व्याख्या—शिष्य ज्ञानवान् सद्गुरु से पूछता है—हे आचार्यदेव ! हम जो शब्द प्रयोग करते हैं—मैं ब्राह्मण, मैं विरक्त-संन्यासी, मैं हिन्दू, मैं मुसलमान, मैं ईसाई, मैं कसाई, मैं जैन इत्यादि—यह सब वस्तुतः क्या है ? हमारे शरीर का निर्माण कर उसमें मन, प्राण, पाँच कर्मेन्द्रिय (वाणी, हाथ, पाँव, पायु और उपस्थ) एवं पाँच ज्ञानेन्द्रिय (कान, त्वचा, आँख, जीभ और नाक) द्वारा किसने जीवन प्रदान किया, क्योंकि यह सब-के-सब तो जड़भूत हैं, स्वतः अपने-अपने कार्य में प्रवृत्त होने में असमर्थ हैं। इन सबको अपना-अपना कार्य करने की योग्यता प्रदान करने वाला और उन्हें अपने-अपने व्यापार में प्रवृत्त करने वाला कोई जरूर एक चेतन, सर्वशक्तिधारी पुरुष होगा। हमारे जीवन में वक्तृत्वशक्ति किसने प्रदान की ? 'न वाचं विज्ञासीत वक्तारं विद्यात्' (कौषीतकोप० ३।२)। वाणी को न (मत) समझो, वक्ता को समझो (चेतन का ज्ञान करो)। इससे यह प्रतीत होता है कि वह वक्ता (चेतन-ईश्वर) हमसे दूर नहीं है। दूसरी बात ईश्वरहीन जीवन शून्य जीवन है अर्थात् मृत है। हे ज्ञानप्रद गुरुवर ! वह ईश्वर कौन है और उसका गुणस्वरूप कैसा है ?॥१॥

'प्रचोदिता येन पुरा सरस्वती वितन्वताऽजस्य सतीं स्मृतिं हृदि।
स्वलक्षणा प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदताम्' ॥
'योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना।
अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान् नमो भगवते पुरुषाय तुभ्यम्' ॥
(श्रीमद्भा. २।४।२२, ४।९।६)

जिन परमात्मा श्रीकृष्ण ने सृष्ट्यादि समय में ब्रह्मा के हृदय में स्मृति जागृत कर, उन्हीं की ही प्रेरणा से शब्दस्वरूप देवभाषा ब्रह्मा के मुख से प्रकट हुई। वे प्रपन्नजनों की रक्षा करने के लिये सतत कटिबद्ध जगद्गुरु भगवान् श्रीकृष्ण मुझ पर प्रसन्न हों।

समस्त शक्तियों को धारण करने वाले जिन सर्वात्मा भगवान् ने मेरे अन्तःकरण में प्रविष्ट होकर अपनी ज्योति से मेरी प्रसुप्त वाग्देवी को जागृत किया और हाथ, पैर, कान, त्वचा आदि अन्यान्य जड़ इन्द्रियों को चेतन किया उन अखिल विश्व-ब्रह्माण्ड-नायक भगवान् श्रीकृष्ण को मैं साष्टाङ्ग दण्डवत् प्रणाम करता हूँ।

श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचꣳ स उ प्राणस्य प्राणः ।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥२॥

तत्त्वप्रकाशिका—एवं पृच्छते शिष्याय गुरुराह—श्रोत्रस्येति । उ भो शिष्य ! मन आदि कारणकलापस्य को देवः स्वविषयं प्रति प्रेरयितेति यत् त्वं पृच्छसि तच्छृणु । श्रोत्रस्य श्रोत्रं स यत् यस्त्वया पृष्टश्चक्षुः श्रोत्रं क उ देवो युनक्तीति ।

शृणोत्यनेन श्रोत्रं शब्दाभिव्यञ्जकमिन्द्रियं तस्य शब्दाभिव्यञ्जकत्वशक्तिप्रदः । मनसो मनः मननःसङ्कल्पादिशक्तिप्रदः । वाचो ह वाचं प्रथमार्थे द्वितीया । वागिन्द्रियस्य शब्दोच्चारणशक्तिप्रदः । प्राणस्य प्राणः प्राणनः सामर्थ्यप्रदः ।

को ह्येवान्यात् कः प्राण्यात् ।
यदेष आकाश आनन्दो न स्यात् ।
ऊद्ध्‌र्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति ।

इति श्रुत्यन्तरात् । येन प्राणः प्रणीयते इति इहापि वक्ष्यते । चक्षुषश्चक्षुः रूपप्रकाशकस्य चक्षुषो रूपप्रकाशनशक्तिप्रद इत्यर्थः । तथा च स इति तच्छब्दोदितः सर्वान्तर्यामितया श्रोत्रादिसर्वनियन्ता पुरुषोत्तमः श्रीवासुदेवः कृष्ण एवेति प्रकरणार्थो विवक्षितः ।

'यः श्रोत्रे तिष्ठन् श्रोत्रादन्तरो यं श्रोत्रं न वेद, यो मनसि तिष्ठन् मनसोऽन्तरो यं मनो न वेद, यो वाचि तिष्ठन् वाचोऽन्तरो यं वाङ् न वेद, यः प्राणे तिष्ठन् प्राणादन्तरो यं प्राणो न वेद, यश्चक्षुषि तिष्ठन् चक्षुषोऽन्तरो यं चक्षुर्न वेद' इत्याद्यन्तर्यामित्वप्रतिपादकश्रुत्यन्तरात् । 'मत्तः सर्वं प्रवर्त्तते' । 'इन्द्रियाणि मनो बुद्धिः' । इत्यादिस्मृतेश्च । एवं ज्ञातुः फलमाह । अतिमुच्येति । धीराः = धीमन्तो भगवतः श्रीकृष्णस्य सर्वनियामकत्वं ज्ञातवन्तः । अस्माल्लोकात् = शरीरात् । प्रेत्य = 'तेऽर्चिषमेवाभिसम्भवन्ति' इत्यादिश्रुत्युक्तरीत्या विरजां प्राप्य, अतिमुच्य = लिङ्गशरीरं विहाय, अमृता भवन्ति = श्रीभगवद्भावमापन्न इत्यर्थः ॥२॥

सान्वयानुवाद—यत् = जो, मनसः = मन का, मनः = मन है, प्राणस्य = प्राण का, प्राणः = प्राण है, वाचः = वाणी का, वाचम् = वाणी है, श्रोत्रस्य = कान का, श्रोत्रम् = कान है, उ = एवं, चक्षुषः = आँख का, चक्षुः = आँख है, सः ह = वे ही इन सबका प्रेरिता परमात्मा है। धीराः = परमात्मपरायण मुमुक्षुजन, अतिमुच्य = स्थूल देह का परित्याग कर, अस्मात् लोकात् = इस मृत्युलोक से, प्रेत्य = विरजा को पाकर, अमृताः भवन्ति = श्रीभगवद्भाव को प्राप्त हो जाते हैं ॥२॥

व्याख्या—इस मन्त्र में शिष्यभाव से पूछे गये प्रश्नों का उत्तर आचार्यश्री देते हैं—वत्स ! जो श्रोत्र का श्रोत्र है, मन का मन है, वाणी का वाणी है, प्राण का प्राण है, नेत्र का नेत्र है; इसका अर्थ है—हे वत्सक ! तुम जो अपने दोनों कानों से बातों को सुनते हो उन कर्णद्वय में सर्वनियन्ता भूमा श्रीकृष्ण ठहरते हैं, उन्हीं की वजह से ही तुम शब्द सुनते हो, तुम्हारी वाणी बोलती है, जीभ हिलती है, साँस चलती है और मन

अर्थानर्थ की भावना करता है। लेकिन उनकी शक्ति इतनी दुर्विज्ञेय है कि वे इन मन, प्राण और दस इन्द्रियों में रहते हुए भी इनसे भिन्न हैं। वे भगवान् श्रीकृष्ण समस्त इन्द्रियों, मन, बुद्धि और प्राण का एवं समस्त जगत् का अभिन्ननिमित्तोपादानकारण हैं। उनसे ये सब उत्पन्न हुए हैं। उन्हीं की लेशमात्र शक्ति को प्राप्त कर ये सब अपना-अपना व्यापार करने में, तत्त्व विचारने में समर्थ हो रहे हैं। इन सबको जानने वाले वे ब्रह्म- शब्दाभिधेय रमापति श्रीकृष्ण इन सबका प्रेरिता हैं।

'अतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति'।

इसका अर्थ है—भगवान् श्रीकृष्ण के माहात्म्यगुणों को जानने वाले विवेकी जन इस मृत्युलोक से प्राकृत लिङ्ग शरीर का परित्याग कर विरजा को प्राप्त होकर श्रीभगवद्भाव को प्राप्त हो जाते हैं।

'बहवो ज्ञानतपसा पूता मद्भावमागताः'। (गीता ४।१०)

'किं वर्णये तव विभो यदुदीरितोऽसुः संस्पन्दते तमनु वाङ् मन इन्द्रियाणि।
स्पन्दन्ति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबन्धुः'॥
(श्रीमद्भा० १२।८।४०)

हे भूमन्! आप देहधारी जीवों के सखा हो, हे सर्वेश्वर! मैं तो सदा आपके अधीन जीव भला आपके अनन्त माहात्म्य-गुणों का वर्णन क्या करूँ? आप मेरे प्राणपति हैं। आपकी ही प्रेरणा से प्रेरित होकर समस्त प्राणियों, ब्रह्मा, शिव तथा मेरे शरीर में प्राण चल रहा है और फिर उसी के कारण वाणी, मन तथा इन्द्रियों में भी बोलने, सोचने, तत्त्व विचारने और करने-जानने की शक्ति आती है। इस प्रकार आप सबके प्रेरक सबके नियन्ता परमात्मा और स्वतन्त्र होने पर भी आप अपना भजन करने वाले भक्तों के प्रेमरूप रस्सी में बँध जाते हैं।

'दृष्ट्वा परिश्रमं कृष्णः कृपयाऽऽसीत् स्वबन्धने'।

भक्तों के परिश्रमरूप प्रेम को देखकर करुणाकर भगवान् श्रीहरि भक्तजनों के हाथों से बँधे जाते हैं॥२॥

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः।
न विद्मो न विजानीमो यथैतदनुशिष्यात्॥३॥

तत्त्वप्रकाशिका—तस्य साकल्येन दुर्ज्ञेयतामाह—न तत्रेति। तत्र = तस्मिन्नन्तर्यामिणि ब्रह्मणि चक्षुर्न गच्छति, तस्यापरिच्छिन्नतया साकल्येन तत्र प्राप्नोति। वाक् = वेदवाणी न गच्छति इयत्तावच्छेदेन प्रतिपादयति। मनोऽपि इयत्तावच्छिन्नतया न निश्चिनोति। इन्द्रियमनोऽगोचरतया वयमपि इदमित्थमितीयत्तावच्छेदेन न विद्मः, अत एव न विजानीमः। यथा = येन प्रकारेण एतद् वस्तु साकल्येन कश्चिदनुशिष्यात् शिष्याय उपदिशेदिति, यद्वा न तत्र चक्षुर्गच्छतीति = तस्यातीन्द्रियत्वमुच्यते। चक्षुरादीनां तत्प्रकाशतया तत्प्रकाशनशक्तिमत्त्वाभावात्। रूपगन्धप्रकाशने रसनश्रवणवत्। सूर्यादिप्रकाशने खद्योतादिवच्च॥३॥

सान्वयानुवाद—तत्र = उस अन्तर्यामी ब्रह्म तक, न = न तो, चक्षुः = चक्षु इन्द्रिय, गच्छति = पहुँच सकती है, न = न तो, वाक् = वागीन्द्रिय, गच्छति = पहुँच सकती है, नो मनः = न मन ही पहुँच सकता है। यथा एतत् अनुशिष्यात् = जिस प्रकार यह वस्तु उपदेश किया जाय वह ऐसा है। न विद्मः = हम नहीं जानते हैं, न विजानीमः = हम नहीं पहचानते हैं ॥३॥ 'नमो गिरां विदूराय मनसश्चेतसामपि'। जो मन, लौकिक-वैदिक (वेद) वाणी एवं चित्तवृत्तियों से भी बिल्कुल दूर हैं हम उन परमात्मा को नमन करते हैं।

व्याख्या—मन सहित दस इन्द्रियाँ सर्वान्तर्यामी परमात्मा तक नहीं पहुँच सकती हैं, क्योंकि वे परमात्मा देश, काल और वस्तु से अपरिच्छिन्न हैं। इसलिये वे इन्द्रिय, मन का विषय नहीं हैं। हम भी इदम्, इत्थम् इस प्रकार इयत्ता से युक्त नहीं जानते हैं, इसलिये हम पहचान भी नहीं सकते हैं। जिस प्रकार बतलाया जाय कि यह वस्तु ऐसी है वह ऐसा है। इसलिये शास्त्र में परमात्मस्वरूप का जैसा गान किया गया है वैसी ही सद्युक्तियों के द्वारा ठीक तरह विचार करके शिष्य को उपदेश करना चाहिये। विरक्तशिरोमणि महाभागवत श्रीशुकदेवजी महाराज राजा परीक्षित से कहते हैं—हे राजन्!

'तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा।
श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान्नृणाम्' ॥

जैसे आदमी मकानों में ठहरते हैं लेकिन मकान उन मकानस्थ आदमी के नजदीक में जाकर उन्हें छू नहीं सकता, क्योंकि मकान ग्यारह इन्द्रियों की भाँति खुद जड़ पदार्थ है और मकान में ठहरने वाले आदमी चेतन होने के कारण मकान को छूने में स्वतः समर्थ हैं। ठीक वैसे ही ये ग्यारह इन्द्रियाँ जड़ पदार्थ हैं अतः वे चेतन के समीप में जाकर स्पर्श करने में समर्थ कदापि नहीं हो सकती हैं।

'देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यञ्च विदुः परं यत्।
सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ॥
तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम्।
अतीन्द्रियं सूक्ष्ममिवातिदूरमनन्तमाद्यं परिपूर्णमीडे' ॥

(श्रीमद्भा० ६।४।२५, ८।३।२१)

शरीर, प्राण, अपान, समान, व्यान और उदान इन पाँच रूपों में विभक्त प्राण, इन्द्रियाँ, अन्तःकरण, मन, बुद्धि, चित्त और अहङ्कार इन पाँच रूपों में विभक्त अन्तः-करण, पाँच महाभूत—आकाश, वायु, अग्नि, जल और पृथिवी, पाँच तन्मात्राएँ—शब्द, स्पर्श, रूप, रस और गन्ध ये सब-के-सब जड़ पदार्थ हैं एवं अपने को, इन्द्रियों को तथा उनके अधिष्ठाता देवतावर्ग को नहीं जानते हैं। किन्तु जीव इन सबको जानता हुआ भी जिन सर्वज्ञ अनन्तस्वरूप परमात्मा को नहीं जानता उन्हीं परमात्मा का मैं स्तवन करता हूँ। जो ब्रह्मादि देवताओं का नियन्ता और भक्तजनों का अभीष्टप्रदाता, जिन अव्यक्तरूपी परमात्मकर्तृक यह सब जगत् परिव्याप्त, जो ज्ञानमिश्रित भक्तियोग

द्वारा प्राप्त होते हैं, जो प्रकृति और जीववर्ग से विलक्षण हैं, जो सबके कारण हैं उन्हीं अविनाशी, अतीन्द्रिय, परब्रह्मस्वरूप, अनन्तस्वरूप, आप्तसमस्तकाम सर्वभिन्नाभिन्नस्वरूप श्रीकृष्ण की मैं स्तुति करता हूँ ॥३॥

अन्यदेव तद्विदितादथो अविदितादधि ।
इति शुश्रुम पूर्वेषां ये नस्तद् व्याचचक्षिरे ॥४॥
यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥५॥
यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥६॥
यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥७॥
यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥८॥
यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥९॥

इति प्रथमः खण्डः ॥१॥

तत्त्वप्रकाशिका—अथ तस्य सर्ववैलक्षण्यं सर्वव्यापकत्वञ्च प्रपञ्चयन् सम्प्रदायं दर्शयति—अन्यदेवेत्यादिना । तच्छ्रोत्रस्य श्रोत्रमित्यादिना प्रक्रान्तवस्तु'विदितात्' परिच्छिन्नविषयात् कार्यादाकाशादेरन्यदेव विलक्षणम् अपरिच्छिन्नत्वात् । ननु जीवस्यापि कैश्चिद् विभुत्वाङ्गीकारात् सिद्धान्तेऽपि जडवर्गाद् वैलक्षण्यस्य ज्ञानधर्मेण विभुत्वस्य च स्वीकाराज्जीव एवास्तामिति चेत्तत्राह—

अथो अविदितादिति । अविदितात् = अतीन्द्रियात् क्षेत्रज्ञाद्, अधि = अधिकमित्यर्थः । यद्वा अविदितात् = कारणात् प्रधानमहदादिवर्गादधिकमिति । यद्वा विदितात् = लौकिकाद् बद्धजीवाद् अन्यत् भिन्नम् । अविदितात् = मुक्तादप्यधिकं तयोर्नियामकत्वात् । इति शुश्रुम इत्येवं श्रुतवन्तो वयं पूर्वेषां गुरूणां वचनं ये नः = अस्मभ्यं तद्वस्तु व्याचचक्षिरे उपदिष्टवन्तस्तेषामित्यर्थः ॥४॥

यद्वस्तु वाचा = वेदलक्षणयाऽनभ्युदितप्रायं कार्त्स्न्येनागोचरत्वात् । येन च नियन्त्रा प्रेरिता वाक् अभ्युद्यते प्राणिभिरुच्चार्यते । तदेव ब्रह्म विद्धि यद्वाचा साकल्येनाप्रतिपाद्यं यच्च वाक्प्रेरकं यत्तदेव स्वरूपगुणशक्त्यादिभिर्बृहत्तमं वस्तु ब्रह्मेति जानीहि । यदिदमिदङ्कारास्पदं जडचेतनात्मकं कामिन उपासते तद् ब्रह्म न भवति । इदङ्कारास्पदप्रपञ्चविजातीयं ब्रह्म विद्धि इत्यर्थः ॥५॥

यद्वस्तु मनसा कश्चिदियत्तावच्छेदेन न मनुते न जानाति । येन चान्तर्यामिणा मनो मतं व्याप्तमाहुः = कथयन्ति तज्ज्ञाः, तदेव मनोगोचरं तद्व्यापकञ्च ब्रह्म त्वं विद्धि नेदमित्यादि पूर्ववत् ॥६॥

यद् ब्रह्म चक्षुषा प्राकृतेन कश्चिन्न पश्यति। येन चान्तर्यामिणा व्याप्तानि चक्षूंषि पश्यन्ति जानन्ति। ब्रह्मज्ञाः पश्यन्ति इति पाठे दृश्यन्तीत्यर्थः। 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति श्रुत्यन्तरात्। तदेव चक्षुरगोचरं तद्व्यापकञ्च ब्रह्म त्वं विद्धि नेत्यादि समानम्॥७॥

यद्वस्तु श्रोत्रेण 'मेधया न बहुना श्रुतेन' इत्यादि श्रुत्यन्तरात्। येन च श्रोत्रमिदं श्रुतं व्याप्तं तदेवेत्याद्युक्तार्थकं यद्वा यद्ब्रह्मकर्तृमनसा न मनुते न तस्य मनोऽधीनं मननं, चक्षुषा न पश्यति न चक्षुरधीनं रूपज्ञानं, श्रोत्रेण न शृणोति = श्रोत्रानधीनशब्दज्ञानकं तदित्यर्थः। अप्राणो ह्यमना अनिन्द्रियोऽपि सर्वतः पश्यति, सर्वतः शृणोति इत्यादि श्रुत्यन्तरात्। शिष्टं समानम्॥८॥

यद्वस्तु प्राणेन न प्राणति न चेष्टते प्राणानधीनस्थितिः। कश्चिन्न शृणोति—तत्कृपां विना न लभते, शृण्वतोऽपि यं न विदुः। नायमात्मा प्रवचनेन लभ्य इति येन प्राणः प्रणीयते स्वविषयं प्रति प्राप्यते। तदेव ब्रह्म त्वं विद्धि शिष्टं समानम्।

इति प्रथमः खण्डः॥१॥

सान्वयानुवाद—तद् = वह, विदितात् = मालूम हुयी वस्तुओं से, अन्यत् एव = अलग ही है, अथो = और, अविदितात् = जो हमें मालूम नहीं हैं उनसे परे है, अधि = सबके ऊपर में है (अखिल ब्रह्माण्डनायक है), इति = इस तरह, पूर्वेषाम् = पूर्वाचार्यों के मुख से, शुश्रुम = हम सुनते आये हैं। ये = जिन्होंने, नः = हमें, तत् = तत्त्वत्रय का, व्याचचक्षिरे = विवेचन करके समझाया था॥४॥

यत् = जो, वाचा = वाणी से, अनभ्युदितम् = नहीं कहा जा सकता है, येन = जिससे, वाक् = वाणी, अभ्युद्यते = बोली जाती है, अर्थात् सर्वनियन्ता परमात्मा से प्रेरित होकर (वाग्देवी) वाणी प्राणियों द्वारा उच्चारित होती है। तत् एव = उसी को ही, त्वम् = तुम, ब्रह्म विद्धि = ब्रह्म जानो, इदं यत् = वाणी के द्वारा बताने लायक, जड़ = जीव, उपासते = कामी पुरुष जिनकी उपासना करते हैं, न = वह ब्रह्म नहीं है, इदम् = इदङ्कारास्पद प्रपञ्च से बिल्कुल अलग, स्वरूप-गुणादि से बृहत्तम वस्तु को ही ब्रह्म समझो। वही ब्रह्म शब्द से सम्बोधित किये जाते हैं॥५॥

यत् = जिसको, (कोई भी) मनसा = मन से, न = नहीं, मनुते = जान सकता, येन = जिससे, मनः = मन, मतम् = व्याप्त है, आहुः = ऐसा ब्रह्मज्ञानी जन कहते हैं, तत् त्वम् ब्रह्म विद्धि = उसी को तुम ब्रह्म जानो, (तत्) एव = वही मन का विषय है। इदम् यत् उपासते इदम् न = गृहमेधी, कामी, शिश्नोदरतर्पिता पुरुष जिनकी उपासना करते हैं वह ब्रह्म नहीं है॥६॥

यत् = जिसको, (कोई भी) चक्षुषा = आँखों से, न = नहीं, पश्यति = देख सकता, येन = जिससे, चक्षूंषि = आँखों को अर्थात् घट, पट, मठ, चट इत्यादि विषयों को, पश्यति = देखता है, त्वं तत् एव ब्रह्म विद्धि, इदम् यत् उपासते इदम् न॥७॥

यत् = जिसको, (कोई भी) श्रोत्रेण = कानों से, न = नहीं, शृणोति = सुन सकता, येन = जिससे, इदम् श्रोत्रम् = यह कान, श्रुतम् = सुनी हुई है, तत् एव ब्रह्म त्वं विद्धि इदम् यत् उपासते इदम् न ॥८।

यत् = जो, प्राणेन = प्राण के द्वारा, न प्राणिति = चेष्टायुक्त नहीं होता, येन = जिससे, प्राणः = प्राण, प्रणीयते = चेष्टा युक्त होता है, तत् एवं त्वम् ब्रह्म विद्धि इदम् यत् उपासते इदम् न ॥९॥

व्याख्या—अब उसी परब्रह्म को प्रश्नों के अनुसार इन मन्त्रों (५-९) द्वारा समझाते हैं—

'यद्वाचो ह वाचम्' इसका परमात्मदृष्टि से परिष्कार करते हैं—वेदलक्षणा वाणी से भी जिस वस्तु को कहा नहीं जा सकता है, उन्हीं की वजह से ही देहधारी जीवों की वाणी बोलती है। उसी को तुम ब्रह्म जानो। परमात्माधीन जो जीववर्ग है वह ब्रह्म नहीं है। कामी पुरुष इदङ्कारास्पद जड़-चेतन की उपासना करते हैं वह ब्रह्म नहीं है। शास्त्रों में परब्रह्म का स्वरूप इस प्रकार वर्णित है—

'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' ॥
(श्वेताश्वतरोपनिषद् ६।८)

'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते'।
'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' ॥
'अहमात्मा गुडाकेश सर्वभूताशयस्थितः'।
(श्रीमद्भगवद्गीता १०।८,७।६,१०।२०)

'भूतेन्द्रियान्तःकरणात्प्रधानाज्जीवसंज्ञितात्।
आत्मा तथा पृथग् द्रष्टा भगवान् ब्रह्मसंज्ञितः' ॥
'आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः।
अविक्रियःस्वदृग्हेतुर्व्यापकोऽसङ्गयनावृतः ॥
एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः।
अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत्' ॥
(श्रीमद्भागवत ३।२८।४१,७।७।१९-२०)

उस (परब्रह्म) के कार्य (प्राकृत शरीर) और करण (प्राकृत इन्द्रियाँ) नहीं हैं, उसके समान या उससे बड़ा दूसरा कोई भी श्रुति-स्मृति में नहीं दिखलायी पड़ता। इस परब्रह्म की स्वाभाविकी शक्ति, स्वाभाविक ज्ञान, स्वाभाविक बल और स्वाभाविकी क्रिया बहुविध ही सुनी जाती है। परा शक्तिः = अघटनघटनापटीयस्त्वरूपा कर्त्तुमकर्त्तुमन्यथाकर्त्तुं सर्वसमर्थरूपा परमात्मा की परा शक्ति है।

हे गुडाकेश! मैं समस्त जगत् की उत्पत्ति का कारण और मुझसे ही समस्त जगत्स्थ प्राणी चेष्टायुक्त होता है। मैं सम्पूर्ण जगत् की उत्पत्ति एवं प्रलय का कारण हूँ।

सब प्राणियों की हृदयस्थित आत्मा मैं ही हूँ। मैं इनसे बिल्कुल अलग भी हूँ क्योंकि मेरा स्वरूप स्वाभाविक भिन्नाभिन्न है। इसका वर्णन भगवान् कपिलदेव करते हैं—भूत, इन्द्रिय, अन्तःकरण, प्रकृति, जीव इन सबसे द्रष्टा आत्मा भगवान् भिन्न है जिसका नाम ब्रह्म है। नित्य, अव्यय, शुद्ध, एक, क्षेत्रज्ञ, आश्रय, अविक्रिय, स्वयंप्रकाश, (जगदुत्पत्ति का) कारण, व्यापक, असङ्ग और अनावृत—इन बारह लक्षणों से उपलक्षित आत्मा का लक्षण कहा गया है। विवेकी जन नाशवान् देहादि में अहन्ता, ममतारूपी झूठे व्यामोह को छोड़ दें। आत्मा का श्रवण, मनन और निदिध्यासन करें वही ब्रह्म है॥

प्रथम खण्ड समाप्त॥१॥

•

अथ द्वितीयः खण्डः।

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम्।
यदस्य त्वं यदस्य च देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम्॥१॥
नाहं मन्ये सुवेदेति नो न वेदेति वेद च।
यो नस्तद् वेद तद् वेद नो न वेदेति वेद च॥२॥

तत्त्वप्रकाशिका—एवं शिष्येण पृष्टो गुरुः सर्वान्तर्यामितया मनःप्रभृतिप्रवर्त्तकं 'श्रीकृष्णाख्यं परं ब्रह्म' इत्युक्त्वा तस्येयत्तावच्छेदेन ज्ञानाविषयत्वादिकं प्रदर्श्य तमेव स्वार्थाभिप्रेतं शिष्यबुद्धिदार्ढ्यार्थं प्रकटयति—यदीति। यदि मन्यसे सुवेदेति सुष्ठु साकल्येनाहं ब्रह्म वेद जानामीति तर्हि दहरमल्पमेवापि नूनं त्वं ब्रह्मणो रूपञ्चेत्येतत् स्वरूपगुणादेरनन्तत्वात् रूपशब्दो गुणोपलक्षकः। यतो दहरमेव त्वं वेत्थ अथ तस्मात् यत् अस्य ब्रह्मणः त्वं त्वयि रूपं व्यत्ययश्छान्दसः। यत् अस्य देवेषु च रूपं तदपि ते त्वया उ भो शिष्य! मीमांस्यं विचार्यमेवाद्यापि। एवमाचार्योक्तः शिष्यस्तद्वचनेन सम्यक् विचार्याह—मन्येऽहं विदितमेव मया ब्रह्मेति॥१॥

कथं विदितं तत्राह—नाहमिति। अहं सुवेद ब्रह्मेति न मन्ये नोऽपि न वेदेति मन्ये। अपि तु वेद च जानाम्येव ब्रह्मेति। ततश्चेयत्तावच्छेदेन तस्य ज्ञानविषयत्वं नास्ति। कियद् धर्मावच्छिन्नतया तु ज्ञानविषयत्वमस्त्येवेत्यभिप्रायः।

उपसंहरति—यो न इति। यः कश्चनास्माकं सब्रह्मचारिणां मध्ये तत् ब्रह्म साकल्येनाहं वेदेति वक्ति स तत् ब्रह्म नो वेद न जानाति परिच्छिन्नदर्शित्वात्। यस्तु अहं न वेदेति वक्ति स वेद च अपरिच्छिन्नब्रह्मदर्शित्वात्॥२॥

सान्वयानुवाद—यदि = अगर, त्वम् = तुम, इति = यह, मन्यसे = मानते हो, सुवेद = मैं परब्रह्म को भलीभाँति जान गया हूँ, अपि = तो, नूनम् = निश्चय ही, ब्रह्मणः = ब्रह्म का, रूपम् = रूप, दभ्रम् = थोड़ा-सा, एव = ही, वेत्थ = जानते हो, अस्य = इस परब्रह्मस्वरूप श्रीकृष्ण का, यत् = जो (रूप), त्वम् = तुममें और, अस्य

यत् = इसका जो रूप, देवेषु = देवताओं में है, अथ नु मन्ये = इसलिये मैं मानता हूँ कि, ते विदितिम् मीमांस्यम् एव = तुम्हारा जाना हुआ पूजित विचारणीय है ॥१॥

अहम् = मैं, सुवेद = ब्रह्म को ठीक-ठीक जान गया हूँ, इति न मन्ये = यह मैं नहीं मानता, नो इति न वेद = और न यही मानता हूँ कि मैं उसे नहीं जानता, वेद च = अपि तु ब्रह्म को जानता ही हूँ। यः = जो कोई, नः = हम ब्रह्मचारियों के बीच में, तत् = उस परब्रह्म को, वेद = जानता है, मैं ब्रह्म को जानता हूँ ऐसा कहता है, सः तत् ब्रह्म नो वेद = वह उस ब्रह्म को नहीं जानता। इसलिये जो यह कहता है कि अहं ब्रह्म न वेद स एव ब्रह्म वेद = मैं उस ब्रह्म को नहीं जानता, ऐसा कहने वाला ब्रह्मचारी शिष्य ही उस परब्रह्म को जानता है ॥२॥

व्याख्या—इस प्रकार शिष्य द्वारा पूछा गया गुरु सर्वान्तर्यामी रूप से मनः प्रभृति प्रवर्त्तक 'श्रीकृष्णाख्य परब्रह्म' यह कह कर, परब्रह्मस्वरूप श्रीकृष्ण का 'इयत्तावच्छेदेन ज्ञानागोचरत्वादि' प्रदर्शित करके उसी स्वार्थाभिप्रेत को शिष्य की बुद्धि को दृढ़ करने के लिये गूढ़ तत्त्व प्रकट करते हैं। 'ब्रह्मणो रूपम्' इसका अर्थ है 'श्रीकृष्णस्य रूपम्'। 'त्वयि देवेषु च, तदपि त्वया भो शिष्य ! विचारणीयम्' = श्रीकृष्ण का रूप तुममें और देवताओं में वह भी तेरे लिए विचारणीय है।

'न यस्य साक्षाद् भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम्।
मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः' ॥

(श्रीमद्भा. ७।१५।७७)

साक्षात् ब्रह्मा, शिवादि अपनी स्थिर बुद्धि से जिन परब्रह्मस्वरूप श्रीकृष्ण के रूप का वर्णन नहीं कर सके, वे श्रीकृष्ण हमारे मौन, भक्ति और उपशम से पूजित प्रपन्न जनों के परिपालक हम पर प्रसन्न हों।

'न यस्य देवा ऋषयः पदं विदुर्जन्तुः पुनः कोऽर्हति गन्तुमीरितुम्।
यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स मावतु' ॥

(श्रीमद्भा. ८।३।६)

जिनके पद (रूप) को देवगण तथा ऋषिगण नहीं जान-पहचान सके फिर दूसरा ऐसा कौन सामाजिक, आधुनिक जन = जीव जान सकता अथवा वर्णन कर सकता है ? अर्थात् उनके रूप को कोई भी वर्णन नहीं कर सकता है। जो नाना नाम-रूप भेदों से नट की भाँति वेष धारण करते हैं, जिस तरह अलग-अलग रूपों में नाट्य करने वाले अभिनेता के असली रूप को देखने वाले आदमी पहचान नहीं पाते हैं; वे दुर्विज्ञेय चरित्र वाले भूमा परमात्मा श्रीकृष्ण हमारी रक्षा करें।

'न मे विदुः सुरगणाः प्रभवं न महर्षयः।
अहमादिर्हि देवानां महर्षीणाञ्च सर्वशः' ॥ (गीता १०।२)

मेरी उत्पत्ति (सम्यक् रूप) को देवगण और महर्षिजन नहीं जानते हैं। क्योंकि मैं देवताओं तथा महर्षियों का भी हर तरह से आदि कारण हूँ ॥१-२॥

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥३॥
प्रतिबोध विदितं मतममृतत्वं हि विन्दते ।
आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥४॥

तत्त्वप्रकाशिका—शिष्याचार्यसंवादनिर्वृत्तमर्थं श्रुतिः स्वयं बोधयति—यस्येति। यस्य पुंसो देशादिपरिच्छेदेन ब्रह्म न मतम् = अविज्ञातं, तस्य मतं = ज्ञातं भवति। यस्य तु परिच्छेदेन मतं स न वेद = न जानाति। तदेव द्रढयति—अविज्ञातमिति। विजानतां = परिच्छिन्नज्ञानवतामविज्ञातं ब्रह्मेति। परिच्छेदमविजानतां विज्ञातं = साक्षात्कृतं भवति ब्रह्मेत्यर्थः ॥३॥

ननु परब्रह्मणोऽपरिच्छन्नतयेयत्तावच्छेदेन ज्ञेयत्वाभावे कथं तेनेष्टसिद्धिरित्यतो गुरुमुखनिर्गतवाक्यश्रवणादिपरम्पराप्राप्तध्रुवाख्यस्मृत्या कियद्धर्मावच्छिन्नतया ज्ञातस्यापि तस्य तदनुग्रहसहकृततत्साक्षात्कारात् मोक्षः, इत्याह गुरुः प्रतिबोधेति—येन पुंसा ब्रह्म मतं गुरुमुखात् श्रवणपूर्वकमननविषयीकृतं प्रतिबोधेन = निदिध्यासनपरिपाकध्रुवास्मृत्याऽयं परोक्षज्ञानेन विदितं = साक्षात्कृतं, स पुमान् अमृतं = ब्रह्म तद्भावरूपां मुक्तिं हि विन्दते = प्राप्नोति। यद्वा—प्रतिबोधो गुरूपदेश उपासनात्मकस्तेन यस्य—

'गोपवेषमभ्राभं तरुणं कल्पद्रुमाश्रितम्।
सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम्।
द्विभुजं ज्ञानमुद्राढ्यं वनमानिलमीश्वरम्' ॥

इत्यादि श्रुत्युक्तं परंब्रह्म विदितं ज्ञानविषयीभूतं भवति। तेनैव तत् सम्यग् ज्ञातं, स एव तदनुग्रहसहकृतं साक्षात्कारेणामृतत्वं विन्दते। कदा एतत् स्याद् इत्यत आह—आत्मनेति। आत्मना तेनैवान्तर्यामिणा वीर्यं बलं स्वप्राप्तिसाधनसामर्थ्यं यदा विन्दते तदा विद्यया = परमात्मोपासनया, अमृतम् = परमात्मानम्, विन्दते = लभते। 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यः' इत्यादि श्रुत्यन्तरात् ॥४॥

सान्वयानुवाद—यस्य अमतम् = जिस पुरुष का देश, काल और वस्तु सीमा से ब्रह्म जानने में नहीं आता, तस्य मतम् = उसी पुरुष को ब्रह्म ज्ञात होता है। यस्य मतम् सः न वेद = जिस पुरुष को ब्रह्म सीमा से मालूम है वह पुरुष ब्रह्म को नहीं जानता है। विजानताम् अविज्ञातम् = सीमित ज्ञानवान् पुरुषों के लिये ब्रह्म अविदित है। अविजानतां विज्ञातम् = वह परब्रह्म अनन्यशरण भक्तिमान् सत्पुरुषों के लिये दृष्टिगोचर होता है ॥३॥

प्रतिबोधविदितम् = सद्गुरु से ज्ञानलाभ कर, मतम् = परब्रह्म को जाना, आत्मना = अन्तर्यामी श्रीकृष्ण से, वीर्यम् = तत्प्राप्तिसाधन-सामर्थ्य, विन्दते = जब प्राप्त करता है, विद्यया = तब भगवदुपासना से, अमृतम् = परमात्मा श्रीकृष्ण को, विन्दते = प्राप्त हो जाता है ॥४॥

व्याख्या—अब भगवती श्रुति स्वयं गुरु-शिष्य संवाद के सम्पन्न अर्थ को बतलाती हैं—जो कहता है कि मैंने ब्रह्म को जान लिया है, वह परमात्मा के अनन्त कल्याण गुण, अनन्त महिमा, जिनकी महिमा का वेद, उपनिषत्, पाञ्चरात्रादि गान करते हैं; जिनकी असीम महिमा की कोई सीमा नहीं है वह ससीम जीव असीम परमात्मा को कैसे जान सकता है ? इसलिये जो यह समझता है कि मैंने परब्रह्म को पहचान लिया है, मैं ज्ञानवान् (ज्ञानी) हूँ, परमात्मा मेरे ज्ञेय हैं—वह वस्तुतः सर्वथा भ्रम में पड़ा है। क्योंकि वह परब्रह्म ज्ञान का विषय नहीं अपितु ध्यान का विषय है। इसलिये इस तरह के जानने वालों के लिये परमात्मा सदा अज्ञात है। परमात्मा का दर्शन उन्हीं प्रपन्न महापुरुषों को होता है जिनमें सकल प्राणियों के प्रति दया-कृपा है एवं जानने का अभिमान थोड़ा-सा भी नहीं रह गया है ॥३॥

उपर्युक्त वर्णन में परमात्मा के जिस स्वरूप को लक्ष्य कराया गया है उसको शास्त्र दृष्टि से ठीक तरह विचार करके चिन्तन करना ध्यान, ज्ञान, पराभक्ति, ध्रुवास्मृति पर्यायभूत ज्ञान शब्द से शास्त्र में कहा गया है। इन साधनों से परमात्मा श्रीकृष्ण का साक्षात् दर्शन लाभ होता है। उन्हीं से उनकी प्राप्ति का ध्यानादि साधन-सामर्थ्य जब मिलता है तब जीव उनकी उपासना से उन परमात्मा श्रीकृष्ण को प्राप्त होता है।

प्रतिबोधविदितं मतम्—

'योऽस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो
यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ताः।
यं सम्पद्य जहात्यजामनुशयी सुप्तः कुलायं यथा
तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम्' ॥

(श्रीमद्भा. १०।८७।५१)

जो इस विश्व के सृष्टि, स्थिति और लय को निरीक्षणमात्र अर्थात् संकल्प मात्र से करने वाले हैं एवं जो प्रकृति जीव के नियन्ता हैं, जिन्होंने इस विश्व की रचना कर पुनः अन्तर्यामी रूप से इसमें प्रविष्ट होकर ब्रह्मा के द्वारा समस्त जीवों का निर्माण किया और स्वयं उनके भीतर प्रविष्ट होकर शासन करते हैं अर्थात् तत्-तत् कर्मों में नियुक्त करते हैं, जिनको प्राप्त होकर यह बद्ध जीव कर्माख्य अविद्या को त्याग देता है; जैसे सोया हुआ प्राणी अपने देहाभिमान को छोड़ देता है। जीव, प्रधान प्रकृति, काल-कर्मादि नियन्ता, ब्रह्म-शिवादि वन्दित पादपीठ, स्वभावतः अपास्त समस्त दोष सार्वज्ञ्यादि अनन्त कल्याण-गुणनिलय, मुमुक्षु, जिज्ञास्य, मुक्त प्राप्य, इस विश्व का अभिन्न निमित्तोपादानकारण, ब्रह्मशब्दाभिधेय तथा सर्वभिन्नाभिन्नस्वरूप श्रीकृष्ण का ही निरन्तर ध्यान करना चाहिये ॥४॥

इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः।
भूतेषु भूतेषु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥५॥

इति द्वितीयः खण्डः ॥२॥

तत्त्वप्रकाशिका—एवं ध्रुवास्मृतिर्ब्रह्मसाक्षात्कारफलेत्युक्तं सा च मनुष्यदेहे एव सम्पाद्य इत्याह—इहेति। इह मनुष्यदेहे यदि परमात्मानम् अवेदीत् = विदितवान्। अथ = तदा सत्यफलं ब्रह्म प्राप्तिरस्ति तेन ब्रह्म लभ्यत एव। इह यदि नावदीत् तर्हि महती विनष्टिः = जन्मजरामरणादिप्रवाहाविच्छेदलक्षणा संसारगतिर्भवति। अतो धीराः = गुणदोषविवेकिनः, भूतेषु = स्थावरजङ्गमेषु सर्वभूतेषु, अन्तर्यामितया स्थितं परमात्मानं विचिन्त्य = विशेषेण देहान्ते ध्यात्वा, अस्माल्लोकात् शरीरात् प्रेत्य अमृता = मुक्ता भवन्तीत्यर्थः ॥५॥

सान्वयानुवाद—चेत् = यदि, इह = इस मनुष्य शरीर में, (परमात्मा वासुदेव को) अवेदीत् = जान लिया, अथ सत्यम् = तब तो यह जीवन सत्य है, सफल है, अस्ति, चेत् = यदि, इह = इस मानव देह में, न अवेदीत् = वासुदेव को नहीं जाना तो, महती विनष्टिः = यह जीवन निष्फल हो गया, महान् विनाश हो गया, धीराः = गुण-दोषविचारक सुधीजन, भूतेषु भूतेषु = सम्पूर्ण चराचर भूतों में, अन्तर्यामिरूप से स्थित परमात्मा वासुदेव को, विचिन्त्य = विशेषरूप से देहान्त में ध्यान करके, अस्मात् लोकात् प्रेत्य अमृताः भवन्ति = इस स्थूल शरीर से छूटकर श्रीभगवद्भाव को प्राप्त होते हैं ॥५॥

व्याख्या—यह मानव-शरीर अत्यन्त दुर्लभ है, इसे पाकर जो मनुष्य आत्मतत्त्व को पहचान लेता है उसके मानव-जन्म की परम सार्थकता है। यदि आत्मतत्त्व को पहचानने के लिये मनुष्य ने कुछ किया तो उसका बहुत बड़ा नुकसान हो गया, उसका महान् विनाश ही समझना चाहिये। बार-बार जन्म-मृत्युरूप संसार के प्रवाह में अविच्छिन्न गङ्गाधारादिवत् बहना पड़ेगा।

पहले खण्ड में यह कहा गया है—पञ्चमहाभूत, पञ्चतन्मात्राएँ, पञ्चप्राण, एकादश इन्द्रियाँ, मन, प्रकृति, जीव—इन सब चीजों से परमात्मा वासुदेव विजातीय है; बिल्कुल अलग है। इस प्रकार भेद को बतलाकर इस समय अभेद का निर्वचन करके प्रकरण का उपसंहार करते हैं—

भूतेषु भूतेषु विचिन्त्य धीराः।
'त्वं वायुरग्निरवनिर्वियदम्बुमात्राः प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च।
सर्वं त्वमेव सगुणो विगुणश्च भूमन् नान्यत् त्वदस्त्यपि मनोवचसा निरुक्तम्' ॥
(श्रीमद्भा. ७।९।४८)

हे भूमन्! आप वायु, अग्नि, पृथिवी, आकाश, जल, शब्द, स्पर्श, रूप, रस, गन्ध, प्राण, अपान, व्यान, उदान, समान, चक्षु, श्रोत्र, घ्राण, रसना, त्वक्, वाक्, पाणि, पाद, पायु, उपस्थ, मन, चित्त, अहङ्कार, यह सम्पूर्ण जगत् और सभी वस्तुएँ 'त्वमेव भगवन्'! अर्थात् आपसे अलग (भिन्न) नहीं हैं। इसलिये हे प्रभो! आपका स्वरूप स्वाभाविक भिन्नाभिन्न है। जो विवेकी जन इस प्रकार आत्मतत्त्व को समझते हैं वे समस्त दुःखों से निवृत्त होकर सदा के लिये जन्म-जरा-मृत्यु के चक्र से छूटकर अमर (मुक्त) हो जाते हैं।

'तरति शोकमात्मवित्' ।
'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' ।
'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्' ।
'तत्त्वमसि' ।

द्वितीय खण्ड समाप्त ॥२॥

•

॥ अथ तृतीयः खण्डः ॥

ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त ।
त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति ॥१॥
तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न
व्यजानन्त किमिदं यक्षमिति ॥२॥
तेऽग्निमब्रुवन् जातवेद एतद्विजानीहि
किमेतद्यक्षमिति तथेति ॥३॥
तदभ्यद्रवत्तमभ्यवदत् कोऽसीत्यग्निर्वा
अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ॥४॥
तस्मिंस्त्वयि किं वीर्यमित्यपीद ँ सर्वं दहेयम् ।
यदिदं पृथिव्यामिति ॥५॥
तस्मै तृणं निदधावेतद् दहेति तदुपप्रेयाय
सर्वजवेन तन्न शशाक दग्धुं स तत
एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥६॥

तत्त्वप्रकाशिका—परब्रह्मणः सर्वप्रशास्तृत्वं सर्वपरत्वमीश्वरेश्वरत्वं सर्वजयपराजय-हेतुत्वञ्च दर्शयन् इयत्तावच्छेदेन ज्ञानाविषयं ब्रह्मेत्युक्तार्थे आख्यायिकामारभते—ब्रह्म हेत्यादिना । देवासुरसंग्रामे उपस्थिते ब्रह्म ह किल देवेभ्यो देवानामर्थे विजिग्ये विजयं प्राप । दे-वानाविश्य जगद्विद्विषः स्वसेतुभेदकान् असुरान् जित्वा देवेभ्यो जयं प्रायच्छत् । अथ जयानन्तरं तस्य ह स्वाविष्टस्य ब्रह्मणो विजये सति देवादयः अमहीयन्त । 'महीङ् पूजायाम्' कण्ड्वादिः । पूज्या वयमिति गर्विता अभवन् । गर्वं दर्शयति—त इति । अस्मदन्तर्यामिणः सर्वकर्मफलदातुः सर्वशक्तेर्ब्रह्मणो नायं जयो महिमा चेत्यस्माकमेवायं महिमेति ऐक्षन्त अमन्यन्त ॥१॥

तद्ध स्वान्तर्यामीश्वरकृतासुरविजयाज्ञाननिमित्तं गर्वादि । एषां देवानामाशयः, विजज्ञौ = विज्ञातवान् । तेभ्यः = देवेभ्यः । तान् स्वात्मतत्त्वं बोधयितुं ह स्फुटं यक्षरूपेण प्रादुर्बभूव ब्रह्मेति । तत्प्रादुर्भूतं यक्षरूपं ब्रह्म देवा न व्यजानन्त = न विज्ञातवन्तः । इदं यक्षं पूज्यं महद्भूतं किमिति ॥२॥

ते चान्तर्भया देवा अस्मदग्रे सरोऽयं सर्वज्ञकल्प एतज्जानीयादित्यभिप्रायेण

तथाऽस्त्वित्युक्त्वाऽग्निस्तद्यक्षमभ्यद्रवत् अभिमुखमगमत् प्रष्टुमिच्छन् तूष्णीं भूत्वा स्वसमीपे स्थितमग्निं कोऽसीत्यभ्यवदत् यक्षः। एवं पृष्टोऽग्निरब्रवीत्। अग्निरिति जातवेदा इति च नामद्वयेन प्रसिद्धोऽहमस्मीति ॥३-४॥

तस्मै एवं गर्ववतेऽग्नये एतत् तृणं ममाग्रे दह, इत्युक्त्वा अग्नेः पुरतः निदधौ स्थापितवदित्यर्थः। तत् तृणं दग्धुं न शशाक आहतप्रतिज्ञः तत एव यक्षात् यक्षरूपमज्ञात्वा निववृते देवान् प्रति गतवान्। न एतत् यक्षम् अशकं शक्तवान् अहं विशेषेण ज्ञातुं यद् एतद् यक्षमिति देवान् प्रति गत्वाऽब्रवीदिति शेषः ॥६॥

(मन्त्र का अन्वय सरल होने से प्रतिपद अर्थ यहाँ नहीं दिया गया है, व्याख्या में स्पष्ट है।)

व्याख्या—परब्रह्म सर्वशासक श्रीकृष्ण ने देवताओं पर अनुग्रह करने के लिये ही यक्ष का रूप ग्रहण किया था। यह देवासुर संग्राम की कथा श्रीमद्भागवत में है परन्तु यह कथा वहाँ अन्य ढंग से है। दोनों कथाओं का तात्पर्य एक है।

'हरिस्मृतिः सर्वविपद्विमोक्षणम्'।

सचमुच भगवान् का स्मरण समस्त विपत्तियों से छुटकारा देता है।

'तत्र देवासुरो नाम रणः परमदारुणः।
रोधस्युदन्वतो राजंस्तुमुलो रोमहर्षणः'॥ (श्रीमद्भा. ८।१०।५)

हे राजन्! समुद्र के तट पर देवता और दैत्यों का बड़ा रोमहर्षक संग्राम हुआ। जो देवासुर-संग्राम के नाम से जाना जाता है। देवासुर संग्राम उपस्थित होने पर भगवान् ने देवताओं को विजय दिला दी। सदा जीवों की हिंसा करने वाले एवं भागवत धर्म की मर्यादा को भङ्ग करने वाले असुरों को जीतकर देवताओं के अन्दर घुसकर परमात्मा श्रीकृष्ण ने देवों को विजय प्राप्त करा दी। क्योंकि जीवों की सफलता तो भगवान् श्रीहरि के सहारे से ही प्राप्त होती है। यद्यपि देवता और दैत्य-दानव दोनों समान रूप से एक ही विजय कर्म में लगे रहे, तथापि भगवान् से विमुख होने के कारण दैत्यों-दानवों को विजयरूप सफलता नहीं मिली। देवताओं को इस प्रकार बड़ी भारी विजय दिलाकर भगवान् ने पुनः अपना रूप धारण कर लिया—'स्वं रूपं जगृहे हरिः'। यह विजय वस्तुतः श्रीभगवान् की ही थी, देवतालोग तो केवल निमित्तमात्र थे। 'निमित्तमात्रं भव सव्यसाचिन्'।

'यत्र योगेश्वरः कृष्णः'—जहाँ योगेश्वर भगवान् श्रीकृष्ण हैं, वहीं विजय है। देवताओं को बड़ी भारी सफलता मिलने के बाद वे अभिमान युक्त होकर आपस में कहने लगें—हम सब-के-सब पूज्य हुए। उनके गर्व को दिखलाती है—'त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति'। वे देवता लोग समझने लगे कि यह हमारी ही विजय है और यह हमारी ही महिमा है। हमारे अन्तर्यामी, समस्त कर्मों के फलदाता, सर्वशक्तिमान् ब्रह्म की यह विजय और यह महिमा नहीं है ॥१॥

तत् ह = लोक-वेद प्रसिद्ध परब्रह्म ने, एषाम् = इन देवों के (अभिप्राय को), विजज्ञौ = जान लिया, तेभ्यः ह = उन देवताओं के सामने, प्रादुर्बभूव = स्वात्मतत्त्व का

ज्ञान कराने के लिये यक्षरूप से परब्रह्म श्रीकृष्ण हो गये। तत् इदं यक्षं किम् इति न व्यजानत = प्रकट हुए यक्षरूपी परब्रह्मस्वरूप श्रीकृष्ण को देवता लोग पहचान नहीं सके कि यह यक्ष पूजनीय महान् भूत कौन है ॥२॥

'भवभयमपहन्तुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृङ्गवद् वेदसारम्।
अमृतमुदधितश्चापाययद् भृत्यवर्गान् पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोऽस्मि' ॥
(श्रीमद्भा. ११।२९।४९)

जिन्होंने जन्म, जरा और मरण भय की निवृत्ति के लिये समुद्र से अमृत को निकालकर देवताओं को पिलाया था। उसमें जो वेदसार और ज्ञान-विज्ञानसार है वह भवभय को दूर करने वाला भेषज है। वह भी भ्रमरवत् भगवान् श्रीकृष्ण ने ही निकाला है। इसलिये मैं उन वेदकर्त्ता, अमृतोदधि, इस जगत् के अभिन्ननिमित्तोपादानकारण पुरुषोत्तम भगवान् श्रीकृष्ण को मालिनी छन्द के पद के द्वारा साष्टाङ्ग प्रणाम करता हूँ।

ते = वे अन्दर से भयभीत इन्द्रादि देवताओं ने कहा—हमारे आगे चलने वाला यह सर्वसमर्थ यक्ष कौन है, एतत् विजानीहि = इस बात को ठीक-ठीक समझिये—इसका भलीभाँति पता लगाइये, इस अभिप्राय से, अग्निम् अब्रुवन् = अग्निदेव से कहा। अग्निदेव परम तेजस्वी हैं, वेदार्थ के विज्ञाता हैं और समस्त जात पदार्थों का ज्ञान रखते हैं। इससे उनका गौरवयुक्त नाम 'जातवेदा' है। इदं यक्षं किम् इति = हे जातवेद ! हमारे सामने यह यक्ष कौन है इसको जानो। अग्नि ने कहा—ओम्। यह कहकर अग्नि तुरन्त यक्ष के समीप जा पहुँचा। उन्हें अपने नजदीक खड़ा देखकर यक्ष ने पूछा—आप कौन हैं? अग्नि ने सोचा कि मेरे तेज:पुञ्ज स्वरूप को सब-के-सब पहचानते ही हैं, इसने कैसे नहीं जाना ? अत: उन्होंने धमक कर उत्तर दिया—मैं अग्नि तथा जातवेदा इन नामद्वय से प्रसिद्ध हूँ ॥३-४॥

यक्षरूपी परब्रह्म श्रीकृष्ण ने अग्नि से पूछा—तस्मिन् त्वयि किं वीर्यम् इति = आप अग्निदेवता हैं और जातवेदा = भूत का ज्ञान रखने वाले भी आप ही हैं, यह बड़े सौभाग्य की बात है पर यह तो कहिये—आप में क्या महान् गुण-शक्ति है, आप क्या कर सकते हैं ? श्रीभगवान् की यह मधुर वाणी सुनकर अग्निदेव ने पुन: साभिमान उत्तर दिया—अपि पृथिव्यां यत् इदम् इदं सर्वं दहेयम् इति = मैं क्या कर सकता हूँ? आप तो बच्चे की तरह व्यर्थ बातें कर रहे हैं। आप जानना चाहते हैं ? अये, मैं चाहूँ तो इस भूमण्डल में जो कुछ भी वस्तु देखने में आ रही हैं उन सबको जलाकर अभी—तुरन्त राख का ढेर कर दूँ ॥५॥

अग्निदेव का पुन: गर्वयुक्त वचन सुनकर सबको क्रियाशक्ति देने वाले यक्षरूपी परब्रह्म श्रीकृष्ण ने—तस्मै तृणम् निदधौ इति = गर्व करने वाले अग्निदेव के आगे एक सूखा तिनका डालकर कहा—एतत् दह = आप तो सारी चीजों को जला सकते हैं, कृपाकर आप तनिक-सा बल लगाकर इस सूखे तृण को जला दीजिये। स: सर्वजवेन तत् उपप्रेयाय (उप = समीपे, प्र = प्रकर्षेण, इयाय = गत:) तत् दग्धुं न एव शशाक = अग्निदेव अपने सारे वेग से उस तिनके के नजदीक तीव्रता से पहुँचे और

उसे जलाना चाहा। जब नहीं जला तब उन्होंने उसे जलाने के लिये अपनी सारी क्रियाशक्ति लगा दी, तब भी उसको जलाने में किसी तरह समर्थ नहीं हुए। जला तो नहीं सके, उसको तनिक-सी आग की आँच भी नहीं लगी।

'यच्चाग्नौ तत्तेजो विद्धि मामकम्' (गीता १५।१२)—अग्नि में जो अग्नित्व (धर्म) है, दाहिका शक्ति है वह तो शक्ति के राशि परमात्मा हैं, अग्नि में जो शक्ति (तेज) है वह शक्ति तो परमात्मा की ही है, अत: परमात्मा ने अग्नि में दाहिका शक्ति प्रदान की है। वे यदि उस शक्तिप्रवाह को अवरुद्ध कर दें तो फिर अग्नि में दाहिका-शक्ति कहाँ से आयेगी ? अग्निदेव इस तत्त्व को न समझकर ही अपने आप को बड़ा समझ रहे थे। पर जब सर्वशक्तिमान् परमात्मा ने अपनी शक्ति को रोक लिया तो वह सूखा तिनका भी नहीं जला सके तब उनका सिर लज्जा से नीचे झुक गया और आहत-प्रतिज्ञ होकर यक्ष के यक्ष रूप को न जानकर चुपचाप देवताओं के पास लौट आये। अग्निदेव देवताओं के समीप जाकर बोले—हे देवगण ! मैं तो ठीक-ठीक नहीं जान सका कि यह यक्ष कौन है? ॥६॥

अथ वायुमब्रुवन् वायवेतद् विजानीहि किमेतद्यक्षमिति तथेति ॥७॥

तदभ्यद्रवत् तमभ्यवदत् कोऽसीति वायुर्वा
अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति ॥८॥
तस्मिंस्त्वयि किं वीर्यमित्यपीदꣳ
सर्वमाददीयं यदिदं पृथिव्यामिति ॥९॥
तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय
सर्वजवेन तन्न शशाकादातुं स तत एव निववृते
नैतदशकं विज्ञातुं किमेतद्यक्षमिति ॥१०॥
अथेन्द्रमब्रुवन् मघवन्नेतद् विजानीहि किमेत-
द्यक्षमिति तथेति तदभ्यद्रवत् तस्मात् तिरोदधे ॥११॥
स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां
हैमवतीं ताꣳ होवाच किमेतद्यक्षमिति ॥१२॥

इति तृतीय:खण्ड: ॥३॥

तत्त्वप्रकाशिका—अथानन्तरम्। अस्य सर्वत्र गतिमत्त्वात् अन्तरिक्षनिलयनाच्चैव यक्षं ज्ञातुमयं समर्थ इत्यभिप्रायेण वायुमब्रुवन्निति ॥७-८॥

आददीयम् = आदद्यां गृह्णीयामित्यर्थ: ॥९॥

तस्या इति पूर्वेण समानार्थकम् ॥१०॥

अथ वाय्वनन्तरम्। अस्मदीश्वरोऽयं बलवान् एष जानीयादित्यभिप्रायेणेन्द्रमब्रुवन्नित्यादि पूर्ववत्। तस्मात्तिरोदधे तस्मात् स्वसमीपं प्राप्तादिन्द्रात् तस्मात् प्रदेशात् वा तिरोहितमभूद् ब्रह्म। देवेश्वरत्वेन स्थापितोऽयं मया एतस्य गर्वभङ्गो मा भूदित्यभि-

प्रायेण। अथवा देवेन्द्रत्वादेतस्य गर्वोऽवश्यमपनेय इत्यभिप्रायेण तेन सह संवादमपि नाकरोत् ॥११॥

स इन्द्रस्तस्मिन्नेव यक्षातिरोधानाकाशप्रदेशे यत्र यक्षं तिरोदधे स्त्रियमाजगाम, तां दृष्ट्वा तस्याः समीपं प्राप। तत्रैव स्थित्वा किं तद् यक्षमिति चिन्तयत इन्द्रस्य स्वस्मिन् भक्तिं बुद्ध्वा इन्द्रोपदेशार्थं यक्षेणैव स्वशक्तिः काचिदुमारूपिणी गुरुस्थानीया प्रकटिता। इन्द्रस्तां हैमवतीं स्वर्णालङ्कारवतीमिव बहु शोभमानामतिशोभावतीम्, एतद्यक्षं किमिति ह स्फुटमुवाच पृष्टवानित्यर्थः ॥१२॥

सान्वयानुवाद—अथ = अनन्तर, वायुम् = वायुदेवता से, अब्रुवन् = (देवताओं ने) कहा—वायो = हे वायुदेव !, एतत् विजानीहि = आप जाकर इसका पता लगाइये, एतत् यक्षं किम् इति = यह यक्ष कौन है, तथा इति = तथाऽस्तु यह कहकर अग्निदेव तुरन्त यक्ष के नजदीक जा पहुँचे। (तत् अभि + अद्रवत्) तम् अभ्यवदत् = उन्हें अपने सामने खड़ा देखकर यक्ष ने पूछा—कोऽसीति = आप कौन हैं ?, अहम् वै वायुः अस्मि इति अब्रवीत्, मातरिश्वा अस्मि इति (च) = मैं सर्वत्र विचरने वाला वायु हूँ एवं मातरिश्वा इन नामद्वय से प्रसिद्ध हूँ, ऐसा वायुदेव ने उत्तर दिया। आददीयम् = अगर मैं चाहूँ तो सब-के-सबको बिना आधार के पकड़ लूँ, उड़ा दूँ। शेष व्याख्या पूर्ववत् ॥७-१०॥

इसके बाद देवगण ने इकट्ठे होकर स्वयं देवराज इन्द्र को इस महत्त्वपूर्ण कार्य के लिये चुना और उन्होंने कहा—यह बलवान् हमारे ईश्वर हैं—मघवन्! एतत् विजानीहि = हे देवराज इन्द्र ! अब आप ही जाकर पता लगाइये कि एतत् यक्षं किम् इति = पूर्ववदनुवाद। इन्द्र के समीप वे तिरोहित हो गये। परमात्मा ने सोचा—मैंने ही इन्द्र को देवताओं के स्वामी रूप से नियुक्त किया है अतः इसका गर्व भङ्ग न हो इस अभिप्राय से यज्ञरूपी परमात्मा ने इन्द्र के साथ सम्भाषण नहीं किया ॥११॥

यक्ष के छिप जाने पर इन्द्र वहीं खड़े रहे, इतने ही में उन्होंने देखा कि जहाँ यक्ष छिप गया था। ठीक उसी जगह एक स्त्री आ पहुँची। इन्द्र उसको देखकर उसके पास जा पहुँचे, जाकर देखा—यक्ष के द्वारा ही अपनी शक्ति कोई उमारूपिणी गुरुस्थानीया सोने के अलङ्कारों से युक्त बिजली की तरह चमक रही है। अकारण करुणावरुणालय परब्रह्म स्वरूप श्रीकृष्ण ही उमा रूप से प्रकट हो गये। इन्द्र ने कहा—देवि ! आप सर्वेश्वर सर्वज्ञ श्रीहरि की अभिन्ना शक्ति हैं, आपने राहु का सिर चक्र से काट डाला और हमें संग्राम में बड़ी भारी सफलता प्रदान की। अब तो यह सारी-की-सारी पोल ही खुल गयी कि हमारे सामने प्रकट होने वाली आप साधारण स्त्री नहीं हैं अपितु सर्वनियन्ता साक्षात् भगवान् विष्णु हैं। कृपाकर सर्वज्ञ आप किञ्चित् मुझे कहिये कि यह यक्ष, जो दर्शन देकर तुरन्त ही छिप गया, वह कौन है और किस कारण से यहाँ प्रकट हुआ था ॥१२॥

'असदविषयमङ्घ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयत् सिन्धुमथ्यम्।
कपटयुवतिवेषो मोहयन् यः सुरारीन् तमहमुपसृतानां कामपूरं नतोऽस्मि' ॥
(श्रीमद्भा.८।१२।४७)

जो विषया, कुमनीषी पुरुषों के लिए दृष्टिगोचर नहीं होते हैं वे तो प्रेमभाव से युक्त दयावान् (कृपावान्) सत्पुरुषों को ही मिलने योग्य होते हैं। अतः श्रीभगवत्पाद-पल्लव भक्ति से ही प्राप्य हैं जिन्होंने असुरों को ठगने के लिये, देवताओं पर कृपाकर उमारूपा युवति स्त्री का रूप धारण कर दैत्यों-दानवों को विमोहित किया और अपने चरणकमलों में प्रपन्न देवताओं को समुद्र-मन्थन से निकले हुए अमृत का पान कराया। जो भी उनके पादारविन्द की शरण ग्रहण करते हैं वे उनकी समस्त कामनाएँ पूर्ण कर देते हैं, उन्हें सब अभीष्ट पदार्थ अनायास ही प्राप्त हो जाते हैं। जिनकी निर्हेतुकी कृपा से मनुष्यों को यह भक्तिरस प्राप्त हुआ उन सर्वलोकेश्वरेश्वर पुरुषोत्तम भगवान् श्रीकृष्ण को मैं मालिनी छन्द के पद के द्वारा दण्डवत् प्रणाम करता हूँ। 'यतो हरिर्विजयः श्रीर्गुणास्ततः' (६।११।२)—जहाँ श्रीहरि रहते हैं वहीं श्री है और वहीं गुण है।

तृतीय खण्ड समाप्त ॥२॥

•

अथ चतुर्थः खण्डः

सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार ब्रह्मेति ॥१॥

तस्माद्वा एते देवा अतितरामिवान्यान्देवान् यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति ॥२॥

तस्माद्वा इन्द्रोऽतितरामिवान्यान्देवान् स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति ॥३॥

तत्त्वप्रकाशिका—एवमिन्द्रेण पृष्टा सा त्वया पृष्टं यक्षं ब्रह्मेति ह किल उवाच। एतत् एतस्य युष्मदाविष्टस्य ब्रह्मणः परमात्मनो वै किल विजये महीयध्वम् अस्मदन्तर्यामिणैवासुरा जिताः, वयं तत्र निमित्तमात्रमिति मत्वा तस्यैव विजयनिमित्तं यूयं महिमानं प्राप्नुथ। मास्य स्वविजयनिमित्तं गर्वं कुरुध्वमित्यर्थः। तत इति। ततो ह वै देवीवाक्यादेव इन्द्रो यक्षं विदाञ्चकार ब्रह्मेति। इतीन्द्रस्य स्वातन्त्र्यं व्यवच्छिनत्ति ॥१॥

तस्माद्वै किल एते देवाः, अतितरामिव इवेत्यनर्थकः। स्वमाहात्म्येनान्यान् देवानतिशयेनातिक्रान्तवन्तः। तानाह यदग्निरिति। योऽग्निर्यो वायुर्य इन्द्रस्तस्मादित्युक्तहेतुं व्यक्तीकरोति—ते हीति। ते देवा हि यत् एनद् यक्षरूपं ब्रह्म नेदिष्ठं समीपे स्थितं पस्पर्शुः (स्पृश संस्पर्शने) = दर्शनादिना तत्स्पर्शं चक्रुरित्यर्थः। गुणश्छान्दसः। हि यतश्च हेतोस्ते अग्न्यादय एनद् ब्रह्म प्रथमः प्रथमं विदाञ्चकार विदाञ्चक्रुरेतद् ब्रह्मेति ॥२॥

तत्राग्निवाय्वोरिन्द्रोपदेशात् यक्षस्य ब्रह्मत्वज्ञानम्। इन्द्रस्तस्या उपदेशेन ताभ्यां प्रथमं यक्षं ब्रह्मत्वेन विवेद अत इन्द्रस्ताभ्यामप्यधिक इत्याह। तस्माद्वा इति। पूर्ववाक्येन समार्थमेतत् ॥३॥

व्याख्या—इस प्रकार इन्द्र के भगवती उमादेवी से पूछने पर तब देवी ने इन्द्र से कहा—तुम जिन यक्ष के विषय में पूछ रहे हो—'ब्रह्मेति' = वे साक्षात् परब्रह्म हैं। तुम्हारे अन्दर विचरने वाले परब्रह्म परमात्मा की ही विजय में तुमलोगों को बड़ी भारी सफलता प्राप्त हुई। इ ...ते हैं—हमारे अन्तर्यामी वासुदेव के द्वारा ही सकल असुर जीते हुए हैं, हम तो उ में निमित्तमात्र थे। ऐसा समझकर उन परब्रह्म परमेश्वर की ही विजयनिमित्त को (हे देवे द्र!) तुम लोग महान् गौरव को प्राप्त हुये। इसलिये परमात्मा की स्वकीय विजयनिमित्त में तुम लोगों को अभिमान नहीं करना चाहिये। देवी के इस सदुपदेश से ही इन्द्र ने यक्ष को साक्षात् परब्रह्म समझा। इसके द्वारा इन्द्र के स्वाधीनत्व को (भगवान् ने) दूर कर दिया ॥१॥

अपने माहात्म्य से अन्य देवगणों को लाँघकर आगे बढ़ने वाले अग्नि, वायु, इन्द्र को ही श्रेष्ठ समझना चाहिये। क्योंकि सामने खड़े इस यक्षरूप ब्रह्म को उन्होंने दर्शनादि द्वारा स्पर्श किया है, इसलिये ये अग्नि आदि तीनों देवता देवताओं में अधिक श्रेष्ठ हैं। अग्नि-वायु-इन्द्र ने ब्रह्म को सबसे पहले जाना है अतः ये साक्षात् परब्रह्म परमात्मा हैं ॥२॥

इन्द्र के उपदेश से अग्नि और वायु को यक्ष में ब्रह्मत्व का ज्ञान हुआ। इन्द्र ने देवी के सदुपदेश से अग्नि और वायु से पहले यक्ष को ब्रह्मरूप से जाना अतएव इन्द्र उन दोनों से भी अधिक श्रेष्ठ माने गये हैं। शेष पूर्ववत् अर्थ समझना चाहिये ॥३॥

तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा ३ इतीति न्यमीमिषदा ३ इत्यधिदैवतम् ॥४॥

अथाध्यात्मं यदेतद् गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णं सङ्कल्पः ॥५॥

तत्त्वप्रकाशिका—देवताविषयं ब्रह्मण उपास्यरूपमुपदिशति—तस्यैष इति। तस्य प्रकृतस्य ब्रह्मण एष आदेश उपदेशः। कोऽसावित्यत आह—यदेतद्विद्युतो व्यद्युतदा—आ उपमार्थेऽविद्युतत् इति बहुत्वं छान्दसत्वात्। विद्युदिव यदेतद् ब्रह्म व्यद्युतत्। दीप्तं कृतवदित्यर्थः। विद्युतादिति पाठे अडभावश्छान्दसः।

यथा विद्युद् अन्धकारं विदार्य सकृत् सर्वतः प्रकाशते तिरोधत्ते च, एवं ब्रह्म देवेभ्यः सकृद् आत्मानं दर्शयित्वा तिरोदधे। इति विद्युदिवोपास्यं ब्रह्मेति भावः।

यद्वा विद्युत् इति षष्ठी, विद्युत्सम्बन्धि तेजो यथा सकृत् विद्युतत् एवं यदेतद् ब्रह्म सकृत् विद्योतितवत्। यथा सकृद्विद्युतमिति श्रुत्यन्तरात्। इतिशब्द आदेशपरामर्शार्थः। इच्छब्दश्चार्थे। अयञ्च तस्यापर आदेशः। न्यमीमिषदा इति स्वार्थे णिच्।

यथा चक्षुर्विषयं प्रति प्रकाशते निमिषति च एवं ब्रह्माग्न्यादीन् प्रति प्राकाशिष्ट न्यमीमिषत्। तिरोदधे चेत्यर्थः। यद्वा इति इत् द्वावनर्थकौ निपातौ, यथा कश्चिन्न्यमीमिषत् चक्षुर्निमेषं कृतवान् तथा ब्रह्मेन्द्रोपरामकाले खे तिरोऽभूदित्यर्थः। इत्येवं देवेषु तस्योपमानदर्शनमुक्तम् ॥४॥

अथानन्तरमात्मनि देहे इत्यध्यात्मं देहे तस्योपदेश उच्यते—यदिति। एतद् ब्रह्म मनो गच्छति इव सम्यक् न गच्छति चिरं न विषयीकरोति इति यत एष उपदेशः। यथा—परमात्मानुगृहीतस्योपासकमनसो ब्रह्म विषयीकरणम्। एवं यक्षस्य ब्रह्मणः प्रकाशोऽपि। अनेन ब्रह्मणाऽनुगृहीतं सत् मन एतद् ब्रह्मोपस्मरत्यभीक्ष्णं भृशञ्च समीपतश्चिन्तयति—विषयीकरोति। कीदृशं मन इत्यत आह—सङ्कल्प इति। सङ्कल्पयति नानाविषयानिति सङ्कल्पः सङ्ककमित्यर्थः। अजहल्लिङ्गत्वाच्छान्दसत्वाद् वा लिङ्गव्यत्ययः। तस्यैष उपमादेशः। यथा भक्तानां मनो गुरुद्वारा परमात्मनाऽनुगृहीतं सम्यक् जानाति, एवमिन्द्रादयोऽपि देवीद्वारा तदनुगृहीताः सन्तस्तद् यक्षं ब्रह्मत्वेन सम्यक् ज्ञातवन्त इत्यभिप्रायः ॥५॥

व्याख्या—अब उपर्युक्त परमात्मतत्त्व को अधिदैवत दृष्टान्त के द्वारा विद्युत् और व्यद्युतद् + आ शब्द से निर्दिष्ट निरतिशय दीप्तिमत्तर परब्रह्म का ध्यान बतलाते हैं—उसी परब्रह्म का यह प्रकरण है तथा उनका यह उपदेश है। जिस तरह बिजली अंधकार को दूर कर चारों ओर एक बार चमकती है फिर तुरन्त लुप्त हो जाती है, इसी तरह परब्रह्म परमात्मा श्रीकृष्ण देवताओं के बीच में एक बार अपने को दिखलाकर छिप गये। इसी तरह बिजली के सदृश ब्रह्म का ध्यान करना चाहिये।

न्यमीमिषदा = यह ब्रह्म का दूसरा ध्यान है—जैसे कोई आँखों के झपकने की भाँति अपने स्वरूप की क्षणिक झाँकी दिखला कर तुरन्त छिप जाता है इसी भाँति भागवतोत्तम देवर्षि नारद को ही भगवान् के इस स्वरूप का दर्शन हुआ था। इस प्रकार यह आधिदैविक बतलाया गया ॥४॥

अथ ध्यानम्—

'बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं
बिभ्रद् वासः कनककपिशं वैजयन्तीञ्च मालाम्।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दै-
र्वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्त्तिः ॥१॥
नौमीड्य तेऽभ्रवपुषे तडिदम्बराय गुञ्जावतंसपरिपिच्छलसन्मुखाय।
वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय' ॥२॥

परब्रह्मस्वरूप श्रीकृष्ण गोपबालकों के साथ अपने चरणारविन्दचिह्नों से सुशोभित वृन्दावन में प्रवेश कर रहे हैं। उनके सिर पर मोरपंख मुकुट के रूप में चमक रहा है। उनका नटवर-सच्चिदानन्द दिव्यमङ्गल विग्रह है। वे अपने दोनों कानों में कर्णिकार को धारण किये हुए हैं। पीतवर्ण का स्वर्णमय-छन्दोमय वस्त्र धारण किये हुये हैं। गले में पाँच वर्ण के पुष्पों की वैजयन्ती माला धारण किये हुये हैं। वे वेणु के छिद्रों को अपनी अधरसुधा से पूर्ण कर रहे हैं। गोपबालकवृन्द उनकी कीर्त्ति का कीर्त्तन-गान कर रहे हैं। हे भगवन्! आप ही समस्त वेद-उपनिषद्-वेदान्तप्रतिपाद्य परब्रह्म हैं, संसार में स्तुति-आराधना करने योग्य केवल एकमात्र आप ही हैं। मेघ के समान सुन्दर आप का श्याम-विग्रह है। उसमें बिजली के समान पीताम्बर चमक रहा है। आपके दोनों कानों में

घूँघुची के कुण्डल हैं। शिर पर मयूरपिच्छ-मुकुट से आपका मुखकमल सुशोभित है और आप वनमाला धारण किये हैं। आपके दायें हाथ में दही-भात का ग्रास है। काँख के नीचे बेंत है। विषाण—शृङ्गी—बाजा, बाँसुरी और श्रीवत्साङ्क-उदार कौस्तुभ से आपकी शोभा अपूर्व हो रही है। आपके चरण इतने कोमल हैं कि उनसे चट्टान भी पिघल जाते हैं। आप सब के मूल(बीज)भूत कारण हैं। अत: मैं आपको प्रसन्न करने के लिये नमन करता हूँ ॥१-२॥

पशून् पातीति पशुपो नन्दस्तस्याङ्गजाय पुत्राय। यद्वा—पशुपो नन्दस्तस्य अङ्गम् मित्रं वसुदेवस्तस्माज्जाताय। यद्वा—पान्तीति पा: पशवश्च पाश्च पशुपा वत्सवत्सपा अङ्गजा देहजा यस्य तस्मै। यद्वा—पशुपां गोपानां मध्ये गजाय मुख्याय। यद्वा—पशुं नन्दिनं पातीति पशुपो महादेव: अङ्गजो हृदयजो यस्य—पशून् प्राणिन: पाति पापात् रक्षतीति पशुपा गङ्गा अङ्गजा अङ्गुष्ठजा यस्येति वा। इति संक्षेप अनन्तार्थकोऽयम्। इति मम गुरुचरणा: कृता गूढार्थदीपिन्याम् ॥

अपना तथा जगत् का भान नहीं होता। जैसे—

'ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा।
औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरि: ॥
प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृत:।
आनन्दसम्प्लवे लीनो नापश्यमुभयम्मुने' ॥ (श्रीमद्भा. १।६।१७-१८)

भक्तिभाव के वशीभूत निर्मल मन से भगवान् श्रीहरि के चरणारविन्द का ध्यान करने पर उत्कण्ठा से मेरी आँखों से आँसू निकल आये और धीरे-धीरे भगवान् मेरे हृदय में प्रकट हो गये ॥१७॥

हे मुने! मैं उस समय प्रभु में प्रेम का आधिक्य हो जाने से पुलकित अङ्गों वाला होकर निरतिशय सुखवान् हो गया और आनन्द के समुद्र में डूब गया। मुझे उस समय अपना तथा जगत् का ज्ञान नहीं रहा ॥१८॥

जो विभु-भूमा सर्वव्यापक भगवान् हैं वही स्वयं ही नारदजी के हृदय में प्रकट हो गये।

'ईश्वर: सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति'।

अर्थात् ईश्वर श्रीहरि सब प्राणियों के हृदय में बैठे हैं। अब आध्यात्मिक दृष्टि से भगवत्प्राप्ति के मुख्य साधन बतलाते हैं—

जब कोई दयावान् अभिज्ञ जन-जीव पर महान् अनुग्रह करते हैं तब हर तरह के विषयों का सङ्कल्प करने वाला यह मन आपातरमणीय सांसारिक तुच्छ विषयों से हट कर निरन्तर परमात्मा का ही उपस्मरण (ध्यान) करता है।

जो विभक्ति, लिङ्ग अथवा वचन विशेष्य के होते हैं वे ही प्राय: विशेषण के होते हैं—ऐसा नियम (विधि) है, लेकिन कुछ ऐसे भी विशेषण शब्द हैं जो विशेष्य का

अनुसरण नहीं करते अर्थात् विशेष्य चाहे किसी लिङ्ग का हो किन्तु वे अपने लिङ्ग का परित्याग नहीं करते है।

यथा—'दुहिताश्च कृपणं परम्' (मनुस्मृतौ)।
'वेदाः प्रमाणम्'। 'तद्वत् सङ्कल्पो मनः'।

लड़कियाँ अत्यन्त दया की पात्र हैं। वेद साक्षी हैं। सङ्कल्प करने वाला मन है।

गच्छतीव—इसका अर्थ है मन श्रीभगवान् के समीप तक पहुँचता हुआ-सा मालूम पड़ता है, लेकिन वहाँ पहुँचता नहीं है। इसका मूल कारण यह है—

जिस व्यक्ति की वात-कफ-पित्त इन त्रिधातुक मृत शरीर में आत्मबुद्धि, स्त्री-पुत्रादि में आत्मीय बुद्धि, मिट्टी या चट्टान के बने देवताओं में पूज्य बुद्धि और जल में तीर्थबुद्धि रहती है, किन्तु ज्ञानवान्, अभिज्ञ महात्माओं में ऐसी बुद्धि नहीं रहती; वह तो गाय-बैल के समान पशु है। उसे विद्वानों ने पशुओं में खर, भारवाही बताया है। 'स एव गोखरः'। यह तत्त्वज्ञान न तप से प्राप्त होता है, न यज्ञ करने से, न तर्पण से, न घर-द्वार का परित्याग करके संन्यास ग्रहण करने से और न वेदाध्ययन से तथा जल, अग्नि, सूर्यादि किसी देवता की आराधना से भी नहीं प्राप्त होता। अर्थात् संसार में किसी की उपासना से तत्त्वज्ञान प्राप्त नहीं हो सकता, जब तक तत्त्वज्ञानी महात्माओं की सेवा-शुश्रूषा करके उनकी चरणधूलि का अभिषेक प्राप्त न हो। अर्थात् श्रीसर्वेश्वर-परायण महात्माओं की चरणधूलि में लोट-पोट हुये बिना यह तत्त्वज्ञान प्राप्त नहीं होता (श्रीमद्भा.१०।८४।१३,५।१२।१२) ॥४-५॥

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं
वेदाऽभि हैनं सर्वाणि भूतानि संवाञ्छन्ति ॥६॥

तत्त्वप्रकाशिका—अन्वर्थं तस्योपासनमाह—तद्धेति। तद् ब्रह्म ह किल तद्वनं नाम तत् ततं व्याप्तं च तत् वनं सर्वेषां वननीयं सम्भजनीयञ्चेति। तद्वनं नाम प्रख्यातं यत्तद् वनमिति। कल्याणगुणहेतुकं वननामकं तस्माद् तद्वनमित्यनेनैव कल्याणगुणाभि-धानेनोपासितव्यम्। अनेन नाम्नोपासकस्य फलमाह—स य इति। स यः कश्चित् अधिकारी, एतद् ब्रह्म एवं तद्वननामेत्येवं रूपेण वेदोपास्ते ह किल एनमुपासकं सर्वाणि भूतानि अभिसंवाञ्छन्ति = सर्वाभिलषितो भवति ॥६॥

व्याख्या—'वन सम्भक्तौ धातुः'। वह परमात्मा वन नाम से विख्यात है। वनम् = परायणम्, परः = परमात्मा एव आयनं = आधारः। 'तस्मिन् लोकाः श्रिताः सर्वे' (कठ. २।३।१); 'मयि सर्वमिदं प्रोतम्' (गीता ७।७)। वह सर्वभूतात्मसाक्षी आनन्दस्वरूप परमात्मा सबका अत्यन्त प्रिय है। उसके आश्रित सब लोक रहते हैं। दुःखरूप विषप्रद विषयों का चिन्तन नहीं करना चाहिये। परमात्मा में अपने मन को लगाकर उनका भजन-आराधन करना चाहिये। जो कोई विवेकी जन उस परमात्मा श्रीकृष्ण को इस प्रकार 'तद्वन' इस रूप से उपासना करता है, उसको निःसन्देह समस्त प्राणी सब ओर से चाहते हैं ॥६॥

'यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरिः ।
तस्मै नमन्ति भूतानि निम्नमाप इव स्वयम्' ॥ (श्रीमद्भा.४।९।४८)

भगवान् श्रीहरि मैत्री आदि गुणों से जिस पर प्रसन्न हो जाते हैं उसके आगे सब प्राणी नतमस्तक हो जाते हैं। जिस तरह जल स्वयं ही नीचे की ओर बहने लगता है तद्वत्।

अत्र वनशब्दोपलक्षितं मधुवनं ग्रहणं समीचीनम्।
'तत्तात गच्छ भद्रं ते यमुनायास्तटं शुचि।
पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः' ॥
'भगवान् वासुदेवस्तं भज तत्प्रवणात्मना'।
'एकमेव हरेस्तत्र कारणं पादसेवनम्'। (श्रीमद्भा.४।८।४२,४०,४१)

वत्स ! तुम्हारा कल्याण हो, अब तुम श्रीयमुनाजी के पवित्र तट पर बसे पुण्य-स्थान मधुवन में चले जाओ जहाँ नित्य = सदा ही भगवान् श्रीहरि का निवास है। तुम भगवान् वासुदेव को सर्वात्म-समर्पण कर एकाग्रचित्त से उनका भजन करो। भगवत्प्राप्ति का मार्ग (उपाय-साधन) केवल भगवान् श्रीहरि की चरण-सेवा ही है।

उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद् ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥७॥

तत्त्वप्रकाशिका—एवमनुशिष्टः शिष्यः पुनराचार्यं पृच्छति—उपनिषदमिति। भो गुरो ! उपनिषदं ब्रूहीति। तत्र नायं श्रुतां ब्रह्मविद्यां पुनः पृच्छति, पिष्टपेषणवत्। प्रश्नस्य पुनरुक्त्यापत्तेः। नाप्यवशिष्टां, प्रेत्यास्माल्लोकादमृता भवन्ति। तस्याः फलकथनेनोप-संहारात्। तर्हि किं विद्यास्वरूपं पृच्छत्युत्पन्नविद्याया अवस्थितिहेतुमथ विद्यास्थानं वेति मनसि कृत्वा गुरुः क्रमेणोत्तरमाह—उक्तेति। अभिहिता ते = तुभ्यमुपनिषत्। का सेत्यत आह—ब्राह्मीमिति। ब्रह्मण इयं तां ब्रह्मविद्यां वाव = एव, ते = तुभ्यमुपनिषदम-ब्रूमेति। उपनिषत्स्वरूपस्य तत्प्रतिपाद्यब्रह्मस्वरूपस्य च ब्रह्मेति होवाचेत्यादिनोक्तत्वान्न तत्र वक्तव्यमवशिष्यते ॥७॥

मृत्यो = हे मृत्यो! यमराज! देवैः अपि अत्र विचिकित्सितं = देवों ने भी इस मुक्तात्मस्वरूप के विषय में सन्देह किया था। न च सुविज्ञेयम् = इसलिये मुक्तात्माओं का स्वरूप सुविज्ञेय नहीं है। त्वं यत् आत्थ = आपने जो कहा, (वह तो बिल्कुल ठीक कहा) अस्य वक्ता = इस विषय का उपदेष्टा, त्वादृक् = आपके जैसा अन्य, न च लभ्यः = नहीं मिल सकता, एतस्य तुल्यः कश्चित् अन्यः वरः न = इसके समान कोई दूसरा वर नहीं है ॥२२॥

व्याख्या—'नैनद् देवा आप्नुवन्' (ईशावास्योपनिषत्), 'न यस्य देवा ऋषयः पदं

विदुः' (श्रीमद्भागवतम् ८।३।६), 'सर्वे वेदा यत्पदमामनन्ति' (कठोपनिषत्), 'परं पदं वैष्णवमामनन्ति तद्' (श्रीमद्भागवतम् २।२।१८), 'न मे विदुः सुरगणाः प्रभवं न महर्षयः' (गीता १०।२)। देवगण इसको प्राप्त नहीं कर सके। जिस पद को देवगण एवं ऋषिगण नहीं जान सके उस परम पद को वैष्णवपद कहते हैं। समस्त वेद जिस परम पद का प्रतिपादन करते हैं। मेरे प्रभव को देवगण और महर्षिगण नहीं जानते हैं।

यमराज ने कहा--हे नचिकेता! प्राचीन समय में अनेक बड़े-बड़े तत्त्वज्ञानियों ने इस अतिगोपनीय मुक्तात्माओं के स्वरूप की खोज करने का प्रयत्न किया था, पर वे भी इस मुक्तस्वरूप को नहीं जान सके। वे आपस में संशययुक्त हो गये। क्योंकि यह धर्म सुविज्ञेय नहीं है। यह सुखपूर्वक विशेष रूप से जानने योग्य नहीं है। यह धर्म अणु है अर्थात् सूक्ष्म है, दुर्विज्ञेय है। इसलिये यमराज नचिकेता से कहते हैं—तुम कोई दूसरा वर माँगो। मैं तुम्हे पहले तीन वर देने का वचन दे चुका हूँ। दूसरी बात महात्मा लोग सत्य से विचलित नहीं होते हैं। मेरे ऊपर व्यर्थ दबाव न डाल। एनं मा अतिसृज = इस वर को मेरे लिये छोड़ दो ॥२१॥

नचिकेता मुक्तात्मस्वरूप की दुर्ज्ञेयता तथा कठिनता की बात सुनकर तनिक भी घबराया नहीं। इस प्रकार यमराज का भाषण सुनकर बड़े धैर्य से मुक्तात्मस्वरूप को जानने की प्रार्थना करता है—हे मृत्यो! आपने जो यह कहा कि पूर्वकाल में देवगणों एवं बड़े-बड़े ऋषि-मुनियों ने जब इस मुक्तात्मस्वरूप पर विचार-विमर्श किया था तब वे भी इसे जान नहीं पाये, उलटे उनकी बुद्धि चकरा गयी और वे आपस में संशयान्वित हो गये; यह बिल्कुल सत्य बात है। यह विषय सहज, सरल एवं सुकर भी नहीं है, बड़ा ही सूक्ष्म है। आपके समान सुयोग्य अनुभवी महात्मा-वक्ता के अतिरिक्त इसका उत्तर (जवाब) देने में समर्थ दूसरा कोई ढूँढ़ने पर भी मिलने वाला नहीं है। आप कहते हैं— 'एनं मा अतिसृज' लेकिन मैं कहता हूँ—'एतस्य तुल्य अन्यः कश्चित् वरं न' = इसके समान दूसरा कोई वर है ही नहीं। अतएव आप कृपाकर मुझे इसका उपदेश कीजिये ॥२॥

शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान्।
भूमेर्महदायतनं वृणीष्व स्वयञ्च जीव शरदो यावदिच्छसि ॥२३॥
एततुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकाञ्च।
महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि ॥२४॥
ये ये कामा दुर्लभा मर्त्यलोके सर्वान् कामांश्छन्दतः प्रार्थयस्व।
इमा रामाः सरथाः सतूर्या नहीदृशा लम्भनीया मनुष्यैः।
आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं माऽनुप्राक्षीः ॥२५॥

तत्त्वप्रकाशिका—एवमुक्तो यमः सर्वात्मना विषयविरक्तस्यैव मोक्षशास्त्रेऽधिकार-श्रवणाद् अविरक्त-स्यैतादृशं मुक्तात्मस्वरूपं नोपदेष्टव्यमिति ज्ञापनाय नचिकेतसो मुमु-क्षास्थैर्यनिरीक्षणाय नानाविषयैस्तं प्रलोभयति—शतं वर्षाण्यायूंषि येषां ते शतायुषः तान् पुत्रपौत्रान् वृणीष्व। बहून् पशून् गोमहिष्यादिरूपान् हस्तिहिरण्यञ्च हस्तिहिरण्यमिति द्वन्द्वैकवद्भावः। अश्वान् भूमेर्महदायतनञ्च पृथिव्या महद्विस्तीर्णमायतनं मण्डलं राज्याधि-पत्यं वृणीष्व। न केवलं पुत्रपौत्राणां शतायुष्ट्वम्, किन्तु त्वञ्च यावज्जीवितुमिच्छसि तावतीः शरदो जीव। सर्वञ्चैतद् अनर्थकं स्वयञ्चेदल्पायुरित्यत आह—स्वयञ्चेति ॥२३॥

त्वदीयं वरमेततुल्यमेतस्य मया दीयमानस्य समं यदि मन्यसे, तर्हि दीयमानां वित्तं चिरजीविकाञ्च दीर्घजीवनहेतुक्षेत्रं दीर्घजीवनं वा उक्तोपलक्षणमेतत् वृणीष्व। न चेद-मन्यदपि दास्यामीत्याह—महाभूमाविति। हे नचिकेतः! त्वं महाभूमौ निमित्तसप्तमीयम्, महाराज्याधिपत्ये सतीति यावत्। एधि = अभिवृद्धो भव। त्वां कामानां = काम्यानां मध्ये कामितभाजं करोमीत्यर्थः ॥२४॥

एतदेव विवृणोति—ये य इति। कामाः = काम्याः, छन्दतः = इच्छानुसारेण। तानेव विशिष्याह—इमा इति। रथेन सह वर्त्तमाना इति सरथाः। सतूर्याः सवादित्रा इमा रूपादि गुणवतीः। मल्लोकस्था वा रामाः = रमणीयाः स्त्रियः प्रार्थयस्व। तासु विशेष-माह—न हीदृशा इति। तर्ह्येतादृशीभिः किं मे प्रयोजनमित्यत आह—आभिरिति। मत्प्रत्ताभिः = मद्दत्ताभिराभिः स्त्रीभिः परिचारयस्व। स्वनृत्यगानादिनाऽऽत्मनः परिचर्यां कारय। मरणमनुमरणान्मुक्तेः पश्चान्मुक्तात्मस्वरूपमिति यावत् माऽनुप्राक्षीः ॥२५॥

सान्वयानुवाद—यमराज इस समय मोक्ष में इच्छा रखने वाले नचिकेता को नाना विषयों से प्रलोभित करते हुए प्रलोभनों के द्वारा 'प्रेते मनुष्ये'—इस वर से हटाना चाहते हैं—शतायुषः पुत्रपौत्रान् वृणीष्व = सौ-सौ सालों की अवस्था वाले पुत्रों और पौत्रों = पोतों को (पुत्र का बेटा) माँग, बहून् पशून् हस्तिहिरण्यम् अश्वान् = बहुत-से पशु हाथी, सोना और घोड़ों को, भूमेः महत् आयतनं वृणीष्व = भूमि के बड़े स्थान को माँग लो, स्वयं च यावत् शरदः इच्छसि जीव = और तुम स्वयं भी जितने सालों तक चाहो जीते रहो ॥२३॥

'संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः' इत्यमरः।

नचिकेतः = हे नचिकेता! एतत् तुल्यं वरम् = इसके समान वर, यदि त्वं मन्य-से = अगर तुम मानते हो, वृणीष्व = माँग लो, वित्तं चिरजीविकां च = चिर काल की जीविका - दीर्घ आयुष्य और धन-सम्पत्ति, महाभूमौ एधि = इस महान् भारतवर्ष में तुम वृद्धि को प्राप्त करो, त्वा कामानां कामभाजं करोमि = तुम्हें हर तरह के विषय-भोगों का अनुतम भोगी बनाकर विषयों को भोगने वाला बना देता हूँ ॥२४॥

ये ये कामाः = जो-जो इच्छाविषयीभूत पदार्थ, मर्त्यलोके = मृत्युलोक में, दुर्लभाः = दुर्लभ हैं, सर्वान् कामान् = उन सारे विषय-भोगों को, छन्दतः प्रार्थयस्व = इच्छानुसार माँग लो, सरथाः सतूर्याः इमा रामाः = रथों के साथ नाना प्रकार के बाजों सहित इन सुन्दरी स्त्रियों को भोगने के लिये ले जाओ, मनुष्यैः ईदृशाः न हि लम्भ-नीयाः = मनुष्यों को ये ऐसी सुन्दर स्त्रियाँ निस्सन्देह अलभ्य हैं, मत्प्रत्ताभिः आभिः

परिचारयस्व = मेरे द्वारा दी हुई इन स्त्रियों से तुम अपनी परिचर्या कराओ, नचिकेतः = हे नचिकेता ! मरणं मा अनुप्राक्षीः = मरने के बाद मनुष्य, 'येयं प्रेते'— 'यह रहता है और यह नहीं रहता है' इस बात को मत पूछो ॥२५॥

व्याख्या—जब 'प्र' उपसर्ग जोड़कर 'इण् गतौ' धातु का प्रयोग करते हैं तब उसका अर्थ मरना हो जाता है। प्रेत = इस लोक से गया। प्रकर्षेण इतः = गतः, परलोकं प्राप्तः प्रेतः। परन्तु यहाँ वाचयामास अर्थ नहीं है। इसका अर्थ है—मनुष्य का शरीर नष्ट होने पर वह सभी बन्धनों से छुटकारा पाकर कहाँ जाता है ? उसका स्वरूप रहता है या नहीं ? यमराज नचिकेता से कहते हैं—हे नचिकेता ! तुम इस वर को लेकर क्या करोगे ? तुम इन वस्तुओं को ग्रहण करो। इन सौ-सौ साल जीने वाले पुत्र-पौत्रों (पोतों), बहुत-से उपयोगी पशु–गायों, हाथी, घोड़े, सुवर्ण, रत्न, भूमि का बड़ा स्थान और भी तुम्हें जो कुछ चाहिये हमसे माँग लो। इन सब विषयों को भोगने के लिये जितने सालों तक जीने की इच्छा हो, उतने ही सालों तक जीते रहो ॥२३॥

नचिकेता ! यदि तुम अधिक धन-सम्पत्ति, ज्यादे दिनों तक जीने के लिए तदुपयोगी वस्तुएँ, विषयसुख-सामग्रियाँ और भी जितने भोग भोगी आदमी भोग सकता है उन सबको मिलाकर इस मुक्तात्मस्वरूप विषयक वर के समान मानते हो तो इन सबको माँग लो। तुम इस विशाल भूमि में वृद्धि प्राप्त करो। मैं तुम्हें इन सब विषय-भोगों को इच्छानुसार भोगने वाला बड़ा भोगी बनाये देता हूँ ॥२४॥

जो-जो इच्छाविषयीभूत पदार्थ मर्त्यलोक में दुर्लभ हैं उन सबको तुम अपने इच्छानुसार माँग लो। ये बहुविध वाद्यों सहित रथों तथा स्वर्ग की सुन्दरी स्त्रियाँ हैं, ये ऐसी सुन्दर स्त्रियाँ–अप्सराएँ मनुष्य प्राप्त नहीं कर सकते। मैं कहता हूँ कि तुम इन्हें ले जाओ, इन सबको बड़े प्रेम से तुमको भेंट कर रहा हूँ और इनसे अपनी सेवा-शुश्रूषा कराओ। नचिकेता ! मुक्तात्मस्वरूपविषयक प्रश्न मत पूछो ॥२५॥

श्वोऽभावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेजः।
अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ॥२६॥
न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा।
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ॥२७॥

तत्त्वप्रकाशिका—एवं प्रलोभ्यमानोऽपि नचिकेता शतायुष इत्यादेरुत्तरमाह—हे अन्तक ! **मर्त्यस्य** = मरणशीलस्य पुरुषस्य यत् एतत् ये एते पुत्रपौत्रपश्वादयः ते श्व अभावः, श्वोऽपि न विद्यते भावः सत्ता येषां ते श्वोऽभावाः क्षिप्रविनाशा इति यावत्, केवलमेतावत् किन्तु स्वसद्भावदशायाञ्च सर्वेन्द्रियाणां तेजः = सामर्थ्यं स्ववृद्धिक्षय-चिन्तया जरयन्ति च तस्मान्न ते मया प्रार्थ्याः।

स्वयञ्च जीव शरदो यावदिच्छसीत्यस्योत्तरमाह—अपि सर्वमिति। सर्वमतिजीवितं ब्रह्मकल्पपर्यन्तं जीवनमप्यल्पमेव, तस्यापि पर्यवसानं स्यात्। निरवधिकजीवनस्य

मोक्षादन्यत्राभावात्। तस्मात्तदपि न प्रार्थये। इमा रामा: सरथा: सतूर्या इत्यादेरुत्तरमाह— तवैवेति। वाहा रथास्तवैव तिष्ठन्तु ॥२६॥

महावित्ते लब्धेऽपि मनुष्यस्य तृप्त्यदर्शनात्। यदि नामास्माकं वित्ततृष्णा स्यात् लप्स्यामहे = प्राप्स्यामहे। चेत् यदि त्वाम् अद्राक्ष्म = दृष्टवन्तो वयं त्वद्दर्शनमात्रेण वित्तलाभो भविष्यतीति न पृथक् प्रार्थनीयमिति भाव:। जीवनमपि न पृथक् प्रार्थनीयं तस्य त्वदधीनत्वादित्याह—जीविष्याम इति। त्वं यावदीशिष्यसि तावज्जीविष्यामोऽतो नायं वरो वरणीय:। किन्तु मे = मया वरणीयस्तु वर: स एव य: प्राक् प्रार्थित: ॥२७॥

सान्वयानुवाद—अन्तक = हे मृत्यो ! श्वोऽभावा: = जो कल नहीं रहेगा नाशवान् पदार्थ, मर्त्यस्य = मरणधर्मा जीव के, सर्वेन्द्रियाणाम् = सारी इन्द्रियों का, यत् तेज: = जो तेज, एतत् जरयन्ति = उसको जीर्ण या क्षीण कर डालते हैं, अपि सर्वम् = और सब, जीवितम् अल्पम् एव = जीता हुआ थोड़ा ही है, तव वाहा: तव एव = (इसलिये) आप ही अपने घोड़े-वाहन इत्यादि, नृत्यगीते = अप्सराओं के नाच-गान अपने पास रखे रहें (मुझे नहीं चाहिये) ॥२६॥

मनुष्य: वित्तेन तर्पणीय: न = आदमी धन से तृप्त नहीं हो सकता, चेत् त्वा अद्राक्ष्म वित्तं लप्स्यामहे = यदि आपके दर्शन प्राप्त कर लिये हैं तब तो हम धन को भी प्राप्त कर ही लेंगे, यावत् ईशिष्यसि = आप जब तक प्राणियों का संहार करते रहेंगे तब तक, जीविष्याम: = हम जीते ही रहेंगे, मे = मेरे, वरणीय: वर: = माँगने लायक वर, तु = तो, स: एव = (मुक्तात्मस्वरूप विषयक) वही है ॥२७॥

व्याख्या—हे अन्तक ! मरणशील पुरुष के ये पुत्र-पौत्र, पशु इत्यादि सभी क्षणभङ्गुर-नाशवान् हैं। इनकी सत्ता कल तक भी नहीं रहेंगी, ऐसे जल्दी विनाश होने वाले पदार्थ हमें नहीं चाहिये। केवल इतना ही नहीं किन्तु अपनी सद्भाव दशा में सम्पूर्ण इन्द्रियों के सामर्थ्य को स्वकीय वृद्धि-क्षय चिन्तन से जीर्ण या क्षीण कर डालते हैं। इसलिये वे रथो, वाद्यों और सुन्दरी रमणियाँ मेरे लिए प्रार्थनीय नहीं हैं। आपने जो ब्रह्म कल्प पर्यन्त दीर्घ जीवन देना चाहा है वह भी थोड़ा ही है। ब्रह्मा का भी पर्यवसान होता है। निरवधिक जीवन का सुख मोक्ष में ही मिलता है, मोक्ष से अन्यत्र नहीं है। सबको लाँघकर जीता हुआ ब्रह्मा के कल्प तक का जीवन भी मुझे नहीं चाहिये। अतएव हम उसे भी नहीं चाहते। ये आपके रथ, हाथी, घोड़े, सोना-चाँदी, सुन्दरी स्त्रियाँ तथा इनके मधुर-मधुर नाच-गान, मुस्कान, चितवन, चलना, हँसना आदि आप अपने ही पास रखे रहें मुझे नहीं चाहिये ॥२६॥

हे भगवन् ! आप जानते ही हैं—मनुष्य धन से कभी भी तृप्त नहीं हो सकता। इस संसार में जितना धन-धान्य हैं, सोना हैं, चाँदी हैं, स्त्री है, पशु है वे सब-के-सब मनुष्य को प्रसन्न या तृप्त करने में समर्थ नहीं हो सकते। क्योंकि काम मनुष्य को बार-बार घायल करता रहता है। विषय-भोग के द्वारा कामना की शान्ति कभी नहीं होती— 'न जातु काम: कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते' ॥

(भा.९।१९।१४) आग में जितनी भी आहुति डालिये, आग उतनी ही बढ़ती जाती है। इसी तरह इन्द्रियों को जितना भी विषय-भोग दिया जाये उतनी ही ये बढ़ती हैं। हे प्रभो ! मुझे जब योग-क्षेम का प्रयोजन होगा तब आपके दर्शन मात्र से ही अपने-आप प्राप्त हो जायेगा। रही लम्बी आयु (अवस्था) की बात, तो जब तक प्राणियों के संहार रूप पद पर आपका शासन है, तब तक मुझे मरने का भी डर क्यों होने लगेगा ? अर्थात् डर नहीं लगेगा। मैं जीता ही रहूँगा। इसलिये मेरा प्रार्थनीय तो वह मुक्तात्मस्वरूपविषयक वर ही है, जो पहले आवेदन किया था। मैं उसे लौटा नहीं सकता ॥२७॥

अजीर्यताममृतानामुपेत्य जीर्यन् मर्त्यः क्वधःस्थः प्रजानन्।
अभिध्यायन् वर्णरतिप्रमोदाननतिदीर्घे जीविते को रमेत ॥२८॥
यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत्।
योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते ॥२९॥

इति कठोपनिषदि प्रथमाध्याये प्रथमा वल्ली ॥१-१॥

तत्त्वप्रकाशिका—अजीर्यतां = वयोहानिमप्राप्नुवतां जन्ममृत्युरहितानाम्। अत एव अमृतानां = मुक्तानाम्, उपेत्य = स्वरूपं ज्ञात्वा, प्रजानन् = आत्मानात्मवस्तुविवेकसम्पन्नः, जीर्यन् मर्त्यः = जरामरणवान्। तदास्थः = तेषु जरामरणाद्युपप्लुतेषु पुत्रादिष्वास्था स्थितिः तात्पर्येण वर्त्तनं यस्य स तदास्थः। ततोऽधिकतरं परमपुरुषार्थं दुष्प्रापमपि प्राप्तुमिच्छुः क्व तदास्थो भवेत्। न कथमपीत्यर्थः। यस्मादहं विवेकादिसम्पन्नः तस्मान्न पुत्रवित्तादिलोभैः प्रलोभ्योऽहमिति भावः। तत्रत्यान् वर्णरतिप्रमोदान्—वर्णाः = आदित्यवर्णत्वादिरूपविशेषाः, रतिप्रमोदाः = ब्रह्मभोगादिजनितानन्दविशेषाः, तान् सर्वान् अभिध्यायन् = निपुणतया निरूपयन्, अनतिदीर्घजीविते = अत्यल्प ऐहिके जीविते को विवेकी रमेत। न कोऽपीत्यर्थः ॥२८॥

प्रागुक्तमेव निर्धारयति—यस्मिन्निति। हे मृत्यो ! महति साम्पराये यस्मिन् मुक्तौ मुक्तस्यात्मस्वरूपमिदं कीदृशमस्ति न वेति। विचिकित्सन्ति = संशयं कुर्वन्ति तत् मुक्तस्वरूपमेव नो ब्रूहीति योजना। श्रुतिः स्वयमाह—य इति। योऽयं वरो गूढमात्मतत्त्वमनुप्रविष्टः प्राप्तस्तमेव नचिकेता वृणीते न तस्मादन्यमित्यर्थः ॥२९॥

इति कठोपनिषदि तत्त्वप्रकाशिकाटीकायां प्रथमाध्याये
प्रथमा वल्ली ॥१-१॥

सान्वयानुवाद—अजीर्यतां = जरा-मरणादि से रहित जन्म, अमृतानां = श्रीभगवद्भावापन्न महात्माओं के, उपेत्य = स्वरूप को जानकर, प्रजानन् = आत्म-अनात्म वस्तु विवेकसम्पन्न, क्व जीर्यन् मर्त्यः = कौन जरा-मरणवान् मनुष्य, तदास्थः = पुत्र-पौत्र इत्यादि, पशु-हाथी, घोड़े इत्यादि, सोने-चाँदी एवं महाभूमि में निष्ठा रखेगा, वर्णरतिप्रमोदान् = स्त्रियों के सौन्दर्य, क्रीडा, आमोद-प्रमोद, हाव-भाव, प्रेम-हास, विलास-चेष्टा एवं कटाक्ष आदि का; अभिध्यायन् = बार-बार ध्यान (चिन्तन) करता

ना, अनतिदीर्घे = बहुत थोड़ा, कः जीविते रमेत = कौन विवेकी जीवित रहने में
ण करेगा अर्थात् नहीं करेगा ॥२९॥

मृत्यो = हे यम !, यस्मिन् इदं विचिकित्सन्ति = जिसमें यह संशय करते हैं,
नुष्य सारे बन्धनों से छूटकारा पाकर (स्थूलकाय त्यागने के बाद) रहता है या नहीं।
त् महति साम्पराये तत् नः ब्रूहि = जो महान् साम्पराय (परलोकसम्बन्धी प्राप्ति) के
षय में है वह हमसे कहिये, यः अयं गूढं अनुप्रविष्टः वरः = जो यह गूढ अनुप्रविष्ट
र है, तस्मात् अन्यं वरं नचिकेताः न वृणीते = उससे भिन्न किसी दूसरे वर को
चिकेता नहीं माँगता ॥२९॥

व्याख्या—हे यमराज ! आप ही ठीक तरह विचार करके हमें बतलाइये—
आपके सदृश जन्म-जरा-मरणादि से शून्य श्रीभगवद्भावापन्न महात्मा (ब्रह्मा, नारद,
शिव, सनत्कुमार, कपिल, मनु, प्रह्लाद, जनक, भीष्म, बलि, वैयासकि एवं आप) के
दर्शन दुर्लभ सन्मार्ग एवं अमोघ सत्सङ्ग प्राप्त करके मृत्युलोक का जरा-मरणवान् ऐसा
कौन विवेकी मानव होगा जो उन सौ-सौ सालों की अवस्था वाले बच्चों-पोतों, बहुत-
से गाय आदि पशुओं, हाथी, घोड़े, सोना-चाँदी इत्यादि विषयों में आस्था तथा स्त्रियों
के सौन्दर्य, मुस्कान, चितवन, चाल, हास, हाव-भाव-कटाक्ष और आमोद में आसक्त
होकर इन्द्रियों के चक्कर में पड़कर उनकी ओर दृष्टिपात करेगा और इस लोक में थोड़े
समय तक जिन्दा रहने में आनन्द मानेगा ॥२८॥ नचिकेता कहता है—हे अन्तक !
जिस मुक्तात्मस्वरूप सम्बन्धी महान् साम्पराय (परलोकसम्बन्धी प्राप्ति) के विषय में
लोग संशय करते हैं कि—शरीर मर जाने के बाद उसमें जो चैतन्य है, उसका अस्तित्व
रहता है या नहीं, उसके सम्बन्ध में कृपाकर आप वह विप्रतिपत्ति हमें बतलावें। यह जो
मुक्तात्मस्वरूपविषयक प्रकृत वर है वह गुप्त है और सबके हृदय में प्रविष्ट है। जैसे कि
रूपादि विषय चक्षुरादि इन्द्रियों को नहीं जान पाते तद्वत्। उससे भिन्न और कोई वर
नचिकेता नहीं चाहता है। यह श्रुति का कथन है ॥२९॥

प्रथमाध्याय में प्रथम वल्ली समाप्त ॥१-१॥

•

अथ प्रथमाध्याये द्वितीया वल्ली

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषः सिनीतः।
तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥१॥

तत्त्वप्रकाशिका—एवं नचिकेतसो विषयाभिलाषराहित्यादयं ब्रह्मविद्यायोग्य इति
भावेन विषयकामनायुक्तस्य तद्रहितस्य च स्वरूपं निरूपयति—अत्र श्रेय इति ब्रह्म-
विद्योच्यते, निःश्रेयसः साधनत्वात्। प्रेय इति प्रीतिविषयं पुत्रादिकाम्यमुच्यते। उत-
शब्दश्च शब्दार्थः। एवशब्दोऽवधारणार्थः। श्रेयोऽन्यद् विलक्षणमेव प्रेयस इति शेषः।
प्रेयश्च श्रेयसोऽन्यदेव। कथं श्रेयःप्रेयसोः परस्परं वैलक्षण्यमित्यत आह—त उभे इति।

ते उभे = श्रेय:प्रेयसी नानार्थे = भिन्नप्रयोजने मोक्षतदितराख्यविलक्षणप्रयोजनविषये, पुरुषं = जीवं, सिनीत: = बध्नीत: । षिञ् बन्धने धातु: । किन्ततस्तदुभयमाददानस्य फलमाह—तयोरिति । तयो: = श्रेय:प्रेयसोर्मध्ये य: पुरुष: श्रेय एवादत्ते साधु = भद्रं मोक्षाख्यं भवति । य उ यश्च प्रेय एव वृणीते स अर्थात् मोक्षाख्यप्रयोजनात् हीयते = हीनो भवति ॥१॥

सान्वयानुवाद—श्रेय: अन्यत् = श्रेय अर्थात् ब्रह्मविद्या, नि:श्रेय का साधन भिन्न है, उत प्रेय: अन्यत् एव = प्रीति का विषय पुत्रादि इच्छाविषयीभूत भोग्य पदार्थ उससे अलग ही है, ते उभे = वे दोनों (श्रेय और प्रेय), नानार्थे पुरुषं सिनीत: = भिन्न प्रयोजन में पुरुष को बाँधते हैं । तयो: = उन दोनों में से, य: = जो, श्रेय: = ब्रह्मविद्या को चाहता है उसका, साधु = मोक्षाख्य फल लाभ होता है, प्रेय: आददानस्य = विषय-भोग को ग्रहण करने वाले का, हीयते = सब-का-सब हीन हो जाता है, वृणीते = क्योंकि वह असत् (तुच्छ) सांसारिक विषय-भोग को माँगता है ॥१॥

व्याख्या—इस संसार में श्रेय और प्रेय ये दो पदार्थ हैं । 'श्रेय' उसको कहते हैं जिस विद्या के द्वारा सब तरह के दु:खों से सर्वथा छूटकर सर्वनियन्ता आनन्दमय परमात्मा श्रीकृष्ण को प्राप्त करने के उपाय किये जाते हैं । प्रेय—विषयों का भोग अर्थात् स्त्री, पुत्र, धन-सम्पत्ति, मकान, नाम, यश-प्रतिष्ठा-सम्मान एवं प्राकृत हर तरह के सुखभोग की सामग्रियों को प्रेय शब्द से सम्बोधित किया जाता है । इसी तरह अपने-अपने ढंग से मनुष्य को सुख पहुँचा सकने वाले ये दोनों साधन आदमी को बाँधते हैं । उसे अपनी-अपनी ओर खींचते रहते हैं । प्रेय वस्तु को चाहने वाला कभी भगवदुपासक नहीं हो सकता । अधिकांश लोग तो प्रीति का विषय (पुत्रादि) भोगों में प्रत्यक्ष और तुरन्त सुख को प्राप्त करते हैं । उसका परिणाम सोचे-समझे बिना ही प्रेय की ओर जो खिंच जाते हैं वे कुमनीषी हैं । लेकिन जो ज्ञानवान् एवं दयावान् पुरुष हैं वे इन प्राकृत विषयभोगों की आपातरमणीयता एवं परिणामदु:खता का रहस्य जानकर उनसे डरकर विरक्त होकर छूटने के लिये ही श्रेय की ओर आकर्षित होते हैं । उन दोनों को ग्रहण करने वाले का फल बतलाते हैं—

श्रेय और प्रेय इन दोनों के बीच में जो पुरुष श्रेय को ही अङ्गीकार करता है उसको मोक्षाख्य फल मिलता है और जो प्रेय को ही स्वीकार करता है वह मोक्षाख्य प्रयोजन से हीन हो जाता है ।

जो पुरुष समस्त कामनाओं का परित्याग कर स्पृहाशून्य, ममतारहित एवं निरहङ्कार होकर विचरण करता है अर्थात् जीवन यात्रा का निर्वाह करता है वह पुरुष शान्ति को प्राप्त करता है (गीता २।७१) । जो भगवत्प्रपन्न ऐकान्तिक उपासक होते हैं वे परमात्मा से कुछ नहीं चाहते हैं, यहाँ तक कि मुक्ति भी नहीं माँगते हैं । (श्रीमद्भा.८।३।२०)

जो सर्वेश्वरेश्वर दुराराध्य भगवान् विष्णु की सम्यक् आराधना कर उनसे

मनोग्राह्य—काम्य भोग्य विषय माँगता है वह कुमनीषी है। क्योंकि वह विषय-भोग असत् है, तुच्छ है। (श्रीमद्भा.१०।४८।११)

श्रेयश्च प्रेयश्च मनष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ॥२॥

तत्त्वप्रकाशिका—तदेव विशदमाह—श्रेयश्च प्रेयश्चेत्येतौ मनुष्यमेतः = प्राप्नुतः। तदा धीरः बुद्धिमान् पुमान् तौ प्राप्तौ श्रेयः प्रेयो रूपार्थौ सम्परीत्य = सम्यक् ज्ञात्वा, विविनक्ति = विवेचयति। हंसो यथाऽम्भसः सकाशात् क्षीरं विविच्य भुङ्क्ते। तथा प्रेयसः सकाशाद् विविच्य = ज्ञात्वा बुद्धिमान् पुरुषः श्रेय उपादत्त इति भावः। एवं विवेकान्तरं धीरः प्रेयसः प्रेयः परित्याज्य श्रेय एव वृणीते। यस्तु मन्दः = अल्पबुद्धिः विवेकासामर्थ्यात् योगक्षेमात्मकं प्रेय एव वृणीते। अलभ्यलाभो योगः। योगस्य प्राप्तस्य रक्षणं क्षेमः ॥२॥

सान्वयानुवाद—श्रेयः च प्रेयः च मनुष्यं एतः = श्रेय और प्रेय ये दोनों वस्तुएँ मनुष्य के पास आती हैं। धीरः तौ सम्परीत्य विविनक्ति = बुद्धिमान् पुरुष उन दोनों वस्तुओं को भलीभाँति जानकर विवेचन करता है। धीरः श्रेयः हि प्रेयसः अभिवृणीते = विवेकी पुरुष श्रेय को ही प्रेय से अधिक आदर करता है, अतः वह श्रेय वस्तु को ही चाहता है। मन्दः योगक्षेमात् प्रेयः वृणीते = अल्पबुद्धिवाला मनुष्य योगक्षेम चलाने के हेतु से प्रेय को ही माँगता है ॥२॥

व्याख्या—यमुनाभ्राता यम कहते हैं—नचिकेता! श्रेय और प्रेय ये दो पदार्थ मनुष्य के सन्मुख आते हैं। तब धीर बुद्धिमान् पुरुष उन दोनों मिले हुए श्रेयरूप और प्रेयरूप पदार्थों पर ठीक तरह से विचार करके दोनों को अलग-अलग कर निर्मल चित्त से जानने की चेष्टा करता है। जैसे हंस पानी से दूध को अलग कर पी जाता है, वैसे ही विद्वान् प्रेय से श्रेय को अनुत्तम समझकर श्रेय को ही ग्रहण करता है और प्रेय का परित्याग कर देता है। जो अल्प बुद्धि वाला मनुष्य है वह विवेकशील न होने के कारण जीवनयात्रा निर्वाह के लिए प्रेय को ही स्वीकार करता है। अलभ्य वस्तु की प्राप्ति को योग कहते हैं। प्राप्त वस्तु की रक्षा करना क्षेम कहलाता है। श्रेय और प्रेय इन दोनों में से श्रेय ग्रहण करने वाले मानव का प्रभूत कल्याण साधित होता है और प्रेय ग्रहण करने वाला अपने दुर्लभ मानव जन्म के ध्येय से बारम्बार संसार रूपी कूप में गिरता है अर्थात् प्रेय के पीछे पड़ने वाला मनुष्य कभी भी शान्ति को प्राप्त नहीं हो सकता। 'स शान्तिमाप्नोति न कामकामी'। (गीता ०२।७०)

इसलिये विवेकी मनुष्य प्रेय का अनादर करके श्रेय को ही स्वीकार करते हैं और अपने जीवन को सफल बनाते हैं।

स त्वं प्रियान् प्रियरूपाꣳश्च कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः।
नैताꣳ सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः ॥३॥

तत्त्वप्रकाशिका—यत्प्रशंसार्थमेतदुक्तं तमिदानीं प्रशंसति—हे नचिकेतः! स

मया प्रलोभितोऽपि प्रियान् तत्र हेतुः प्रियरूपान् मनोहररूपान् कामान् काम्यान् मया दत्तानपि अभिध्यायन् चिन्तयन् तेषामनित्यत्वासारत्वादिदोषान् अत्यस्राक्षीरतिसृष्टवानसि = परित्यक्तवानसि। एतां मया दत्तां वित्तमयीं सृङ्कां शृङ्खलां नैवाप्तः। यद्यन्येऽपि नैवाप्तास्तर्हि को विशेषोऽस्येत्यत आह—यस्यामिति। यस्यां वित्तमयी शृङ्खलायां बहवो मनुष्या मज्जन्ति तथा शृङ्खलया आत्मानं बध्नन्तीत्यर्थः ॥३॥

सान्वयानुवाद—नचिकेतः = हे नचिकेता! सः = मेरे द्वारा वरों से प्रलोभित किये जाने पर भी, त्वम् अभिध्यायन् = तूने अच्छी तरह विचार करके, प्रियान् = प्रिय लगने वाले, च = और, प्रियरूपान् = अत्यन्त सुन्दर मनोहर रूपवाले, कामान् = इच्छाविषयीभूत पदार्थ अर्थात् प्रिय और प्यारे दीखने वाले भोगों को, अत्यस्राक्षीः = छोड़ दिया है, एतां वित्तमयीं सृङ्कां = इस सम्पत्तिमयी शृङ्खला (बेड़ी) को, न अवाप्तः = नहीं प्राप्त हुये, यस्यां बहवः मनुष्याः मज्जन्ति = जिसमें बहुत-से लोग बँध जाते हैं ॥३॥

व्याख्या—यमराज कहते हैं—हे नचिकेता! मैंने भोग सम्बन्धी वरों से तुमको प्रलोभित किया परन्तु तुमने उनको स्वीकार नहीं किया। तुम बड़े ही बुद्धिमान्, आत्म-अनात्म वस्तु विवेकसम्पन्न विवेकी तथा वैराग्य से सम्पन्न हो।

मैंने बड़ी ही लुभावनी भाषा में तुम्हें बारम्बार पुत्र, पौत्र, हाथी, घोड़े, गौएँ, स्वर्ण-चाँदी, धन-सम्पत्ति, विशाल भूमि इत्यादि बहुत-से पदार्थ एवं दुष्प्राप्य और लोभनीय विषयभोगों का प्रलोभन दिया; इतना ही नहीं, स्वर्ग के दिव्य भोगों—सुन्दरी स्त्रियों के साथ चिरकालीन स्त्रीसङ्ग भोगसुख का लालच दिया, लेकिन तुमने सहज ही उन सबकी उपेक्षा कर दी।

तुमने प्रेय का परित्याग कर श्रेय को ग्रहण किया, अतः तुम अवश्य ही भगवत्तत्त्व का श्रवण करने के सर्वोत्तम अधिकारी हो। इससे तुम्हारे इस दुर्लभ मनुष्य जन्म का कल्याण साधित होगा ॥३॥

दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता।
विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्त ॥४॥

तत्त्वप्रकाशिका—श्रेयःप्रेयसोः स्वरूपं निरूपयन् उभे नानार्थे इत्युक्तमेव विवृणोति—या प्रेयोरूपा अविद्या विद्याविरुद्धेति विज्ञाता। या च श्रेयोरूपा विद्येति विद्वद्भिः। ते एते श्रेयप्रेयसी। दूरं विपरीते अतिविरुद्धे। विरुद्धत्वमेव विवृणोति—विषूची इति। विरुद्धफलहेतुरित्यर्थः। तत्राहं नचिकेतसं विद्याभीप्सिनं विद्यार्थिनमेव मन्ये। विद्याभीप्सितमिति वा पाठ आहिताग्न्यादित्वान्निष्ठान्तस्य परनिपातश्छान्दसत्वाद्वा। कुतः? त्वा = त्वां, बहवः कामा न लोलुपन्त = न लोलुपन्ति, न प्रलोभयन्तीति यावत् ॥४॥

सान्वयानुवाद—या अविद्या = जो अविद्या (अज्ञान), च विद्या इति ज्ञाता =

और विद्या (ज्ञान) नाम से प्रसिद्ध हैं, एते विपरीते विषूची दूरम् = ये दोनों विपरीत तथा भिन्न परिणामवाली हैं। नचिकेतसं विद्याभीप्सिनं मन्ये = मैं नचिकेता को अधिकारी विद्यार्थी मानता हूँ, क्योंकि त्वा बहवः कामाः न लोलुपन्त = तुझे बहुत-से भोग की कामनाओं-इच्छाओं ने भी नहीं ललचाया ॥४॥

व्याख्या—यमराज आगे वर्णन करते हैं—इस संसार में अविद्या और विद्या ये दो तरह के ज्ञान हैं। अविद्या वह ज्ञान है कि इस परिदृश्यमान जगत् में जो जागतिक विषयसुख को देने वाला भौतिक पदार्थ का ज्ञान है, इससे मनुष्यों को हर तरह का जागतिक सुख मिलता है। आज-कल की व्यावहारिक या सामाजिक भाषा में इसको 'विज्ञान' कहते हैं। जो कि यह अज्ञान है। इस विज्ञान से सब तरह के यहाँ के साधन-सुख-उपभोग मिल सकते हैं। गाड़ी, मोटर, हाथी, घोड़ा इत्यादि नाना प्रकार के यन्त्र और जो कुछ भी जागतिक सुख के साधन हैं उन सबको विज्ञान कहते हैं एवं मनुष्यों को प्राप्त होते हैं। इसका नाम अविद्या है अर्थात् अनात्मविद्या है। विद्या वह है कि जिससे आत्म-परमात्म का ज्ञान होता है। 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्'। 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्'। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'। इस आत्म-परमात्मस्वरूप का ज्ञान विद्या शब्द से विख्यात है। इसलिये विवेकी मनुष्यों को चाहिये कि वे सबसे पहले भलीभाँति विचार करके ही इनका ग्रहण करें। इन दोनों में से जो उनको पसन्द हो।

नचिकेता ने व्यावहारिक सब तरह के सुखोपभोगों को दुःखरूप समझकर उनका परित्याग कर दिया। हे नचिकेता! मैं मानता हूँ कि तुम आत्म-परमात्मविद्या के वास्तविक विद्यार्थी हो। क्योंकि बहुत-से बड़े-बड़े भोग भी तुम्हारे मन में यत्-किञ्चित् भी लोभ पैदा नहीं कर सकें ॥४॥

अविद्यायामन्तरे वर्त्तमानाः स्वयं धीराः पण्डितं मन्यमानाः।
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः ॥५॥

तत्त्वप्रकाशिका—श्रेयःकाम एव श्रेष्ठ इति भावेन प्रेयः कामान् निन्दति—काम्यकर्मादिलक्षणमविद्यायामन्तरे मध्ये घनीभूते इव तमसि वर्त्तमानाः पुत्रपश्वादि-तृष्णापाशशतैः स्वयं वयं धीराः प्रज्ञावन्तः पण्डिताः शास्त्रदक्षाश्चेति मन्यमानाः, ते दन्द्रम्यमाणाः = वक्रगतयः, मूढाः = जरामरणभोगादिदुःखैः अविवेकिनः, परियन्ति = परिगच्छन्ति। ननु बहूनामेवं प्रवृत्तेः कथमियं प्रवृत्तिः स्यादित्यत्र दृष्टान्तमाह—अन्धेनैवेति। अन्धेन = दृष्टिविहीनेनैव नीयमाना विषमे पथि यथा बहवोऽन्धा महान्तमनर्थ-मृच्छन्ति तद्वत् ॥५॥

सान्वयानुवाद—अविद्यायाम् अन्तरे वर्त्तमानाः = अविद्या के बीच में रहते हुये, स्वयं धीराः पण्डितं मन्यमानाः = अपने-अपको बड़े बुद्धिमान् पण्डित समझने वाले, मूढाः दन्द्रम्यमानाः परियन्ति = वे मूर्खलोग टेढ़े रास्ते में ही हमेशा ठोकरें खाते हुए भटकते रहते हैं। अन्धेन एव नीयमानाः यथा अन्धाः = जैसे अन्धे मनुष्य के द्वारा ले

जाते हुए बहुत-से अन्धे किसी चट्टान, दीवाल और पशु आदि से टकराकर हर तरह के बड़े दुःख भोगते हैं ।।५।।

व्याख्या—इस प्रकार अविद्या के बीच में अर्थात् जागतिक भोगसाधनों में फँसने वाले मनुष्य अपने-आपको बड़े वैज्ञानिक समझकर घमण्ड करते हैं। वे समझते हैं कि हम बड़ी-बड़ी ज्ञान-विज्ञान की वस्तुओं का आविष्कार करते हैं। परन्तु वे आत्म-परमात्मज्ञान की दृष्टि से गाँव के गँवार से भी अधम होते हैं। वे मूर्खलोग ठोकरें खाते हुये पशु, पक्षी, पतङ्ग इत्यादि बहुविध दुःखपूर्ण योनियों में भटकते रहते हैं। जैसे अन्धे पुरुष द्वारा ले जाते हुए अन्धे बीच में ही ठोकरें खाते हुए भटकते हैं और काँटें-कङ्कड़ों से बींध कर गहरे गड्ढे आदि में गिर जाते हैं ।।५।।

इसलिये श्रीमद्भागवत में कहा गया है—

'दृष्टं श्रुतमसद् बुद्ध्वा नानुध्यायेन्न संविशेत्।
संसृते चात्मनाशं च तत्र विद्वान् स आत्मदृक्' ।।

इस लोक में जो कुछ भी देखा और सुना जाता है, उसको असद् समझकर न तो उसका चिन्तन करना चाहिये और न भोग करना चाहिये, क्योंकि यदि उसके चिन्तन और भोग में लग जायेंगे तो जन्म-जरा-मरण होते रहेंगे और आत्म-परमात्मज्ञान बिखर जायेगा। जो सुखोपभोग से विरक्त होता है वही आत्मज्ञानी होता है।

न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्।
अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे ।।६।।

तत्त्वप्रकाशिका—परे काले देहपतनाद् ऊर्ध्वं सम्यक् इयते गम्यते इति साम्परायः = परलोकः, बालम् = अविवेकिनं प्रति न प्रतिभाति = न प्रकाशते। प्रमाद्यन्तं = पुत्रधनादिष्वासक्तमनसं, तथा वित्तमोहेन = वित्तनिमित्तेनाविवेकेन, मूढम् = तमसाच्छन्नं सन्तमयमेव लोकोऽस्ति परलोको नास्तीति मन्यमानः पुनः पुनर्जनित्वा वशं = मदधीनतामापद्यते ।।६।।

सान्वयानुवाद—वित्तमोहेन प्रमाद्यन्तं बालं मूढं = धन के मोह से प्रमाद करने वाले गाँव के गँवार से भी अधम मूर्ख को, साम्परायः न प्रतिभाति = परलोक नहीं सूझता, अयं लोकः परः नास्ति इति मानी = यह लोक है, परलोक नहीं है—ऐसा मानने वाला मूर्ख, पुनः पुनः मे वशम् आपद्यते = बार-बार मेरे (यम के) वश में आता है ।।६।।

व्याख्या—शास्त्रकारों ने चार प्रकार की बातों को मद बढ़ाने वाली बताया है। एक तो उत्तम कुल में जन्म, दूसरी प्रभुता = हुकूमत, तीसरी विद्या और चौथी धन। 'जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान्'। मनुष्यों में जब इन चारों चीजों का मद आ जाता है तब वे मूढता को प्राप्त होते हैं। उनको परलोक नहीं सूझता, भगवान् का नाम नहीं भाता। वे हमेशा नशे में रहते हैं। ये भोगी यही मानते हैं कि बस, यही एक लोक है,

परलोक नहीं है। इस प्रकार मानने वाले अभिमानी मनुष्य बारम्बार यमपाश में जकड़ जाते हैं। भूख-प्यास से व्याकुल, सूर्य और दावानल की गरम-गरम वायु से तपता हुआ तथा तपी हुई बालू के मार्ग पर विवश होकर चलना पड़ता है। नहीं चलने पर पीछे से कोड़ों की मार पड़ती है। उस मार्ग में न कहीं विश्रामस्थान है और न पीने को पानी मिलता है। इस प्रकार प्रमादी, पापी एवं अभिमानी पुरुष बड़े कष्ट से यमलोक पहुँचाया जाता है। वहाँ कर्मानुसार नरकों की यातना भोगकर फिर नीच योनियों में जन्म लेते हैं। यमराज के दूत हाथ में पाश लेकर जब मनुष्यों को लेने जाते हैं तो यमराज धीरे से बुलाकर उनके कान में कहते हैं कि जहाँ भगवन्नाम का संकीर्तन होता हो, भगवान् की सुमधुर लीलाकथा में मनुष्य मग्न हो वहाँ भूलकर भी मत जाना और न उन्हें मेरे यहा यहाँ लाना।

'जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविन्दम्।
कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान्' ॥

जिनकी जिह्वा कभी भगवान् का गुणगान नहीं करती, न भगवान् के मङ्गलमय नाम का उच्चारण करती है और न जिनका चित्त कभी भगवान् के चरणारविन्द का स्मरण करता है, जिनके मस्तक भगवान् श्रीकृष्ण के चरणकमल में कभी नहीं झुकते तथा जिन्होंने कभी भगवान् श्रीकृष्ण के पूजन आदि कृत्य नहीं किये ऐसे दुष्ट प्रकृति वाले पुरुषों को मेरे समीप लाना (श्रीमद्भा. ६।४।२९) ॥६॥

श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यन्न विद्युः।
आश्चर्यो वक्ता कुशलोऽस्य लब्धाऽऽश्चर्यो ज्ञाता कुशलानुशिष्टः ॥७॥

तत्त्वप्रकाशिका—श्रवणायापि श्रवणार्थं श्रोतुमपि यो न लभ्य आत्मा बहुभिरनेकैः प्राणिनां मध्ये बहूनां प्राणिनां भगवद्विषयकश्रवणमपि नास्ति। अस्ति केषाञ्चिच्छ्रवणं तथाऽपि न साम्परायः। तेषां यथार्थतः प्रतिभातीत्याह—शृण्वन्तोऽपीति। शृण्वन्तोऽपि बहवोऽनेकेऽन्ये आत्मानं न विद्युः = न विदन्ति। कुत इत्यतो वक्तृदौर्लभ्यादित्याह—आश्चर्य इति। कुशलेन गुरुणाऽनुशिष्टोऽस्य आत्मत्वस्य यथार्थतो ज्ञाता। ज्ञानानुसारेणास्य वक्ता आश्चर्यो दुर्लभः। कुशलोऽस्य लब्धा गुरूक्तप्रकारेण ज्ञाता श्रोतोऽपि आश्चर्य इति योजना ॥७॥

सान्वयानुवाद—यः = जो, श्रवणाय = सुनने के लिये, अपि = भी, बहुभिः = बहुतों को, लभ्यः न = प्राप्त नहीं होता, शृण्वन्तः = सुनकर, अपि = भी, बहवः यं न विद्युः = बहुत-से लोग जिसको नहीं जानते, अस्य लब्धा = इसको प्राप्त करने वाला, कुशलः वक्ता आश्चर्यः = सही कहने वाला (भी) विरला है। कुशलानुशिष्टः ज्ञाता आश्चर्यः = कुशल गुरु से जिसे उपेदश मिला है। आश्चर्य है ॥७॥

व्याख्या—परमात्मतत्त्व की दुर्लभता बतलाने के लिए यमराज ने कहा—'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः'। सबसे पहले बताया

गया—परमात्मा की प्राप्ति में मुख्य साधन श्रद्धा—'आत्मा वा अरे श्रोतव्यः' = आत्मा का श्रवण करना चाहिये (बृहदारण्यक २।४।५)।

'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः' ॥

हजारों मनुष्यों के बीच में कोई एक मोक्ष के लिए यत्न करता है और उन यत्नशील सिद्धों के बीच में भी कोई एक मुझको तत्त्व से जानता है। (गीता ७।३)

आगे यमराज कहते हैं—'आश्चर्यो वक्ता आश्चर्यो ज्ञाता'। महर्षि श्रीकृष्णद्वैपायन वेदव्यास जी ने परमात्मा को सर्वाश्चर्यमय बतलाया है—

'मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते'। (श्रीमद्भा.१।८।१६) जैसे हम सब भूत हैं, परमात्मा महाभूत हैं। हम सब पुरुष हैं, परमात्मा महापुरुष हैं। यहाँ मयट् प्रत्यय प्राचूर्यार्थ है। इसमें आश्चर्य की कोई बात नहीं है।

न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः।
अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान् ह्यतर्क्यमणुप्रमाणात् ॥८॥

तत्त्वप्रकाशिका—सन्ति च शतशः विद्वद्गोष्ठिवरिष्ठा वेदान्तनिष्णाता बहवस्ते एवास्य वक्तारो भविष्यन्तीति कथं दुर्लभतेत्यत आह—न नरेणेति। अवरेण = हीनेन प्राकृतेन स्वपाण्डित्यख्यापनायाधीतवेदान्तेन, नरेण = देहात्माभिमानिना, एषः = आत्मा, प्रोक्तः = उपदिष्टः, सुविज्ञेयो न भवति = सुष्ठु सम्यक् विज्ञेयो विज्ञातुं शक्यो न हि भवतीत्यर्थः। कुतः? यस्माद् बहुधा चिन्त्यमानः। शून्यवादिव्यतिरिक्तवादिभिरस्तीति चिन्त्यमानस्तैर्नास्ति इति। चिन्त्यमानस्तत्रापि वादिनां विप्रतिपत्तयः सन्ति। तस्माद् विप्रतिपत्तिमता ह्युपदिष्ट आत्मा न लब्धुं शक्य इति भावः।

केनाचार्येणोपदिष्टो ज्ञातव्य इत्यत आह—अनन्यप्रोक्त इति। अनन्येन = भगवदेकमात्रनिष्ठेन निवृत्तिपथाधिरूढेन ब्रह्मसाक्षात्कारिणाऽऽचार्येण प्रोक्ते = उक्ते आत्मतत्त्वे गतिः पूर्वोक्तविकल्पविषयचिन्ता अत्र = आत्मनि नास्ति। यद्वा अनन्येनाचार्येणोपदिष्ट आत्मनि अत्र संसारे गतिः = गमनागमनं नास्ति। ननु येन केनाप्युपदिष्टेऽप्यात्मनि तर्कात्तन्निश्चयो भविष्यतीत्यत आह—अणीयानिति। तोऽणुप्रमाणादप्यणीयानात्माऽतस्तत्स्वरूपं न तर्कगोचरम् ॥८॥

सान्वयानुवाद—अवरेण नरेण प्रोक्ते = अनधिकारी मनुष्य के द्वारा उपदेश किये जाने पर, बहुधा चिन्त्यमानः = (और) उसके द्वारा बहुत प्रकार से चिन्तन किये जाने पर, (भी) एषः सुविज्ञेयः न = यह आत्मा—भगवत्तत्त्व सम्यक् ज्ञान का विषय नहीं हो सकता। अनन्यप्रोक्ते गतिः = अकिञ्चन सत्पुरुष के द्वारा उपदेश किये जाने पर भागवती गति की प्राप्ति होती है। अत्र नास्ति = फिर दुबारा इस संसार में आवागमन नहीं होता, हि अणुप्रमाणात् अतर्क्यम् = यह बिल्कुल सत्य है कि आत्मस्वरूप तर्क का विषय नहीं है, अणु प्रमाण से भी अतिशय अणु (सूक्ष्म) आत्मा है ॥८॥

व्याख्या—कोई गाँव के गँवार या आम्नायवादी, पण्डितम्मानी अर्थात् अपने-आप को बड़ा भारी विद्वान् मानने वाले ये मूर्ख लोग तथा तन्त्र इत्यादि का सहारा लेने वाले हीन जन लोग यदि शिष्यों को आत्मोपदेश देना शुरू कर दे तो सुविज्ञेय कदापि नहीं हो सकता। यदि निवृत्तिपथाधिरूढ ब्रह्मनिष्ठ जन आत्मोपदेश करे तो सद्गति मिलती है, जिस सद्गति को प्राप्त करने के बाद जहाँ से फिर दुबारा इस संसार में लौटना नहीं पड़ता।

'तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम्॥
तत्र भागवतान् धर्मान् शिक्षेद् गुर्वात्मदैवतः।
अमाययाऽनुवृत्त्या यैस्तुष्येदात्माऽऽत्मदो हरिः' ॥

(श्रीमद्भा.११।३।२१-२२)

इसलिये उत्तम श्रेय को जानने की इच्छा वाला अधिकारी गुरु की शरण में जाय। गुरु ऐसा हो कि शब्दब्रह्म एवं परब्रह्म में निष्णात हो और उसमें उपशम = शान्तस्वभाव तथा निवृत्तिमार्गपरायणता भी होनी चाहिये। वहाँ गुरु को ही देवतात्मा समझकर और छल-कपट छोड़कर उसकी सेवा-शुश्रूषा करे। अधिकारी व्यक्ति ऐसे ही गुरु से भागवत धर्मों (भगवत्स्वरूपगुणादि) को सीखे। जिनसे परमात्मा भगवान् मुकुन्द बहुत प्रसन्न होते हैं।

नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ।
यां त्वमापः सत्यधृतिर्बतासि त्वाङ्ङ्नो भूयान्नचिकेतः प्रष्टा॥९॥

तत्त्वप्रकाशिका—तदेव विवृणोति—अन्येन = ब्रह्मदर्शिनोपदिष्ट आत्मनि उत्पन्ना मतिर्नैषा तर्केण = स्वबुद्ध्यभ्यूहमात्रेणापनेया न प्रापणीया = न परिणेयेति यावत्। अतस्तर्कनिष्णातेनाप्यात्मतत्त्वं स्वयं ज्ञातुं न शक्यते। हे प्रेष्ठ = प्रियतम! अन्येनाचार्येणोपदिष्टा मतिः सुज्ञानाय = मोक्षसाधनज्ञानाय भवति। का पुनः सा तर्कागम्या मतिरित्यत्राह—यां त्वमिति। यां मतिं त्वं मद्वरप्रदानेनापः = प्राप्तवानसि। सत्यावितथविषया धृतिर्यस्य स तथोक्तः। त्वं न चाल्पधैर्यवानसि। बत = इत्यनुकम्पायाम्। हे नचिकेतः! त्वादृक् = त्वत्सदृशः प्रष्टा (नोऽस्मभ्यं) भूयान्न = न भविष्यतीत्यर्थः॥९॥

सान्वयानुवाद—प्रेष्ठ = हे प्रियतम! एषा = यह, मतिः = बुद्धि, तर्केण = तर्क से, न आपनेया = नहीं मिल सकती। अन्येन = भगवत्तत्त्वज्ञ गुरु के द्वारा, प्रोक्ता एव सुज्ञानाय = बतलाये जाने पर ही यह मोक्ष का साधन ज्ञान के लिए होता है। यां त्वम् आपः = जिसे तुमने प्राप्त किया है। बत = यह अनुकम्पा में है। नचिकेतः = हे नचिकेता! सत्यधृतिः असि = तुम सम्यक् धैर्यवान् हो, त्वादृक् प्रष्टा नः भूयात् = तुम्हारे सदृश ही पूछने वाला हमें मिलता रहे॥९॥

व्याख्या—जो वस्तु अतर्क्य और सूक्ष्म है उसके विषय में कदापि तर्क नहीं करना चाहिये। शब्दब्रह्म एवं परब्रह्म में निष्णात उपशमशील गुरु के द्वारा बताये जाने

पर ही मति (बुद्धि) मोक्ष के साधन ज्ञान के लिये होता है। हे नचिकेता ! तुम सचमुच निस्सन्देह सम्यक् धैर्यवान् हो। क्योंकि तुमने सुख के इतने प्रलोभन मनोविलास को छोड़ दिया। हमें तेरे समान प्रश्न (आत्मपरमात्मविषयक) पूछने वाला शिष्य ही बार-बार मिला करें ॥९॥

जानाम्यहꣳ शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत्।
ततो मया नाचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥१०॥

तत्त्वप्रकाशिका—नाहं त्वत्पृष्टं वक्तुमसमर्थस्त्वां विषयैः प्रलोभितवान् किन्तु त्वत्परीक्षणार्थमेव यतस्त्वत्पृष्टं जानामीत्याह—जानाम्यहं शेवधिर्निधिः। अत्र शेवधि-शब्दः कामनाविषयत्वगुणयोगात्कर्मफलं निर्वक्ति तथा च कर्मफललक्षणो निधिरिव प्रार्थ्यते। स चानित्य इति जानामि हि यस्माद् अध्रुवैरनित्यसाधनैर्ध्रुवं तत् नित्यमात्मतत्त्वं न प्राप्यते। ततस्तस्मान्मया परब्रह्मावाप्तिकारणज्ञानोद्देशेनानित्यैरिष्टकादिद्रव्यैर्नाचि-केतोऽग्निश्चितस्तस्माद्धेतोर्नित्यफलसाधनं ज्ञानं प्राप्तवानस्मीत्यर्थः। अतः परब्रह्मप्राप्तेर्ज्ञानैकसाध्यत्वस्य न विरोधः ॥१०॥

सान्वयानुवाद—अहं जानामि = मैं जानता हूँ, शेवधिः अनित्यम् इति = खजाना अनित्य है ('निधिर्ना शेवधिर्भेदाः' इत्यमरः)। हि अध्रुवैः तत् ध्रुवं न हि प्राप्यते = अनित्य वस्तुओं से वह नित्य वस्तु आत्मा नहीं मिल सकती। ततः = इसलिये, मया = मेरे द्वारा, अनित्यैः द्रव्यैः नाचिकेतः अग्निः चितः = अनित्य द्रव्यों से नाचिकेत नामक अग्नि का चयन किया गया। नित्यं प्राप्तवान् अस्मि = नित्य वस्तु आत्मा को प्राप्त हो गया हूँ ॥१०॥

व्याख्या—यमराज कहते हैं कि—खजाना अनित्य है अर्थात् सभी भोगसाधन अनित्य हैं। जब तक मनुष्य इन अनित्य विषय भोगसाधनों में आसक्त रहेगा तब तक उन्हें नित्य वस्तु भगवान् नहीं मिल सकते। आगे कहते हैं—मैंने अनित्य साधनों के द्वारा नाचिकेताग्नि का चयन किया, नित्य वस्तु भगवान् को प्राप्त कर लिया। इसका तात्पर्य यहाँ यही है कि श्रीभगवान् ने कहा है—'अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्'। (गीता ९।३३) यह लोक अनित्य है, इसमें कोई सुख नहीं है। इस संसार में दुःख-ही-दुःख है। तुम नर बनकर इसमें आये हो, अतः मेरा भजन करो।

'यत् कृतं यत् करिष्यामि तत्सर्वं न मया कृतम्।
त्वया कृतं तु फलभुक् त्वमेव मधुसूदन' ॥

जो कुछ मैंने किया और आगे जो करूँगा वह सब वस्तुतः मैंने बिल्कुल नहीं किया और न करूँगा; वह तो आपने किया है। अतः हे मधुसूदन ! आप ही फल के भोक्ता हैं। 'यदत्र क्रियते कर्म भगवत्परितोषणम्'। 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' ॥

भगवान् श्रीकृष्ण ने गोपियों से कहा—उपकार-प्रत्युपकार की भावना रखकर जो भजन करते हैं उसमें स्वार्थ है; वहाँ न प्रेम है, न सुख है और न धर्म ही है। जो निरपेक्ष

भजन करते हैं वहाँ प्रेम और धर्म दोनों हैं। जो दोनों में किसी का भी आश्रय नहीं लेते ऐसे प्राणी चार प्रकार के होते हैं—(१) आत्माराम—जिनकी बाह्यदृष्टि नहीं है। (२) पूर्णकाम—जो भोग-सामग्री रहते हुए भी कामनारहित हैं अर्थात् जिनको मेरा साक्षात्कार हो गया है। (३) कृतघ्न—किये हुए उपकार को नहीं मानने वाला, उनको अकृतज्ञ शब्द से भी कहते हैं। (४) गुरुद्रुह—जो उपकार भूलकर अकारण द्रोह करते हैं। यहाँ 'गुरुद्रुह' शब्द का अर्थ गुरुद्रोही नहीं है। गुरु यथा स्यात् द्रुह्यन्ति—जो भयङ्कर तथा अपराधी हैं। शास्त्र में उनके लिये यह शब्द आया है।

कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरनन्त्यमभयस्य पारम्।
स्तोमं महदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः ॥११॥

तत्त्वप्रकाशिका—जगतः = प्राणिमात्रस्य, कामस्याप्तिं क्रतोः = यज्ञादिकर्मणः, प्रतिष्ठां = फलभूतामालोच्य मोक्षस्वरूपमुपदिशति—आनन्त्यमभयस्य पारमित्यादिना। आनन्त्यम् = अविनाशित्वम् अभयस्य च पारं परां निष्ठां, स्तोमम् = अनेकगुणसंहतं तच्च तन्महच्च स्तोमं महत्। उरुगायं = उरुभिर्वेदैरुरुभिर्ब्रह्मादिभिर्गीयते इत्युरुगायम्। कीर्त्तिं प्रतिष्ठां स्थैर्यं एवम्भूतं मोक्षं दृष्ट्वा, धृत्या = धैर्येण, धीरः = धीमान्, सन् नचिकेत अत्यस्राक्षीः = लौकिकान् कामान् त्यक्तवानसीत्यर्थः। अथवा जगतः प्रतिष्ठां सकलजगदाधारकं सर्वकामाप्तिं क्रतोरानन्त्यमानन्त्यहेतुमभयस्य पारं मोक्षहेतुमिति यावत्। स्तोमं महत्। स्तोमेभ्यो वेदसमूहेभ्यो महान्तमत एव उरुगायम्। उरुभिर्वेदैर्ब्रह्मादिभिर्वा उरुत्वेन सर्वोत्कृष्टत्वेन गीयत इत्युरुगीयमानं प्रतिष्ठां मुक्तौ प्रत्यगात्मनामाश्रयभूतं परब्रह्मस्वरूपं दृष्ट्वा सांसारिककामान् त्यक्तवानसीत्यर्थः ॥११॥

सान्वयानुवाद—नचिकेतः = हे नचिकेता! कामस्य आप्तिम् = कामनाओं की प्राप्ति, यज्ञ आदि कर्मफलों की प्राप्ति, जगतः प्रतिष्ठां = जगत् की संस्था, क्रतोः आनन्त्यं = यज्ञ का अनन्तत्व, अभयस्य पारं = निर्भय का पार (पार = किनारा), स्तोमं महद् = अनेक दिव्यगुणों से सम्पृक्त ब्रह्म, उरुगायं = विष्णु, प्रतिष्ठां = सर्वाधार श्रीकृष्ण को, दृष्ट्वा = देखकर, धीरः धृत्या अत्यस्राक्षीः = बुद्धिमान् नचिकेता ने धैर्य धारण करके सब विषयभोगों को बिल्कुल छोड़ दिया ॥११॥

व्याख्या—सारी कामनाओं की प्राप्ति, यज्ञ आदि कर्मों का फल परमात्मा श्रीकृष्ण की ही प्रेरणा से जीवों को प्राप्त होता है। 'संसेवतां सुरतरोरिव ते प्रसादः'। (श्रीमद्भा. १०।७२।६) जीवों को वे ही निर्भय पद को प्रदान करते हैं। वे सब प्रकार के दोषों से रहित समस्त दिव्य कल्याणात्मक गुणों से सम्पन्न हैं। यहाँ महत् शब्द बृहत् का वाचक है। 'नावेदविन्मनुते तं बृहन्तम्'। (तै.ब्रा.३।१२।९।७) अवेदज्ञ पुरुष उस बृहत् वस्तु ब्रह्म को नहीं जान सकता। श्रीमद्भागवत में 'उरुगाय' शब्द से भगवान् का एक नाम कहा गया है। 'जयोरुगाय भगवन्नुरुक्रम नमोऽस्तु ते'। विवेकी नचिकेता ने परतत्त्व जगदाधार श्रीकृष्ण को जानकर धैर्य से समस्त विषयभोगों का परित्याग कर दिया ॥११॥

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥१२॥
एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः प्रगृह्य धर्म्यमणुमेतमाप्य।
स मोदते मोदनीयꣳ हि लब्ध्वा विवृतꣳ सद्म नचिकेतसं मन्ये ॥१३॥

तत्त्वप्रकाशिका—मुक्तस्वरूपविषयकं यत्तृतीयप्रश्नं पृष्टवान् तं निर्वक्ति—तं दुर्दर्शमित्यादिना मन्त्रद्वयेन—यत्त्वं प्राप्यस्य परब्रह्मणः स्वरूपं ज्ञातुमिच्छसि तं दुर्दर्शं द्रष्टुमशक्यं श्रवणायापि बहुभिर्यो न लभ्य इति प्रागभिहितत्वात्। गूढम् = अनादि-कर्मात्मिकाविद्यातिरोहितम्। अनुप्रविष्टम् = सर्वभूतानुप्रविष्टम्। गुहाहितम् = हृदय-गुहायां स्थितम्। गह्वरेष्ठम् = अन्तर्यामिणम्। पुराणम् = पुरातनमनादिमिति यावत्। अध्यात्मयोगाधिगमेन = विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानमध्यात्मयोगः तेनाधिगमो जीवात्मज्ञानं तेन हेतुना एवं परमात्मानं मत्वा प्रत्यगात्मज्ञानपूर्वकं परमात्मज्ञानमिति भावः। हर्षशोकौ विषयलाभालाभप्रयुक्तौ हर्षशोकौ जहातीत्यर्थः। अस्य मन्त्रस्यार्थो वेदान्तकौस्तुभे संक्षेपेण विवृतस्तथाहि—एवं मोक्षस्वरूपे पृष्टे तदुपदेशयोग्यतापरीक्षापूर्वकं प्रतिवचनमपि। तं दुर्दर्शमित्यादि तदेवं सामान्यत उपदिष्टे देवमिति निर्दिष्टस्य प्राप्यस्य स्वरूपं मत्वेति प्रतिपन्नस्य ज्ञानरूपोपायस्य स्वरूपम्। धीर इति प्रतिपन्नस्येति ॥१२॥

यो मर्त्यः मरणशीलोऽधिकारी एतदात्मतत्त्वं श्रुत्वा कुशलानुशिष्टाचार्येभ्यः सम्परिगृह्य = सम्यगवधार्य सम्यङ्मत्वेति यावत्। प्रगृह्य धर्म्यं = कर्मसाध्यं शरीरादि पृथक्कृत्य परित्यज्य, एवं स्वात्मभूतमेतं परमात्मानमणुं = सूक्ष्मं तस्मादेव प्राकृत-चक्षुराद्यगोचरं देशविशेषे प्राप्य स विद्वान् मोदनीयं = प्रीतिविषयमपहतपाप्मत्वादि-गुणाष्टकविशिष्टं स्वस्वरूपं लब्ध्वा मोदते आनन्दीभवतीत्यर्थः।

'एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'। (छान्दोग्ये ८।३।४) 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः'। (छान्दोग्ये ८।१२।३) श्रुत्यर्थोऽत्रानुसन्धेयः। एवं प्रश्नोत्तरमभिधाय मोक्षार्हत्वेन तं स्तौति। नचिकेतसं प्रति सद्म = वैकुण्ठधाम। विवृतम् = अपावृतद्वारं प्रवेशार्हं मन्ये ॥१३॥

सान्वयानुवाद—गूढम् = जो सम्पूर्ण प्राणियों में छिपा हुआ, अनुप्रविष्टम् = जो आकाश में शब्दरूप से, वायु में स्पर्शरूप से, अग्नि में तेजरूप से, जल में रसरूप से, पृथिवी में गन्धरूप से, अहङ्कार में सङ्कर्षणरूप से, मन में अनिरुद्धरूप से, बुद्धि में प्रद्युम्नरूप से और चित्त में वासुदेवरूप से अन्दर स्थित है। गह्वरेष्ठम् = इसलिये उपर्युक्त गुफाओं में सदा सन्निहित रहते हैं। गुहाहितम् = सम्पूर्ण भूतों के हृदयरूप गुहा में स्थित हैं। पुराणम् = सबके कारण, तं दुर्दर्शं देवम् = उस दुराराध्य श्रीकृष्ण को, धीरः = आत्म-अनात्मवस्तु विवेकसम्पन्न निष्काम ज्ञानी उपासक, अध्यात्मयोगाधिगमेन = अध्यात्म-योग के मार्ग से, मत्वा = ठीक तरह समझकर, हर्षशोकौ जहाति = हर्ष और शोक को त्याग देता है ॥१२॥

मर्त्यः = मनुष्य, एतत् = इस, धर्म्यम् = कर्मसाध्य शरीरादि को, प्रगृह्य = परित्याग करके, श्रुत्वा सम्परिगृह्य = सुनकर और भली-भाँति समझकर, एतम् अणुम् = इस सूक्ष्म-सर्वगुहाशय ईश्वर को, आप्य = प्राप्त करके, सः मोदनीयम् = वह आनन्दवान् हो जाता है। लब्ध्वा हि मोदते = अपहतपाप्मत्वादि गुणाष्टक को पाकर आनन्दित हो जाता है। नचिकेतसं विवृतं सद्म मन्ये = नचिकेता के लिये वैकुण्ठधाम का द्वार खुला हुआ मानता हूँ ॥१३॥

व्याख्या—श्रुति में देव पद से श्रीकृष्ण ही विवक्षित है—

'देवः पायात् पयसि विमले यामुने मज्जतीनां
याचन्तीनामनुनयपदैर्वञ्चितान्यंशुकानि।
लज्जालोलैरलसविलसैरुन्मिषत्पञ्चबाणै-
र्गोपस्त्रीणान्नयनकुसुमैरर्चितः केशवो नः' ॥१॥

जो निष्काम उपासक इस शरीर से ऊपर उठकर ज्योतिस्वरूप वैकुण्ठधाम को प्राप्त होता है वह वहाँ अपने वास्तविक स्वरूप से सम्पन्न होकर आनन्दवान् हो जाता है। वह उत्तम पुरुष हँसता, क्रीड़ा करता एवं रमण करता हुआ सदा-सर्वदा वहाँ श्रीभगवद्भाव में मग्न रहता है। वह इन आठ गुणों—अपहतपाप्मा, विजर, विमृत्यु, विशोक, विजिघित्स, अपिपास, सत्यकाम और सत्यसङ्कल्प—से हमेशा सम्पन्न रहता है।

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्।
अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥१४॥

तत्त्वप्रकाशिका—तं दुर्दर्शमिति मन्त्रेण निर्दिष्टानां प्राप्यप्राप्तृब्रह्मोपासनस्वरूपाणां स्वरूपशोधनाय पृच्छत्यन्यत्र धर्मादित्यादिना। धर्मात् = पुण्यसाधनात्। अन्यत्र विलक्षणम्। अधर्मात् = अपुण्यरूपसाधनात्। अन्यत्र विलक्षणम्। ब्रह्मोपासनम्। ब्रह्मोपासनविषयकं प्रश्नं निरुच्य कार्यकारणपरिच्छेदकात् कालादन्यमपरिच्छिन्नमुपेयविषयकं प्रश्नं करोति। अस्मात्कृतादित्यादि न। एतत्प्रश्ने उपेतुः प्रत्यगात्मनो नित्यत्वात् प्राप्यान्तर्गतत्वाच्च तत एव तस्यापि तन्त्रेण प्रश्नः कृतः। कृतं कार्यमकृतं कारणं तयोः परिच्छेदकाद् भूतादतिक्रान्तात् कालाद् भव्याच्च भविष्यतश्च तथा वर्त्तमानकालादन्यत्रापरिच्छिन्नं यदुपेयं पश्यसि तद्वद् मह्यम्। तदेतद्भाष्यकृद्भिः वेदान्तकौस्तुभे भाषितम्। तं दुर्दर्शमिति मन्त्रमुद्धृत्ये पश्चादुक्तं तदेवं सामान्यत उपदिष्टे देवमिति निर्दिष्टस्य स्वरूपं मत्वेति प्रतिपन्नस्य ज्ञानरूपोपायस्य स्वरूपं धीर इति प्रतिपन्नस्य प्राप्तुश्च स्वरूपं शोधयितुं पुनरप्यन्यत्र धर्मादन्यत्राधर्मादित्यनेन पुण्यापुण्यरूपसाधनविलक्षणस्योपासनस्य 'अन्यत्रास्मात् कृताकृतात्' अन्यत्र भूताच्च भव्याच्च यदित्यनेन कालापरिच्छिन्नस्योपेयस्य प्रश्ने च प्राप्तुरपि चेतनस्य नित्यत्वात् प्राप्यान्तर्गतत्वाच्च तत एव तस्यापि तन्त्रेण प्रश्नः कृतः।

अथवोपेयप्रश्नपरमेवेदं वाक्यम्। अन्यत्र धर्मादन्यत्राधर्मादिति। प्रकृतस्यान्यत्र

शब्दद्वयस्य सामानाधिकरण्यवत्। अन्यत्रास्मात्कृताकृतादन्यत्र भूतादित्युपरितनान्यत्र-शब्दद्वयस्यापि सामानाधिकरण्यप्रतीतेरेवमप्युपेयप्रश्ने उपेतुरन्तर्भावाद् उपास्यास्यप्यन्त-र्भूतत्वात् त्रयमेव पृष्टमिति। पूर्वकल्पे प्रष्टव्यद्वयपरत्वाश्रयमपि क्लिष्टमेव। अन्यत्र धर्मादन्यत्राधर्मादिति प्रक्रमस्थान्यत्रशब्दद्वयस्य सामानाधिकरण्यं यथा प्रतीयते तथा अन्यत्रास्मात् कृताकृतात् अन्यत्र भूताच्च भव्याच्च चेत्यत्रान्यत्रशब्दद्वयस्यापि सामाना-धिकरण्यं वाच्यम्। यदि तत्र धर्माधर्मविलक्षणं कालत्रयविलक्षणञ्च यदिति शब्दद्वय-मश्रोष्यत तदान्यत्र शब्दयुगद्वयस्य स्वरसतः प्रतीतं सामानाधिकरण्यं पर्यत्यक्षत। अतः प्रक्रमरीत्यनुसारिप्रतीतिसामानाधिकरण्यभङ्गे कारणाभावादन्यत्र धर्मादन्यत्राधर्मादित्ययम-प्यंशः प्राप्य ब्रह्मपर एवास्त्वित्याशयेनाथवेति कौस्तुभे कल्पान्तरमनुसृतम् ॥१४॥

सान्वयानुवाद—यत् तत् (त्वं) पश्यसि तत् (मह्यं) वद = नचिकेता कहता है—हे प्रभो ! आप जिस तत्त्व का दर्शन करते हैं उसे मुझको बतलाइये। यम ने कहा—उसमें न तो कार्य-कारण हैं, न साधन-साध्य हैं, न धर्माधर्म हैं, न पाप-पुण्य हैं और न भूत-भव्य हैं। अथवा इस मन्त्र का अर्थ इस प्रकार समझिये—धर्म और अधर्म, कृत और अकृत, भूत और भव्य इन सबके परे जो परतत्त्व है हे भगवन् ! कृपा कर आप उस परतत्त्व को हमें बतलायें। आप सब जगह उसका दर्शन करते हैं—यत् सर्वत्र तदीक्षणम्। नचिकेता के इस पकार पूछने पर यमराज ने नचिकेता से कहा कि तुम सचमुच आत्म-परमात्म-तत्त्व के जिज्ञासु हो। (सान्वयानुवाद में मन्त्र का अर्थ स्पष्ट है अतः व्याख्या नहीं दी गयी है।) अब यमराज यहाँ से दोनों तत्त्वों का वर्णन करना प्रारम्भ करते हैं—

सर्वे वेदा यत्पदमामनन्ति
तपाꣳसि सर्वाणि च यद् वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदꣳ सङ्ग्रहेण ब्रवीम्योमित्येतत् ॥१५॥

तत्त्वप्रकाशिका—एवं प्रार्थितो यमो बुद्ध्यारोहार्थं प्राप्यस्य परब्रह्मणो वैभवं प्रदर्शयन् सङ्ग्रहवचनं प्रतिजानीते—सर्व इति। सर्वे वेदा ऋगाद्या यत्पदं यस्य प्राप्यस्य स्वरूपमामनन्ति साक्षात्परम्परया वा प्रतिपादयन्ति। कृत्स्नाया उपनिषदः परिशुद्धात्म-स्वरूपपरत्वं निश्चीयते। न जायते म्रियते वा विपश्चित्। हन्ता चेन्मन्यते हन्तुम्। आसीनो दूरं व्रजति शयानो याति सर्वतः। यस्य ब्रह्म च क्षत्रञ्च। सोऽध्वनः पारमाप्नोति तद् विष्णोः परमं पदम्। सा काष्ठा सा परा गतिः। एष सर्वेषु भूतेषु। पराञ्चि खानि। ईशानो भूतभव्यस्य। इत्यादि वक्ष्यमाणानां मन्त्राणां परिशुद्धात्मस्वरूपपरत्वस्य सम्प्रति-पन्नत्वात्। तपांसि सर्वाणि यद् वदन्ति। यत्प्राप्त्यर्थानि। यदिच्छन्तो ब्रह्मचर्यं चरन्ति। गुरुकुलवासलक्षणमन्यद्वा। स्त्रीसङ्गराहित्यमिति यावत्। चरन्त्यनुतिष्ठन्ति। तत्पदं प्राप्यस्वरूपं ते तव सङ्ग्रहेण ब्रवीमि। एवं प्रतिज्ञातं परब्रह्मणः स्वरूपमुपदिशति—ओमित्येतदिति। एतत् त्वया पृष्टं प्राप्यस्वरूपम्। ओम् शब्दवाच्यम्। प्रणवपदस्य भगवति रूढत्वात्। ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति श्रीमुखवचनस्य

जागरूकत्वात्। प्रणवावयवयोरकारमकारयो: परब्रह्मवासुदेवप्रत्यगात्मवाचितया प्राप्य-प्राप्त्रोरप्युपदिष्टत्वमस्तीति द्रष्टव्यम्। विवृतञ्चैतद्द्राष्यकृद्भिर्वेदान्तकौस्तुभे। ततो ब्रह्म-प्रतिपादकतया प्रणवं प्रशस्य तद्वाच्यं प्राप्यप्राप्तृस्वरूपं वाचकरूपमुपायञ्च कथयद्भि-रिति ॥१५॥

सान्वयानुवाद—सर्वे वेदा: यत् पदं आमनन्ति = सम्पूर्ण (चारों) वेद जिन भगवान् श्रीकृष्ण के स्वरूप-गुणादि का प्रतिपादन करते हैं। च = और, सर्वाणि तपांसि यत् वदन्ति = सारी तपस्या जिन भगवान् श्रीकृष्ण को बतलाती है। यद् इच्छन्त: ब्रह्मचर्यं चरन्ति = जिन भगवान् श्रीकृष्ण की इच्छा करते हुए ब्रह्मचर्य का पालन करते हैं। तत् पदं ते संग्रहेण ब्रवीमि = उस वैष्णवपद को तुम्हें मैं संक्षेप से बतलाता हूँ। ओम् इति एतत् = ओं ऐसा यह एकाक्षर मन्त्र है ॥१५॥

व्याख्या—इस लोक में चारों वेद, पुराण, इतिहास, आगम-निगम, तन्त्र-मन्त्र-सूत्र-धर्मशास्त्र इत्यादि परब्रह्मस्वरूप भगवान् श्रीकृष्ण के स्वरूप-गुणादि का न केवल कीर्त्तन-प्रतिपादन ही करते हैं अपितु वैकुण्ठ-लोक में सिंहासन पर विराजमान भगवान् श्रीकृष्ण के सम्मुख ये सब मूर्त्तिमान् होकर उनकी स्तुति करते हैं। इसलिये वैकुण्ठलोकवासी उद्धवजी कहते हैं—

'दानव्रततपोहोमजपस्वाध्यायसंयमै:।
श्रेयोभिर्विविधैश्चान्यै: कृष्णे भक्तिर्हि साध्यते'॥

दान, व्रत, तपस्या, यज्ञ, जप, वेदाध्ययन, संयम (शम-दम) तथा अन्य नाना प्रकार के कल्याणकारी साधनों (यागादि) से श्रीकृष्ण में भक्ति ही प्राप्त की जाती है। उन साधनों का प्राप्तिरूप परमफल यही है कि श्रीकृष्ण की भक्ति चित्त में आवें। गीता में भगवान् श्रीकृष्ण ने स्पष्ट कहा भी है—'वेदैश्च सर्वैरहमेव वेद्य:' अर्थात् सम्पूर्ण वेदों से जानने योग्य जो वस्तु है वह मैं ही हूँ। गुरुकुल-निवासी ब्रह्मचारी लोग ब्रह्मचर्य इत्यादि कठिन व्रतों का अनुष्ठान (पालन) श्रीकृष्ण की प्राप्ति के लिये करते हैं।

'येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विता:।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्'॥ (गीता ९।२३)

हे कौन्तेय! श्रद्धायुक्त होकर जो सकल भक्त दूसरे देवताओं का पूजन करते हैं वे भी मेरा ही पूजन करते हैं, किन्तु उनका वह पूजन अविधिपूर्वक अर्थात् 'विधानं विधि: वेद:, विधत्ते इति विधि:'। उन अज्ञजनों की पूजा वेद-शास्त्रपुर:सर नहीं है।

हे नचिकेता! मैं उस परम पद को संक्षेप से तुम्हें कहता हूँ, तुम एकाग्रचित्त से उसका श्रवण करो। 'ओम् तत् सत् इति' यह तीन प्रकार का ब्रह्म का नाम-निर्देश है, ऐसा वेद में ब्रह्मवादियों के द्वारा उच्चारण किया गया है ॥१५॥

एतद्ध्येवाक्षरं ब्रह्म एतदेवाक्षरं परम्।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥१६॥

एतदालम्बनः श्रेष्ठमेतदालम्बनं परम्।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥१७॥

तत्त्वप्रकाशिका—परब्रह्मवाचकं प्रणवं फलप्रदर्शनमुखेन स्तौति—हि द्वयमत इत्यर्थे। यत ओङ्कारो ब्रह्मवाचकोऽत एतदक्षरं ब्रह्मैव तत्प्राप्तिसाधनत्वात्। 'ओमित्यनेनैवाक्षरेण परमपुरुषमभिध्यायीते'ति श्रुत्या परब्रह्महेतुध्यानविषयत्वबोधनात् प्रणवस्य ब्रह्मप्राप्तिसाधनत्वं निश्चीयते। एतदक्षरं प्रणवमेव जप्येषु ध्येयेषु परं सर्वोत्कृष्टम् अत एवैतदक्षरं प्रणवं ज्ञात्वोपास्यो योऽधिकारी यदिच्छतस्य पुंसस्तत्फलम्भवति हि प्रसिद्धमित्यर्थः ॥१६॥

एतत्प्रणवरूपमालम्बनं श्रेष्ठं प्रशस्यतमम्। अत एवैतदालम्बनकं ध्यानादिपरम्। सर्वेभ्य उत्कृष्टम्। एतत् परमालम्बनं ज्ञात्वा ब्रह्मलोके ब्रह्मैव लोकस्तस्मिन् महीयते पूज्यो भवतीत्यर्थः ॥१७॥

सान्वयानुवाद—हि-हि = दोनों का अर्थ अतएव = इसलिये। एतत् अक्षरं ब्रह्म = यह अक्षर ब्रह्म है। एतत् अक्षरं परम् = यह अक्षर श्रेष्ठ है। एव-एव इन दोनों का अर्थ है निश्चय। एतत् एव अक्षरं ज्ञात्वा = इस अक्षर की उपासना करके, यः = यत् इच्छति, तस्य तत् = जो (उपासक) जिसकी इच्छा करता है, उसको वह प्राप्त हो जाता है ॥१७॥

ओम् रूप इस एकाक्षर वेदमन्त्र द्वारा परम पुरुष श्रीकृष्ण का ही निरन्तर ध्यान करना चाहिये।

एतत् श्रेष्ठं आलम्बनम् = यह श्रेष्ठ आलम्बन है।

एतत् परं आलम्बनम् = यही उच्च आलम्बन है।

एतत् आलम्बनं ज्ञात्वा = इस आलम्बन की आराधना करके, ब्रह्मलोके महीयते = ब्रह्मलोक में पूजित होता है ॥१७॥

(मन्त्रार्थ सरल होने से व्याख्या नहीं दी गयी है।)

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥१८॥
हन्ता चेन्मन्यते हन्तुः हतश्चेन्मन्यते हतम्।
उभौ तौ न विजानीतो नायः हन्ति न हन्यते ॥१९॥

तत्त्वप्रकाशिका—जीवात्मस्वरूपं निरूपयति—न जायते इत्यादि मन्त्रद्वयेन—विपश्चिन्मेधावी न जायते नोत्पद्यते। वाशब्दश्चार्थे न चायं कदाचिन्म्रियते। नायं प्रत्यगात्मा कुतश्चित्कारणान्तराद् बभूव। यतो न जायतेऽतोऽजो न म्रियतेऽतो नित्यः। इति द्वाभ्यां पदाभ्यां जन्ममरणलक्षणविक्रिये निरस्ते। अस्तित्वलक्षणविकारवारणायाह—शाश्वत इति। सनातनः = प्राकृतवत्सदसत्परिणामशून्यः। वृद्धिलक्षणक्रियावारणायाह—पुराण इति। पुराऽपि नव एव। यो हि सावयवः सोऽवयवोपचयाद् वर्द्धते।

तत्त्वप्रकाशिका—न सर्वथा मुमुक्षुर्विषयप्रमादी स्यादिति भावेनोक्तमेव विवृणोति—बाला: = अविवेकिन:, पराच: = बहिष्ठान् कामान् अनुयन्ति, अत: ते विततस्य = सर्वदेशकालेषु विस्तृतव्यापारस्य, मृत्यो: = यमस्य, पाशं = मरणमिति यावत्, यन्ति = यान्ति। अथ = तस्मात्, धीरा अमृतत्वं = मोक्षं, ध्रुवं = नित्यं विदित्वा इहाध्रुवेषु विषयेषु न प्रार्थयन्ते। प्रत्यक् तत्त्वज्ञस्य सर्वं जिहासितव्यमिति भाव:। परात्मन: सर्वजीवगताहन्तास्पदत्वेन मुख्याहमर्थत्वात् प्रत्यक्त्वमस्तीति द्रष्टव्यम् ॥२॥

सान्वयानुवाद—बाला: = मूर्ख, पराच: कामान् = बाहर की कामनाओं-इच्छाओं का, अनुयन्ति = अनुसरण करते हैं, ते = वे मूर्ख, विततस्य = सब जगह फैले हुए, मृत्यो: = मृत्यु के, पाशं यन्ति = पाश-बन्धन में जाकर गिरते हैं,

अथ = इसलिये, धीराः = जितेन्द्रिय मनुष्य, ध्रुवं = नित्य, अमृतत्वं = भगवद्भाव को, विदित्वा = जानकर, इह = इस अनित्य असुख लोक में, अध्रुवेषु = अनित्य-असुख पदार्थों में से किसी को (भी), न प्रार्थयन्ते = नहीं चाहते हैं ॥२॥

व्याख्या—अविवेकी मनुष्य ही बहिष्ठ विषयों के पीछे पड़ते हैं, वे विषय अल्प समय रहने वाले और पश्चात् नष्ट होने वाले होते हैं। जैसे किसी गरीब को धन की प्राप्ति हो जाय, फिर उसका सब धन नष्ट हो जाय या चोरों द्वारा चुरा लिया जाय। इस प्रकार धन प्राप्त होकर खो जाता है। अतः ये बाह्य विषय-भोग, धन-सम्पत्ति चिरस्थायी एवं नित्य नहीं हैं। जो इस दुर्लभ मानव-जीवन को खो देते हैं वे मूर्ख हैं। निश्चय ही वे समस्त देश-कालव्यापी यम के पाश में बँध जाते हैं। 'अथ धीराः' इसलिये जो बुद्धिमान् होते हैं वे इनसे सर्वथा विरक्त होकर 'ध्यायेम कृष्णं कमलेक्षणं हरिम्' इन तत्त्व का निरन्तर ध्यान करते हैं। इन अनित्य विषयों में से किसी को भी नहीं चाहते हैं ॥२॥

येन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान्।
एतेनैव विजानाति किमत्र परिशिष्यते। एतद्वै तत् ॥३॥

तत्त्वप्रकाशिका—येन साधनेन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनांश्च मैथुननिमित्तान् सुखविशेषान् जानाति सर्वो लोकः। 'तदेवा ज्योतिषां ज्योतिः' (बृ.४।४।१६) इति रूपादिप्रकाशकानामिन्द्रियाणां तदनुगृहीतानामेव कार्यजनकत्वादिति भावः। आत्मनाऽविज्ञेयं किमत्रास्मिंल्लोके परिशिष्यते। न किञ्चित् परिशिष्यते। स आत्मा सर्वज्ञ एतत् वै तत्। तत्पूर्वं प्राप्यतया निर्दिष्टं विष्णोः परमं पदम्। एतत् वै एतदेवैतन्मन्त्र-प्रतिपाद्यात्मस्वरूपमेवेत्यर्थः ॥३॥

सान्वयानुवाद—येन रूपं रसं गन्धं स्पर्शान् शब्दान् च मैथुनान् = जिस साधन से रूप-रस-गन्ध-स्पर्श-शब्द और मैथुन को, विजानाति = जानता है, एतेन एव आत्र परिशिष्यते किम् = इससे ही यहाँ परिशेष रह जाता है क्या, एतत् वै तत् = यही वह है ॥३॥

व्याख्या—जिससे रूप-रस-गन्ध-शब्द-स्पर्श एवं स्त्रीसङ्ग से प्राप्त सुख का अनुभव करता है—इस बात को तो सब लोग जानते हैं। 'व्यवायो गाम्यधर्मो मैथुनं निधुवनं रतम्' इत्यमरः। मनुष्यों की आयु बहुत थोड़ी है। उसमें भी रात्रियाँ नींद और स्त्रीसङ्ग से व्यतीत होती हैं और दिन धन की चिन्ता एवं कुटुम्ब के भरण-पोषण इत्यादि विषयों से बीत जाते हैं (श्रीमद्भा.२।१।३)। आत्मा ज्योतियों के भी ज्योति स्वरूप है, सर्वज्ञ है; इसलिये कुछ परिशिष्ट नहीं रहता। एतद्वै तत् = यहाँ वेदान्तियों को जरा ध्यान देना चाहिये कि वह परमपद को ही ये वैष्णव परमपद कहते हैं ॥३॥

स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥४॥

तत्त्वप्रकाशिका—स्वप्नान्तं निखिलं स्वप्नप्रपञ्चं जाग्रत्प्रपञ्चञ्च मन आदीन्द्रिय-भावमापन्नेन येन परमात्मना लोकः पश्यति। महान्तमिति पूर्ववद् व्याख्येयम्।

सान्वयानुवाद—स्वप्नान्तं = स्वप्न के अन्त को, च = और, जागरितान्तं = जाग्रत् अवस्था के अन्त को, उभौ = इन दोनों को, येन = जिससे, अनुपश्यति = देखता है (तम् इति शेषः), उस महान्तं = महान्, आत्मानं = आत्मा, विभुं = विभु को, मत्वा = जानकर, धीरः न शोचति = बुद्धिमान् पुरुष शोक नहीं करता ॥४॥

व्याख्या—जिस परमात्मा श्रीकृष्ण के साहचर्य से यह जीवात्मा स्वप्न अवस्था में अखिल स्वाप्न प्रपञ्च को एवं जाग्रत् प्रपञ्च मन आदि इन्द्रियों को देखता है अर्थात् इन सबका अनुभव करता है, उस महात्मा परमात्मा श्रीकृष्ण का आराधन करके विवेकी मनुष्य कदापि शोक नहीं करता ॥४॥

जैसे कि भगवान् ने अपने श्रीमुख से स्वयं कहा है—

'मां प्रपन्नो जनः कश्चिन्न भूयोऽर्हति शोचितुम्'।

य इमं मध्वदं वेद आत्मानं जीवमन्तिकात्।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते॥ एतद्वै तत् ॥५॥

तत्त्वप्रकाशिका—यः कश्चिदिदमिमं मध्वदं कर्मफलभुजं जीवात्मानमन्तिकमात् जीवस्यान्तिके समीपे भूतस्य भव्यस्य वर्त्तमानस्य कालस्येशानमीश्वरं हरिं वेद जानाति। स ततो भगवज्ज्ञानसामर्थ्येनान्यविषयकभयाभावान्न विजुगुप्सते आत्मानं गोप्तुं नेच्छति। एतद्वै तदिति पूर्ववत् ॥५॥

सान्वयानुवाद—यः = जो, मध्वदं = अपने कर्म का फल, जीवमन्तिकात् = जीव के नजदीक, भूतभव्यस्य = भूत, भविष्य और वर्त्तमान का, ईशानं = शासन करने वाले, इमं = इस भगवान् श्रीहरि को, वेद = जानता है, ततः (सः) आत्मानं न विजुगुप्सते = उसके बाद वह अपनी रक्षा करना नहीं चाहता ॥५॥

व्याख्या—यहाँ 'मध्वद' पद का अर्थ है—कर्मों का फल, क्योंकि जीव के लिये ही कहा गया—'पिप्पलं स्वादु अत्ति', 'स्वकृतम्भुजः', 'स्वकृतभुक् पुमान्'। परमात्मा सबके समीप में एवं सबके हृदयों में सदा विराजमान है। भूत-भावी-भवन् का नियन्ता है। जीवात्मा—मध्वदं = मधु + अदं = मीठा फल खाता है, अपने कर्मों को भोगता है। जो परमात्मा श्रीहरि को तीनों काल का शासक समझता है, संसार में किसी से उसको भय नहीं होता एवं अपनी रक्षा किसी से नहीं चाहता ॥५॥

अब श्रुतियाँ कहती हैं—ब्रह्म से लेकर स्थावर पर्यन्त समस्त भूत उन महाभूत परब्रह्म श्रीकृष्ण से ही उत्पन्न हुए हैं। अतः जो कुछ भी पदार्थ है, सब उन्हीं का नाम-रूप विशेष है। इस सम्पूर्ण जगत् के अभिन्ननिमित्तोपादान कारण एवं विश्वजन्मादि हेतु सर्वोपास्य सर्वभिन्नाभिन्न परमात्मा श्रीकृष्ण ही हैं। वे एक ही बहुविध नामरूपों से दृष्टि-गोचर हो रहे हैं।

निकला। उसमें से चतुरानन ब्रह्मा उत्पन्न हुए। ब्रह्मा के मानस पुत्र मरीचि के कश्यप हुये। कश्यप द्वारा अदिति से विवस्वान् का जन्म हुआ। विवस्वान् की पत्नी संज्ञा से श्राद्धदेव मनु के रूप में उत्पन्न हुए (एवं यम और यमुना युगलसन्तान भी उत्पन्न हुई)। 'यतो वा इमानि भूतानि जायन्ते' इस श्रुति के अनुसार परमात्मा से सारे प्राणियों की सृष्टि से जगत् भर गया।

या प्राणेन सम्भवत्यदितिर्देवतामयी।
गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत। एतद्वै तत् ॥७॥

तत्त्वप्रकाशिका—कर्मजन्यफलानामदनाद् भक्षणाद् अदितिः = जीवात्मा प्राणेन सम्भवति। प्राणेन सह वर्त्तमाना देवतामयी। इन्द्रियाधीनभोगा। गुहां प्रविश्य तिष्ठन्ती। हृदयपुण्डरीककुहरवर्त्तिनी। तामेव विशिनष्टि। या भूतेभिर्भूतैः समन्विता व्यजायत विविधाकारेण देवादिरूपेण जायते। एतत् वै तत्। तत्तदात्मकमित्यर्थः ॥७॥

सान्वयानुवाद—या = जो, देवतामयी अदितिः = देवमाता अदिति, प्राणेन सह = प्राण के साथ, सम्भवति = सम्यक् उत्पन्न होती है, या भूतेभिः = जो भूतों के साथ, व्यजायत = विविध नाम-रूपों में उत्पन्न हुई, गुहां प्रविश्य तिष्ठन्तीम् = हृदय-कमलकुहर में घुसकर रहने वाली, एतत् वै तत् = वह ब्रह्मात्मिका है ॥७॥

व्याख्या—देवमाता अदिति देवतामयी हैं, कर्मजन्य फलों का अदन = भक्षण = उपभोग करने वाली होने से जिनका नाम अदिति जीवात्मा है। जो प्राण के साथ रहती हैं। समस्त देवताओं के हृदय-पुण्डरीककुहर में प्रवेश कर रहने वाली हैं। जो विविध आकार—देवादिरूप से उत्पन्न होती है ॥७॥

अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः।
दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः। एतद्वै तत् ॥८॥

तत्त्वप्रकाशिका—योऽधियज्ञे उत्तराधरारण्योर्निहितः स्थितो जातवेदाग्निः पुनः सर्वहविषां भोक्ता गर्भिणीभिरन्तर्वत्नीभिरगर्हितान्नपानभोजनादिना सुभृतः = सुष्ठु सम्यक् भृतो गर्भ इव निहित इति पूर्वेणान्वयः। उदित्यवधारणे। दिवे दिवे = अहनि अहनि, ईड्यः = स्तुत्यः वन्द्यश्च। जागृवद्भिः = जागरणशीलवद्भिरप्रमत्तैः। हविष्मद्भिः = आज्यादिमद्भिर्ऋत्विग्भिः। मनुष्येभिः = मनुष्यैश्च स्तुत्योऽग्निः। एतद्वै तत्। एतदग्नि-स्वरूपं तत्पूर्वोक्तब्रह्मात्मकमित्यर्थः ॥८॥

सान्वयानुवाद—अरण्योः जातवेदाः अग्निः निहितः = दो अरणियों के भीतर जातवेदा अग्नि छिपी रहती है, इव गर्भिणीभिः गर्भः सुभृतः = जैसे गर्भवती स्त्रियों के द्वारा गर्भ सुरक्षित रहता है, जागृवद्भिः = जागने वाले, हविष्मद्भिः = हवन करने वाले, मनुष्येभिः = मनुष्यों द्वारा, दिवे-दिवे ईड्यः = प्रतिदिन अग्नि स्तुति करने योग्य है ॥८॥

व्याख्या—जैसे याज्ञिक पुरुष काष्ठद्वय को मन्त्रों द्वारा मन्थन कर काष्ठ में

निहित अग्निदेव को प्रकट करते हैं, जैसे गर्भिणी स्त्रियों द्वारा सम्यक् धारण किये हुए अनिन्दित अन्न-पान-भोजनादि से परिपुष्ट बालक गर्भ में निहित रहता है; वैसे ही जागरणशील, हविष्मान् उपासकों द्वारा प्रतिदिन जातवेदा अग्निस्वरूप—ज्योतिस्वरूप श्रीकृष्ण स्तुत्य एवं वन्दनीय है ॥८॥

'वेदैश्च सर्वैरहमेव वेद्यः' अर्थात् सम्पूर्ण वेदों से जानने योग्य जो वस्तु है वह मैं ही हूँ। (गीता.१५।१५)

यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति।
तं देवाः सर्वेऽर्पितास्तदु नात्येति कश्चन। एतद्वै तत् ॥९॥

तत्त्वप्रकाशिका—सूर्यः सृष्टिकाले यतो ब्रह्मणः सकाशादुदेति। यत्र च प्रलयकालेऽस्तमदर्शनञ्च गच्छति। देवाः सर्वे यस्मिन्नात्मनि अर्पिताः प्रतिष्ठिताः। तदु नात्येति कश्चन। तत् सर्वात्मकं ब्रह्म कोऽपि नातिक्रामति। छायावदन्तर्यामिणो दुर्लङ्घ्यत्वादिति भावः। एतद्वै तत्। उक्तोऽर्थः ॥९॥

सान्वयानुवाद—यतः सूर्यः उदेति = जिससे सूर्य उदय होता है, च = और, यत्र अस्तं गच्छति = जहाँ अस्त को जाता है, तं सर्वे देवाः अर्पिताः = उसमें सब देवसमुदाय प्रतिष्ठित हैं, तत् उ कश्चन न अत्येति = उसको कोई (कभी भी) नहीं लाँघ सकता, एतत् वै तत् ॥९॥

व्याख्या—यदि परमात्मा कर्त्तुमकर्त्तुमन्यथाकर्त्तुं सर्वसमर्थ न हो तो उनका पराक्रम किस काम का ? उनका शासन सर्वोपरि है। सब सूर्यादि देवगण उनमें स्थित रहते हुए लगातार अपने-अपने व्यापार में लगे हुए हैं। जब सृष्टि का समय होता है तब परमात्मा श्रीकृष्ण से सूर्य उदय होता है और प्रलय के समय सूर्य उनमें जाकर अदर्शन हो जाता है। कोई भी उनकी आज्ञा का उल्लङ्घन नहीं कर सकता ॥९॥

यदेवेह तदमुत्र यदमुत्र तदन्विह।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥१०॥

तत्त्वप्रकाशिका—यदेव ब्रह्म स्वात्मस्थत्वेनेह लोकेऽनुसन्धीयमानं तदेव लोकान्तरे तत्रस्थानां पुंसां स्वात्मस्थत्वेनानुभूयते। तस्मादात्मभेदो नास्तीत्यर्थः। इह = परमात्मनि। नानेव अत्र इवशब्द उपमायां, यथा परमात्मनि अत्यन्तभेदं तथैव अत्यन्ताभेदम्। यः पश्यति स मृत्योः = मरणान्मरणं मृत्युं पुनः पुनर्जन्ममरणभावमाप्नोति प्रतिपद्यते। अतो न ब्रह्मणा चेतनानामत्यन्तभेदः, नाप्यत्यन्ताभेदः। किन्तु चेतनाचेतनयोर्ब्रह्मणा सह भेदाभेदः। सर्वात्मत्वसर्वनियन्तृत्वसर्वव्यापकत्वस्वतन्त्रसत्त्वसर्वाधारत्वयोगेन स्वरूपेण भेदः। ब्रह्मात्मकत्वतन्नियम्यत्वतद्व्याप्यत्वततन्त्रसत्त्वपराधेयत्वादियोगेन च स्वरूपेण चाभेदः। अतो न गुणसाङ्कर्यदोषावकाशः प्रसज्येत, न वयं स्वरूपतो जीवेशयोरैक्यमभ्युपगच्छामो येनोक्तदोषः प्रसज्येत। किन्तु इतरेतरात्यन्तविलक्षणत्वात् ब्रह्मणश्चेतनाचेतनयोश्च स्वरूपेण भिन्नत्वमभिन्नत्वञ्चाभ्युपगच्छामः ॥१०॥

सान्वयानुवाद—यत् इह तत् एव अमुत्र = जो यहाँ है वही वहाँ है, (और) यत् अमुत्र तत् अनु इह = जो वहाँ दूसरे लोक में है वही यहाँ इस लोक में है, इव = उपमा में, यः = जो, इह = परमात्मा में, नाना पश्यति = नाना देखता या मानता है, सः = वह, मृत्योः मृत्युं आप्नोति = एक मृत्यु के पीछे दूसरी मृत्यु को प्राप्त होता है ॥१०॥

व्याख्या—जो परब्रह्म स्वात्मस्थ रूप से इस भूलोक में अनुसन्धीयमान है उसी परब्रह्म को ही दूसरे लोक में रहने वाले मनुष्य स्वात्मस्थ रूप से अनुभव करते हैं। समस्त देहधारी जीवों में एक ही अजन्मा परमात्मा श्रीकृष्ण अन्तर्यामी रूप से निवास करते हैं। जैसे सब आँखों में एक ही सूर्य होता है (श्रीमद्भा. १।९।४२), इसलिये उनमें भेद नहीं है। वे सर्वात्मा हैं, समदर्शी हैं। इस मन्त्र में 'इव' पद का प्रयोग उपमा अर्थ में हुआ है। जैसे परमात्मा में अत्यन्त भेद और वैसे ही परमात्मा में अत्यन्त अभेद को जो देखता या मानता है वह पुनः-पुनः जन्म-मरण भाव को प्राप्त होता है।

इसलिये परब्रह्म के साथ चेतनों का न अत्यन्त भेद है और न अत्यन्त अभेद ही है किन्तु चेतनाचेतनों का परब्रह्म के साथ स्वाभाविक भेदाभेद सम्बन्ध है। गजेन्द्र ने भी श्रीभगवान् की इस प्रकार स्तुति की है—

'सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदनम्।
विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम्' ॥ (श्रीमद्भा. ८।३।२६)

विश्वं = भेदम्, अविश्वं = अभेदम्। सोऽहं परं प्राप्यं भेदाभेदं ब्रह्म प्रणतोऽस्मीत्यन्वयः।

मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥११॥

तत्त्वप्रकाशिका—यदि सर्वप्राणिनामन्तर्यामी परमात्मा इत्युच्यते, तथात्वेनास्माकं कुतो नोपलभ्यत इत्यत्राह—इदमात्मस्वरूपं श्रवणादिसंस्कृतेन मनसाऽऽप्तव्यम् = ग्राह्यम्। इह = जगत्कारणे ब्रह्मणि नानात्वन्नास्ति। तस्य सर्वास्वपि उपनिषत्स्वेकत्वावधारणात्। कारणनानात्वदर्शनस्य फलमाह—मृत्योरिति। नित्यसंसारी भवति, परमेश्वरे नानात्वदर्शित्वात्। इवशब्दोऽल्पार्थः। 'इवोपमायामल्पे च' इति कोशात्। स च कैमुत्यन्यायपरः। कारणे ब्रह्मणि यद्यल्पनानात्वदर्शनस्यापीदृक् फलं, किम्बहुत्वेनेत्यर्थः। ननु कारणे ब्रह्मणि भेदाप्रसक्तिरप्रसक्तस्य निषेधायोगादिति चेन्न कारणेऽनेकत्वप्रसक्तेः शास्त्रसिद्धत्वात्।

'जीवाद् भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चलाः।
जीवे प्रलयमृच्छन्ति न जीवात् कारणं परम्' ॥ इति।
'ब्रह्मा देवानां प्रथमः सम्बभूव'।
'विश्वस्य कर्ता भुवनस्य गोप्ता'।

'न सन्न चासच्छिव एव केवलः ।
स्वभावमेके कवयो वदन्ति कालं तथाऽन्ये' ॥

इत्यादिश्रुतिभिः कारणनानात्वस्य सुप्रसक्तत्वात् । इहेति विशेषणान्नानात्वमात्र निषेधसम्भवः तदाधारब्रह्मणो निषेधनिषेध्ययोर्नानात्वतदभावयोश्च भेदावश्यकत्वादिति अथवा नानाशब्दोऽत्र विनाऽर्थकः । 'विनञ्भ्यां नानाञौ न सह' इति सूत्रे महाभाष्यकारै- र्नानाविनाशब्दयोरेकार्थत्वोक्तेस्तथा चैवं योजना ।

इह जगति नाना स्वोपादानं परमेश्वरं विना किञ्चनापि वस्तुजातं नास्ति। सर्वकार्यावच्छिन्नस्य स्वोपादानाविनाभूतत्वात् ।

'यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम्' ॥

इति श्रीमुखोक्तेः । अन्यत्स्पष्टम् । इत्थं द्वितीयाध्याये अध्यासपरपक्षगिरिवज्रे श्रीमन्माधवमुकुन्ददेवाचार्यचरणैरस्य मन्त्रस्यार्थो विवृतः ॥११॥

सान्वयानुवाद—इदं मनसा एव आप्तव्यम् = यह मन से ही प्राप्त करना चाहिये—ग्रहण करना चाहिये, इह किञ्चन नाना न अस्ति = इस जगत्कारण ब्रह्म में स्व-पर कुछ भेद नहीं है, यः इह नाना इव पश्यति = जो ब्रह्म में स्वकीय-परकीय भेद देखता है, सः मृत्योः मृत्युं आप्नोति = वह एक मृत्यु के पीछे दूसरे मृत्यु को प्राप्त होता है ॥११॥

व्याख्या—यह आत्मस्वरूप श्रवण, मनन और निदिध्यासन से परिष्कृत मन से ही ग्रहण किया जा सकता है, अन्यथा नहीं। परमात्मा में बिल्कुल स्वकीय एवं परकीय भाव नहीं है। अथवा इस जगत् में स्वोपादान परमात्मा के बिना कुछ भी नहीं है। सब जगह वही है। यह नाम-रूप विश्व उन्हीं का स्वरूप है। इस जगत् में परमात्मा से कुछ भी भिन्न पदार्थ नहीं है। बाकी अर्थ पूर्ववत् है ॥११॥

देवगुरु बृहस्पति जी के शिष्य सर्वशास्त्रविशारद उद्धवजी ने कहा है—

'दृष्टं श्रुतं भूतभवद्भविष्यत् स्थास्नुश्चरिष्णुर्महदल्पकं च ।
विनाऽच्युताद् वस्तुतरां न वाच्यं स एव सर्वं परमात्मरूपः' ॥
(श्रीमद्भा. १०।४६।४३)

जिनको उपर्युक्त श्लोक का अर्थ मालूम हैं वे ही वास्तविक पण्डित एवं दार्शनिक हैं।

'सा विद्या सन्मतिर्यया, सा विद्या या विमुक्तये'। वह विद्या है जिससे परब्रह्म परमात्मा में मति-बुद्धि लगे, वह विद्या है जिससे मुक्ति मिले।

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते ॥ एतद् वै तत् ॥१२॥

तत्त्वप्रकाशिका—अङ्गुष्ठमात्रः = अङ्गुलपरिमाणः। हृद्यकाशापेक्षयाऽङ्गुष्ठमात्रत्वोक्तिः। पुरुषः = पूर्णः षड्गुणो भगवान्। आत्मनि = शरीरे। मध्ये = गुहायां तिष्ठति। परमात्मानं विशिनष्टि—ईशानो भूतभव्यस्येति। कालत्रयवर्तिनिखिलचेतनस्येश्वरो नियन्ता। न तत इति पूर्ववत्। एतत् विशेषणेन जीवात्मनो व्यावृत्तिस्तस्य भूतभव्येशानत्वाभावात्। 'शब्दादेव प्रमितः'। (ब्र.सू.१।३।२४) इत्यधिकरणे भूतभव्येशितृत्वलिङ्गादयं मन्त्रः परमात्मपर एवेति सिद्धान्तिततत्वात्। 'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठश्च समाश्रितः' (१६।३) इति तैत्तिरीयके। 'अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः'। इति श्वेताश्वतरे (३।१३) चाङ्गुष्ठमात्रत्वस्य परमात्मन्यपि श्रवणात्॥१२॥

सान्वयानुवाद—अङ्गुष्ठमात्रः = अंगूठे के बराबर, पुरुषः = षड्विध ऐश्वर्य-परिपूर्ण भगवान् श्रीहरि, ईशानः = सबका स्वामी, आत्मनि मध्ये तिष्ठति = शरीर के बीच में रहते हैं। भूतभव्यस्य = भूत और भविष्य का नियन्ता है। ततः न विजुगुप्सते = जो इस प्रकार जानता है उसको संसार में किसी से भय नहीं होता है॥१२॥

व्याख्या—अब परब्रह्म परमात्मा भगवान् श्रीकृष्ण का वर्णन करते हैं—वे अँगूठे के बराबर आकार वाले, मुकुटमण्डित पीताम्बर धारण किये हुए श्याम वर्ण के बड़े ही सुन्दर हैं तथा सम्पूर्ण प्राणियों के हृदय में प्रविष्ट हैं।

'ईश्वरो जीवकलया प्रविष्टो भगवानिति'। (श्रीमद्भा.३।२९।३४) 'सर्वस्य चाहं हृदि सन्निविष्टः'। (गीता १५।१५)

'अङ्गुष्ठमात्रममलं स्फुरत्पुरटमौलिनम्।
अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतम्'॥ (श्रीमद्भा.१।१२।८)

वे तीनों काल में (भूत-भावी-भवन्) रहने वाले सभी चेतन प्राणियों के शासक हैं। समग्र ऐश्वर्य, समग्र धर्म, समग्र यश, समग्र श्री, समग्र ज्ञान और समग्र वैराग्य इन छः गुणों से वे सर्वतः परिपूर्ण हैं। पुरुष शब्द से वेदान्तशास्त्र में श्रीकृष्ण ही लिये जाते हैं। इस प्रकार जो परम पुरुष भगवान् श्रीकृष्ण को अपने हृदय में अँगूठे के रूप में स्थित देखता या अनुभव करता है एवं कालत्रय का स्वामी जानता है वह किसी की निन्दा नहीं करता, किसी का तिरस्कार नहीं करता; इसलिये उसको संसार में किसी से भय नहीं होता॥१२॥

**अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः।
ईशानो भूतभव्यस्य स एवाद्य स उ श्वः। एतद्वै तत्॥१३॥
यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति।
एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति॥१४॥**

तत्त्वप्रकाशिका—अङ्गुष्ठमात्र इति पूर्ववत्। धूमानावृताग्निरिव प्रकाशकः। उरप्यर्थे। स एवाद्य वर्त्तते स एव श्वोऽपि वर्त्तिष्यते। अनाद्यनन्तकालेऽपि वर्त्तते।

कालत्रयवर्त्तिनो यावन्तः पदार्था उपलभ्यन्ते ते सर्वेऽपि भगवदात्मका इति भावः। एतद्वै तत् पूर्ववत्। यथा पर्वतेषु दुर्गे = गिरिशिखरे, दृष्टं = सिक्तं, उदकं = जलं, निम्नप्रदेशेषु विधावति। एवं परमात्मगतदेवान्तर्यामित्वमनुष्यान्तर्यामित्वादिधर्मान् पृथगधिकरणनिष्ठान् पश्यन् पर्वतनिर्झरपातमनुकृत्य संसारकुहरे पततीत्यर्थः ॥१३-१४॥

सान्वयानुवाद—भूतभव्यस्य = भूत-भविष्य का, ईशानः = नियन्ता, अङ्गुष्ठमात्रः पुरुषः = अँगूठे के बराबर आकार वाले भगवान्, अधूमकः ज्योतिः इव = धूम रहित ज्योति की भाँति। स एवं अद्य = वही आज है, स उ श्वः = वही कल भी रहेगा॥ यथा = जैसे, उदकं = जल, दुर्गे = ऊँचे शिखर पर, दृष्टं = छिडका हुआ, पर्वतेषु = पहाड़ों में, विधावति = चला जाता है। एवं = इस तरह, धर्मान् = धर्मों को, पृथक् = अलग, पश्यन् = देखकर, तान् एव अनुधावति = उन्हीं के पीछे दौड़ता रहता है॥१३-१४॥

व्याख्या—अखिल चेतन प्राणियों के नियन्ता और उनकी हृदयगुहा में स्थित अँगूठे के बराबर कुण्डल और मुकुट पहने धूम से अनावृत अग्नि के समान प्रकाशक भगवान् श्रीकृष्ण भूत, भविष्य और वर्त्तमान काल का नियन्त्रण करने वाले सर्वसमर्थ ईश्वर हैं। वे परम दयालु आज हैं, वे कल भी रहेंगे और अनादि-अनन्त काल में भी रहते हैं॥१३॥

जैसे पहाड़ों पर छिड़का हुआ पानी नीचे की ओर बहने लगता है वैसे ही परमात्मा के भीतर रहने वाले देवान्तर्यामित्व-मनुष्यान्तर्यामित्वादि धर्मों को पृथक् अधिकरण करके जो देखता है वह पहाड़ी झरना पात का अनुकरण कर संसार रूप गुफा में गिरता है॥१४॥

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।
एव मुनेर्विजानत आत्मा भवति गौतम॥१५॥

इति द्वितीयाध्याये चतुर्थी वल्ली समाप्ता।

तत्त्वप्रकाशिका—सवत्र देवादिषु मनुष्यादिषु चैक एव परमात्मेति विजानतो मुनेरात्माऽपि तज्ज्ञानेन विशुद्धः सन्परमात्मना समानो भवतीत्याह—हे गौतम! यथा शुद्धे उदके शुद्धं जलमासिक्तं योजितं तादृगेव तत्समदृशमेव भवति, न कथञ्चिद् विसदृशं भवति किन्तु न तत्तदेव भवति, अन्यथा बुद्धिदर्शनासम्भवात्। एवं विजानते मुनेरात्माऽपि मुक्तः सन् तादृगेव परमात्मसदृश एव भवति॥१५॥

इति काठकोपनिषत्तत्त्वप्रकाशिकाटीकायां द्वितीयाध्याये
चतुर्थी वल्ली समाप्ता॥

सान्वयानुवाद—गौतम = हे गौतम! यथा = जैसे, शुद्धं उदकं = शुद्ध जल, शुद्धे आसिक्तं = शुद्ध जल में डालने पर, तादृग् एव भवति = वैसा ही हो जाता है, एवम् = इस तरह, विजानतः मुनेः आत्मा भवति = जानने वाले मुनि का आत्मा भगवत्साधर्म्य हो जाता है॥१५॥

व्याख्या—जैसे वर्षा का शुद्ध जल किसी जलाशय में गिरा तो उसके शुद्ध जल में वह मिल जाता है, शुद्ध जल में शुद्ध जल मिलकर तद्भाव—तत्समानता को प्राप्त होता है, ठीक उसी तरह मननशील आत्मज्ञानवान् पुरुष-जीव परमात्मा श्रीकृष्ण के समधर्मी हो जाता है। भगवान् ने अपने श्रीमुख से स्वयं कहा भी है—

'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः'। (गीता १४।२)

॥ द्वितीय अध्याय की चतुर्थ वल्ली समाप्त ॥

•

अथ द्वितीयाध्याये पञ्चमी वल्ली

पुरमेकादशद्वारमजस्यावक्रचेतसः ।
अनुष्ठाय न शोचति विमुक्तश्चाविमुच्यते। एतद्वै तत् ॥१॥

तत्त्वप्रकाशिका—पुरमेकादशद्वारम्। चक्षुषी श्रोत्रे नासिके मुखञ्चेति सप्त-शीर्षण्यानि नाभिरसनं गुह्यञ्चेति त्रीणि शिरस्येकमित्येकादशद्वारमिदं पुरम् = शरीरम्। अजस्य = जननादिरहितस्य। अवक्रचेतसः = ऋजुबुद्धेर्विवेकिन आत्मनः शरीराख्यं पुरं भवतीत्यर्थः।

यस्येदं पुरं तं पुरस्वामिनं शरीरात्पृथग्भूतमिति। हरेरधीनस्थितिप्रवृत्तिकमिति च विविच्य परमात्मानमनुष्ठाय ध्यात्वा न शोचति। शरीराभिमानकृतो हि शोकः। शरीरस्य भगवदधीनस्थितिप्रवृत्तिकत्वेन तदभिमानाभावान्न शोक इति भावः। एतद्वै तत्। एतन्मन्त्रेण यत्प्रत्यगात्मनः स्वरूपमभिहितं तद्भगवदायत्तत्वात् तदात्मकमेवेत्यर्थः ॥१॥

सान्वयानुवाद—अवक्रचेतसः = सरल हृदय ('चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः), अजस्य = अजन्मा आत्मा का, एकादशद्वारम् = ग्यारह दरवाजे वाला, पुरम् = शरीर है, विमुक्तः = निवृत्तिमार्गनिरत मुनि, अनुष्ठाय न शोचति = भगवान् की अहैतुकी भक्ति करके कभी शोक नहीं करता, च = और, विमुच्यते = (विषयों से) छूट जाता है ॥१॥

व्याख्या—जिसकी बुद्धि सरल है ऐसे षड्विध विकारों से रहित चित्स्वभाव जीवात्मा का शरीर को नगर के रूप में कल्पना करके वर्णन करते हैं—जिसमें ग्यारह द्वार हैं। दो आँख, दो कान, दो नाक के छेद, एक मुख, नाभि, गुद—विष्टानिर्गमद्वार, शिश्न-मूत्रनिर्गमद्वार और एक मस्तक में ब्रह्मरन्ध्र—ये ग्यारह द्वार हैं। इन द्वारों का द्वारपाल जीवात्मा है, क्योंकि इन सब दरवाजों को खुलना-बन्द करना यह द्वारपाल का ही कार्य होता। जीवात्मा का यह पाञ्चभौतिक शरीर ग्यारह द्वारों वाला एक नगर है। इन ग्यारह द्वारों में से एक बड़ा द्वार है, जिसका नाम 'देहकुहर' है, उसमें जो आत्मा के रूप में बैठा हुआ है उसका नाम 'क' ब्रह्म है। 'कं ब्रह्म' (छा.उ. ४।१।५) तब 'द्वारक' शब्द हो गया। द्वारक शब्द से ही टाप् प्रत्यय करके द्वारका शब्द बना हुआ है।

विवेकी मनुष्य इस रहस्य को बुद्धि से ठीक तरह विचार करके निर्मल मन से द्वारकाधीश परमात्मा श्रीकृष्ण का ध्यान करके कभी शोक नहीं करता। वह जन्म-जरा-मरणादि रूप संसाराब्धितरङ्ग से सर्वदा के लिए मुक्त हो जाता है ॥१॥

हꣳसः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥२॥

तत्त्वप्रकाशिका—हंसः = सूर्यः, शुचिषत्–शुचौ = ग्रीष्मर्तौ सीदतीति शुचिषत् = तेजस्वी, वसुर्वायुः सर्वान्वासयतीति। अन्तरिक्षे सीदतीति अन्तरिक्षषद् अन्तरिक्षगतः। वेद्यां पूज्यतया सीदतीति वेदिषत्। होताऽग्निः। 'अग्निर्वै होता' इति श्रुतेः। अतिथिः सोमः सन् दुरोणे कलशे सीदतीति दुरोणसत्, ब्राह्मणोऽतिथिरूपेण वा दुरोणेषु गृहेषु सीदतीति वा। नृषु मनुष्येषु सीदतीति नृषत्। वरेषु देवेषु सीदतीति वरसत्। देवेषु वर्त्तमानम्। ऋतं सत्यलोको यज्ञो वा तस्मिन् सीदतीति ऋतसत्। व्योम्नि आकाशे परमपदे वा वर्त्तमानं व्योमसत्। अब्जा अप्सु शङ्खशुक्तिमकरादिरूपेण जायत इति। गोजा गवि पृथिव्यां व्रीहियवादिरूपेण जायत इति। ऋतेन जायते ऋतजाः कर्मफलभूताश्च स्वर्गादय इति यावत्। अद्रिजाः पर्वतेभ्यो जायन्ते नद्याद्याः। एतत् सर्वं बृहद् ऋतमपरिच्छिन्नसत्यरूपब्रह्मात्मकमित्यर्थः ॥२॥

व्याख्या—यह मन्त्र अनन्त अर्थ का बोधक है। चिन्तन-मनन करने से अनेकानेक अर्थबोध हो सकता है। अब इसके एक-एक शब्द की व्याख्या देखिये—

हंसः—अज्ञानं हन्ति, सर्वं गच्छतीति सर्वगो हंसो भगवान् श्रीकृष्ण एव = जो अज्ञान का हनन करता है एवं जो सबको व्याप्त कर सदा सर्वत्र रहता है वह हंसनामा भगवान् श्रीकृष्ण ही है। भगवान् ने अपने श्रीमुख से स्वयं कहा भी है—'तस्याहं हंसरूपेण सकाशमगमं तदा'। (श्रीमद्भा. ११।१३।३७) 'हन हिंसागत्योः' धातु से 'हंस' शब्द बनता है।

शुचिषद्—जो अनवरत अखिलदेहधारी जीवों के पवित्र हृदय में निवास करते हैं उनको मैं नित्य प्रणाम करता हूँ। 'नित्यं शुचिषदे नमः'। (श्रीमद्भा. ४।२४।३७)

वसुः—सर्वान् वासयति यद्वा वसति सर्वस्मिन्निति = जो सबको व्याप्त करते हैं अथवा जो सबमें निवास करते हैं–वसुः = श्रीकृष्णः। 'वस निवासे' धातु से 'वसु' शब्द बनता है।

अन्तरिक्षसद्—अन्तर्हृदि साक्षिरूपेण सीदतीति सदा तिष्ठतीत्यर्थः = जो समस्त जीवों के विशुद्ध अन्तःकरण में जाग्रत्, स्वप्न और सुषुप्ति अवस्था में साक्षिरूप से ठहरते हैं।

'भवानखिलदेहिनामरात्मदृक्'। (श्रीमद्भा. १०।३१।४)

आप सम्पूर्ण शरीरधारी जीवों के अन्तरात्मा तथा उनके द्रष्टा साक्षी हैं।

होता—'अग्निर्वै होता' = अग्नि ही होता है। इस श्रुति के अनुसार 'होता अग्नि को कहते हैं। यह उपलक्षण है। यज्ञ में जितनी वस्तुएँ होती हैं वह सब ब्रह्म ही हैं। 'त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयम्' (श्रीमद्भा.४।७।४५) अर्थात् आप क्रतु हैं, आप हवि हैं (अग्नि में डालने की वस्तु को हवि पद से कहते हैं), आप हुताश = अग्नि हैं। 'हुतं अश्नातीति हुताशोऽग्निः'।

वेदिषद्—वे यज्ञवेदी, तुलसीवेदी एवं ज्ञानवेदी में रहते हैं। 'कच्चित्तुलसि कल्याणि गोविन्दचरणप्रिये'। (श्रीमद्भा.१०।३०।७)

अतिथिः—आने तथा ठहरने की तिथि (समय) का निश्चय नहीं रहने से वह अतिथि ('न विद्यते तिथिर्यस्यासौ' इस विग्रह से) कहा जाता है।

'अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते।
स्वकीयं दुष्कृतं दत्त्वा पुण्यमादाय गच्छति'॥

अर्थात् जिस गृहस्थ के घर में अतिथि निराश होकर लौटता है वह उसे अपना पाप देकर और उसका पुण्य लेकर चला जाता है। अतिथिरूप से दुरोण = घरों में छिपकर रहता है, इसलिये अतिथि को 'दुरोणसत्' पद से कहा। आगे श्रुतियाँ परब्रह्म श्रीकृष्ण का वर्णन करती हुई कहती हैं—

नृषद्—भगवान् श्रीकृष्ण सब मनुष्यों में जीवरूप से स्थित हैं। 'ईश्वरो जीवकलया प्रविष्टो भगवानिति'। (श्रीमद्भा.३।२९।३४)

वरसद्—भगवान् श्रीकृष्ण सब देवताओं में निवास करते हैं। इसलिये देवताओं की अवहेलना नहीं करनी चाहिये। 'नूनं मे भगवांस्तुष्टः सर्वदेवमयो हरिः'। (श्रीमद्भा.११।२३।२९) सब देवताओं में निवास करने वाले एवं पाप-हरण करने वाले वे भगवान् मुझ पर प्रसन्न हों ('हरिर्हरति पापानि' इति स्मृतेः)।

ऋतसद्—प्रिय-मधुर वाणी का नाम 'ऋत' है। उसमें भगवान् श्रीकृष्ण निवास करते हैं। 'ऋतञ्च सूनृता वाणी कविभिः परिकीर्त्तिता'। (श्रीमद्भा.११।१९।३८) अर्थात् कवियों ने प्रिय-मधुर वाणी को 'ऋत' शब्द से कहा है। परन्तु महान् तपस्वी श्रीशुक्राचार्यजी ने कहा है—

'स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसङ्कटे।
गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम्'॥

अर्थात् स्त्रियों को मनाने में, हास-परिहास में, विवाह में, जीविका के विषय में, प्राणसङ्कट में, गो-ब्राह्मण की रक्षा के लिए एवं किसी की हिंसा हो रही हो तो अनृत = मिथ्या भाषण (झूठ बोलना) भी जुगुप्सित = निन्दित नहीं माना जाता है। महर्षि याज्ञवल्क्यजी ने भी कहा है—जहाँ सत्य (सच) बोलने से ब्राह्मण आदि चारों वर्णों के वध की सम्भावना हो वहाँ साक्षी असत्य (झूठ) बोल सकता है।

व्योमसद्—भगवान् श्रीकृष्ण परमपद में ठहरते हैं। यद्यपि 'व्योम' शब्द

आकाश का वाचक होता है तथापि लक्ष्य के अनुसार ही व्याख्यान करना चाहिये। यहाँ व्योम पद का अर्थ है परमपद अर्थात् वैकुण्ठ, जहाँ भगवान् जनार्दन लक्ष्मीजी की गोद में चरणारविन्द को रखकर शयन करते हैं—'अथो जगाम वैकुण्ठं यत्र देवो जनार्दनः' (श्रीमद्भा. १०।८९।७)

अब्जा—अप्सु जायते अब्जा = नलिनी। पानी में उत्पन्न कमल को अब्जा कहते हैं। यह तो सामान्य अर्थ है। परन्तु परमात्मा अप् जल में शङ्ख, शुक्ति (सीपी) और मकरादि रूपों से उत्पन्न होते हैं।

"रात्रिर्गमिष्यति भविष्यति सुप्रभातं भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
इत्थं विचिन्तयति कोशगते द्विरेफे हा हन्त हन्त 'नलिनीं' गज उज्जहार"॥

कमल की कली में बन्द भौंरा यह सोच रहा था कि रात बीतेगी, सूर्य उदय होगा और कमल खिलेगा तो मैं बाहर निकलूँगा। इतने में हाथी आया और वह नलिनी = कमल को उखाड़ कर खा गया। उसके साथ-साथ वह भौंरा भी हाथी के पेट में चला गया और उसकी मृत्यु हो गयी।

गोजा—गो—पृथिवी में धान, गेहूँ, जौ, मकई इत्यादि रूप से परमात्मा उत्पन्न होते हैं। अथवा गो अर्थात् गाय। मनुष्य गौ का दूध, दही, मक्खन, मलाई एवं घी का पर्याप्त प्रमाण में सेवन करें। बुद्धिमान् मनुष्य गौ की सेवा अवश्य करें।

'प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु'।

(शुक्लयजुर्वेद-वाजसनेयसंहिता अ.२०, मन्त्र १०)

ऋतजा—ऋतेन यज्ञेन जायते ऋतजाः कर्मफलभूताश्च स्वर्गादयः।

अद्रिजा—पर्वतेभ्यो जायन्ते नद्याद्याः। ऋतं = सत्यं, बृहत् = ब्रह्म। एतत्सर्वं ब्रह्मात्मकमित्यर्थः ॥२॥

अब उपर्युक्त परमात्म-स्वरूप बोध के लिये लिङ्ग को कहते हैं—

ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति।
मध्ये वामनमासीनं विश्वेदेवा उपासते ॥३॥

तत्त्वप्रकाशिका—सर्वेषां हृदि स्थितः परमात्मा ऊर्ध्वं हृदयात् प्राणवायुम् उन्नयति = ऊर्ध्वं गमयति, तथाऽपानं प्रत्यक् = अधः, अस्यति = क्षिपति। मध्ये = हृदयपुण्डरीके आसीनं, वामनं = वमनीयमुपासकैर्भजनीयम्। सर्वे विश्वेदेवाः = चक्षुरादयः प्राणा रूपादिज्ञानबलिमुद्वहन्तो विशो राजानमिव परमात्मानमुपासते ॥३॥

सान्वयानुवाद—प्राणम् = प्राण को, ऊर्ध्वं = उपर, उन्नयति = ले जाता है, अपानं = अपान को, प्रत्यक् = नीचे, अस्यति = फेंकता है, विश्वेदेवाः = सब देव, मध्ये = बीच में, आसीनं वामनम् उपासते = बैठने वाले उपासनीय अतिसुन्दर वामन देव की उपासना करते हैं ॥३॥

व्याख्या—शरीर के भीतर चलने वाले वायु को 'प्राण' कहते हैं। वह एक ही है तथापि उपाधि-भेद से पञ्चप्राण = प्राण, अपान, समान, उदान और व्यान इन नामों को प्राप्त करता है। (तर्कसंग्रह)

सम्पूर्ण प्राणियों के हृदयस्थित परमात्मा प्राणवायु को ऊपर ले जाता है और अपान वायु को नीचे की ओर फेंकता है। इन दोनों के बीच में जो हृदयकमल है उसमें भगवान् वामनदेव बैठे हैं। चक्षुरादि इन्द्रियाँ उनको रूपादि ज्ञानबलि का उपहार देती हैं। जैसे वैश्यादि राजा की उपासना करते हैं वैसे ही समस्त इन्द्रियाँ परमात्मा की उपासना करती हैं ॥३॥

आश्रमों सहित ब्राह्मण, क्षत्रिय, वैश्य और शूद्र ये चारों वर्ण परमात्मा के अङ्ग से ही उत्पन्न हुए हैं और उनकी सन्तान हैं। जो लोग परमपिता परमात्मा की उपासना नहीं करते हैं उनका अधः पतन हो जाता है। वे वर्ण और आश्रम से भ्रष्ट होकर नीच योनियों में चले जाते हैं और नरक-तुल्य कष्ट भोगते हैं। भगवत्प्रपन्न लोग भगवदाराधन-भजन-कीर्त्तन के विषय में कोई तर्क या युक्ति नहीं लगाते हैं; वे केवल श्रद्धा-भक्ति-विश्वास से ही भगवान् श्रीहरि का भजन करते हैं।

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः।
देहाद् विमुच्यमानस्य किमत्र परिशिष्यते॥ एतद्वै तत् ॥४॥

तत्त्वप्रकाशिका—शरीरस्थस्य = स्थूलशरीरस्य, अस्य = उपासकस्य, विस्रंसमानस्य = स्थूलं शरीरं त्यजतो देहाद् विशेषेण मुच्यमानस्य मुक्तस्य किमत्र परिशिष्यते। कृतकृत्यत्वात् कर्त्तव्यं किमपि नावशिष्यते। परब्रह्मणो वासुदेवस्यानवरतध्यायतो मुमुक्षोः 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये' (छा.उ.६।१४।२) इति श्रुत्यनुसारेण शरीरपात एवान्तरीयो न किञ्चित्कर्त्तव्यं परिशिष्यते इति भावः। एतद्वै तत्। पूर्ववत् ॥४॥

सान्वयानुवाद—शरीरस्थस्य = शरीर में रहने वाला, देही = (देहः अस्यास्तीति देही) जीवात्मा, विस्रंसमानस्य = जब इस शरीर को छोड़ने लगता है, देहात् = शरीर से, विमुच्यमानस्य = मुक्त, अस्य = जीवात्मा का, किं अत्र परिशिष्यते = क्या यहाँ कुछ अवशेष (बचा) रहता है ? ॥४॥

व्याख्या—चित्स्वभाव जीवात्मा का जन्म या मरण स्वरूप से नहीं होता। यह षड्विध विकारवाले शरीर का ही जन्म और मरण होता है। प्रश्न—इस स्थूल मनुष्य-शरीर में रहने वाला देही (जीवात्मा) स्थूल शरीर का परित्याग करके जब शरीर से निकल कर चला जाता है तब यहाँ क्या उसका कुछ पाप-पुण्य (प्रारब्धकर्म) अवशिष्ट रहता है ? उत्तर—वह परमात्मा के महान् अनुग्रह से अनुगृहीत और कृतकृत्य हो जाने के कारण उसका कर्त्तव्य कर्म यहाँ कुछ भी बचा नहीं रहता है।

सतत भगवच्चरणारविन्द का हृदय में ध्यान करने पर भगवान् श्रीहरि जिस पर

कृपा कर देते हैं वह लोकनिष्ठ और वेदनिष्ठ मति को बिल्कुल छोड़ देता है। (श्रीमद्भा.४।२९।४६) 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये' इस श्रुति के अनुसार परब्रह्म श्रीकृष्ण का निरन्तर ध्यान करने वाले मुमुक्षु पुरुष के लिए तभी तक विलम्ब है जब तक पाप-पुण्यरूप प्रारब्ध कर्म भोग द्वारा क्षय होकर देहपात नहीं हो जाता। उसके बाद वह ब्रह्मभाव को प्राप्त हो जाता है ॥४॥

न प्राणेन नापानेन मर्त्यो जीवति कश्चन।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥५॥

तत्त्वप्रकाशिका—सकलजीवनहेतुप्राणापानप्रेरकत्वं परब्रह्मणः इति निरूपयन् तयोरपि जीवनहेतुत्वरूपमाहात्म्यं दर्शयति—न प्राणेन नापानेन, मर्त्यः = मनुष्यो देहवान्, कश्चन जीवति न कोऽपि जीवति। तर्हि केन जीवतीत्यत आह—इतरेणेति। प्राणापानाभ्यामितरेण परब्रह्मणैव जीवन्ति सर्वे। यस्मिन् = परमात्मनि, एतौ = प्राणापानावुपाश्रितौ, प्राणापानयोरपि जीवनं यद्धेतुकं तद्धेतुकमेव सर्वेषां जीवनमित्याशयः ॥५॥

सान्वयानुवाद—कश्चन मर्त्यः = कोई मरणधर्मा इन्द्रियवान् जीव, न प्राणेन न अपानेन जीवति = न प्राण से और न ही अपान से जीवित रहता है, इतरेण तु जीवन्ति = अन्य दूसरी वस्तु से ही सकल प्राणी जीवित रहते हैं, यस्मिन् एतौ उपाश्रितौ = जिसमें ये दोनों (प्राणवायु और अपान वायु) आश्रित होकर रहते हैं ॥५॥

व्याख्या—केवल प्राणवायु से अथवा केवल अपान वायु से कोई देहवान् प्राणी जीवित नहीं रह सकता। प्राण और अपान से भिन्न परमात्मा श्रीकृष्ण से ही सकल इन्द्रियवान् प्राणी पशु-पक्षी, मनुष्य, देवता आदि जीवित रहते हैं। जिस परमात्मा में उपाधि-भेद से ये प्राण, अपान, समान, उदान और व्यान रहकर कार्य करते हैं, उससे मरणधर्मा प्राणी जीवित रहता है ॥५॥

'हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः' ॥

प्राण हृदय में, अपान गुदा में, समान नाभिमण्डल में, उदान कण्ठदेश में और व्यान समस्त शरीर में रहता है।

हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्।
यथा च मरणं प्राप्य आत्मा भवति गौतम ॥६॥

तत्त्वप्रकाशिका—ये यं प्रेत इति प्रष्टुर्मुक्तस्वरूपेऽपि सन्देह आसीत् विशेषतस्तन्निवृत्त्यर्थमिदमुच्यते—हन्तेदानीमपि पुनरपि ते तुभ्यमिदं गुह्यं गोप्यं ब्रह्म सनातनं प्रवक्ष्यामि। हे गौतम! आत्मा = प्रत्यगात्मा, मरणं = मोक्षं प्राप्य, यथा = यादृक्रूपसम्पन्नो भवति तथा पुनरपि तुभ्यं वक्ष्यामीत्यर्थः ॥६॥

सान्वयानुवाद—गौतम = गोतमवंशोद्भव हे नचिकेता! हन्त = फिर भी, ते =

तुम्हें, इदं गुह्यं सनातनं ब्रह्म प्रवक्ष्यामि = यह गोपनीय सनातन ब्रह्म का उपदेश करता हूँ। च = और, आत्मा = जीवात्मा, मरणं प्राप्य यथा भवति = मृत्यु को प्राप्त होकर जिस प्रकार योनि को प्राप्त होता है ॥६॥

व्याख्या—यमराज कहते हैं—नचिकेता! इस समय तुमको गोप्य सनातन ब्रह्म का उपदेश करता हूँ। जिनमें अस्ति-नास्ति दोनों का बहुत सुन्दर वर्णन है। तुम उनका समाहित-चित्त से ध्यानपूर्वक हमसे श्रवण करो। जीवात्मा इस स्थूल शरीर से मुक्त होकर जैसे रूप से सम्पन्न होता है वैसे ही फिर से तुम्हें बताता हूँ ॥६॥

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ॥७॥

तत्त्वप्रकाशिका—अधिकारिविशेषनिर्देशपरेण हन्त इत्यनेन विवक्षितमर्थं विवृण्वन्नाह—अन्ये = परब्रह्मश्रवणमननादिविमुखाः मूढाः, शरीरत्वाय = शरीर-ग्रहणार्थं, देहिनः = देहवन्तः मनुष्ययोनिं प्रपद्यन्ते। स्थाणुं = वृक्षादिस्थावरभावमन्येऽत्यन्ताधमाः। मरणं प्राप्य अनुसंयन्ति = अनुगच्छन्ति। केषाञ्चित् मनुष्ययोनिप्राप्तिः। अन्येषां स्थाणुयोनिप्राप्तिरित्यत्र किं विनिगमकमिति जिज्ञासायामाह–यथेति। यथाकर्म = यैर्यादृशं कर्म जन्मान्तरे कृतं तद्वशेन योनिप्राप्तिः। यथाश्रुतम् = यादृशं विज्ञानमुपार्जितं तदनुरूपमेव शरीरं प्रतिपद्यन्ते। 'रमणीयचरणाः' (छा.उ.५।१०।७); 'तं विद्याकर्मणी समन्वारभेते' (बृ.उ.४।४।२) इत्यादि श्रुत्यनुरोधादिति भावः ॥७॥

सान्वयानुवाद—यथाकर्म = जैसा जिसका कर्म, (और) यथाश्रुतम् = जैसा जिसका शास्त्रज्ञान होता है, अन्ये = दूसरे, देहिनः = शरीरधारी प्राणी, शरीर-त्वाय = शरीर प्राप्त करने के लिए, योनिं प्रपद्यन्ते = योनि को प्राप्त होते हैं, अन्ये = दूसरे, स्थाणुं = स्थावर-अवस्था (वृक्ष-योनि) को, अनुसंयन्ति = प्राप्त होते हैं ॥७॥

व्याख्या—कितने लोग ऐसे हैं जो अतिपरिश्रम से गृह, पुत्र, मित्र और धन-सम्पत्ति इकट्ठी करते हैं, अन्त में उनको सब कुछ छोड़कर मरना पड़ता है; मृत्यु हर समय उनकी चोटी पकड़े खड़ी है। इसपर वे बिल्कुल ध्यान नहीं देते हैं। जो सर्वभूतान्तरात्मा श्रीकृष्ण से विमुख हैं, न चाहने पर भी विवश होकर उन्हें घोर अन्धकार में जाना पड़ता है। यह श्रीमद्भागवत की कथा है।

यथाकर्म—जैसे धुन्धुकारी ने अपने भाई गोकर्ण से कहा—मैं तुम्हारा ही भाई धुन्धुकारी हूँ। मैंने अपने कुकर्मों से ब्राह्मणत्व का नाश कर डाला। बुरे-से-बुरे, बड़े-से-बड़े पापकर्म किये जिससे मैं प्रेत हो गया हूँ। इसलिये मैं प्रेत-योनि में भटक रहा हूँ। अब आप मुझे इस प्रेत-योनि से छुड़ाइये।

यथाश्रुतम्—जैसे महामति महाभागवत ध्रुवजी ने प्रतिदिन भगवान् श्रीहरि की मङ्गलमयी लोकपावनी कथा का श्रवण किया। उन्होंने भोगों से पुण्य का क्षय और

पुण्याचरण से पापों का क्षय करते हुए छत्तीस हजार वर्षों तक पृथिवी का शासन किया और उसके बाद उनको यह मालूम हुआ कि यह संसार तो भगवान् विष्णु की वैष्णवी माया से रचित है। 'मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्त्तते'। (श्रीमद्भागवत १०।८५।५४) 'विष्णोर्माया भगवती यया सम्मोहितं जगत्'। (१०।१।२५) वे सम्पूर्ण राज्य को तथा स्त्री-पुत्रादि को छोड़कर हरि-भजन करने के लिए बदरिकाश्रम चले गये।

कहाँ यह अनात्मा भौतिक शरीर और कहाँ प्रकृति से परे आत्मा? इस संसार में कौन किसका पति, कौन किसका पुत्र, भाई और बन्धु-बान्धव है ? इनमें मोह ही कारण है। लोग इनमें मोह के कारण फँसे हुए हैं। (श्रीमद्भा.८।१६।१९)

अन्ये स्थाणुं अनुसंयन्ति—जैसे नलकूबर और मणिग्रीव ये दोनों अपने निन्दित कर्मों से स्थाणु (पेड़) हो गये अर्थात् वृक्ष-योनि को प्राप्त हो गये।

(श्रीमद्भा. १०।१०।२१)

अन्ये देहिनः शरीरत्वाय योनिं प्रपद्यन्ते—जिस मनुष्य के मन में कर्मवासना रहती है उसको जीवयोनि में आने का अवसर प्राप्त होता है। शरीर-वियोग के समय मानव जीवन की अन्तिम घड़ी में मनुष्य को नारायण का स्मरण करना चाहिये। इस बात को ठीक तरह सोच-विचार कर विवेकी मनुष्यों को चाहिये कि वे मन से समस्त कर्मवासनाओं को निकाल दें।।७।।

य एष सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्म्मिमाणः।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ।।एतद्वै तत् ।।८।।

तत्त्वप्रकाशिका—यः प्रतिज्ञातः तमर्थमुपदिशति—यः पुरुषः पूर्णषड्गुणः परमात्मा। एषु जीवेषु सुप्तेषु सत्सु तदा कामं कामं सङ्कल्प्य सङ्कल्प्य स्वेच्छानुसारेण रथपथादीन् निर्मिमाणो जागर्त्ति तदेव शुक्रं प्रकाशकं तदेव ब्रह्म = पूर्णगुणं तदेवानन्याधीनममृतमुच्यते तेन मुक्तानां व्यावृत्तिस्तेषाममृतत्वं भगवदधीनमित्याशयः। तस्मिन् = परब्रह्मणि, सर्वे लोका आश्रिताः। तद् ब्रह्म कोऽपि नात्येति। अयञ्चार्थः सन्ध्यधिकरणे भाष्ये श्रीश्रीनिवासाचार्यचरणैर्निपुणं प्रकाशितः। एतद्वै तत् इति पूर्ववत् ।।८।।

सान्वयानुवाद—यः एषः = जो यह, कामं कामं = इच्छाविषयीभूत वस्तु-समुदाय को संकल्प करता हुआ, निर्म्मिमाणः पुरुषः = निर्माण करने वाला पुरुष—परमात्मा, सुप्तेषु जागर्त्ति = जाग्रत्, स्वप्न और सुषुप्ति अवस्था में भी जागते रहते हैं, तत् एव शुक्रम् = वही शुक्र है, तद् ब्रह्म = वही ब्रह्म है, तत् एव अमृतम् = वही अमृत है, उच्यते = यही सब वेद, उपनिषद् और पुराण आदि शास्त्रों में कहा जाता है। तस्मिन् = उसी में, सर्वे = सभी, लोकाः श्रिताः = लोक आश्रित हैं। तत् कश्चन उ = उसे कोई भी, न अत्येति = लाँघ नहीं सकता। एतत् वै तत् पूर्ववत् ।।८।।

व्याख्या—परब्रह्म श्रीकृष्ण जाग्रत्, स्वप्न और सुषुप्ति इन तीनों अवस्थाओं में साक्षी रूप से रहते हैं। जीवों में ये तीन अवस्थाएँ होती हैं। श्रीकृष्ण ही जीवों की तीनों अवस्थाओं के मूल में द्रष्टारूप से स्थित हैं। भगवान् श्रीकृष्ण की महिमा को 'परब्रह्म' शब्द से वेदान्त-शास्त्र में कहा जाता है। भगवान् ने अपने श्रीमुख से स्वयं राजा सत्यव्रत से कहा भी है—'मदीयं महिमानञ्च परं ब्रह्मेति शब्दितम्'। (श्रीमद्भा. ८।२४।३८) जैसे वायु और अग्नि से तपाया हुआ सुवर्ण कान्ति वाला होता है वैसें ही भगवान् श्रीकृष्ण सुवर्ण के समान कान्तिवाले हैं। वे षडैश्वर्यों से सर्वतः परिपूर्ण आप्तकाम हैं। 'कामं कामं निर्मिमाणः' का अर्थ है—वे अपनी इच्छानुसार उपासकों के मनोवाञ्छित फल प्रदान करने वाले हैं। 'नमस्त आशिषामीश' (श्रीमद्भा. ४।२४।४२)—हे भगवन्! आप समस्त कामनाओं को पूर्ण करने वाले आपको मैं प्रणाम करता हूँ।

'स ईश्वरो मे कुरुतान्मनोरथम्' (श्रीमद्भा.६।४।३४) अर्थात् वे षडैश्वर्यपूर्ण परमात्मा हमारा मनोरथ पूर्ण करें। वे सब लोकों के आधार हैं, इसलिये सम्पूर्ण लोक उन पर आश्रित हैं। उनको कोई भी नहीं लाँघ सकता। उनके बनाये हुए नियमों का कोई भी अतिक्रमण नहीं कर सकता ॥८॥

सनातन पद से दो प्रकार के व्युत्पत्तिगत अर्थ व्युत्पन्न होते हैं—'सदा तनोतीति सनातनः। यद्वा सदा तिष्ठतीति सनातनः'। सनातन धर्म, सनातन ब्रह्म, सनातन जीव और सनातनी प्रकृति। 'वक्ष्ये सनातनं धर्मम्'। (श्रीमद्भा.७।११।५) 'प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्'। (क.उ.२।२।६) 'ममैवांशो जीवलोके जीवभूतः सनातनः'। (श्रीमद्भग. १५।७) प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि'। (श्रीमद्भग.१३।१९)

पुरुषं = जीवम्। अनादी = सनातनौ। विद्धि = जानीहि। धर्म, ब्रह्म, जीव और प्रकृति ये चारों वस्तु सनातन नित्य सत्य हैं—यह कथन वेद और शास्त्रों से सिद्ध हो गया। वैसे ही परब्रह्म श्रीकृष्ण के वासुदेव, सङ्कर्षण, प्रद्युम्न और अनिरुद्ध ये चारों व्यूह (अङ्ग) भी नित्य हैं।

'नमो भगवते तुभ्यं वासुदेवाय धीमहि।
प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च' ॥ (श्रीमद्भा.१।५।३७)

इस मन्त्र में श्रीमन्निम्बार्काचार्यजी के गुरुदेव देवर्षि नारदजी ने कहा—हम भगवान् श्रीकृष्ण का ध्यान करते हैं एवं नमन करते हैं। वासुदेव, सङ्कर्षण, प्रद्युम्न और अनिरुद्ध को केवल नमस्कार करते हैं। यह हमारे द्वैताद्वैत-वेदान्त-सिद्धान्त है।

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥९॥

तत्त्वप्रकाशिका—अहमर्थस्यात्मनो दुर्बोधत्वमाशङ्क्याह—यथा एक एवाग्निः प्रकाशकः, भुवनं = ब्रह्माण्डं, त्रिवृत्करणव्याप्त्या प्रविष्टः सन् रूपं रूपं भौतिकव्यक्ति

प्रति। प्रतिरूपः दाह्यभेदेन बहुविधो बभूव, सर्वत्र भौतिकपदार्थेषु तेजोधातोर्मिलितत्वेन प्रतिसङ्क्रान्तरूपत्वात्। तथा एक एव सन् परमात्मा सर्वभूतान्तरात्मा = सर्वेषां भूतानां प्रत्यगात्मनाम् अभ्यन्तरात्माऽन्तर्यामितया प्रविष्टत्वात्। प्रतिरूपो बभूव। बहिश्च बहिरप्याकाशवत् स्वेनाविक्रियरूपेण व्याप्नोतीत्यर्थः ॥९॥

सान्वयानुवाद—यथा एकः अग्निः भुवनं प्रविष्टः = जिस प्रकार एक अग्नि ब्रह्माण्ड में प्रविष्ट होकर, रूपं रूपं प्रतिरूपः बभूव = ब्रह्माण्डस्थ उन वस्तुओं का जैसा आकार होता है वैसे ही आकार वाली—रूपवाली अग्नि हो जाती है। तथा एकः सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपः = वैसे ही सभी प्राणियों के भीतर आत्मा के रूप में बैठा हुआ परमात्मा एक ही है, बहिः च = बाहर भी वही है ॥९॥

व्याख्या—एकः सर्वभूतान्तरात्मा—इस मन्त्र को महर्षि श्रीकृष्णद्वैपायन वेदव्यास जी ने बहुत ही सम्यक् प्रकार से व्याख्या की हैं—

'यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु।
नानेव भाति विश्वात्मा भूतेषु च तथा पुमान्' ॥ (श्रीमद्भा. १।२।३२)

अर्थात् जैसे लकड़ी बड़ी हो, छोटी हो या मोटी हो लेकिन एक ही आग उसमें हर तरह से मालूम पड़ती है और दिखाई देती है ठीक वैसे ही इस विश्वसृष्टि में अर्थात् सर्वभूतों में एक ही सर्वात्मा भगवान् श्रीकृष्ण नाना नामों से और नाना रूपों से प्रकाशित हो रहे हैं।

'अहं सर्वेषु भूतेषु भूतात्माऽवस्थितः सदा।
तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडम्बनम्' ॥ (श्रीमद्भा. ३।२९।२१)

भूतात्मा मैं सदा सभी भूतों में अवस्थित हूँ। जो मनुष्य मुझ सर्वभूतावस्थित परमात्मा का अवज्ञा-तिरस्कार (अनादर) करके मेरा पूजन करता है वह पूजा नहीं ढोंग है। वह मूर्ख राख में हवन करता है। 'भूस्मन्ये जुहोति सः' ॥९॥

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बभूव ॥१०॥

तत्त्वप्रकाशिका—अन्यदृष्टान्तेन परबुद्ध्यारूढं करोति—वायुर्यथा त्रिवृत्करणरीत्या भुवनं प्रविष्टः प्राणात्मना सर्वव्यक्तिष्वनुप्रविष्टो रूपं रूपं प्रतिरूपो बभूवेत्यादिपूर्ववत्समानम् ॥१०॥

व्याख्या—जिस प्रकार एक ही वायु त्रिवृत्करण रीति से ब्रह्माण्ड में प्रविष्ट होकर प्राणरूप से सम्पूर्ण व्यक्तियों में अनुप्रविष्ट होकर प्रत्येक रूप के अनुरूप हो रहा है, उसी प्रकार सम्पूर्ण भूतों का एक ही अन्तरात्मा—ईश्वर प्रत्येक रूप के अनुरूप हो रहा है। तत्त्व एक ही है, नाम-रूप से बहुविध मालूम हो रहा है। जैसे कि वायु नाना पुष्पों की गन्ध से नाना गन्धवान् प्रतीत होता है, परन्तु वायु एक ही है; वैसे ही एक सर्वभूतान्तरात्मा श्रीकृष्ण ही हैं।

सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥११॥

तत्त्वप्रकाशिका—यद्येकस्य ब्रह्मणः सर्वान्तरात्मत्वमेष्टव्यं तदा जीवात्मवद् दुःखित्वं तस्य प्रसज्येतेत्याशङ्क्यान्यथोपपत्तिमाह—'आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्' इति श्रुत्या यथा सूर्यः सर्वलोकस्य चक्षुः चक्षुरधिष्ठातृतया तदन्तर्गतोऽपि चाक्षुषैः = बहिर्निर्गतैश्चक्षुर्मलादिभिः काणपित्तादिभिश्चाध्यात्मिकदोषैस्तथा बाह्यैश्चाशुच्यादिदर्शनसंसर्गदोषैश्च न लिप्यते न स्पृश्यते तथा परमात्मा एकः सर्वभूतेष्वात्मतया वर्त्तमानोऽपि तद्गतेनानेकप्रकारलोकदुःखेन न लिप्यते न स्पृश्यते। यतो बाह्यः लोकदुःखाद् बहिर्भूतः तस्य स्वाभाविकापहतपाप्मत्वादिगुणवत्तया स्वेतरवस्तुभ्यो विजातीयत्वात् ॥११॥

व्याख्या—यदि कोई यह शङ्का करे कि एक सर्वभूतान्तरात्मा परमात्मा भूतों के साथ साहचर्य होने से जीवात्मा के समान दुःखों का भोग भी करता ही होगा ? ऐसी शङ्का करने वालों को उत्तर देते हैं—जैसे सूर्य सब लोगों की आँख है, फिर भी लोगों की आँखों के दोषों से सूर्य को किसी तरह दोष नहीं लगता है, ठीक इसी तरह सब भूतों का अन्तरात्मा एक है। वह लोगों के दुःखों से कदापि दुःखित नहीं होता, क्योंकि वह लोगों के दुःखों से बिल्कुल अलग है। 'सर्वभूतान्तरात्मा लोकदुःखेन बाह्यः अतः सः न लिप्यते'। 'लोको विश्वे जने' इति हैमः। सम्पूर्ण प्राणियों के भीतर छिपा हुआ सबका अन्तर्यामी सर्वव्यापी परमात्मा एक ही है। वह सबमें रहता हुआ भी सबसे बिल्कुल अलग है। मूढ़ अज्ञ लोग उस असङ्ग परमात्मा को आसक्त मानते हैं। जिस परमात्मा के चरणारविन्द की सेवा-पूजा से कर्माख्य अविद्या का नाश हो जाता है और श्रीभगवद्भावापत्तिरूपा मुक्ति की प्राप्ति होती है, उसमें आसक्ति कहाँ से आ सकती है?,

'न लिप्यते लोकदुःखेन बाह्यः'।

'जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराद्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ॥
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि' ॥१॥

यह श्रीमद्भागवत के प्रथम स्कन्ध के प्रथम अध्याय का प्रथम पद्य है। इसमें 'सत्यं परं धीमहि' का प्रयोग करके तो श्रीमद्भागवत का वैदिकत्व सूचित कर दिया गया है—'सत्यं ज्ञानमनन्तं ब्रह्म'; 'ब्रह्मविदाप्नोति परम्'; 'भर्गो देवस्य धीमहि'। अतः श्रीमद्भागवत साक्षात् वेदान्त है। 'वयं प्रकृतेः परं परब्रह्म श्रीकृष्णं धीमहि ध्यायेम'।

'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' ॥ इति स्मृतेः।

कृष् शब्द का कर्षण अर्थ है और णकार का सुख अर्थ है। इन दोनों के मिलने पर कर्षण और सुखरूप के आश्रय परब्रह्म श्रीकृष्ण यह कहलाता है।

अब जरा ध्यान देकर सुनिये—श्रीमन्निम्बार्काचार्यजी जिस परतत्त्व का ध्यान करते थे—

स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम्।
व्यूहाङ्गिनं ब्रह्म परं वरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरिम् ।।२।।

योऽस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो
यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ताः ।।
यं सम्पद्य जहात्यजामनुशायी सुप्तः कुलायं यथा
तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम्' ।।३।।

'ध्यायेत्' इस विधिवाक्य का प्रयोग करके यह निर्देश कर दिया गया है कि परब्रह्म स्वरूप श्रीकृष्ण का ही निरन्तर ध्यान करना चाहिये। निश्चित ही भगवान् श्रीकृष्ण का दर्शन, श्रवण, मनन और विज्ञान हो जाने पर इन सबका ज्ञान हो जाता है। आत्मतत्त्व का ज्ञान केवल तर्क से नहीं हो सकता, उसके लिये तो श्रोत्रिय भगवन्निष्ठ आचार्य की सन्निधि में जाना चाहिये। 'आचार्यवान् पुरुषो वेद'। (छा.उ.६।१४।२)

'गुरुर्न स स्यात् स्वजनो न स स्यात् पिता न स स्याज्जननी न सा स्यात्।
दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युम्' ।।

भगवान् श्रीऋषभदेवजी कहते हैं—गुरु, स्वजन, पिता, माता, दैव और पति वे नहीं कहलाते हैं जो समुपेत मृत्यु से न छुड़ा सकें।

अब हम आगे वल्ली की बात की ओर आते हैं—जो लोग कहते हैं कि सजातीय-विजातीय स्वगतभेदशून्य ब्रह्म में है—उनका यह मत—'न लिप्यते लोकदुःखेन बाह्यः' इस श्रुति से निरस्त हो गया।

"यतो बाह्यः लोकदुःखाद् बहिर्भूतः तस्य स्वाभाविकापहतपाप्मत्वादिगुणवत्तया स्वेतरवस्तुभ्यो विजातीयत्वात्। मायागुणदोषलेशरहितत्वात्। मायानियन्तृत्वात्। अव्यक्तजीवेश्वरत्वात्। सर्ववेदैकवेद्यत्वात्। विश्वसृष्टिस्थितिप्रलयासाधारणधर्मत्वात्। जीवमोक्षप्रदातृत्वात्। 'मुक्तिं ददाति मुकुन्दः' इति श्रीशुकवचनात्"।

'आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' ।। (गी.८।१६)

अर्थात् हे कुन्तीपुत्र (अर्जुन)! ब्रह्मलोक से आरम्भ करके समस्त लोकों का पुनः-पुनः आवर्त्तनशील (उत्पत्तिविनाशधर्मयुक्त) होता है परन्तु मुझको प्राप्त होकर पुनर्जन्म नहीं होता।

'अपीच्यदर्शनं शश्वत् सर्वलोकनमस्कृतम्।
सन्तं वयसि कैशोरे भृत्यानुग्रहकातरम्' ।।

भगवान् की किशोरावस्था है। उनके दर्शन बहुत ही सुन्दर हैं। वे उपासकों पर

अनुग्रह करने के लिए व्यग्र हैं। समस्त देवजन-मनुष्यजन उनको नमस्कार करते हैं। उपासकों को निर्मल मन से इस रूप का ध्यान करना चाहिये।(श्रीमद्भा.३।२८।१७)

'अनादित्वान्निर्गुणत्वात् परमात्मायमव्ययः।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते' ॥ (गी.१३।३१)

'प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः।
अविकारादकर्त्तृत्वान्निर्गुणत्वाज्जलार्कवत्' ॥ (श्रीमद्भा.३।२७।१)

हे कुन्तीपुत्र (अर्जुन)! यह अविनाशी परमात्मा (मैं) अनादि होने से और निर्गुण—मायागुणदोषलेशरहित होने से सब देहों में रहता हुआ भी लिप्त नहीं होता। वह असङ्ग परमात्मा सभी शरीर में रहता हुआ भी प्रकृति के सुख-दुःखादि गुणों से लिप्त नहीं होता, क्योंकि वह अविकारी, अकर्त्ता और निर्गुण है। जैसे जलाशय या सरोवर में जल के हिलने पर भी अर्क—सूर्य नहीं हिलता।

इस परमात्मा को पुरुष, देव, सर्वात्मा, विश्वात्मा, विश्वरूप, सर्वनामा, सर्व-भूतान्तरात्मा और भूतभावन आदि कहते हैं।

एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥१२॥

तत्त्वप्रकाशिका—एकः = मुख्यः समानातिशयशून्यः, वशी = सर्वेषां प्रकृतिकाल-कर्मब्रह्मादीनां वशयिता, यतः सर्वभूतान्तरात्मा एकं बीजं स्वेनैकीभूतम्। अविभागवस्थं प्रकृतिलक्षणं बीजं महदादिरूपेण बहुधा = बहुविधं विश्वरूपेण करोति; 'तमःपरे देवे एकी भवती'ति श्रुतेः। तमात्मस्थं = स्वान्तर्यामिणं, ये धीराः = निवृत्तबाह्यवृत्तयः विवेकिनोऽनुपश्यन्ति।

शास्त्राचार्योपदेशमनु साक्षादनुभवन्ति, तेषां भागवतानां शाश्वतं नित्यं भगवद्भावा-पत्तिरूपं सुखम्भवति नेतरेषां = तद्विपरीतानामित्यर्थः ॥१२॥

सान्वयानुवाद—सर्वभूतान्तरात्मा एकः = सब भूतों की अन्तरात्मा एक है, वशी = सबको वश में करने वाला, यः एकं रूपं बहुधा करोति = जो एक रूप से हर तरह की चीजों को बना देता है, तमात्मस्थं = शरीर में रहने वाले उस परमात्मा को, ये धीराः अनुपश्यन्ति = जो भक्त लोग देखते हैं—साक्षात् अनुभव करते हैं, तेषां शाश्वतं सुखम् = उनको परमानन्द सुख प्राप्त होता है, इतरेषां न = दूसरों को नहीं ॥१२॥

व्याख्या—परब्रह्म परमात्मा श्रीकृष्ण स्वतन्त्र और सर्वगत है। उसके समान अथवा उनसे बड़ा और कोई नहीं है। 'न त्वत्समोऽस्त्यभ्यधिकः'। (गी.११।४३) समस्त जगत् उसके अधीन है। परमात्मा का एक नाम 'विश्वकृदीश्वर' है। वह विश्वसृष्टिकर्ता = रचयिता है इसलिये—'एकं रूपं बहुधा करोति'। 'एकोऽहं बहु स्याम्' = मैं एक हूँ लेकिन अब बहुत होऊँगा। एक ही विश्वात्मा भगवान् विश्व के

अनन्त नाम-रूपों में अनेक रूप से बना है। विश्वकर्त्ता परमात्मा ने अनेक नामरूपिणी सृष्टि बनायी है। अपने शरीर के भीतर स्थित जो निष्काम महाभागवत लोग उस परमात्मा श्रीकृष्ण को देखते हैं उन्हीं को अविनाशी परमानन्द सुख मिलता है, दूसरों को नहीं ॥१२॥

नित्योऽनित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥१३॥

तत्त्वप्रकाशिका—भयोऽपि तमेवार्थं प्रथयति—यः नित्यानां = शाश्वतानां, चेतनानां = जीवानाम् अनन्तानाञ्च, नित्यः चेतनः एकः तैरुपासितः सन् = कामान् तद्वाञ्छितान्, विदधाति = निष्पादयति, तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः = संसारोपरतिपूर्वकभगवद्भावापत्तिरूपा मुक्तिः, शाश्वती = नित्या स्यात्। नेतरेषाम् = अभक्तानाम् ॥१३॥

सान्वयानुवाद—नित्यानां नित्यः = नित्यों में नित्य, चेतनानां चेतनः = चेतनों में चेतन, यः बहूनां एकः (सः) कामान् विदधाति = जो असंख्य-अनन्त जीवों में एक है वह सबकी कामनाओं को पूरा करता है। तं = उसको, आत्मस्थं = अपने शरीर में—हृदयकमल में, ये धीराः अनुपश्यन्ति = जो भक्त देखते हैं, तेषां शाश्वती शान्तिः = उनको आत्यन्तिकी शान्ति मिलती है, न इतरेषाम् = दूसरो को नहीं ॥१३॥

व्याख्या—इस श्रुति में जीवों के बहुत्व-अनेकत्व-नानात्व का प्रतिपादन किया गया है, साथ ही उनको नित्य और चेतन भी कहा गया है और अन्तर्यामी परमात्मा को एक बताया गया है। 'आत्मा एक ही है' ऐसा कहने वालों के मत को सनातनी श्रुति निगल गयी। जैसे पतगेन्द्र महाहि को भक्षण कर जाता है।

आत्मा अनेक हैं, भगवान् ने अपने श्रीमुख से स्वयं कहा भी है—

'अहमात्माऽऽत्मनां धातः'। (श्रीमद्भा. ३।९।४२)

एक सर्वात्मा भगवान् जीवों के सब अभीष्ट पदार्थ तथा नाना प्रकार के मनोवाञ्छित फल प्रदान करते हैं। जो उनको अपने हृदयपुण्डरीक में अनुभव करते हैं उन्हें शाश्वती शान्ति प्राप्त होती है। जो भगवान् का भजन नहीं करते हैं उनको सामान्य शान्ति भी नहीं मिलती तो उन अभक्तों को शाश्वती शान्ति कहाँ से मिलेगी? नेतरेषाम् ॥१३॥

तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम्।
कथं नु तद् विजानीयां किमु भाति विभाति वा ॥१४॥

तत्त्वप्रकाशिका—एवमुक्तोऽन्तेवासी आत्मनां दुर्ज्ञेयत्वेन कथं विजानीयामिति पृच्छति—तदन्तरात्मस्थं ब्रह्मानिर्देश्यमिदमित्थमिति निर्देशानर्हं, परमं = सर्वोत्तमं, सुखं = सुखस्वरूपं प्राकृतपुरुषवाङ्मनसयोरगोचरम्। एतदिति भवादृशा विवेकिनः

मन्यन्ते = साक्षात् कुर्वन्ति, कथं नु = केन प्रकारेण प्राकृतरूपहीनं ब्रह्म अहं विजानीयाम्। स्ववेद्यत्वमापादयेयं किमु भो तत् किं दीप्तिमत्त्वेन भाति तत्रापि विशेषेण स्पष्टं प्रकाशते उत तेजोऽन्तरसंवृतत्वान्न विस्पष्टं प्रकाशत इति प्रश्नः ॥१४॥

सान्वयानुवाद—तत् परमं सुखम् अनिर्देश्यम् = उस परम सुख को अङ्गुलि से निर्देश नहीं किया जा सकता, एतत् इति मन्यन्ते = ऐसा मानते हैं, तत् कथं नु विजानीयां = उसको (मैं) किस तरह जानूँ ? किं उ भाति वा विभाति = क्या वह चमकता है अथवा स्पष्ट प्रकाशित होता है ॥१४॥

व्याख्या—वह जो अनन्त ब्रह्मसुख है वह अनिर्देश्य—निर्देश करने के अयोग्य है, साधारण पुरुषों के वाणी और मन का अविषय है। इस सुख को आपके समान विवेकी पुरुष ही साक्षात् करते हैं। किस प्रकार से प्राकृत रूपहीन ब्रह्म को मैं जान सकूँ ? क्या वह स्वयं दीप्तिमान् रूप से चमकता है अथवा सूर्य की भाँति दूसरों को प्रकाशित करता है ॥१४॥

'भाति विभाति वा' इस प्रश्न के उत्तर श्रुति और स्मृति इस तरह दिखलाती हैं—

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥१५॥

इति काठकोपनिषदि द्वितीयाध्याये पञ्चमी वल्ली समाप्ता ॥२॥

'एवं सकृद्ददर्शाजः परब्रह्मात्मनोऽखिलान्।
यस्य भासा सर्वमिदं विभाति सचराचरम्' ॥
(श्रीमद्भागवते १०।१३।५५)

तत्त्वप्रकाशिका—'आदित्यवर्णं तमसः परस्तात्'। (श्वे. उ.३।८) सदेकरूपायेति वचनेन परमात्मा दिव्यमङ्गलविग्रहवत्तया सर्वातिशयदीप्तिमानस्तीत्याह—न तत्रेति। 'तत्र' तस्मिन् प्रकृते परब्रह्मणि सूर्यः सर्वप्रकाशोऽपि न भाति, तद् ब्रह्म न प्रकाशयति तथा तत्र चन्द्रश्च तारकाणि च तेषां समाहारश्चन्द्रतारकमपि न प्रकाशयति तथा तत्र नेमा विद्युतो भान्ति अस्मत्करणगोचरोऽयमग्निर्न भातीति किमु वक्तव्यं ब्रह्मणः सर्वतेजसामाच्छादकत्वादित्यर्थः।

ननु भास्वररूपवति सूर्यादौ प्रत्यक्षेणानुभूयमानेन भातीति प्रत्यक्षविरुद्धं कथमभिधीयते इति चेत्तत्राह—तमेव परमात्मानं भान्तं प्रकाशन्तमनुभाति सर्वमादित्यादिकं भाति प्रकाशते। तस्य सर्वतेजसां कारणत्वात्। भगवदायत्तः सूर्यादीनां प्रकाशः। तथाहि स्मृतिः—

'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्' ॥ (गी. १५।१२)

तस्य = ब्रह्मणः, भासा = कान्त्या, सर्वमिदं = सूर्यादिकं, विभाति = प्रकाशते ॥१५॥

इति काठकोपनिषत्तत्त्वप्रकाशिकाटीकायां द्वितीयाध्याये
पञ्चमी वल्ली समाप्ता ॥

सान्वयानुवाद—तत्र सूर्यः न भाति = वहाँ सूर्य प्रकाशित नहीं होता, न चन्द्रतारकं = न चन्द्रमा और तारागण, न इमाः विद्युतः भान्ति = न ये बिजलियाँ ही वहाँ चमकती हैं, अयं अग्निः कुतः = यह अग्नि कहाँ से ? तम् भान्तम् एव = उस दीप्तिमान् परमात्मा को ही, सर्वम् = सब (सूर्यादि), अनु = पीछे-पीछे, भाति = प्रकाशित करते हैं, अर्थात् ये सूर्यादि सर्वप्रकाशवान् परमात्मा का अनुकरण करते हैं। तस्य = उस परमात्मा की, भासा = कान्ति से, इदं सर्वं विभाति = यह समस्त चराचर जगत् प्रकाशित हो रहा है ॥१५॥

व्याख्या—'अनुकृतेस्तस्य च'। (ब्र.सू.१।३।२२) उस नित्य आविर्भूतस्वरूप परमात्मा श्रीकृष्ण का अनुकरण करने वाले सूर्यादि उस पर प्रकाश नहीं कर सकते, भगवान् श्रीकृष्ण के प्रकाश से यह सारी सृष्टि प्रकाशित होती है। हे अर्जुन ! सूर्य में स्थित जो तेज, चन्द्रमा में जो तेज और अग्नि में जो तेज है जिससे समस्त जगत् प्रकाशित हो रहा है, उस तेज—कान्ति को तू मेरी ही कान्ति जान। मेरे भय से वायु चलती है, सूर्य तपता है, इन्द्र वर्षा करता है, अग्नि जलती है और मृत्यु भी मेरे ही भय से प्राणियों का संहार करती हुई सब जगह विचरती है।

॥ द्वितीयाध्याय में पञ्चम वल्ली समाप्त ॥

•

अथ द्वितीयाध्याये षष्ठी वल्ली

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ॥
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥ एतद्वै तत् ॥१॥

तत्त्वप्रकाशिका—प्रकृतिकार्यसंसारवृक्षावधारणेन तन्मूलभूतस्य परब्रह्मणः स्वरूपादिकमवधारयितुं आदितः षष्ठी वल्लीयं प्रवर्त्तते—ऊर्ध्वमूल इति। ऊर्ध्वं = भगवद्धामगन्तृभगवद्भक्तस्य सर्वलोकातिक्रमणे सावर्णब्रह्माण्डोपरि वर्त्तमानं त्रिगुणात्मकप्रकृत्यावरणमेव मूलमादिर्यस्य संसारवृक्षस्येत्यूर्ध्वमूलः। अवाक्शाखः = ततोऽर्वाचीनाः सत्यलोकप्रभृतयः चतुर्दश लोकाः शाखा इव जीवकर्मफलभोगाश्रयाः शाखा यस्येत्यवाक्शाखः। एवम्भूतः एषः अश्वत्थः। अश्वत्थवत् सकामकर्मवातेरितत्वेन नित्यप्रचलितस्वभावः यथातिमन्दवातेनाश्वत्थश्चलति तद्वत्। यद्वा विनाशित्वेन श्वः प्रभातपर्यन्तमपि न तिष्ठति स्थास्यतीति विश्वासानर्हत्वादश्वत्थः परभक्तिपरज्ञानात् प्राक् प्रवाह-

रूपेण सनातनश्चिरन्तनः एवम्भूतस्य संसारवृक्षस्य प्रकृतिः मूलं तस्याश्च ब्रह्मशक्तित्वात् शक्तिशक्तिमतोर्भेदाभेदत्वेन। ब्रह्ममूलत्वमाह—तदिति। तदेव मूलभूतं शुक्रं = शुभ्रं प्रकाशात्मकं तद् ब्रह्म स्वरूपादिना बृहत् तदेवामृतं नित्यमुक्तस्वभावं कथ्यते। तस्मिन् मूलभूते सर्वकारणे ब्रह्मणि सर्वे लोकाः भूरादयः श्रिताः स्थिताः, तदु तद् ब्रह्म कश्चन कश्चिदपि नात्येति = नातिक्रामति, सर्वकारणत्वात्। एतद् वै तत् पूर्ववदर्थः ॥१॥

सान्वयानुवाद—ऊर्ध्वमूलः = ऊपर जिसके मूल (जड़) है। अवाक्शाखः = (और) नीचे जिसकी शाखाएँ हैं। एषः सनातनः अश्वत्थः = यह सनातन (आदि) पीपल का पेड़ है। तदेव = वही, शुक्रं = प्रकाशस्वरूप, तद् ब्रह्म = वह ब्रह्म, तदेव = वही, अमृतमुच्यते = अमृत कहलाता है। सर्वे लोकाः = सब लोक, तस्मिन् श्रिताः = उस पर स्थित हैं, कश्चन तद् उ न अत्येति = कोई भी उसको लाँघ नहीं सकता ॥१॥

व्याख्या—ऊपर जिसके मूल है और नीचे की ओर जिसकी अवान्तर शाखाएँ हैं—ऐसा यह सनातन अश्वत्थ वृक्ष अनादि काल से प्रवर्त्तित होकर चिरकाल-लगातार चल रहा है और आगे चलता ही रहेगा। क्योंकि यह सनातन वृक्ष है। दूसरी बात अश्वत्थ वृक्ष (पीपल का पेड़) स्वयं भगवत्स्वरूप है—'अश्वत्थः सर्ववृक्षाणां' (गीता १०।२६)। मन्त्र का अर्थ इस प्रकार समझना चाहिये—प्रकृति से परे भगवान् श्रीकृष्ण का अपना दिव्य वैकुण्ठ लोक मूल है। उसके बाद नीचे के शेष चौदह लोक हैं। ये चौदह लोक उस दिव्य वैकुण्ठ लोक की अवान्तर शाखाएँ हैं। उस ऊर्ध्वमूल (वैकुण्ठलोक) में अनन्त ब्रह्माण्डनायक कोटिकन्दर्पलावण्य सर्वेश्वरेश्वर सर्वोपास्य परब्रह्म श्रीकृष्ण निवास करते हैं। 'शुक्र' पद का अर्थ है—वे श्रीकृष्ण स्वभावतः सर्वप्रकार दोषों से रहित हैं। वे परब्रह्म हैं। वे नित्यमुक्त, परिशुद्ध, विबुद्ध, वेदान्तवेद्य हैं; इसलिये उनको अमृत पद से पुकारते हैं।

ऊर्ध्वमूल का वर्णन एवं अण्डगोलक का मान—सूर्यमण्डल से ध्रुवलोक ३८ लाख योजन, ध्रुवलोक से महर्लोक १ करोड़ योजन, महर्लोक से जनलोक २ करोड़ योजन, जनलोक से तपोलोक ८ करोड़ योजन एवं तपोलोक से सत्यलोक १२ करोड़ योजन हैं। इस प्रकार सूर्यमण्डल से सत्यलोक २३ करोड़ ३८ लाख योजन होता है। सत्यलोक से वैकुण्ठलोक १ करोड़ ६२ लाख योजन है। उसके बाद अण्डगोलक है। इस प्रकार विष्णुपुराण के अनुसार सूर्य से ऊपर अण्डकटाह २५ करोड़ योजन है। सूर्यमण्डल से पृथ्वी १ लाख योजन नीचे है। पृथ्वी से नीचे १०-१० हजार योजन की दूरी पर सात पाताल हैं। पाताल से ३० हजार योजन नीचे भगवान् शेष हैं। शेषजी से २४ करोड़ ९८ लाख योजन गहरा गर्भोद है। इस प्रकार जोड़कर ऊपर से नीचे तक ब्रह्माण्डगोलक का परिमाण ५० करोड़ योजन होता है।

अब नीचे के लोकों का वर्णन सुनिये—जिन्हें बिलस्वर्ग कहते हैं। इनकी संख्या सात हैं—अतल, वितल, सुतल, तलातल, महातल, रसातल और पाताल। ये प्रत्येक १०-१० हजार योजन की दूरी पर स्थित हैं। इनमें स्वर्ग से भी अधिक विषय-भोग-

ऐश्वर्य-आनन्द-सन्तानसुख तथा अतुल सम्पत्ति वर्त्तमान है। यहाँ के वैभवपूर्ण भवन तथा उपवन आदि दिव्य स्थानों में दैत्य और दानव सुन्दरी स्त्रियों के साथ विहार करते हैं। दिव्य औषधियों और रसायन के सेवन से उनकी युवावस्था सदा बनी रहती है। उन्हें किसी प्रकार का भय नहीं रहता। बड़े-बड़े सर्पों के शिर की मणियाँ पाताल में प्रकाश करती हैं। अतल में मय दानव का पुत्र बल रहता है, जिसने छियानबे मायाओं का विस्तार किया था। जम्हाई लेते समय जिसके मुख से स्वैरिणी, कामिनी और पुंश्चली ये तीन प्रकार की स्त्रियाँ उत्पन्न हुई थीं, जो बिलस्वर्ग में प्रविष्ट पुरुषों को स्वर्णरस पिलाकर उनके साथ विहार करती हैं। वितल में भगवान् शिव पार्वती के साथ निवास करते हैं, जिनके वीर्य से वहाँ हाटकी नाम की नदी बहती है। उसमें हाटक (सुवर्ण) उत्पन्न होता है। सुतल में राजा बलि का निवास है। भगवान् उसके द्वार पर रहकर सदा उसकी रक्षा किया करते हैं। तलातल में मय दानव निवास करता है। महातल में भयङ्कर सर्पों का अनेक शिरों वाला क्रोधवश नाम का गण रहता है, जिसमें कुहक, तक्षक, कालिय आदि प्रधान हैं। वे अपने स्त्री-पुत्रादि कुटुम्ब सहित आनन्द से विहार करते हैं। रसातल में पणि नामक दैत्य-दानव रहते हैं, जो निवातकवच, कालेय और हिरण्यपुरवासी कहे जाते हैं। वे देवताओं के प्रबल शत्रु, जन्म से ही बड़े बलवान् तथा महासाहसी हैं। भगवान् के सुदर्शन चक्र से घबड़ाकर वे भी सर्पों के समान छिपकर रहा करते हैं। इन्द्र की दूती सरमा (देवशुनी) के कठोर शब्दों को सुनकर वे इन्द्र से भी डरते हैं। रसातल के नीचे पाताल है जहाँ शङ्ख, कलिक आदि बड़े-बड़े फणों वाले महाक्रोधी नाग रहते हैं, जिनमें वासुकि प्रधान है। उनमें कोई पाँच, कोई सात, कोई दस, कोई सौ और कोई हजार शिर वाले हैं जिनके फणों में लगी बड़ी-बड़ी मणियाँ सूर्य के समान चमकती हुई सम्पूर्ण पाताल को प्रकाशित करती हैं—

'येषामु ह वै पञ्चसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमन्ति' ॥ (मम गुरुचरणकृता श्रीमद्भागवत-कथा)

इस प्रकार श्रीभगवद्धाम से नीचे के सत्यलोक प्रभृति चर्तुदश लोक का वर्णन करके शास्त्र के द्वारा सम्यक् विचार कर निर्णय किया गया है।

इस सनातन वृक्ष का वर्णन श्रीमद्भागवत में भी है—

'एकायनोऽसौ द्विफलस्त्रिमूलश्चतूरसः पञ्चविधः षडात्मा।
सप्तत्वगष्टविटपो नवाक्षो दशच्छदी द्विखगो ह्यादिवृक्षः' ॥

यह आदि—सनातन वृक्ष है। जिसका एक माया आश्रय है। इसके दो फल हैं— सुख-दुःख, सिद्धि-असिद्धि, जय-पराजय। सत्त्व, रजः और तमोगुण ये तीन जिसके मूल हैं। धर्म, अर्थ, काम और मोक्ष ये चार जिसके रस हैं। श्रोत्र, त्वचा, नेत्र, रसना और नासिका ये पाँच जिसके ज्ञानप्रकार हैं (इन्हीं को ज्ञानेन्द्रिय कहते हैं)। जन्म, अस्तित्व, वृद्धि, विपरिणाम, अपक्षय और विनाश—अदर्शन ये छः जिसके स्वभाव

हैं। रस, रुधिर, मांस, मेदा, अस्थि, मज्जा और शुक्र ये सात धातुएँ जिसकी त्वचा—छाल हैं। पृथिवी, जल, तेज, वायु, आकाश, मन, बुद्धि और अहङ्कार ये आठ जिसकी विटप—शाखाएँ हैं। जिसमें नौ छिद्र—दरवाजे हैं। प्राण, अपान, व्यान, समान, उदान, नाग, कूर्म, कृकल, देवदत्त और धनञ्जय ये दस जिसमें पत्ते हैं। जीवात्मा और परमात्मा ये दो पक्षी इस आदि वृक्ष में रहते हैं। उसी परमात्मा के मुख-नासिका से निर्गत श्वास से वेदादि शास्त्रों का प्रादुर्भाव हुआ है। उन्हीं में चौदह लोकों की कल्पना शास्त्र द्वारा की गयी है।

पैरों से लेकर कटिपर्यन्त सातों पाताल तथा भूलोक की कल्पना की गयी है। नाभि में भुवर्लोक की, हृदय में स्वर्लोक की और भगवान् श्रीकृष्ण के वक्षःस्थल में महर्लोक की कल्पना की गयी है। उसके गले में जनलोक, दोनों स्तनों में तपोलोक और मस्तक में सनातन ब्रह्मा का सत्यलोक है। भगवान् के कमर में अतल, दोनों जाँघों में वितल, दोनों घुटनों में शुद्ध सुतल लोक और दोनों जङ्घाओं में तलातल की कल्पना की गयी है। एड़ी के ऊपर की दोनों गाँठों में महातल, पञ्जे और एड़ियों में रसातल और तलुओं में पाताल समझना चाहिये। इस प्रकार विराट् पुरुष भगवान् श्रीकृष्ण के अङ्गों में लोकों की कल्पना की गयी है। उनके दोनों चरणकमलों में भूलोक, नाभि में भुवर्लोक और शिर में स्वर्लोक है। भगवान् के शरीर की नाड़ियाँ नदियाँ हैं, रोम वृक्ष, श्वास वायु, गति काल तथा कर्म संसार कहा गया है। ब्राह्मण भगवान् के मुख, क्षत्रिय बाहु, वैश्य ऊरु, तथा शूद्र पैर कहे गये हैं। इस प्रकार सूर्य, चन्द्र, ग्रह, नक्षत्र, तारा, समुद्र, द्वीप, पर्वत, पशु-पक्षी, कीट-पतङ्ग सब भगवान् के शरीर के अवयव कहे गये हैं। (श्रीमद्भागवतम्)

इस प्रकार शास्त्रीय दृष्टिकोण से ऊर्ध्वमूल पद का विवेचन किया गया है। दृश्यमान संसार को आदि सनातन वृक्ष बताया गया है। परमात्मा को शुक्र-तेजोमय-भास्वर बताया और वही ब्रह्म है, उस पर सब लोक टिके हैं इसलिये वह सर्वाधार-सर्वाश्रय है। उसकी आज्ञा सर्वोपरि है। कोई भी उसका उल्लङ्घन नहीं करता ॥१॥

यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम्।
महद्भयं वज्रमुद्यतं य एतद् विदुरमृतास्ते भवन्ति ॥२॥

तत्त्वप्रकाशिका—ततो मूलकारणात् ब्रह्मणो जगन्निःसृतमित्याह—यदिति। यदिदं किञ्च इदं सर्वं जगत् प्राणे = प्राणशब्दवाच्ये परस्मिन् ब्रह्मणि स्थितं सत्। एजते एजृ कम्पने इति धातुः। प्राण इति सप्तम्यन्तपदसामर्थ्यात् स्थितमित्यध्याहारः। (अत एव प्राणः) इति सूत्रेण प्राणशब्दस्य ब्रह्मपरत्वं निर्विवादम्। ततो निस्सृतं निर्गतं सत् एजति स्वस्वकार्येषु चेष्टते यज्जगदुत्पत्त्यादिकारणं ब्रह्म तन्महद्भयम्। बिभेत्यस्मादिति भयं महच्च तद्भयं च महद्भयम्। उद्यतमिव वज्रम्। उद्यद्वज्रवन्महाभयप्रदम्। स्वधर्मातिलङ्घन इति शेषः। य एतद्विदुर्जगदुत्पत्त्यादिकारणं सकलजगन्नियामकं ब्रह्मेति जानन्ति ते अमृता मरणधर्मरहिता मुक्ता भवन्तीत्यर्थः ॥२॥

सान्वयानुवाद—यत् किं च इदं सर्वं जगत् = जो कुछ भी यह सब जगत्, प्राणे = प्राण शब्दवाच्य परब्रह्म में स्थित है, निःसृतम् = उस परब्रह्म से यह जड़-चेतनात्मक जगत् उत्पन्न हुआ है, एजति = सब अपने-अपने काम में लगे हैं। उद्यतं वज्रं महद् भयम् = ऊपर उठाये हुए वज्र के समान महाभयप्रद है, एतद् ये विदुः = इसको जो जानते हैं, ते अमृता भवन्ति = वे अमर हो जाते हैं।

व्याख्या—प्राण भी परब्रह्म भगवान् श्रीकृष्ण का ही रूप है—

'प्राणो हि भगवानीशः प्राणो विष्णुः पितामहः।
प्राणेन धार्यते लोकः सर्वं प्राणमयं जगत्'॥ (ब्र.सू. १।१।२३)

छान्दोग्योपनिषद् (१।११।५) में भी कहा—'सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते'।

निश्चय ही ये समस्त चराचर भूत प्राण में ही विलीन होते हैं और प्राण से ही उत्पन्न होते हैं। अतः यहाँ प्राण पद से परब्रह्म श्रीकृष्ण का ही वर्णन हुआ है, ऐसा मानना चाहिये।

भयादस्याग्निस्तपति भयात्तपति सूर्यः।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः॥३॥

तत्त्वप्रकाशिका—कथं तद्भयेन चेष्टते जगदित्यत्राह—भयादिति। अस्य ब्रह्मणो भयात् भयेनाग्निः तपति। तथा सूर्यो भयात् तपति। भयाद् इन्द्रश्च वायुश्च तथा मृत्युः सर्वमारकोऽप्यस्य भयाज्जगत्सु धावति स्वव्यापारं करोति। धावतिशब्दः इन्द्रादीनां स्वस्वव्यापारप्रवृत्तिपरः। यदीदृशानां समर्थानां लोकपालानां सतां वज्रोद्यतकरवत् नियन्ता चेदीश्वरो न स्यात् तदा स्वामिभयाद् भृत्यानामिव नियन्ता प्रवृत्तिर्न स्यादिति भावः॥३॥

सान्वयानुवाद—अस्य भयात् अग्निः = इसी के भय से अग्नि, तपति = जलती है, भयात् सूर्यः तपति = भय से सूर्य तपता-उदय होता है, भयात् इन्द्रः च वायुः च = भय से इन्द्र वर्षा करते हैं, वायु चलता है, पञ्चमः मृत्युः धावति = पाँचवीं मृत्यु भी इसके भय से प्राणियों का संहार करती हुई सब जगह विचरती है॥३॥

व्याख्या—इसी के भय से वायु चलता है, इसी के भय से सूर्य तपता है, इसी के भय से इन्द्र वर्षा करते हैं और इसी के भय से तारे चमकते हैं। इसी से भयभीत होकर ओषधियों के सहित लताएँ और सारी वनस्पतियाँ अपने-अपने समय पर फल-फूल धारण करती हैं। इसी के भय से नदियाँ बहती हैं और समुद्र अपनी मर्यादा से बाहर नहीं जाता। इसी के भय से अग्नि प्रज्वलित होती है और पहाड़ों के साथ पृथिवी पानी में नहीं डूबती। इसी के अमोघ शासन से यह आकाश जीवित प्राणियों को साँस के लिये अवकाश (मौका) देता है और महत्तत्त्व अहंकाररूप शरीर का सात आवरणों से युक्त ब्रह्माण्ड के रूप में विस्तार करता है। परब्रह्म भगवान् श्रीकृष्ण के ही भय से

गुणाभिमानी देवगण सृष्टि-जगत् रचना आदि में तत्पर रहते हैं अर्थात् समस्त चराचर भूत उस परमात्मा श्रीकृष्ण के डर से अपना-अपना काम स्वयं करते रहते हैं। उनके अधीन यह दृश्यमान सम्पूर्ण चराचर लोक है। यह सब कालरूपी भगवान् श्रीकृष्ण की महिमा है। (श्रीमद्भागवतम्) ('कालोऽस्मि' (गी.११।३२) मैं काल हूँ)

इह चेदशकद् बोद्धुं प्राक् शरीरस्य विस्रसः।
ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥४॥

तत्त्वप्रकाशिका—इह जीवन्नेव सकलभयकारणं ब्रह्मेति बोद्धुं ज्ञातुं चेत् यद्य-शकत् शक्नोति शरीरस्य विस्रसः विस्रंसनात् पातनात् प्राक् पूर्वं तदा संसृति बन्धनात् मुच्यते न चेत् ततस्तदज्ञानात् हेतोः सृज्यन्ते स्रष्टव्याः प्राणिनो येषु ते सर्गाः भूरादि-लोकाः तेषु लोकेषु शरीरत्वाय जन्मजरामरणादिलक्षणशीर्यमाणत्वाय कल्पते समर्थो भवति शरीरं गृह्णातीत्यर्थः। तस्माच्छरीरपातनात्पूर्वमेवात्मज्ञानाय यतेतेति भावः ॥४॥

सान्वयानुवाद—चेत् = अगर, शरीरस्य विस्रसः = शरीर गिरने के, प्राक् = पहले, इह = इस अत्यन्त दुर्लभ मानव शरीर में ही, (उपासक) बोद्धुम् = परमात्मा को साक्षात्, अशकत् = कर सका (तब तो मनुष्य जन्म सफल हो गया), ततः = नहीं तो फिर, सर्गेषु लोकेषु = सृष्टि होने के समय उत्पन्न होने वाले लोकों–योनियों में, शरीरत्वाय कल्पते = शरीर धारण के लिए यह योग्य—समर्थ होता है ॥४॥

व्याख्या—भगवान् श्रीकृष्ण गरुड़ जी से कहते हैं—

'यावत् स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत् क्षयो नायुषः।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः'॥ (गरुडपुराण)

जब तक शरीर स्वस्थ हो, किसी रोग का आक्रमण न हुआ हो, वृद्धावस्था न आयी हो, इन्द्रियों की शक्तियाँ नष्ट न हुई हों, आयु क्षीणप्राय न हुई हो; तब तक विद्वान् पुरुष को अपनी आत्मा के उद्धारार्थ शीघ्र प्रयत्न कर लेना चाहिये। अन्यथा घर में आग लगने पर कुआँ खोदने से कोई लाभ नहीं होता। इसलिये शरीर गिरने से पहले ही आत्मज्ञान–आत्मोद्धार के लिए यत्न करना चाहिये ॥४॥

यथाऽऽदर्शे तथाऽऽत्मनि यथा स्वप्ने तथा पितृलोके।
यथाप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके ॥५॥

तत्त्वप्रकाशिका—आत्मतत्त्वस्य दुर्बोधत्वं दर्शयति—यथा आदर्शे दर्पणे प्रती-यमानमात्मानं लोको विविक्तं पश्यति तथेहात्मनि अन्तरात्मानं ध्यानादौ विविक्तमात्मनो दर्शनं भवतीत्यर्थः। यथा स्वप्ने जाग्रद् दर्शनवत् सम्यक्तया संशयादिविरोधित्वेन ज्ञानाभावः तथा पितृलोके संशयादियुक्तमात्मदर्शनं, यथा अप्सु जलेषु अविविक्तात्मरूपं परीव दृश्यते परिदृश्यत इव नेतरवत् स्पष्टं प्रकाशते तथा गन्धर्वलोकेऽप्यायातत;

प्रतीतिमात्रमित्यर्थः। एवमन्यलोकान्तरेऽपि श्रुतिप्रामाण्याद् ज्ञायते। छायातपयोरिव ब्रह्मलोके। यथा छायातपयोर्मिश्रणे शुद्धातपवर्त्तिपदार्थवन्नोपलम्भः, एवं ब्रह्मलोकेऽपि न सम्यगुपलम्भः सम्भवति। अतो दुरधिगममात्मतत्त्वमिति भावः ॥५॥

व्याख्या—जैसे मुँह देखने के दर्पण में मनुष्य—प्राणी प्रतीयमान स्वरूप को अलग करके देखता है वैसे ही इस मनुष्य शरीर में अन्तरात्मा को, यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि में योगिजन जन्म-जन्मान्तर की कठोर तपस्या से अपने हृदयकमल में स्पष्टरूप से परमात्मा का दर्शन करते हैं। इसको विविक्त = आत्मदर्शन कहते हैं। ज्ञान की सामान्य अवस्था को सुषुप्ति कहते हैं। उस समय जाग्रत् दर्शन की भाँति सम्यक् ज्ञान नहीं रहता है। उसी प्रकार पितृलोक में संशयादियुक्त आत्मदर्शन होता है। जैसे जल में अपने रूप का अस्पष्ट दर्शन होता है वैसे ही गन्धर्वलोक में। इस प्रकार अन्य लोकान्तर में भी शास्त्र-प्रमाण से जाना जाता है। ब्रह्मलोक में छाया और धूप की भाँति आत्मतत्त्व का अनुभव होता है। जैसे छाया और धूप—प्रकाश के एक साथ मिल जाने पर शुद्ध प्रकाश में रहने वाला पदार्थवत् अनुभव नहीं होता है, इस प्रकार ब्रह्मलोक में भी आत्मतत्त्व का सम्यक् ज्ञान–अनुभव नहीं होता है ॥५॥

'यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसम्प्रमोषात्।
य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः' ॥

(श्रीमद्भा.६।४।२६)

जिस समय मन में निश्चलता आ जाती है एवं दृष्ट पदार्थों की स्मृति भी नहीं रहती उस समय योगी पुरुषों को स्वस्वरूप-परस्वरूप ज्ञान के द्वारा शुद्ध अन्तःकरण में जिनकी अनुभूति होती है, उस पवित्र स्थान में रहनेवाले हंस को मैं प्रणाम करता हूँ।

इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत्।
पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥६॥

तत्त्वप्रकाशिका—तर्हि कथमसौ ज्ञेयः किञ्च तज्ज्ञाने कारणमित्यत्राह—इन्द्रियाणामिति। इन्द्रियाणां = चक्षुरादीनां स्वस्वविषयग्रहणार्थं स्वकारणात् राजसाऽहङ्कारात् पृथगुत्पद्यमानानां पृथग्भावं पृथक् भिन्नं विलक्षणं भावः स्वभावो येषां ते पृथग्भावम्। उदयास्तमयौ यौ = उत्पादविनाशौ च यदित्यव्ययं यावित्यर्थे। तान् सर्वान् इन्द्रियादिगतान् मत्वा धीरो धीमान्न शोचति। इन्द्रियाणां परस्परवैलक्षण्यं स्वभावः। उत्पादविनाशौ च ज्ञानस्वरूपे आत्मनि न सन्तीति ज्ञात्वा न शोचतीत्यर्थः ॥६॥

सान्वयानुवाद—पृथक् उत्पद्यमानानां इन्द्रियाणां = पृथक्-पृथक् = अलग-अलग रूपों में पैदा होने वाली इन्द्रियों के, पृथक् भावं = भिन्न-भिन्न स्वभाव अर्थात् इनकी अलग-अलग आदत, उदयास्तमयौ = उनके उदय और अस्त को, यत् मत्वा धीरः न शोचति = जानकर विवेकी पुरुष शोक नहीं करता ॥६॥

व्याख्या—इन्द्रियों की रचना चित्स्वभाव आत्मा से बिल्कुल अलग है। इन्द्रियों

का जन्म और विनाश होता है तथा इनका पृथक्-पृथक् स्वभाव है। आत्मा तो सदैकरस में रहता है। उत्पन्न और विनाश ज्ञानस्वरूप आत्मा में नहीं है—इस प्रकार समझकर साधक शोक नहीं करता ॥६॥

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम्।
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥७॥
अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च।
यं ज्ञात्वा मुच्यते जन्तुरमृतत्वञ्चाधिगच्छति ॥८॥

तत्त्वप्रकाशिका—देहेन्द्रियादिभ्यो भिन्नः प्रत्यगात्मेति ज्ञातेति क्षेत्रज्ञानां भगवच्छरणागतिमन्तराऽन्यः कोऽप्युपायो न दृश्यते। अतस्तामेव प्रतिपादयति–इन्द्रियेभ्य इति। अस्य व्याख्यानं प्रागुपदर्शितरीत्याऽवसेयम्। सत्त्वं = बुद्धिः, अधि = अधिकः। पुरुषं परमात्मानं विशिनष्टि—व्यापकेति। अलिङ्गः = लिङ्गागम्यः प्राकृतशरीररहितो वा। परत्वञ्च वशीकार्यतायां विवक्षितम्। परस्य भगवतः वशीकरणं शरणागतिरेव यं सर्वेश्वरं भगवन्तमाचार्यतः शास्त्रतश्च ज्ञात्वा जन्तुः = जीवात्मा संसारात् मुच्यते। अमृतत्वञ्च भगवद्भावापत्तिरूपां मुक्तिं लभत इत्यर्थः ॥७-८॥

सान्वयानुवाद—इन्द्रियेभ्यः मनः परम् = इन्द्रियों से मन परे है, मनसः सत्त्वं उत्तमम् = मन से बुद्धि श्रेष्ठ है। सत्त्वात् महान् आत्मा अधि = बुद्धि से जीवात्मा कर्त्तारूप से महान् श्रेष्ठ है, महतः अव्यक्तम् उत्तमम् = जीवात्मा से शरीर श्रेष्ठ है (क्योंकि जीवात्मा के समस्त साधनों की प्रवृत्ति शरीराधीन है)॥ अव्यक्तात् पुरुषः परः = शरीर से परमात्मा परे है, व्यापकः अलिङ्गः = जो सर्वव्यापक और अजन्मा है, जन्तुः यं ज्ञात्वा मुच्यते = जन्मजरामरणवान् प्राणी जिसको जानकर मुक्त होता है, अमृतत्वं च अधिगच्छति = और अमृतत्व को प्राप्त होता है ॥७-८॥

व्याख्या—सातवें मन्त्र का व्याख्यान इसी उपनिषद् के (१।३) दसवें मन्त्र में देखना चाहिये। मन्त्र में 'अलिङ्गः' पद का अर्थ इस प्रकार समझना चाहिये। जिस प्रकार गजेन्द्र ने श्रीभगवान् की स्तुति की है—'न स्त्री न षण्ढो न पुमान् न जन्तुः' (श्रीमद्भा.८।३।२४) अर्थात् वे परमात्मा न स्त्री हैं, न नपुंसक हैं, न पुरुष हैं और न तो जन्मजरामरणवान् प्राणी हैं। वे इन चारों से एवं सत्त्व-रजः-तमःस्वरूपा प्रकृति से परे हैं। पुरुषु = जीवशरीरेषु, शेते = तिष्ठतीति पुरुषः = सर्वगुहाशयः श्रीकृष्णः। वे परम पुरुष परमात्मा श्रीकृष्ण सम्पूर्ण शरीरधारी जीवों के भीतर प्रादेश (= अँगूठे और तर्जनी के बीच का स्थान) परिमाणवाला घर बनाकर उन प्राणियों में स्थित हैं, इसलिये वे व्यापक हैं। उन सर्वेश्वर भगवान् श्रीकृष्ण को गुरूपदेश से एवं श्रुति-शास्त्र से जानकर ठीक-ठीक समझकर जीवात्मा संसार से छूट जाता है और श्रीभगवद्भावापत्तिरूपा मुक्ति का लाभ करता है ॥८॥

न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्।
हृदा मनीषा मनसाभिक्लृप्तो य एतद् विदुरमृतास्ते भवन्ति ॥९॥

तत्त्वप्रकाशिका—अस्य भगवतो रूपं दिव्यमङ्गलविग्रहं सन्दृशे दर्शनाय विषये अभिमुखतया न तिष्ठति यद्वा सन्दर्शनाय प्राकृतचक्षुषा सम्यक् दर्शनयोग्यं न भवति। 'दिव्यं ददामि ते चक्षुः' इति श्रीमुखवचनात् अथवा अस्य रूपसादृश्यं नीलपीतादिकं नास्ति अत एव न चक्षुषा प्राकृतचक्षुषा एनं प्रकृतं परमात्मानं कश्चिदपि न पश्यति। चक्षुरित्यन्येन्द्रियोपलक्षणार्थम्। तर्हि किं सर्वथा ज्ञानाविषयः नेत्याह। हृदा प्रेमभक्त्या मनीषा धृत्या मनसा मननेन सम्यक् दर्शनेन अभिक्लृप्तोऽभिग्रहणसमर्थो भवति। एतत् प्रकृतं ब्रह्म ये विदुः ते अमृताः मुक्ताः भगवद्भावं गता भवन्ति।

श्रीबादरायणेन श्रीमहाभारते हृच्छब्दस्य भक्त्यर्थकत्वं मनीषेत्यस्य धृतिरूपार्थत्वं भाषितं, तथाहि—

'न सन्दृशे तिष्ठति रूपमस्य न च चक्षुषा पश्यति कश्चनैनम्।
भक्त्या च धृत्या समाहितात्मा ज्ञानरूपं परिपश्यतीह'॥ इति।

धृत्या समाहितात्मा भक्त्या श्रीपुरुषोत्तमं पश्यति साक्षात्करोति।

'भक्तिरेवैनं नयति, भक्तिरेवैनं दर्शयति, भक्तिरेवैनं गमयति, भक्तिवशः पुरुषः भक्तिरेव भूयसी' इत्याद्याः श्रुतयः शतशः सन्ति। ताभिरिन्द्रचन्द्रब्रह्मरुद्रादिदुर्लभोऽपि भगवान् वासुदेवो रमाकान्तो भक्तिप्रपत्त्या व्याजमाहात्म्येन शरणागतवत्सलत्व-कारुण्यादिगुणविवशतया प्रपन्नभक्तानां सुलभ इति प्रतिपाद्यते।

'नाहं वेदैर्न तपसा न दानेन न चेज्यया।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुञ्च तत्त्वेन प्रवेष्टुञ्च परन्तप'॥

इति श्रीमुखवचनेनापि निश्चीयते केवलं भक्तिग्राह्यत्वं भगवत इति भावः॥९॥

सान्वयानुवाद—अस्य रूपं सन्दृशे न तिष्ठति = इसका रूप दृष्टिगोचर नहीं होता, कश्चन एनं चक्षुषा न पश्यति = कोई इसको आँख से देख नहीं सकता, हृदा मनीषा मनसा अभिक्लृप्तः = प्रेमभक्ति, धृति एवं मनन से तथा सम्यक् दर्शन—ज्ञान से वह ग्रहण के लिए समर्थ होता है, ये एतत् विदुः = जो इसको जानते हैं, ते अमृताः भवन्ति = वे अमृत हो जाते हैं॥९॥

व्याख्या—इन परब्रह्मस्वरूप श्रीकृष्ण का दिव्य मङ्गल विग्रह प्रत्यक्ष विषय के रूप में अपने सामने नहीं ठहरता, उनके दिव्य रूप को कोई भी मनुष्य प्राकृत चर्म-चक्षुओं से देख नहीं सकता। प्रेमभक्ति, धारणा, मनन एवं सम्यक् शास्त्रज्ञान इन साधनों से साधक पुरुषोत्तम भगवान् श्रीकृष्ण का साक्षात्कार करता है। जो इन परब्रह्म श्रीकृष्ण को जान लेते हैं वे भगवद्भाव को प्राप्त हो जाते हैं॥९॥

श्रुति कहती है—भक्ति भगवान् के समीप ले जाती है। भक्ति भगवान् का दर्शन करवाती है। भक्ति भगवान् का ज्ञान देती है। परम पुरुष भगवान् श्रीकृष्ण भक्ति के वश में रहते हैं।

भगवान् श्रीकृष्ण स्वयं कहते हैं—जो उपासक मेरे प्रति अनन्य योग द्वारा एकमात्र मन्निष्ठ होकर निर्जन स्थान में वासशीलत्व मानव-जनसमाज में अनुराग-विहीन मुझ उपास्यदेव को ऐकान्तिक भक्तियोग से भजता है अर्थात् मेरी सेवा-पूजा करता है; प्रकृति के ये तीन गुणों (सत्त्व, रज और तम) को लाँघकर वह उपासक ब्रह्मभाव के लिये योग्य होता है। (गीता १३।१०,१४।२६)

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।
बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम् ॥१०॥
तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ॥११॥
नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा।
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥१२॥

तत्त्वप्रकाशिका—यदा = यस्मिन् काले, ज्ञायते = ज्ञेयमेभिरिति ज्ञानानीन्द्रियाणि पञ्च स्वविषयेभ्यो निवृत्त्य आत्मन्येवावतिष्ठन्ते मनसा सह बुद्धिश्चाध्यवसायलक्षणा स्वव्यापारेषु न विचेष्टते = स्वव्यापारं न करोति तां परमां गतिमाहुः = विषयान्तरसञ्चरणं विहाय मोक्षार्थगमनं परमां गतिमाहुरित्यर्थः ॥१०॥

तां पूर्वमन्त्रोक्तामिन्द्रियाणां बाह्याभ्यन्तरकरणानां स्थिरामचलां धारणां योगिनः योगमिति मन्यन्ते। तदा = तस्मिन् काले, अप्रमत्तः = प्रमादरहितो भवति। इन्द्रियाणां निर्व्यापारत्वे एवाव्यवहितचित्तता भवतीत्यर्थः। किमर्थं चित्तावधानमित्यत आह—योग इति। हि यस्मात् योगः प्रभवाप्ययौ। इष्टप्रभवानिष्टनिवर्त्तकः योगस्य तत्साधनत्वात् तत्राप्रमत्ततया भवितव्यमित्यर्थः ॥११॥

नैव वाचा न मनसा न चक्षुषा नान्यैरपीन्द्रियैः प्राप्तुं = ज्ञातुं, शक्यः। यदि वागादिना प्राप्तुमशक्यो भगवान् तर्हि केन प्रमाणेन वेद्य इत्यत आह—अस्तीति। अस्तीति ब्रुवतः = शब्दात् अन्यत्र इत्यर्थः। तस्यौपनिषदैकसमधिगम्यत्वं वाच्यमिति भावः ॥१२॥

सान्वयानुवाद—यदा = जिस समय, पञ्च ज्ञानानि = पाँचों ज्ञान-इन्द्रियाँ, मनसा सह = मन के साथ, अवतिष्ठन्ते = स्थिर हो जाती हैं, बुद्धिः च न विचेष्टते = और बुद्धि भी विविध चेष्टा नहीं करती, (तब) तां परमां गतिम् आहुः = उसको परम गति कहते हैं ॥१०॥

तां स्थिरां इन्द्रियधारणां = उस स्थिर इन्द्रियों की धारणा को, योगम् इति मन्यन्ते = ध्यान-योग ऐसा कहते हैं, तदा अप्रमत्तः भवति = उस समय वह प्रमादरहित होता है, (यह) योगः हि प्रभवाप्ययौ = ध्यान-योग अपने इष्टदेव की ओर ले जाने वाला और अनिष्ट को निष्कासित करने वाला है ॥११॥

नैव वाचा = न तो वाणी से, न मनसा = न मन से, न चक्षुषा एव = न आँख से ही, प्राप्तुं शक्यः = प्राप्त करना शक्य है, तत् अस्ति = वह है, कथं

उपलभ्यते = (तब उसकी) कैसे-किस प्रकार उपलब्धि हो सकती है अर्थात् वह कैसे मिल सकता है ? तब उत्तर देते हैं—इति ब्रुवत: अन्यत्र = इस तरह कहने वाले के शब्दों से दूसरे स्थान में वह मिल सकता है ॥२॥

व्याख्या—भगवद्ध्यानयोग का अभ्यास करते-करते जब मन के सहित पाँचों ज्ञानेन्द्रियाँ स्व-स्व विषयों से लौटकर भली-भाँति परमात्मा में ही स्थिर = सुसमाहित हो जाती हैं और बुद्धि भी स्व-व्यापार नहीं करती है, उस समय जो अवस्था होती है उसको 'परम गति' पद से कहते हैं ॥१०॥

इन्द्रिय, मन, बुद्धि, बाहर और भीतर के करणों की स्थिर धारणा को उपासक लोग ध्यानयोग कहते हैं। उस समय उपासक विषय-दर्शनरूप सब तरह के प्रमाद से सर्वथा रहित हो जाता है। यह ध्यान-योग इष्टप्रापक और अनिष्टनिवर्त्तक है ॥११॥

दूसरी श्रुति कहती है—'यद् वाचो ह वाचम्, मनसो मन:, चक्षुषश्चक्षु: । असन्नेव स भवति, असद् ब्रह्मेति वेद चेत्' । जो वाक् इन्द्रिय का वाक् है। जो मन का मन है। जो चक्षु इन्द्रिय का चक्षु है। यदि कोई मनुष्य यह समझता है या ऐसा निश्चय करता है कि ब्रह्म असत् है अर्थात् ब्रह्म या ईश्वर नाम की कोई वस्तु नहीं है जो इस प्रकार जानता है वह स्वयं ही असत् हो जाता है। ऐसे असत् तुच्छ (क्षुद्र) मनुष्यों की वाक् इत्यादि इन्द्रियों से इस परब्रह्म श्रीकृष्ण की प्राप्ति नहीं हो सकती। अस्तीति—वह परब्रह्म श्रीकृष्ण है। कथं तदुपलभ्यते—कैसे उनकी उपलब्धि अर्थात् साक्षात्कार मिल सकता है, नेत्रों से दर्शन हो सकता है? तब श्रुति कहती है—'ब्रुवतोऽन्यत्र असत्' अर्थात् तुच्छ प्राणियों की शब्दावली से वह भिन्न है। श्रीमद्भागवत में ब्रह्मसूत्रकार महर्षि श्रीकृष्णद्वैपायनजी ने कहा है—

'शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णश: स्मरन्ति नन्दन्ति तवेहितं जना: ।
त एव पश्यन्त्यचिरेण तावकं भवप्रवाहो परमं पदाम्बुजम्' ॥

(श्रीमद्भा. १।८।३६)

तावकं त्वदीयं पदाम्बुजं कीदृशं भवप्रवाहस्य जन्मपरम्पराया उपरामो यस्मिन् तत्, परा मा शक्तिः मूलप्रकृतिरूपा देवी वृषभानुजा यस्मिन् तत्। एवम्भूतं पदाम्बुजम्।

जो भगवल्लीलाचरित्र का श्रवण करते हैं, रसास्वादनपूर्वक गान करते हैं, मन-ही-मन गुनगुनाते रहते हैं, पुन:-पुन: स्मरण करते हैं और उसी में आनन्द लेते हैं वे ही परब्रह्मस्वरूप श्रीकृष्ण के संसार-निवर्त्तक एवं रमा-सेवित चरणारविन्द का शीघ्र ही दर्शन करते हैं। नेतरेषामभक्तानाम्—किन्तु दूसरे जो अभक्त जन हैं उन्हें प्राप्त नहीं हो सकता। जन: = स्वकर्मानुसारेण नानायोनिषु जन्म यस्य भवति सो जन:। अपने कर्मानुसार नाना योनियों में जन्म जिसका होता है वह जन कहलाता है।

अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयो: ।
अस्तीत्येवोपलब्धस्य तत्त्वभाव: प्रसीदति ॥१३॥

तत्त्वप्रकाशिका—तत्त्वं भावयतीति तत्त्वभावो मनस्तेन परमात्माऽस्तीत्येवो-पलब्धव्य:, उपलभ्यते च वेदान्तवचनै: ब्रह्मणोऽस्तित्वं तस्य दार्ढ्याय मनसाऽपि तस्यास्तित्वं प्रत्येतव्यमित्येवं मनननिदिध्यासने कार्ये। उभयोर्हेत्वोरुभाभ्यां शब्दमनो-रूपाभ्यामस्तित्वेनोपलब्धस्य ज्ञानवतो भुक्ता ब्राह्मण इतिवदयं निर्देश:। तत्त्वभाव: मन: प्रसीदति = प्रसन्नं भवति शान्तरागादिदोषं भवति ॥१३॥

व्याख्या—'शब्दानामनेकार्थत्वात्' इस नियम के अनुसार एवं प्रकरण या लक्ष्य के अनुसार ही व्याख्या करनी चाहिये। यहाँ 'तत्त्वभाव' शब्द मन का वाचक है। निरन्तर वेदान्तवाक्यों का मनन एवं चिन्तन द्वारा ब्रह्म के अस्तित्व का निश्चय = अवधारण करना चाहिये—'ब्रह्म अस्तीत्येव'। श्रुतियों के श्रवण, मनन और निदि-ध्यासन-बारम्बार चिन्तन से ही बुद्धिमान् पुरुष अपने स्वरूप का एवं परस्वरूप ब्रह्म का अनुभव करते हैं। उनको उपलब्ध वस्तु का 'अस्तीत्येव' ऐसा भान होता है, उस समय उनका मन प्रसन्न हो जाता है; राग-द्वेष आदि दोष बिल्कुल शान्त हो जाते हैं ॥१३॥

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिता:।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥१४॥
यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थय:।
अथ मर्त्योऽमृतो भवत्येतावदनुशासनम् ॥१५॥

तत्त्वप्रकाशिका—यदा यस्मिन् काले अस्योपासकस्य हृदि श्रिता: कामा: सङ्कल्पा: ते सर्वे प्रमुच्यन्ते दुर्वासना उच्छिद्यन्ते। अथ = अनन्तरमेव, मर्त्य: = मरणधर्मकोऽपि, अमृतो भवति = पूर्वोत्तराघरहितो भवति। अत्र दुर्व्यसनमोक्ष-पूर्वकमोक्षोपासने स्थित उपासको ब्रह्म समश्नुते = ब्रह्मविषयकानवच्छिन्नानुभूत्या स्थितो भवतीत्यर्थ:। 'समानाचाऽऽसृत्युपक्रमादमृतत्वञ्चानुपोष्य' ॥ (ब्र.सू.४।२।७) इत्यस्य ब्रह्मसूत्रस्य भाष्ये पूज्यपादै: श्रीश्रीनिवासाचार्यचरणैर्भाषितं, तथाहि—अमृतत्वञ्चानु-पोष्येति। चशब्दोऽवधारणे। अनुपोष्यैव उष दाहे इत्यस्य धातो: रूपम्। देहेन्द्रियादि-सम्बन्धमदग्ध्वैवामृतत्वमुत्तरपूर्वाघाश्लेषविनाशरूपं यत्प्राप्यते तत्। यदा सर्वे प्रमुच्यन्त इति वाक्येनोच्यते। अत्र ब्रह्म समश्नुत इत्यस्य चानुभवेनोपासनाकाले ब्रह्म सम-श्नुते ॥१४॥

उक्तार्थमेव विशदयति-यदा यस्मिन् काले हृत्स्थानम् अयते इति हृदयो जीव: तस्य ग्रन्थय: सर्वे। यद्वा-हृदयस्य = अन्त:करणस्य, ग्रन्थय: = ग्रन्थिवद् दुर्मोचा देहे तत्सम्बन्धिषु अहन्ता-ममतात्मका: अनादिकर्मनिरूपितमायासम्बन्धाख्या:।

'कारणं गुणसङ्गोऽस्य सदसद् योनिजन्मसु'। इति श्रीमुखोक्ते:। ममेदं धनं स्त्री-पुत्रादिकं सुखी दु:खी चाहं एवमादिरूपा इह जन्मनि प्रभिद्यन्ते = भेदं प्राप्नुवन्ति। अथ मर्त्य: मरणधर्मा अमृतो भवति।

एतावदेवानुशासनमनुशासनीयमुपासकायोपदेशो वेदान्तवाक्यस्येत्यर्थ: ॥१५॥

सान्वयानुवाद—यदा = जब, अस्य = इस उपासक के, हृदि = हृदय में, श्रिताः = स्थित, सर्वे = समस्त, कामाः = कामनाएँ, प्रमुच्यन्ते = स्वतः छूट जाती हैं, अथ = तब, मर्त्यः = वह मरणधर्मा मानव, अमृतः = अमर, भवति = होता है, अत्र = इस जीवन में, ब्रह्म समश्नुते = ब्रह्म को प्राप्त होता है ॥१४॥

यदा = जब, इह = इस जन्म में, हृदयस्य = हृदय की, सर्वे ग्रन्थयः = सारी ग्रन्थियाँ, प्रभिद्यन्ते = छूट जाती हैं, अथ मर्त्यः अमृतो भवति = तब मरणधर्मा मनुष्य अमर होता है, एतावत् हि अनुशासनम् = इतना ही अनुशासन सदुपदेश है ॥१५॥

व्याख्या—मनुष्यों की मृत्यु तो हर समय काल रूप से बाहर खड़ी है, उनके शिर पर सवार है। अतः कुटुम्ब आदि में अत्यन्त आसक्त होकर अहङ्कार-ममकार नहीं करना चाहिये। 'ममाहम्' का चिन्तन करने वाले मौत के साथ जुआ ही खेल रहे हैं। भगवान् श्रीहरि जिस पर अनुग्रह करते हैं वह समझता है कि इस भौतिक अनात्म-शरीर को एक दिन कुत्ते खा जायेंगे, गीदड़ खा जायेंगे, चिता जला डालेगी इसलिये देह-गेह आदि अनात्म-वस्तुओं में आत्मबुद्धि और उनमें 'ममाहम्' इस प्रकार की मति वह नहीं करता।

श्रीमद्भागवत में एक भगवद्भक्त ने कहा है—

'भगवञ्जीवलोकोऽयं मोहितस्तव मायया।
अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु' ॥ (श्रीमद्भा. १०।४०।२३)

हे भगवन्! यह जीवलोक आपकी माया से मोहित हो रहा है। 'यह मैं', 'यह मेरा' (ऐसा स्वीकार करके) तुच्छ सांसारिक नाना विषय-भोगवासनाओं में आसक्त होकर कर्मों के मार्गों में भटक रहा है। पुरञ्जनोपाख्यान में देवर्षि नारदजी ने भी यही बात कही है—

'अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही।
दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते' ॥ (श्रीमद्भा.४।२८।१७)

कुमति गृहासक्त पुरञ्जन घर में 'यह मैं', 'यह मेरा' इस तरह अभिमान करके और यौवनमदयुक्त स्त्री का सङ्ग करने के कारण दीन हो गया। जब उसका शरीर-वियोग का समय उपस्थित हुआ तब उसकी मृत्यु हो गयी।

भगवान् श्रीकृष्ण उद्धवजी से कहते हैं—'गृहेष्वतिथिवद् वसन्' (श्रीमद्भा.११। १७।५४) अर्थात् घर में अतिथि के समान निवास करना चाहिये। जैसे कोई अतिथि रात के समय किसी के घर में निवास करता है एवं अन्न-जलादि का भक्षण-पानादि करके रात में पलंग पर सोता है, बिस्तर का उपभोग करता है, मीठी-मीठी हर तरह की बात करता है लेकिन दूसरे दिन चला जाता है; ठीक वैसे ही बुद्धिमान् मनुष्यों को घर में अनासक्त होकर विषयों का उपभोग करना चाहिये।

अहम्, मम, नाना काम, कुवासना और कर्माख्य अविद्या ये सब हृदय की

ग्रन्थियाँ हैं। जब मनन-निदिध्यासन से हृदय की सब कर्मवासनाएँ, विषय-भोगकामनाएँ हृदय से दूर हो जाती हैं तब मरणधर्मा मानव अमर होता है। जन्म-जरा-मरण से छुटकारा पाना ही 'अमर' कहलाता है। इसके बाद वह ब्रह्मभाव को प्राप्त होता है। 'बहवो ज्ञानतपसा पूता मद्भावमागताः'। (गीता ४।१०)

श्रीमद्भगवद्गीता में अर्जुन को उपदेश करते समय श्रीभगवान् ने अन्तिम उपदेश में यही बात कही है—

'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः' ॥

सभी प्रकार के धर्म-कर्मों को छोड़कर केवल एकमात्र मेरी शरण में आ जा। मैं तुझे हर तरह के पापों से छुड़ा दूँगा, तू शोक मत कर।

श्रीमद्भागवत में उद्धव को उपदेश करते समय श्रीभगवान् ने अन्तिम उपदेश में यही बात कही है—

'मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे।
तदाऽमृतत्वं प्रतिपद्यमानो मयाऽऽत्मभूयाय च कल्पते वै' ॥

मरणधर्मा मानव जब सर्वविध कर्मों को छोड़ देता है और अपने-आपको मेरे चरणों में सौंप देता है तब वह मेरा अत्यन्त प्रिय हो जाता है। तब वह अमृतत्व को प्राप्त करके मेरे ब्रह्मभाव के लिए योग्य होता है।

यहाँ 'सर्वधर्मान् परित्यज्य' तथा 'त्यक्तसमस्तकर्मा' इन श्रीभगवद्वचनों से धर्म-कर्मों में फलेच्छा–फलबुद्धि का परित्याग करके निष्काम भाव से यावज्जीवन भगवदर्थ कर्म करना चाहिये। इन वाक्यों का यही अर्थ है, यही तात्पर्य है। जैसे इससे पूर्व-पूर्व में श्रीभगवदुक्तियों का स्मरण करना चाहिये।

'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥
मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव' ॥

मुझमें मनवाला हो, मेरा भक्त बन, मेरा पूजन करने वाला हो और मुझको नमस्कार कर। "न 'मम अहं' इति नमः" अर्थात् सम्पूर्णरूप से आत्मसमर्पण करना ही नमन कहलाता है। इस प्रकार मत्प्रपत्र होकर मन को मुझमें नियुक्त = संयमित करके 'त्वं मां एव एष्यसि' = तू मुझको ही प्राप्त हो जायेगा।

हे पाण्डुपुत्र अर्जुन! जो धर्म-कर्मों को केवल मेरे ही लिए करने वाला है, मैं ही जिसका परमेश्वर-परमात्मा हूँ, जो मेरा भक्त है, जिसकी धर्म-कर्मों में फलों की इच्छा नहीं है, जो सर्वभूतों में निर्वैर है तथा जो सम्पूर्ण प्राणियों पर दया करता है वह मुझको ही प्राप्त होता है।

'दयया सर्वभूतेषु सन्तुष्ट्या येन केन वा।
सर्वेन्द्रियोपशान्त्या च तुष्यत्याशु जनार्दनः' ।।

सभी प्राणियो पर दया करनी चाहिये। सर्वत्र भगवद्दृष्टि रखनी चाहिये। प्रारब्ध के अनुसार जो कुछ मिल जाय उसी में सन्तोष करना चाहिये। अपनी समस्त इन्द्रियों को विषयों से हटाकर शान्त करने से शीघ्र ही भगवान् श्रीहरि प्रसन्न हो जाते हैं। (श्रीमद्भागवत ४।३१।१९) उपर्युक्त तीनों मन्त्रों का यही आशय है। बस, इतना ही समस्त वेद, उपनिषद्, वेदान्त और पुराणों का सनातन उपदेश है।

शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ।।१६।।

तत्त्वप्रकाशिका—हृदयस्य प्रधाननाड्यः शतं शतसङ्ख्याकाः, एका च सुषुम्ना नाम्नी तासां मध्ये एका प्रधाना सुषुम्णाख्या ब्रह्मनाडी मूर्द्धानमभिनिःसृता तया नाड्या ऊर्ध्वं ब्रह्मलोकमायन् गच्छन् अमृतत्वं भगवद्भावापत्तिरूपां मुक्तिं प्राप्नोति। अन्यास्तु नाड्यो विष्वगुत्क्रमणे नानाविधसंसारमार्गोत्क्रमणायोपयुज्यन्ते। इदञ्च वाक्यं भगवता बादरायणेन उत्क्रान्तिपादे आलोचितम्। तथाहि—

'तदेकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकतया'। (ब्र.सू.४।२।१६)

विवृतञ्चैतत् वेदान्तकौस्तुभे। शताधिकतया मूर्द्धन्यया नाड्या विदुषोऽन्याभिरविदुषश्च निष्क्रमणमित्येवम्भूता उत्क्रान्तो विदुषोऽस्ति न वेति सन्देहे नास्ति विशेषनाडीविशेषज्ञानासम्भवात् इति प्राप्तेऽभिधीयते—हार्दानुगृहीत इति। 'सर्वस्य चाहं हृदि सन्निविष्टः' इत्येवम्भूतो हार्दः श्रीपुरुषोत्तमस्तेन स्वानन्यवशीभूतेन सर्वास्ववस्थासु तदनुरूपविद्धयोगादत्रानुगृहीतः। इयं सा नाडी यया उत्क्रम्य मम साधर्म्यं यास्यसीति प्रतिबोधित इत्यर्थः। 'ददामि बुद्धियोगं तं येन मामुपयान्ति ते' इति श्रीमुखवचनात्। तदनुग्रहादेव। स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति श्रुतिप्रोक्तं तस्य हार्दानुग्रहपात्रीभूतस्य विदुष ओकः स्थानमग्रज्वलनं भवति, अग्रे ज्वलनं प्रकाशनं यस्य इत्येवम् अनुकूलं भवति तत्प्रकाशितद्वारः, तेनैव हार्देन प्रकाशितं द्वारं नाडीमूलं यस्मै स विद्वान् शताधिकया हृदयाद् उद्गतया मूर्द्धानं गतया सूर्यरश्मिभिरेकीभूतया नाड्यैव निष्क्रामति।

भगवति वैषम्याभावं दर्शयन्ननुग्रहबीजमाह—विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च। विद्यापरिपाकजन्यवेद्यवशीकरणलक्षणवेत्तृसामर्थ्यात् मम कदा अनया वेदान्तगीतया वेदान्तवेद्यप्राप्तिर्भविष्यतीति विद्याशेषसृत्यनुस्मृतियोगाच्च तेनानुगृहीत इत्यर्थः। तस्माद् विदुषो नाडीविशेषेणोत्क्रमणमिति सिद्धम् ।।१६।।

सान्वयानुवाद—शतं च एका च हृदयस्य नाड्यः = कुल मिलाकर एक सौ एक हृदय की नाड़ियाँ हैं, तासां एका मूर्धानम् अभिनिःसृता = उनमें से एक बीच में मस्तक की ओर निकली हुई है (इसे ही सुषुम्णा नाम्नी ब्रह्मनाड़ी कहते हैं), तया ऊर्ध्वं

आयन् = उस सुषुम्णा ब्रह्मनाड़ी के द्वारा ऊपर के श्रीवैकुण्ठलोक में जाकर, (जीव) अमृतत्वम् एति = अमृतत्व अर्थात् ब्रह्मभाव को प्राप्त हो जाता है, अन्याः = दूसरी एक सौ नाड़ियाँ, उत्क्रमणे = मौत में, (जीव को) विष्वङ् = हर तरह की योनियों में ले जाने की हेतु, भवन्ति = होती हैं।

व्याख्या—अब शरीर नष्ट होने के बाद आगे होने वाली विद्वान्-अविद्वान् की गति = प्राप्तिस्थान का श्रुति वर्णन करती है—हृदय में प्रधान नाड़ियाँ एक सौ संख्या वाली और एक प्रधान सुषुम्णा नाम्नी ब्रह्मनाड़ी है। यह नाड़ी उन एक सौ नाड़ियों के बीच में है, जिसको सुषुम्णा नाड़ी कहते हैं। यह सुषुम्णा नाड़ी शिर को फोड़कर निकली है। भगवान् श्रीकृष्ण के परमधाम में जाने का अधिकारी उस सुषुम्णा नाड़ी के द्वारा स्थूल शरीर से बाहर निकलकर चौदह लोकों से ऊँचे श्रीभगवद्धाम में जाकर श्रीभगवद्भाव को प्राप्त हो जाता है।

परन्तु श्रीशुक-सनकादि जन्म से ही श्रीभगवद्भाव को प्राप्त, आप्त समस्त काम निजलाभसन्तुष्ट हैं और वे ऊर्ध्वरिता एवं असाधारण पुरुष हैं। उपर्युक्त 'अमृतत्वमेति' यह शृति जन्म-जरा-मरणवान् निष्काम श्रीभगवद्भक्त के लिए ही है, श्रीशुकादि के लिए नहीं है। इन दोनों से भिन्न जो सकामकर्मी पुरुष हैं, वे मरणकाल में दूसरी नाड़ियों के द्वारा स्थूल शरीर से बाहर निकलकर अपने-अपने कर्मवासना के अनुसार संसार में नाना योनियों को प्राप्त होते हैं।

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
सदा जनानां हृदये सन्निविष्टः।
तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकां धैर्येण।
तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति ॥१७॥

तत्त्वप्रकाशिका—अङ्गुष्ठमात्रः = जीवाङ्गुष्ठपरिमितः, जनानां = प्रत्यगात्मनां, हृदये सदा सन्निविष्ट अन्तरात्मा, तं = परमात्मानं, स्वाच्छरीरात् = परमात्मशरीरभूताज्जलशब्दवाच्याच्चेतनात्, प्रवृहेत् = विविच्य जानीयात्। 'जुष्टं यदा पश्यत्यन्यमीशम्'। (श्वे.।४।७) इति श्रुत्युक्तरीत्या। सर्वात्मत्व-सर्वनियन्तृत्व-सर्वव्यापकत्व-स्वतन्त्रसत्त्व-सर्वाधारत्वादिधर्मैः भिन्नं ब्रह्मात्मकत्व-तन्नियम्यत्व-तद्व्याप्यत्व-तत्तन्त्र-सत्त्व-पराधेयत्वादि-धर्मैश्चाभिन्नत्वञ्च जानीयात्। 'एष सर्वभूतान्तरात्मा। अन्तः प्रविष्टः शास्ता जनानाम्।

'यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' ॥

आत्मा हि परमः स्वतन्त्रोऽधिगुणः। तस्मिल्लोकाः श्रिताः सर्वे। "सर्वं खल्विदं ब्रह्म। तज्जलानिति। तत्त्वमसि श्वेतकेतो। अहं भगवो देवते। एकमेवाद्वितीयम्। आत्मा वा इदमेक एवाग्र आसीत्। एको ह वै नारायण आसीद्"। इत्युभयविषश्रुतीनां भेदाभेदप्रतिपादिकानाम् उत्क्रमादिषड्लिङ्गोपेतानां तुल्ययोगक्षेमत्वात् स्वार्थ एव प्रामाण्याच्च

प्राबल्यमितरथैकतराणां श्रुतीनां बाधः प्रसज्येत तस्मादुक्तार्थो वरीयान् उक्तार्थं दृष्टान्तेन परबुद्ध्यारूढं करोति—मुञ्जात् = तृणविशेषात्। इषीकां तन्मध्यवर्तिस्थूलतृणविशेषमिव धैर्येण ज्ञानकौशलेनेति पूर्वेणान्वयः, तं विद्यादिति पूर्ववत्। द्विरुक्तिरुपदेश-समाप्त्यर्था ॥१७॥

सान्वयानुवाद—अन्तरात्मा = सभी प्राणियों में अन्तर्यामीरूप से निवास करने वाला, अङ्गुष्ठमात्रः = अँगूठे के बराबर, पुरुषः = परमपुरुष श्रीकृष्ण, सदा = हमेशा, जनानां = मनुष्यों के, हृदये = हृदय में, सन्निविष्टः = सम्यक् प्रविष्ट है, तं = उसको, मुञ्जात् = मूँज से, इषीकाम् इव = सींक की भाँति, स्वाच्छरीरात् = स्वशरीर से, धैर्येण = धैर्य धारण करके एकाग्रचित्त से, प्रवृहेत् = देखो, तं = उसी को, शुक्रं = तेजोमय प्रकाशस्वरूप, अमृतं = अमृत को, विद्यात् = जानो। तं शुक्रम् अमृतं विद्यात् इति ॥१७॥

व्याख्या—अब एक ही मन्त्र में छहों वल्लिओं के अर्थ का उपसंहार करते हुये श्रुति कहती है—जनों के हृदय के अन्दर रहने वाले को अन्तरात्मा कहते हैं। वे अँगूठे के बराबर हैं। वे सब के नियन्ता हैं। वे अपने हृदय में सदैव विराजमान हैं। उनको ध्यानयोग से अपने शरीर से अलग करके जानना चाहिये = देखना चाहिये। जैसे मुञ्ज से तिल को अलग करते हैं। हे अर्जुन ! मैं सबके हृदय में संनिविष्ट हूँ। मैं योगमाया से ढका हुआ अतः सबके सामने प्रकाशित नहीं होता। (गीता १५।१५;७।२५)

'त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा
कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः।
यद्बुद्ध्यवस्थितिमखण्डितया स्वदृष्ट्या
द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से' ॥ (श्रीमद्भा.४।९।१५)

जब भगवान् अपनी योगमाया के पर्दे को दूर कर देते हैं तब जीव भगवान् को पहचानकर तत्त्व का अपनी रुचि के अनुसार वर्णन करते हैं। हे भगवन् ! आप नित्य मुक्त हैं। आप परिशुद्ध एवं विबुद्ध हैं। आप मेरी आत्मा हैं। आप कूटस्थ हैं। आप आदि-कारण पुरुष हैं। आप षड्विध ऐश्वर्यों से पूर्ण हैं। आप त्रिलोकीनाथ हैं। आप जीवों की बुद्धि में अखण्ड रूप से अवस्थान करते हैं। आप अपनी दृष्टि से एककाला-वच्छेदेन सारी सृष्टि को देखते हैं। आप स्थिति = पालन में अधिमख = श्रीविष्णु हैं। आप जीवों से भिन्न—बिल्कुल अलग हैं। इन उभयविध वाक्यों को ही स्वाभाविक भेदाभेद-भिन्नाभिन्न-द्वैताद्वैतसिद्धान्त कहते हैं।

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिञ्च कृत्स्नम्।
ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव ॥१८॥

तत्त्वप्रकाशिका—एवं मृत्युप्रोक्तां विद्यां प्राप्तवता नचिकेतसा विद्याफलं लब्धमित्याह श्रुतिः—नचिकेत एव नाचिकेतो मृत्युप्रोक्तामेतां विद्यामात्मविद्यां 'यदा पश्य' चेत्याद्युक्तं योगविधिञ्च लब्ध्वा = प्राप्य, ब्रह्मप्राप्तः, आविर्भूतगुणाष्टकोऽभू-

दित्यर्थः। विद्याप्रतिपत्त्या विरजः = विगतमायातत्कार्यसम्बन्धाख्यरजः, विमृत्युः = विगतजन्ममरणश्चेत्यर्थः। य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इति श्रुत्यनुसारेण सायुज्यप्राप्तिर्बोद्धव्या। न केवलं नचिकेता एव या अन्योऽप्यध्यात्मविद्यामात्मविद्यां वेत्ति सोऽप्येवमेव नचिकेता इवैव भवतीत्यर्थः ॥१८॥

सान्वयानुवाद—अथ = इस प्रकार तत्त्वोपदेश सुनने के बाद, नाचिकेतः = नचिकेता, मृत्युप्रोक्तां = यमराज द्वारा कही हुई, एतां विद्यां = इस विद्या को, च = और, कृत्स्नं योगविधिं = सम्पूर्ण योगविधि को, लब्ध्वा = पाकर, विमृत्युः = जन्म-मरण से रहित, विरजः = तीनों गुणों से शून्य होकर, ब्रह्मप्राप्तः अभूत् = ब्रह्म को प्राप्त हो गया, अन्यः अपि यः अध्यात्मविद् एव = दूसरा भी जो कोई इस अध्यात्मविद्या को इस प्रकार जानता है वह भी नचिकेता के समान ही ब्रह्म को प्राप्त हो जाता है ॥१८॥

व्याख्या—सूर्यपुत्र भगवान् यम की कही हुई इस पूर्वोक्त आत्मविद्या और सम्पूर्ण ध्यान-योगविधि को मृत्यु से प्राप्त कर नचिकेता अपहतपाप्मत्वादि गुणाष्टक को प्राप्त हो गया। 'जो यह भगवदुपासक इस शरीर से ऊपर उठकर परम ज्योतिस्वरूप को प्राप्त कर वह अपने वास्तविक रूप से अभिनिष्पत्ति हो जाता है' इस श्रुति के अनुसार सायुज्य प्राप्ति जाननी चाहिये। केवल नचिकेता ही नहीं, बल्कि नचिकेता के समान जो दूसरा भी इस आत्मविद्या को जानता है वह भी इस प्रकार नचिकेता के समान ही हो जाता है ॥१८॥

'सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु। मा विद्विषावहै।
ॐ शान्तिः! शान्तिः!! शान्तिः!!!

इति यजुर्वेदीय कठोपनिषत् समाप्ता।

तत्त्वप्रकाशिका—शिष्याचार्ययोः शास्त्रीयनियमातिलङ्घनेन विद्याग्रहणप्रतिपादननिमित्तदोषस्य प्रशमनार्थेयं शन्तिरधुनोच्यते—स विद्याप्रकाशितो भगवान् हेति प्रसिद्ध्यर्थे नौ शिष्याचार्याववतु स्वस्वरूपप्रकाशेन रक्षतु। सह नौ भुनक्तु, विश्लेषमन्तरेण आवां सहितावेव यथा स्यात् तथा पालयतु। यद्वा विद्याफलप्रदानेन नौ पालयत्वित्यर्थः। सह वीर्यं करवावहै सहैवावां विद्याकृतं वीर्यं सामर्थ्यं करवावहै, सनियमविद्याप्रदानेन विद्यायाः सामर्थ्यं निष्पादयावहै, किञ्च तेजस्विनौ तेजस्विनोरावयोर्यदधीतं तत्स्वाधीनमस्तु। यद्वा— तदतीव वीर्यवदस्त्वित्यर्थः। मा विद्विषावहै। यश्चाधर्मेण शिष्याचार्यौ परस्परमनवधानकृताध्ययनाध्यापननिमित्तद्वेषं मा करवावहै। यश्चाधर्मेण विब्रूते यश्चाधर्मेण पृच्छति। तयोरेकतरः प्रति विशेषञ्चाधिगच्छति। इति स्मृत्युक्तदोषो मा भूदावयोरित्यर्थः। ॐ शान्तिः शान्तिः शान्तिः, त्रिवचनं मनोवचनशरीरभेदेन त्रिदोषशान्त्यर्थम्।

अस्या उपनिषद अर्थः सङ्क्षेपेण समन्वयाध्याये व्यासाचार्यैस्त्रिभिरधिकरणैर्निरूपितः। अत्राधिकरणे यस्य ब्रह्म च क्षत्रञ्चेति विषयः। वचनमुदाहृत्य अत्रोदनोपसेचनशब्दाभ्यां सूचितः कश्चिदत्ता अत्ता प्रतीयते किं क्षेत्रज्ञः परमात्मा वेत्तीति विमर्शः कृतः। तत्र भोक्तृत्वं कर्मनिमित्तम्। तथा च जीवस्यैवात्तृत्वं प्रतिपन्नं भवति न परमात्मन इति पूर्वपक्षं कृत्वा अत्ता चराचरग्रहणात्। प्रकरणाच्च। गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्। विशेषणाच्च। (ब्र.सू.।१।२।९।१०।११।१२) इति चतुर्भिः सूत्रैः सिद्धान्तः कृतः। तथाहि अत्रात्ता परमात्मैव कुतः चराचरग्रहणात् यस्य ब्रह्म चेति मन्त्रे चराचरशब्देन कृत्स्नस्य स्थावरजङ्गमात्मकप्रपञ्चस्य प्रतिपादनात् सकलप्रपञ्चसंहर्तृत्वं विश्वोत्पत्तिलयकर्त्तुः परब्रह्मण एव सम्भवति न तु शारीरस्य।

'महान्तं विभुमात्मानं मत्वा धीरो न शोचति। यमेवैष वृणुते तेन लभ्यः' इत्यादिमन्त्रैः परमात्म-प्रकरणमध्यपठितैर्निश्चीयते परमात्मैवात्ता न शारीरः।

ननु ऋतं पिबन्तावित्युत्तरमन्त्रे कर्मफलभोक्तृत्वप्रतिपादनात् न परमात्मात्ता किन्तु शारीरः। एतन्मन्त्रप्रतिपाद्यानि ऋतपान-कर्तृत्व-सुकृत-साध्य-मध्यम-लोक-वर्त्तित्व-गुहावच्छिन्नत्वरूपाणि लिङ्गानि कर्मफलभोक्तरि विभौ परमात्मनि नोपपद्यन्ते। अतोऽत्र प्रकरणेन परमात्मा प्रत्येतव्य इत्याशङ्क्य समाहितम्। गुहां प्रविष्टौ हि दुर्दर्शनादिति। क्षेत्रज्ञपरमात्मानावेव हृदयगुहां प्रविष्टौ प्रत्येतव्यौ यत उभयोश्चेतनत्वेनैकस्वभावत्वात्। तयोरेकस्मिन् प्रकरणे गुहाप्रवेशदर्शनात्।

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितमिति प्रकरणेऽस्मिन् प्रत्यगात्मपरमात्मनोरुपास्योपासकभावः प्राप्यप्रापकभावो गन्तव्यगन्तृत्वभावादिभिर्विशेषणत्वेन प्रतिपादनात्। ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति। यः सेतुरीजानानाम्। आत्मानं रथिनं विद्धि, विज्ञानसारथिर्यस्तु इत्यादिश्रुतिषु तयोरुपासना-सौकर्यायैकाधिकरणस्थत्वप्रतिपादनार्थत्वाद् ऋतं पिबन्ताविति मन्त्रस्य जीवपरप्रतिपादकत्त्वमेव भाति। अतो यस्य ब्रह्म च क्षत्रं चेति मन्त्रः परमात्मपर एवेति निर्णीतम्।

'तथाऽङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते'॥ (क.उ.२।१।१२)

इति मन्त्रेऽङ्गुष्ठमात्रतया निर्दिश्यमानो जीव एव, अङ्गुष्ठमात्रस्य जीवधर्मत्वात्; 'प्राणाधिपः सञ्चरति स्वकर्मभिः' (श्वे.उ.५।७); 'अङ्गुष्ठमात्रो रवितुल्यः' (श्वे.उ.५।८); 'अङ्गुष्ठमात्रं निश्चकर्ष यमो बलात्'। इति पूर्वपक्षं कृत्वा, 'शब्दादेव प्रमितः। हृद्यपेक्षया तु मनुष्याधिकारत्वात्। कम्पनात्। ज्योतिर्दर्शनात्'॥ (ब्र.सू.१।३।२४।२५।१।३।३९। ४०) इति चतुर्भिः सूत्रैः सिद्धान्तः कृतः। तेषामर्थाः भाष्ये द्रष्टव्याः।

'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः'॥

इति वाक्ये साङ्ख्यप्रक्रियाप्रत्यभिज्ञानात् पञ्चविंशातिरिक्तपुरुषनिषेधाच्च साङ्ख्याभिमत-ब्रह्मात्मकप्रधानमव्यक्तशब्देनाभिधीयत इति। आनुमानिकमप्येकेषामिति चेदिति सूत्रखण्डेन पूर्वपक्षं कृत्वा शरीररूपकविन्यस्तगृहीतैर्दर्शयति च। सूक्ष्मं तु तदर्हत्वात्। तदधीनत्वादर्थवत्। ज्ञेयत्वावचनाच्च। वदतीति चेन्न प्राज्ञो हि प्रकरणात्। त्रयाणामेव चैवमुपन्यासः प्रश्नश्च। महद्वच्च। (ब्र.सू.१।४।१।२।३।४।५।६।७) इति सप्तभिः सूत्रैः सिद्धान्तः कृतः। तेषामर्था वेदान्तकौस्तुभे द्रष्टव्याः। इयमुपनिषत्सर्वाऽपि परमात्मपरेति त्रिभिरधिकरणैर्निर्णीतम्।

अनादिनिवृत्तपथप्रवर्त्तकब्रह्मविद्योपदेशकलोकाचार्यश्रीसनन्दनादिप्रवर्तित-
श्री १०८ महामुनीन्द्रभगवन्निम्बार्काचार्यचरणोपबृंहितवैदिकस-
त्सम्प्रदायानुगतपूज्यपादनिखिलरसिकचूडामणि-
श्री १०८ स्वामीहरिदासपदाश्रिताश्रितपरम-
विरक्तमहानुभावस्वामिनीशरणपादपद्मच-
ञ्चरीकेण विदुषा श्रीअमोलकरामेण
पूर्वाचार्योक्तितः संगृहीतायां काठ-
कोपनिषत्तत्त्वप्रकाशिकाटीकायां
द्वितीयोऽध्यायः समाप्तः॥

व्याख्या—आत्मविद्या को प्रकाशित करने वाले, आत्मतत्त्व को देने वाले तथा सर्वविध संकटों से मुक्ति देनेवाले वे भगवान् श्रीकृष्ण हम गुरु-शिष्य दोनों का स्व-स्व स्वरूप प्रकाश द्वारा रक्षण करें एवं पालन-पोषण भी करें। ('भुज पालनाभ्यवहारयोः' धातोः भुनक्ति इति रूपम् = भुज धातु का पालन एवं भोजन अर्थ में प्रयोग होता है।)

हम दोनों के मन, शरीर और इन्द्रियों में शक्ति देने वाले वे परमात्मा श्रीकृष्ण हम दोनों का सामर्थ्य निष्पादन करें। हम दोनों की पढ़ी हुई विद्या तेजस्विनी हो। हम दोनों परस्पर ध्यान न देकर किये हुये अध्ययन-अध्यापन निमित्त द्वेष न करें। मन, वाणी और शरीर से किसी प्राणी को कष्ट न दें।

इति श्रीमन्निम्बार्कमहामुनीन्द्रमतानुवर्त्ति श्रीमत्परमहंसपरिव्राजका-
चार्यत्यागमूर्त्तिस्वामिधनञ्जयदासजीकाठियाबाबा-
पादपद्मान्तेवासी योगिराजस्वामिराधाविहारि-
दासजी काठियाबाबाचरणारविन्द-
चञ्चरीक डॉ. स्वामी
द्वारकादासजी काठियाबाबा
कृत अन्वयार्थ-तत्त्वप्रभा हिन्दी टीका में
कठोपनिषद् समाप्त—३।

●

प्रश्नोपनिषद्

अथर्ववेदीय प्रश्नोपनिषद् में कुल सड़सठ मन्त्र हैं। इस उपनिषद् में पिप्पलाद ऋषि ने सुकेशादि छः ऋषियों के छः प्रश्नों का क्रम से उत्तर दिया। प्रश्नोत्तर रूप होने के कारण इसका नाम प्रश्नोपनिषद् हो गया।

शान्ति-पाठ

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः। व्यशेम देवहितं यदायुः॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥
ॐ शान्तिः! शान्तिः!! शान्तिः!!!

अर्थ—हे देवगण! हम अपने कानों से भद्र–कल्याणकारी शब्द श्रीभगवान् की कथा का ही सुनें, आँखों से हम सभी जगहों पर उन्हीं का ही दर्शन करें, हम स्थिर अङ्गों से प्रेमपूर्वक नतमस्तक होकर हाथ जोड़कर शरीर-मन-वाणी से श्रीभगवान् की स्तुति (स्तवन) प्रतिदिन करते रहें। हमारी आयु का सदुपयोग प्रभु के लिए ही हो, भगवदनुकूल कर्म का संङ्कल्प और उनके प्रतिकूल कर्म का वर्जन करें। वे परममङ्गलमय यशोमूर्त्ति, परमैश्वर्यवान्, सबके गुरु, बुद्धि के प्रवर्त्तक, सभी को जानने वाले, विश्व का भरण-पोषण करने वाले, अरिष्टों को मिटाने के लिये चक्र के समान शक्तिशाली, गरुडासन रमापति भगवान् कृष्ण हमारी सदा रक्षा करें। आध्यात्मिक, आधिदैविक तथा आधिभौतिक ये तीन प्रकार के तापों की शान्ति हो।

'यजत्राः' शब्द का अर्थ है जो सद्गृहस्थ यज्ञीय अग्नि को स्थिर रखता है अर्थात् अग्निहोत्री।

'यज देवपूजासङ्गतिकरणदानेषु' धातुः—यजति, यजते। इतने अर्थों में यज धातु का प्रयोग होता है। 'यजत्राः' का अर्थ है 'देवपूजकाः'। परमात्मा श्रीकृष्ण का पूजन करने वालों को 'यजत्र' कहते हैं। हे देवगण! हमारे सुदृढ़ अवयव एवं आरोग्य-बल-सम्पन्न शरीर विशेष रूप से सुपुष्ट हो। वह भी इसलये कि हम उनके द्वारा परब्रह्म श्रीकृष्ण का निरन्तर स्तवन, वन्दन, पूजन और ध्यान करते रहें। हमारी आयु भगवान् श्रीहरि के काम में अर्थात् भोग में आ सके। हमारी आयु को इन्द्रियाँ न भोगें, प्रभु ही उपभोग करें। हम मन, वाणी और शरीर से किसी भी प्राणी को कष्ट न दें।

श्रीराधावदनाम्भोजगतसौन्दर्यसौरभम् ।
लिहद्भ्यां लोचनालिभ्यां श्रीकृष्णः पातु नो हरिः ॥१॥

अवलोकयन्निति शेषः ।

श्रीनिम्बभानुमहं वन्दे स्वान्तध्वान्तनिरासकम् ।
सन्मार्गस्योपदेष्टारं हंसवंशविभूषणम् ॥२॥
श्रीनिवासं गुरुं वन्दे करुणावरुणालयम् ।
बादरायणसूत्राणां भाष्यकारम्मुनीश्वरम् ॥३॥
नत्वाऽन्यान् देशिकान् मान्यान् पूर्वाचार्योक्तितः खलु ।
प्रश्नोपनिषदो व्याख्यां व्याकरिष्ये यथामति ॥४॥

अत्रादौ सुकेशा इत्याद्याख्यायिका विद्याप्रशंसया श्रोतॄणां श्रद्धातिशयजननार्था। यथा पूर्वे आचार्या वेदशास्त्रसम्पन्ना भारद्वाजप्रभृतयः संवत्सरपर्यन्तसमीचीनब्रह्मचर्यानुष्ठानेन वक्ष्यमाणां ब्रह्मविद्यां लब्धवन्तः, तदनन्तरमतिप्रशस्तराजानस्तथाऽस्माभिरप्येवंविधैर्भाव्यमिति स्मर्यते हि तत्त्वज्ञानोत्पत्तिं प्रति श्रद्धादीनां कारणत्वं श्रद्धावाँल्लभते ज्ञानमिति ।

ॐ सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौशल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥१॥

तत्त्वप्रकाशिका—सुकेशानामतो भरद्वाजस्यापत्यं भारद्वाजः। शिबेरपत्यं शैब्यः सत्यकामो नामतः। सूर्यस्यापत्यं सौर्यः, तदपत्यं सौर्यायणिः। दीर्घः सुलोपश्च छान्दस इति स एव सौर्यायणी। गर्गस्य गोत्रो गार्ग्यः। कौशल्यो नामतः कोशलायां भवो वा। अश्वलायनस्यापत्यमाश्वलायनः। भृगोरपत्यं भार्गवः। विदर्भेषु भवो वैदर्भिः कबन्धी नामतः। कत्यस्यापत्यं कात्यायनः। इतरेतरयोगे च शब्दाः। त एते ह किल ब्रह्मपरा वेदाभ्यासे तात्पर्यवन्तो ब्रह्मनिष्ठाः। तदुक्तानुष्ठाननिष्ठामुनयः कदाचित्समवेताः परब्रह्म वासुदेवमन्वेषमाणा जिज्ञासवो बभूवुरिति शेषः। ब्रह्मपरा इत्यादि ब्रह्मजिज्ञासाधिकारिसम्पत्तिकथनम्। ततस्ते किलैष पिप्पलादो यद् वयं प्रक्ष्यामः तत्सर्वं वक्ष्यति तस्मादेनं प्रति गच्छाम इति निश्चित्य समित्पाणयो भूत्वा भगवन्तं = पूज्यं पिप्पलादमुपसन्नास्तत्समीपं प्राप्ताः। ह वै शब्दः पिप्पलादस्य प्रश्नप्रतिवचनसामर्थ्यप्रसिद्धिद्योतकः ॥१॥

व्याख्या—

शङ्खचक्रमहामुद्रापुस्तकाढ्यश्चतुर्भुजम् ।
सम्पूर्णचन्द्रसङ्काशं हयग्रीवमुपास्महे ॥१॥

भरद्वाज के पुत्र सुकेशा, शिबि के पुत्र सत्यकाम, गर्ग-गोत्र में उत्पन्न सौर्यपुत्र सौर्यायणि-सौर्यायणी, कोशल-देशोद्भव कौशल्य, अश्वलायन के पुत्र आश्वलायन, भृगु

के पुत्र भार्गव, विदर्भ देशोत्पन्न कबन्धी, कत्य के पुत्र कात्यायन—ये सब-के-सब शब्दब्रह्म में निष्णात एवं वेदों के तात्पर्य को ठीक-ठीक जानने वाले और परब्रह्म श्रीकृष्ण के प्रति निष्ठावान् (अर्थात् भगवान् श्रीकृष्ण ने हयग्रीव रूप से प्रकट होकर वेद-शास्त्रों में भगवत्प्राप्ति के जो भी उपाय, उपासना या साधन बताये हैं अर्थात् उनके श्वास से निकले हैं, उनके अनुष्ठान में निष्ठा एवं श्रद्धावान्) किसी समय ये छहों महामुनि इकट्ठे होकर परब्रह्म श्रीकृष्ण की जिज्ञासा से एक साथ नाना पुण्य तीर्थ और क्षेत्रों में भ्रमण किये।

'भुवि पुरुपुण्यतीर्थसदनान्यृषयः' (श्रीमद्भा. वेदस्तुतौ)।

परं ब्रह्म अन्वेषमाणाः ते ऋषयः = परब्रह्म श्रीकृष्ण के स्वरूप एवं उनकी प्राप्ति में उत्कट इच्छा रखने वाले वे मुमुक्षु लोग तत्त्वजिज्ञासु के वेश में हाथ में समिधा-पूजन सामग्री लिए हुये पूजनीय पिप्पलादजी के समीप में गये। हम जो कुछ प्रश्न करेंगे वे सब प्रश्नों का उत्तर हमें देंगे।

छः महामुनि का ऋषि-आश्रम पर पुनः ब्रह्मचर्यादिपूर्वक निवास एवं प्रश्नोत्तर उपक्रम

तान् ह स ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान् पृच्छत यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति ॥२॥

तत्त्वप्रकाशिका—तान् आगतान् ह सः = ऋषिः पिप्पलाद उवाच—किमिति। यद्यपि यूयं प्रागेव तप आदि सम्पन्नाः तथापि भूयः = पुनरेव, तपसा = सर्वेन्द्रियनिग्रहलक्षणेन विशेषतो ब्रह्मचर्येण श्रद्धया = आस्तिक्यनिष्ठया युक्ताः संवत्सरमेकमस्मान् परिचरन्तः संवत्स्यथ सम्यग्वसत। ततो यथाकामं = यथेष्टं प्रश्नान् प्रष्टव्यार्थान् पृच्छत। युष्माभिः पृष्टञ्च प्रतिवक्तुं यदि वयं विज्ञास्यामः, तर्हि सर्वं वः = युष्मभ्यं, वक्ष्याम इति न ह्येवं सति अवचने कारणमस्तीति हशब्दः ॥२॥

सान्वयानुवाद—तान् = उन सुकेशा आदि महामुनियों से, सः ऋषिः उवाच ह = वे ऋषि स्पष्ट प्रिय मधुर वाणी से बोले, भूयः एव = तुमलोग पुनः, तपसा ब्रह्मचर्येण श्रद्धया = तपस्या, ब्रह्मचर्य और श्रद्धा अर्थात् मुझमें एवं शास्त्रों में आस्तिक्य मतिपूर्वक, संवत्सरम् = एक साल तक, संवत्स्यथ = मेरे आश्रम पर यथाविधि निवास करो, यथाकामम् = यथेष्ट, प्रश्नान् पृच्छत = प्रश्न पूछना, यदि = अगर, विज्ञास्यामः = मैं जानता होऊँगा, सर्वं ह = सारी बातें, वः = तुम लोगों को, वक्ष्यामः इति = बताऊँगा ॥२॥

व्याख्या—उपर्युक्त छहों महामुनियों को परब्रह्म श्रीकृष्ण की जिज्ञासा से अपने पास आया देखकर भगवत्तत्त्वज्ञ पिप्पलादजी उनसे बोले—यद्यपि तुमलोग पहले से ही तप आदि से सम्पन्न हो तथापि पुनरेव तप, समस्त इन्द्रियनिग्रह, ब्रह्मचर्य-पालनपूर्वक

आस्तिक्य निष्ठा से युक्त हो तथा एक वर्ष पर्यन्त हमारी सेवा-शुश्रूषा करते हुये आश्रम में निवास करो। उसके बाद तुमलोग अपनी-अपनी विचिकित्सा के अनुसार यथेष्ट प्रश्न हमसे पूछना। अगर तुम्हारे पूछे हुये विषयों का मुझे ज्ञान होगा तो तुम लोगों को सब बतला दूँगा ॥२॥

इससे यह ध्वनित हुआ कि जीवात्मा सर्वज्ञ नहीं है। 'सर्वज्ञो भगवान् हरिः' (श्रीमद्भा.६।८।३१)। 'यः सर्वः सर्ववित्' (मु.उ.प्र.खण्ड १।१०)। एकमात्र भगवान् श्रीहरि ही सर्वज्ञ, सर्ववित् एवं सर्वगत है।

प्रथम प्रश्न

अथ कबन्धी कात्यायन उपेत्य पप्रच्छ-भगवन्! कुतो ह वा इमाः प्रजाः प्रजायन्त इति। तस्मै स होवाच-प्रजाकामो वै प्रजापतिः स तपोऽतप्यत ॥३॥

तत्त्वप्रकाशिका—अथ तदुक्तनियमानुष्ठानसमनन्तरं तेषां मध्ये कबन्धी कात्यायनमुपेत्य = पुरस्कृत्य पिप्पलादं पप्रच्छ। 'शब्दक्रमादर्थक्रमो बलीयानिति' पश्चादुक्तस्यापि कात्यायनस्य प्रश्नः प्रतिवचनञ्च प्रथममुक्तम्। एवमन्यत्रापि द्रष्टव्यम्। तच्च क्रमं तत्रैव दर्शयिष्यामः। किमिति भगवन्! कस्मात् कारणात्। पुरुषाद् इमा देवाद्याः सर्वाः प्रजा उत्पद्यन्त इति। ह वा इति प्रजानां प्रजननस्य सुप्रसिद्धताद्योतकौ निपातौ। सुप्रसिद्धं तावत् प्रजानां प्रजननम्। कार्यं सहेतुकं कादाचित्कत्वादिति प्रयोगेण कार्यस्य सहेतुकत्वं निश्चीयतेऽन्यथा सर्वत्र सर्वदा सर्वकार्योत्पादापत्तेः। नन्वस्तु तावत् प्रत्यगात्मनो विश्वं प्रति हेतुत्वम्।

'जीवाद् भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चलाः।
जीवे प्रलयमिच्छन्ति न जीवात् कारणं परम्' ॥

इति श्रुत्या विशेषत्वेन विधानादिति चेन्न; 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि'त्यादिना कारणस्यैकत्वप्रतिपादनात्। 'चेतनश्चेतनानामि'त्यादिना अंशो नानाव्यपदेशादित्यादिना च प्रत्यगात्मनामनन्तत्वोक्तेर्जीवकारणवादे बहुत्वप्रसङ्गान्न जीवस्य कारणत्वं किन्तु हिरण्यगर्भः समवर्त्तताग्रे आदि कर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य गोप्तेति प्रसिद्ध्या च एकत्वपूर्वकारणत्वप्रतिपादनाच्चतुर्मुख एव जगत्कारणत्वमित्यपि न तस्य पूर्ववर्त्तित्वासिद्ध्या कारणत्वस्याप्यसिद्धत्वात्।

तथाहि—'न सन्न चासच्छिव एव केवलः' इत्यन्यनिषेधपुरस्कारेण शिवस्य पूर्ववर्त्तित्वं केवलत्वञ्चोच्यते। तथैव हिरण्यगर्भस्यावरत्वमपि हिरण्यगर्भं पश्यति—जायमानमिति। अतः शिवस्यैव जगत्कारणत्वं निश्चीयते—इति चेन्न। तस्यापि कालादिपारतन्त्र्यात् तथा च—'ममापि कालो ग्रसते कुतः पुत्र!! रसायनमि'त्यादिना स्कन्दं पुत्रं प्रति स्वयमेव त्रिलोचनोक्तत्वात्।

कालं तथान्य इति श्रुतेः । तथा च षष्ठेंऽशे बादरायणः ।

'कालो भवाय भूतानामभवाय च पाण्डव ।
कालमिदं ज्ञात्वा भवस्थैर्यधरोऽर्जुन सृष्टा ॥
कालेन कालेन पुनर्यास्यन्ति संयमम् ।
कालात्मकमिदं सर्वं ज्ञात्वा शममवाप्नुहि' ॥

इति स्मृतेश्च काल एव जगद्धेतुर्भवतु—इति चेन्न; श्रुत्या कालवादिनां भ्रान्तत्व-प्रतिपादनात् 'कालं तथान्ये परिमुह्यमाना' इति तत्रैव स्वभाववादिनां विवेकित्वप्रति-पादनात् । स्वभावमेके कवयो वदन्तीति स्वभाव एव जगत्कारणमिति चेन्न; यतः तन्मते च न कारणसापेक्षं कार्यम् । अपितु स्वत एव तत्र पृच्छ्यते स्वाभाविकं जगदिति प्रतिज्ञायां तत्साधको हेतुरस्ति न वेति । भावपक्षे स्वभाववाद हानिर्यत्तत्र साधनं हेत्वन्तरं तदेव तत्र मुख्यकारणं तस्य चौपचारिकत्वापत्तेः । द्वितीये हेत्वन्तराभावपक्षे मूकतापत्त्या प्रतिज्ञाभङ्गः तस्मान्न स्वभावसिद्धिः । स्वतोऽभावरूपस्य गगनकुसुमायमानस्य भावात्मक-कार्योत्पादनेन कथमपि सामञ्जस्यं स्यात् । नहि शशविषाणादीनां कार्योत्पादनं कुत्रापि दृष्टं श्रुतं वा, तस्मान्नाभावस्यापि जगत्कारणत्वं नापीश्वरस्तदनुपलम्भादिति प्रष्टुराशयः ।

प्रकृतमनुसरामः—तस्मै पृष्टवते कात्यायनाय स पिप्पलादः किलोत्तरमुवाच—किमिति । प्रजानां = ब्रह्मादीनां, पतिः = पालकः प्रजापतिः । परमेश्वरः कल्पादौ किलात्मनः प्रजाकामो देवादिप्रजावत्त्वमात्मन इच्छन्नवर्त्तत । अथ सर्वज्ञोऽपि लोकविडम्बनाय तप अतप्यत कर्त्तव्यमन्वालोचयत् ॥३॥

सान्वयानुवाद—अथ = अनन्तर, एक साल के बाद, कबन्धी कात्यायन उपेत्य = कबन्धी कात्यायन के समीप जाकर, पप्रच्छ = पूछा, भगवन् = हे प्रभो! कुतः ह वै इमाः प्रजाः प्रजायन्ते इति = किस कारण (पुरुष) से यह सकल प्रजा नाना नामरूपों से उत्पन्न होती है? यह मेरा प्रश्न है। सः = वह, तस्मै = उससे, उवाच = कहा, ह वै सः प्रजाकामः प्रजापतिः तपः अतप्यत = निश्चय ही प्रजावृद्धि की कामना वाला वह प्रजापति तप किया ॥३॥

व्याख्या—(१) अथ शब्द प्रारम्भ का वाचक है। (२) अथ शब्द मङ्गल का वाचक है। किसी कार्य के आरम्भ में 'अथ' शब्द का उच्चारण करने से कार्य मङ्गलप्रद होता है।

'ओंकारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ' ॥

विश्वसृष्टि के पहले ब्रह्माजी के कण्ठ को भेदकर 'अथ' तथा 'ओंकार' (प्रणव) ये दो शब्द निकले, इसलिये ये दोनों शब्द मङ्गलवाची हैं।

मन्त्र में 'प्रजापति' शब्द उपलक्षण है। 'विद्यमानं स यत् व्यावर्त्तकं तद् विशेषणम्—यथा काकवत् गृहम् अन्येद्युः यदा काकः गृहोपरि अविद्यमानः सन्

देवदत्तस्य गृहं परिचायति तदा अविद्यमान: काक: उपलक्षणं कथ्यते। तथैवात्रापि श्रीशुकोक्तिर्ज्ञेया—

'श्रिय: पतिर्यज्ञपति: प्रजापतिर्धियां पतिर्लोकपतिर्धरापति: ।
पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पति:' ।।

जो लक्ष्मी के स्वामी हैं, यज्ञों के फलदाता, ब्रह्मादि के रक्षक, बुद्धि के प्रवर्त्तक, लोकों के अधिष्ठाता तथा पृथिवी के उद्धर्त्ता वे शरणागत (प्रपन्न) भक्तों के पालक यदुपति भगवान् श्रीकृष्ण मुझ पर प्रसन्न हों। 'गति: कृष्ण: सर्वेषां स एव प्राप्ति:'। 'नान्या गति: कृष्णपदारविन्दात्' इति श्रीमन्निम्बार्काचार्योक्ति:। परब्रह्म श्रीकृष्ण सर्वज्ञ होकर भी लोकों का विस्तार करने के लिये और अपने प्रपन्न भक्तों को आनन्दित करने के लिये तप किये। 'यस्य ज्ञानमयं तप:' (मु.उ.१।१।१०) अर्थात् परब्रह्म श्रीकृष्ण का ज्ञान ही तप है।

'भगवन् कुतो ह वा इमा: प्रजा: प्रजायन्ते'। इसका अर्थ स्मृति के अनुसार इस प्रकार समझिये—

'सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधा: प्रजा: ।
अप एव ससर्जादौ तासु वीर्यमवासृजत् ।।१।।
विष्णो: सकाशादुद्भूतं जगत्तत्रैव च स्थितम् ।
स्थितिसंयमकर्त्तासौ जगतोऽस्य जगच्च स: ।।२।।
अहं सर्वस्य प्रभवो मत्त: सर्वं प्रवर्त्तते ।
अहं कृत्स्नस्य जगत: प्रभव: प्रलयस्तथा' ।।३।।

परब्रह्म श्रीकृष्ण ने अपने शरीर से हर तरह की प्रजा (जीव) उत्पन्न करने की इच्छा से संकल्प करके पहले निर्मल जल की सृष्टि की, फिर उस निर्मल जल में अपने शक्तिरूप वीर्य का आधान किया। (मनुस्मृति १।८)

यह सम्पूर्ण चराचर जगत् (भूत) भगवान् श्रीकृष्ण से उत्पन्न हुआ है और उन्हीं में स्थित हैं। वे इस जगत् के परिपालक हैं, संहारकर्त्ता हैं और जड़-चेतनात्मक जगत् उन्हीं का स्वरूप है। (विष्णुपुराण १।१।३१)

हे अर्जुन ! मैं जड़-चेतनात्मक सकल जगत् की उत्पत्ति और प्रलय का कारण हूँ। मैं सबकी उत्पत्ति का कारण हूँ और हमारी वजह से ही सबकी वाणी बोलती है, जीभ हिलती है और साँस चलती है। (श्रीमद्भगवद्गीता)

स तपस्तप्त्वा स मिथुनमुत्पादयते। रयिञ्च प्राणञ्चेत्येतौ मे बहुधा प्रजा: करिष्यत इति ।।४।।

तत्त्वप्रकाशिका—आलोचितकार्यश्च स प्रजापतिर्मिथुनं = स्त्रीपुरुषरूपं द्वन्द्व-मुत्पादयते = उत्पादयत् किं तत्। रयिं = प्रकृतिं, प्राणं = पुरुषम्। सर्वा: प्रजा: सिसृक्षु:। परमात्मा कथं तावुत्पादयदिति। एवं मन्यते स्म प्रजापति: एतौ रयिप्राणौ मम बहुविधा: प्रजा: करिष्यत इति ।।४।।

सान्वयानुवाद—सः = उसने, रयिं च = रयि, प्राणं च = और प्राण, इति मिथुनम् = यह जोड़ा, तपः तप्त्वा उत्पादयते = अपने धर्मभूत ज्ञान से उत्पन्न किया, एतौ मे = ये दोनों (रयि और प्राण) मेरी, बहुधा = बहुविध, प्रजाः = सृष्टि, करिष्यत इति = करेंगे ॥४॥

व्याख्या—इस मन्त्र की श्रीमद्भागवत के अनुसार व्याख्या करते हैं—परब्रह्म श्रीकृष्ण की इच्छा से ब्रह्मा का शरीर दो भागों में विभक्त होकर मिथुन रूप से परिणत हो गया। इस श्रुति में जो प्राण शब्द आया है उसका अर्थ है पुरुष और रयि का अर्थ है प्रकृति (स्त्री); एक पुरुष, दूसरी स्त्री। इसमें जो पुरुष था, वह स्वायम्भुव मनु हुए और दूसरा भाग उनकी पत्नी शतरूपा। स्वायम्भुव मनु से मैथुन-सृष्टि द्वारा प्रजा की वृद्धि होने लगी।

'स्त्रीणां तु शतरूपाहं पुंसां स्वायम्भुवो मनुः'। (श्रीमद्भागवत ११।१६।२५)

इसके अनुसार मनु और शतरूपा ये दोनों परब्रह्म श्रीकृष्णकी विभूतियाँ है (श्रीमद्भा. ३।५१।५२।५३।५४) वहाँ मैथुन-सृष्टि का वर्णन है। स्वायम्भुव मनु द्वारा शतरूपा से प्रियव्रत और उत्तानपाद नामक दो पुत्र उत्पन्न हुये और आकूति, देवहूति और प्रसूति ये तीन कन्याएँ उत्पन्न हुईं। आकूति का विवाह रुचि के साथ, कर्दम का देवहूति के साथ और दक्ष का प्रसूति के साथ हुआ; जिनकी सृष्टि से यह सम्पूर्ण जगत् परिपूर्ण हो गया—

'आकूतिं रुचये प्रादात् कर्दमाय तु मध्यमाम्।
दक्षायादात् प्रसूतिं च यत आपूरितं जगत्' ॥

आदित्यो ह वै प्राणो रयिरेव चन्द्रमा रयिर्वा एतत्सर्वं यन्मूर्तञ्चामूर्तञ्च तस्मान्मूर्त्तिरेव रयिः ॥५॥

तत्त्वप्रकाशिका—रयिप्राणयोरर्थं व्याचष्टे—आदत्ते इत्यादित्यः, तस्य भोक्तृत्वेन 'प्राण'शब्दवाच्यत्वम्। रयिरेव चन्द्रमाः = भोग्यवर्गः। सोमत्वाभिधाने वक्तुः किन्तात्पर्यमित्यतः दर्शयति—रयिर्वेति। मूर्तं = पृथिव्यप्तेजोलक्षणम्। अमूर्तं = वाय्वन्तरीक्षम्। मूर्त्तामूर्ते = भोक्तुरन्नरूपे, भोग्य इत्यर्थः। सर्वस्यापि पाञ्चभौतिकशरीरस्य मूर्तशब्दाभिधेयस्य भोग्यत्वेन रयित्वमित्याह—तस्मादिति ॥५॥

सान्वयानुवाद—आदित्यः ह वै = सूर्य ही, प्राणः = प्राण है, रयिः एव = रयि ही, चन्द्रमाः = चन्द्रमा है, यत् च मूर्तं = जो मूर्त पदार्थ है, च = और, अमूर्तं = अमूर्त पदार्थ है, एतत् सर्वं = यह सब, रयिः वै = रयि ही है, तस्मात् = इसलिये, मूर्तिः एव = मूर्त्ति ही, रयिः = रयि है ॥५॥

व्याख्या—पूर्वोक्त रयि तथा प्राण पद का अर्थ बतलाते हैं। 'ग्रहण करता है' इसलिये आदित्य (जीव) की भोक्ता रूप से प्राण शब्दवाच्यता है।

('नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः') सर्वव्यापक सर्वगत परब्रह्म

श्रीकृष्ण न किसी के पापकर्म को और न किसी के पुण्यकर्म को ही ग्रहण करते हैं। चन्द्रमा ही भोग्यवर्ग है। पृथिवी, जल और तेज को मूर्त कहते हैं। आकाश और वायु को अमूर्त कहते हैं। मूर्त और अमूर्त ये दोनों भोक्ता जीव का अन्न रूप में भोग्य हैं। क्योंकि सबका यह शरीर पञ्च महाभूतों से बना हुआ प्राञ्चभौतिक शरीर भोग्य रूप से रयि ही है (परन्तु भोक्ता जीव रयि नहीं है, वह ज्ञानस्वरूप ज्ञानवान् है) ॥५॥

अथादित्य उदयन् यत् प्राचीं दिशं प्रविशति, तेन प्राच्यान् प्राणान् रश्मिषु सन्निधत्ते। यद् दक्षिणां यत् प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशो यत्सर्वं प्रकाशयति तेन सर्वान् प्राणान् रश्मिषु सन्निधत्ते ॥६॥

तत्त्वप्रकाशिका—अथ = रयिनिरूपणानन्तरम्, आदित्यो निरूप्यत इति शेषः। आदित्यशब्देन विवक्षितस्य भोक्तुः प्राणशब्दवाच्यत्वं कथमिति जिज्ञासायामाह—उदयन्निति। अयं प्रत्यगात्मा सुषुप्तिस्थानात् उदयन् = प्रबुद्ध्यमानः सर्वाः दिशः प्रकाशयन् तत्तद्दिग्वर्त्तीन्द्रियाणि धर्मभूतज्ञानाख्यरश्मिद्वारा बिभर्त्ति तत एव प्राणशब्दवाच्येन्द्रियाधिष्ठातृत्वात् प्रत्यगात्मा प्राणशब्देनात्र व्यवहृतः, प्राचीं दिशं प्रविशति = प्रकाशयति। प्राग्दिग्वर्त्तिपदार्थानुपलभत इति यावत्। तेन = तस्माद्धेतोः। प्राच्यान् प्राणान्। रश्मिषु सन्निधत्ते प्राग्दिग्वर्त्यर्थप्रकाशकचक्षुरादीन् प्राणान् धर्मभूतज्ञानाख्यरश्मिमुखेनाधितिष्ठति प्रेरयति। न हि कुठारादयः छिदा साधनभूताः कर्त्तारमन्तरेण फलोपसाधका एव भुवन्निरूपाद्युपलब्धौ करणभूताश्चक्षुरादयः तदधिष्ठातृत्वलक्षणकर्त्तारमन्तरेण कार्यं जयितुं न क्षमन्ते। अचेतनस्य चेतनाधिष्ठितस्यैव कार्यजनकत्वनियमादिति भावः। एवं दक्षिणां दिशं प्रविशतीति यत्तेन दाक्षिणात्यान् प्राणान् स्वरश्मिषु सन्निधत्त इत्यादि योज्यम्, दिशोऽन्तरा दशदिशां मध्ये, यत्सर्वमिति निगमम्।

अत्र प्रजाः सिसृक्षुः भगवान् प्रथमं प्रकृतिं पुरुषं च ससर्जेति वक्तव्ये प्रागुपदर्शितरीत्या परोक्षरूपेणाभिधानं तस्य रहस्यत्वं सूचनाय 'परोक्षप्रिया' हि देवाः (ऐत.उ.१।३) इति श्रुत्या गोप्यार्थस्य स्फुटतरोपदेशानर्हत्वादित्याशयः ॥६॥

सान्वयानुवाद—अथ = रयि निरूपण के अनन्तर, आदित्यः = सूर्य (जीवात्मा), उदयन् = उदित होता हुआ, प्राचीं दिशं = पूर्व दिशा में, प्रविशति = प्रवेश करता है, तेन प्राच्यान् = उस हेतु से पूर्वस्थ, प्राणान् = इन्द्रियों को, रश्मिषु सन्निधत्ते = किरणों में धारण करता है, यत् दक्षिणं = जो दक्षिण दिशा को, यत् प्रतीचीं = जो पश्चिम दिशा को, यत् उदीचीं = जो उत्तर दिशा को, यत् अधः = जो नीचे के लोकों को, यत् ऊर्ध्वं = जो ऊपर के लोकों को, यत् अन्तरा = जो बीच के, दिशः = दिशाओं को, यत् सर्वं = जो सबको, प्रकाशयति = प्रकाशित करता है, तेन सर्वान् प्राणान् = इसलिये सारी इन्द्रियों को, रश्मिषु सन्निधत्ते = किरणों में धारण करता है ॥६॥

व्याख्या—रयि निरूपण के अनन्तर आदित्य का निरूपण किया जा रहा है—आदित्य शब्द से विवक्षित भोक्ता में प्राण शब्द वाच्यत्व कैसे हो सकता है ? ऐसी

जिज्ञासा होने पर उत्तर देते हैं—यह जीवात्मा सुषुप्ति स्थान से उदय होता हुआ अर्थात् जागता हुआ सारी दिशाओं को प्रकाशित करता हुआ उस उस दिशाओं में रहने वाली इन्द्रियों को अपने धर्मभूत ज्ञानाख्य रश्मि द्वारा धारण करता है, इसलिये प्राण शब्द वाच्य इन्द्रियों के अधिष्ठाता जीवात्मा है। इस श्रुति में प्राण शब्द रूप से जीवात्मा का ही व्यपदेश हुआ है, ऐसा समझना चाहिये।

इस कारण पूर्व दिशा में रहने वाली वस्तुओं को प्रकाशित करने वाला जीवात्मा चक्षुरादि इन्द्रियों को आत्मा के धर्मभूत ज्ञानाख्य किरणों के प्राधान्य से प्रेरित करता है। जैसे फलोपधायक साधनभूत कुल्हाड़ी कर्त्ता के बिना लकड़ी नहीं काट सकती, ठीक वैसे ही निरूपादि उपलब्धि में करणभूत चक्षुरादि इन्द्रियाँ कर्त्ता (जीवात्मा) के बिना कार्य को जीतने में कदापि सक्षम नहीं हो सकती हैं। अत: अचेतन इन्द्रियों के अधिष्ठाता चेतन जीवात्मा है।

इस प्रकार दक्षिण दिशा में प्रवेश करता है, जिसके कारण दाक्षिणात्य इन्द्रियों को अपनी किरणों में धारण करता है। इत्यादिवत् योजनीय दश दिशाओं के मध्य में जो सब विद्यमान है ॥६॥

स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते। तदेतदृचाऽभ्युक्तम् ॥७॥

तत्त्वप्रकाशिका—प्राणादित्यशब्देन निर्दिष्टस्य भोक्तृवर्गस्य ब्रह्मात्मकतामुपदिशति—स एषो भोक्ता प्राण: वैश्वानर:। विश्वेषां सर्वेषां नराणां नेतृत्वेन वैश्वानरशब्दवाच्यपरमात्मभिन्न: ब्रह्मात्मकत्वेन तन्नियम्यत्वेन च सर्वात्मत्वेन सर्वनियन्तृत्वादिना च भिन्नश्च, वैश्वानररूपं परमात्मानं विशिनष्टि–विश्वरूप इति। सर्वशरीरतया विश्वरूपपदवाच्य:। स एवाग्रनेतृत्वादिगुणयोगेनाग्नि:, स परमात्मा भोक्तृत्वेन रूपेणोदयते। तत् एतत् ब्रह्म विश्वरूपमिति मन्त्रेणाभ्युक्तं स्पष्टमुक्तमतो दृढतरं प्रतिपत्तव्यमित्यर्थ: ॥७॥

सान्वयानुवाद—स एष: = वह यह, प्राण: = जीवात्मा, वैश्वानर: विश्वरूप: अग्नि: उदयते = वैश्वानर विश्वरूप अग्नि (परमात्मा) का उदय होता है, तत् एतत् ऋचा अभि + उक्तम् = वही यह बात ऋचा द्वारा आगे स्पष्ट रूप से कही गयी है ॥७॥

व्याख्या—श्रुत्युक्त प्राण और आदित्य पद से निर्दिष्ट भोक्तृवर्ग में ब्रह्मात्मकत्व का (श्रुति) उपदेश देती है। यहाँ 'प्राण' पद का अर्थ भोक्ता है। समस्त मनुष्यों के नेता (आगे चलने वाला–ले जाने वाला) रूप से वैश्वानर पदवाच्य परमात्मा से अभिन्न ब्रह्मात्मकत्व तन्नियम्यत्व रूप से एवं सर्वात्मरूप से और सर्वनियन्तृत्वरूप से भिन्न वैश्वानर वही अग्नि है और विश्व ही उनका रूप है। अग्र-नेतृत्वादि धर्म के सम्बन्ध से वही अग्नि ही वह परब्रह्म परमात्मा श्रीकृष्ण भोक्ता रूप से उदय होते हैं। वही यह 'परब्रह्म श्रीकृष्ण विश्वरूप है' इस मन्त्र से स्पष्ट कहा गया है। इसलिये यथार्थ ज्ञान करना चाहिये ॥७॥

विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम्।
सहस्ररश्मि: शतधा वर्त्तमान: प्राण: प्रजानामुदयत्येष सूर्य: ॥८॥

तत्त्वप्रकाशिका—विश्वरूपं = सर्वशरीरम्। हरिणं = हरिम्। हरिशब्दस्य नान्तत्वं च्छान्दसम्। जातवेदसं = जातस्य सर्वस्य वेदितारम्। परायणं = सर्वप्राणिनां परमाश्रयम्। ज्योतिः = प्रकाशकम्। एकम् = अद्वितीयम्। तपन्तं = जाठराग्न्यादि-रूपेण तपन्तम्।

'सन्तापयति स्वं देहमापादतलमस्तकम्'।
'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्'॥

इति श्रुतिस्मृतिभ्याम्।

सहस्ररश्मिः = अनन्तरश्मिः। प्रजानां = भूतानाम्। प्राणः = धारकः। स एषः पुरुषः सूर्य इव प्रकाशकः। शतधा = अनेकधा प्राणिभेदेन वर्त्तमानः = सर्गकाल उदयत इत्यर्थः॥८॥

व्याख्या—जगत् में जितने शरीर हैं वे सब-के-सब उन्हीं के रूप हैं।

'हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः'॥

दुष्टचित्त मनुष्य के द्वारा स्मरण किये जाने पर भी भगवान् श्रीहरि पापों को हर लेते हैं। जैसे अनजान में या अनिच्छा से स्पर्श करने पर भी अग्नि जलाती ही है। वे भगवान् श्रीहरि प्राणी मात्र की मनोवृत्ति को जानने वाले हैं। वे समस्त प्राणियों के परम आश्रय हैं, ज्योतिः स्वरूप हैं तथा अद्वितीय हैं। जाठराग्नि आदि रूप से तपाते हैं। अपने पैर से लेकर शिर तक तपाते हैं। मैं ही सब प्राणियों के शरीर में स्थित रहने वाला प्राण और अपान से संयुक्त वैश्वानर अग्निरूप होकर चार प्रकार के अन्न को पचाता हूँ। सहस्ररश्मिः = हजारों किरणों वाले हैं। अर्थात् वे सर्वज्ञ सर्वशक्त्यादि कारुण्य-वात्सल्यादि अनन्त कल्याणकारक धर्मों के आधार हैं। जड़-चेतनात्मक समस्त भूतों को धारण करने वाले सर्वाधारक हैं, सूर्य की भाँति प्रकाशक हैं। वे ही परम पुरुष श्रीकृष्ण अनेक प्रकार से प्राणिभेद से वर्त्तमान सृजन काल में उदय होते हैं।

संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च। तद्ये ह वै तदिष्टापूर्ते कृतमित्युपासते, ते चान्द्रमसं लोकमभिजयन्ते। त एव पुनरावर्त्तन्ते। तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यन्ते। एष ह वै रयिर्यः पितृयाणः॥९॥

तत्त्वप्रकाशिका—रयिशब्दप्रतिपाद्या प्रकृतिर्भोग्यरूपा, प्राणशब्दोदितपुरुषः भोक्तेति विभागं निरूप्य सम्प्रति सर्वोत्पत्तिनिमित्तकारणं संवत्सरादिलक्षणं कालं तदवान्तरभेदोत्तरायणादिकं रयिप्राणरूपं विभागं दर्शयति—संवत्सराख्यकालरूपस्य प्रजापतेरयने मार्गौ द्वौ दक्षिणश्चोत्तरश्च द्वे प्रसिद्धे ह्यायने षण्मासलक्षणे याभ्यां दक्षिणे-नोत्तरेण च याति सविता केवलकर्मिणां लोकान् विदधत् तथा च कर्मिणां लोकं विधातुं तयोर्दक्षिणोत्तराभ्यां गमनात् तन्निमित्तत्वाच्चायनद्वयप्रसिद्धिरिति भावः। तत् तत्र साधकेषु

मध्ये ये ऋषयः प्रजाकामाः इष्टं यागादिकं पूर्त्तमन्नदानादिकं कृतमन्यच्च कर्मेत्युपासते ऽनुतिष्ठन्ति ते एते दक्षिणपितृयाणं प्रतिपद्यन्ते प्रतिपन्नाश्च ते चान्द्रमसमेव लोकमभिजयन्ते प्राप्नुवन्ति। ते एव पुनः स्वकर्मावसाने चान्द्रमसाल्लोकादावर्त्तन्ते ह वै। ह वा इति प्रसिद्धौ। एष एव पितृयाणः। रयिरन्नप्रधानः, वैषयिकभोगात्मक इति यावत्।

इष्टम्— अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम्।
आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते ॥१॥

पूर्तम्— वापीकूपतडागादि देवतायतनानि च।
अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥२॥

इति इष्टापूर्तयोर्भेदः ॥९॥

सान्वयानुवाद—संवत्सरः वै = संवत्सर–बारह महीनों वाला काल ही, प्रजापतिः = प्रजापति है, तस्य = उसके, अयने = दो मार्ग हैं, दक्षिणं च = एक दक्षिण, उत्तरं च = दूसरा उत्तर, तत् = उन दोनों के बीच में, ये ह वै = जो लोग, इष्टापूर्ते = इष्ट और पूर्त्त कर्म, कृतम् = और अन्य कर्म का, उपासते = उपासन—अनुष्ठान करते हैं, ते = वे लोग, चान्द्रमसम् एव लोकम् अभिजयन्ते = केवल चन्द्र-सम्बन्धी लोक ही जीतते हैं अर्थात् चन्द्र-सम्बन्धी लोक ही प्राप्त होते हैं। ते एव = वे ही, पुनः आवर्त्तन्ते = पुनरावृत्ति करते हैं, तस्मात् = इसलिये, एते = ये, प्रजाकामाः = प्रजा को चाहने वाले, ऋषयः = भक्तगण, दक्षिणं प्रतिपद्यन्ते = दक्षिण मार्ग को प्राप्त होते हैं। ह एषः वै रयि = निस्सन्देह यही वही रयि है, यः पितृयाणः = जो पितृयान नामक मार्ग है ॥९॥

व्याख्या—रयि शब्द प्रतिपाद्या प्रकृति भोग्यरूपा और प्राण शब्द से पुरुष भोक्ता —संक्षेप में यह बताया गया। इस समय सर्वोत्पत्ति निमित्तकारण संवत्सरादि का लक्षण काल, उसके अवान्तरभेद उत्तरायणादिक रयिप्राणरूप विभाग को दिखलाते हैं—संवत्सराख्य कालरूप प्रजापति के दो अयन (मार्ग) है—दक्षिण और उत्तर। ये प्रसिद्ध दो अयन दक्षिणायन के जो छः महीने हैं जिनमें भगवान् भास्कर दक्षिण की ओर घूमते हैं और उत्तरायण के छः महीने ही उत्तर अङ्ग हैं। केवल कार्य करने वाले जनों को विधान करने के लिये सूर्यदेव इन दोनों मार्गों से घूमते हैं। दक्षिण एवं उत्तर गमन निमित्त पथद्वय प्रसिद्ध हैं। साधकों के बीच में जो इष्टयागादि पूर्त—अन्नदानादि सत्कर्मों का अनुष्ठान करते हैं वे यह दक्षिण पितृयान नामक मार्ग को प्राप्त होते हैं। वे चान्द्रमस लोक ही जीतते हैं—प्राप्त होते हैं। वे ही पुनः निज कर्मावसान होने पर चान्द्रमस लोक से इस मृत्युलोक में लौट आते हैं।

अग्निहोत्र, तप-तपस्या, सत्य-आत्म-परमात्म का विचार, वेदों का अनुपालन, अतिथि-सत्कार और वैश्वदेव इनको इष्ट कहते हैं। वापी, कुआँ, तालाब आदि देवतायतन, अन्नदान और बगीचा आदि लगाना कर्म को पूर्त कहते हैं। इष्ट और पूर्त में इतना ही अन्तर है ॥९॥

अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयन्ते। एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्त्तन्त इत्येष निरोधस्तदेष श्लोकः ॥१०॥

तत्त्वप्रकाशिका—मार्गान्तरारम्भार्थोऽथशब्दः। ये संसारात् विरक्ताः पुमांसः तपसेन्द्रियजयेन विशेषतो ब्रह्मचर्येण = स्त्रीसङ्गराहित्यलक्षणेन, श्रद्धया = आस्तिक्य-बुद्धिलक्षण्या, विद्यया = प्रत्यगात्मविद्यया परमात्मानमुपास्यादित्यमभिजयन्ते। अर्चि-रादिनोत्तरेणायनेनादित्याच्चन्द्रमसं चन्द्रमसं विद्युतम्। तत्पुरुषोऽमानवः, स एतान् ब्रह्म गमयति। इत्युक्तप्रकारेण ब्रह्माप्तिद्वारभूतमादित्यमभिजयन्ते प्राप्नुवन्तीत्यर्थः। यस्मात् एतत् देवयानं प्राप्यं परं ब्रह्म प्राणानां प्राणभूतानामायतनमाधारभूतम्। एतत् परायणं परमं प्राप्यम्। एतदमृतमविनाशि। अभयमत एव भयवर्जितम्। एतस्मान्न पुनरावर्त्तन्ते उपासका इति शेषः।

'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इत्युक्तरीत्या परं ब्रह्म श्रीकृष्णं प्राप्य न निवर्त्तन्ते। एष निरोधः। एष प्रजापतिशब्दनिर्दिष्टः परमात्मा स्वप्राप्तस्य पुनरावृत्तिनिरोधकारी। अतः प्रजापतिशब्दितं परमात्मानं प्राप्तस्य तदुपासकस्य न पुनरावृत्तिरुपपद्यत इति भावः। तत्र तस्मिन्नर्थे एष श्लोकः वक्ष्यमाणमन्त्रः सम्मतित्वेन भवति ॥१०॥

सान्वयानुवाद—अथ = अनन्तर, तपसा ब्रह्मचर्येण श्रद्धया = (जो) तपस्या, ब्रह्मचर्य एवं श्रद्धा से युक्त; विद्यया = विद्या के द्वारा, आत्मानम् = अन्तर्यामी श्रीकृष्ण का, अन्विष्य = अन्वेषण (खोज) करते हैं, (वे) उत्तरेण = उत्तरायण मार्ग से, आदित्यम् = आदित्य को, अभिजयन्ते = सब ओर से जीत लेते हैं। एतत् वै = यह ही, प्राणानाम् = इन्द्रियों का, आयतनम् = आश्रय है, एतत् अमृतम् = यह अमृत है, अभयम् = भयवर्जित, एतत् परायणम् = यह उपासकों का आधार है, एतस्मात् = इससे, न पुनः आवर्त्तन्ते = पुनः लौटकर नहीं आते हैं, इति एष निरोधः = यह निरोध है, तत् एषः श्लोकः = यह श्लोक है ॥१०॥

व्याख्या—जो सांसारिक विषय-भोगों से विरक्त-वितृष्ण हैं, तपस्या के द्वारा जिन्होंनें इन्द्रियों को जीत लिया है और विशेष करके ब्रह्मचर्य तथा गुरूपदिष्ट शास्त्र वाक्यों में आस्तिक्य-बुद्धि एवं प्रत्यगात्मविद्या द्वारा परमात्मा श्रीकृष्ण की उपासना करके वे आदित्य-लोक को जीत लेते हैं। अर्थात् उस परम-वैष्णव पद को प्राप्त करते हैं।

'परं पदं वैष्णवमामनन्ति तद्'-यही अमृत, नित्य, अविनाशी और निर्भय परम-पद है। इसे प्राप्त हुये उपासक फिर लौटकर जन्म-जरा-मरण आदि प्रवाहरूप संसार में नहीं आते हैं। इसलिये 'देवयान' नामक मार्ग यह निष्काम ज्ञानी भक्तों का ही एकमात्र आधार है। इस देवयान नामक मार्ग के सम्बन्ध में श्रीभगवान् ने कहा है—हे कौन्तेय! मुझे प्राप्त करके तो पुनर्जन्म नहीं होता। (गी.८।१६)

यही प्रजापति शब्द से निर्देश किया गया परमात्मा और परमात्म-प्राप्ति की

पुनरावृत्ति का निरोध (निवारक) है। अर्थात् जिनको भगवद्भावापत्तिलक्षणमोक्षकाम है वे पुनः पुनरावृत्ति–पुनरावर्त्तन नहीं करते हैं, यही निरोध पद का अर्थ है। उस अर्थ में आगे कहे जाने वाले ये मन्त्र सम्मतिरूप से हैं ॥१०॥

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्द्धे पुरीषिणम्।
अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षडर आहुरर्पितमिति ॥११॥

तत्त्वप्रकाशिका—हेमन्तशिशिरयोरैक्येन पञ्चर्तवः पादा अंशा यस्य तं पञ्चपादं, पितरं जनानां पोषकं, द्वादश मासा आकृतयोऽवयवा यस्य तं दिवः = द्युलोकात्, परे = परस्मिन्नर्धे स्थाने, पुरीषमुदकं तदस्यास्तीति पुरीषिणं वर्षणहेतुम्, अथशब्दः पक्षान्तरपरिग्रहार्थकः। तेभ्योऽन्ये परे उत्कृष्टाः कालतत्त्वविदो सप्तचक्रे = सप्तहयरूपेण चक्रे सततं गतिमति कालात्मनि षडरे = षडनुमति जगत्सर्वं विचक्षणं निपुणं निश्चलं यथा भवति तथाऽर्पितमित्याहुः ॥११॥

सान्वयानुवाद—पञ्चपादम् = पाँच पैर वाला, पितरम् = जनताओं का पालक, द्वादशाकृतिम् = बारह आकृतियों वाला, पुरीषिणम् = जल का जनक, दिवः = द्युलोक से, परे अर्धे = परस्थान में, आहुः = ऐसा कहते हैं। अथ = 'अथ' पद वादियों के दूसरे पक्ष का निर्देशक है। इमे अन्ये उ = दूसरे कुछ लोग ऐसा बतलाते हैं। परे सप्तचक्रे = उत्कृष्ट सात पहियों वाले, षडरे = अरोंवाले रथ में, अर्पितम् = अर्पित है, विचक्षणम् = निपुण है ॥११॥

व्याख्या—हेमन्त और शिशिर ये दोनों को एक मिलाकर या मानकर पाँच ऋतु परमात्मा श्रीकृष्ण के अंश हैं। वे ही सबका पालन-पोषण करते हैं इसलिये भगवान् श्रीकृष्ण सबके परम पिता हैं; जैसे माँ-बाप लड़का-लड़की को पालते-पोसते हैं। बारह महीने परब्रह्म श्रीकृष्ण के आकृति अर्थात् अवयव हैं।

द्युलोक से ऊर्ध्व देश में जलोत्पादक स्थान है, कालतत्त्व को जानने वाले विद्वान् लोग उसका उदकवर्षी रूप में वर्णन करते हैं। दूसरे कुछ लोग कहते हैं—यह सबसे विचक्षण है। विचष्टे इति विचक्षणम्। 'चक्षिङ् व्यक्तायां वाचि'। विपश्चित् इत्यर्थः।

'न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायाञ्च विशुद्धमाविशत्।
यद्भक्तियोगानुगृहीतमञ्जसा मुनिर्विचष्टे ननु तत्र ते गतिम्' ॥
(श्रीमद्भा. ४।२४।५९)

जिसका चित्त बाहर के शब्द, स्पर्श, रूप, रस और गन्ध इन विषयों में भटकता नहीं है, निद्रारूप गुफा में प्रवेश नहीं करता; श्रीभगवदुक्त भक्तियोग से अनुगृहीत विशुद्ध चित्तवाला वह मुनि अनायास ब्रह्मस्वरूप श्रीकृष्ण को देखता है।

'नान्या गतिः कृष्णपदारविन्दात्' इत्युक्तेः।

जिसे सात चक्र और छः अरों वाला रथ कहा गया है वह इस पाँचभौतिक शरीर का आत्मारूप है। सर्वभिन्नाभिन्न सर्वज्ञ परमात्मा श्रीकृष्ण ही सबके उपास्य हैं।

मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणस्तस्मादेते ऋषयः शुक्ल इष्टं कुर्वन्तीतर इतरस्मिन् ॥१२॥

तत्त्वप्रकाशिका—संवत्सराख्यकालरूपस्य प्रजापते रयिप्राणात्मना विभागं प्रदर्श्य प्रजापतिरूपमासस्य विभागं विवृणोति—मास इति। मासो ह वै प्रजापति-र्यथोक्तलक्षणस्तस्य मासात्मनः प्रजापतेरेको भागः कृष्णपक्षो रयिरन्नं चन्द्रमा अपरो भागः, शुक्लः = शुक्लपक्षः प्राणः। यस्माच्छुक्लः प्राणत्वेनोत्कृष्टः, तस्माद् ऋषयः = मन्त्र-द्रष्टारः सर्वेऽपि, इष्टं = योगं कुर्वन्ति, इतरे इतरस्मिन् कृष्णपक्षे एव कुर्वन्ति ॥१२॥

सान्वयानुवाद—मासः वै = महीना ही, प्रजापतिः = प्रजापति है। तस्य = उसका, कृष्णपक्षः एव = कृष्णपक्ष ही, रयिः = अन्न है। शुक्लः प्राणः = शुक्लपक्ष प्राण है। तस्मात् = इसलिये, एते ऋषयः = ये मन्त्रों का दर्शन करने वाले ऋषिगण, शुक्ले = शुक्लपक्ष में, इष्टं कुर्वन्ति = अग्निहोत्रादि स्वभावज कर्म करते हैं। इतरे इतरस्मिन् = कृष्णपक्ष में भी करते हैं।

व्याख्या—संवत्सराख्य कालरूप प्रजापति का रयि तथा प्राणस्वरूप से विभाग प्रदर्शन करके प्रजापतिरूप मास का विभाग करते हैं—मासस्वरूप प्रजापति का एक भाग कृष्णपक्ष (पन्द्रह दिन) रयि = अन्न चन्द्रमा हैं, दूसरा भाग शुक्लपक्ष (पन्द्रह दिन) प्राण हैं, क्योंकि शुक्लपक्ष प्राणरूप से उत्कृष्ट है। इसलिये भक्तलोग दोनों ही पक्षों में अग्निहोत्र कर्म, तपस्या, ब्रह्मविचार, प्राणियों पर दया, अतिथि-सेवा तथा वैश्वदेव—ये सब इष्ट कर्म करते हैं ॥१२॥

अहोरात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यन्ते ॥१३॥

तत्त्वप्रकाशिका—अहोरात्रो वै प्रजापतिस्तस्याहोरात्रात्मकस्य प्रजापतेरह एव प्राणः रात्रिरेव रयिः। ये दिवा = अहनि, रत्या = रतिकरणभूतया सह स्त्रिया, संयु-ज्यन्ते = मैथुनमाचरन्ति, ते एते प्राणमहरात्मानं प्रस्कन्दन्ति = निर्गमयन्ति शोषयन्ति वा। यद्रात्रौ संयुज्यन्ते रत्या ऋतौ ब्रह्मचर्यमेव तदिति प्रशस्तमेतत् ऋतौ स्वभार्यागमन-मित्यर्थः ॥१३॥

सान्वयानुवाद—वै = निश्चय ही, अहोरात्रः = दिन-रात, प्रजापतिः = प्रजापति है, तस्य = उसका, अहः एव प्राणः = दिन ही प्राण है, रात्रिः एव रयिः = रात ही रयि है, ये दिवा = जो दिन में, रत्या संयुज्यन्ते = रमण-स्वरूपा स्त्री से संयुक्त होते हैं, एते वै प्राणं प्रस्कन्दन्ति = वे निश्चय ही अपने प्राण को सुखाते हैं, यद् रात्रौ = जो रात में, रत्या संयुज्यन्ते = रतिरूपा स्त्री से संयुक्त होते हैं, तद् ब्रह्मचर्यम् एव = वह ब्रह्मचारी ही है ॥१३॥

व्याख्या—इस मन्त्र में दिन और रात को मिलाकर चौबीस घंटे के कालरूप में परब्रह्म श्रीकृष्ण के स्वरूप की कल्पना करते हैं—दिन और रात ये प्रजाओं के पालक हैं। उस अहोरात्रस्वरूप प्रजापति श्रीकृष्ण का दिन ही प्राण है और रात्रि रयि (भोग्य) है। अतः जो मनुष्य दिन में रमण-साधनरूप स्त्री के साथ मैथुन–स्त्रीसङ्ग करते हैं वे निश्चय ही अपने को अधोगति में डाल देते हैं। जो मनुष्य शास्त्रविधानानुसार ऋतुकाल में रात्रि के समय नियमानुकूल मैथुन—निज-भार्या के साथ प्रसङ्ग करते हैं वह उनका ब्रह्मचर्य ही है ॥१३॥

अन्नं वै प्रजापतिस्ततो ह वै तद्रेतस्तस्मादिमाः प्रजाः प्रजायन्त इति ॥१४॥

तत्त्वप्रकाशिका—ननु प्रकृतिपुरुषकालात्मकस्य परब्रह्मणः कथं जगदुत्पादन-कारणत्वमन्नपरिणामभूतस्य रेतस एव प्रजोत्पादकत्वदर्शनादित्याशङ्कायामाह—अन्नावस्थं तदुत्पन्नरेतोऽवस्थञ्च प्रजापतिशब्दवाच्यं ब्रह्मैवातः प्रकृतिपुरुषसंवत्सरमासकालान्नात्मकाद् ब्रह्मणः सर्वाः प्रजायन्ते इति मीमांसितम् ॥१४॥

व्याख्या—सकल प्राणी अन्न से उत्पन्न होते हैं, अन्न की उत्पत्ति वृष्टि से होती है, वृष्टि यज्ञ से होती है (गी.३ ।१४)। अग्नि में विधिपूर्वक दी हुई आहुति सूर्य में स्थित होती है। सूर्य से वृष्टि होती है, वृष्टि से अन्न होता है और अन्न से प्रजा उत्पन्न होती है (मनुः ३।७६)। यही इस मन्त्र का भावार्थ है।

संसारासक्तजननिन्दापूर्वकं विरक्तं मुमुक्षं स्तौति—

तद्ये ह वै तत्प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते। तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम् ॥१५॥

तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति ॥१६॥

॥ इति प्रश्नोपनिषदि प्रथमः प्रश्नः ॥

तत्त्वप्रकाशिका—तत् तस्माद् येऽन्नं वै प्रजापतिरिति प्रजापतिशब्दप्रतिपाद्य-स्यान्नस्य व्रतं = भक्षणमनुतिष्ठन्ति ते ब्रह्मचर्यहीना एव मिथुनमुत्पादयन्ते तेषामेष लोकः पुत्रपश्वन्नादिलक्षणः लोकः। येषां कायशोषणाख्यं तपो न भक्षणशीलता मैथुनवर्जनं येषु सत्यवचनं प्रतिष्ठितं येषु जिह्मं कौटिल्यमनृतमसत्यवचनं माया विप्रलिप्सा इत्यादयो दोषा न सन्ति तेषामिति सम्बन्धः। विरजो निर्दोषो ब्रह्मैव लोकः। तथैव भगवता बादरायणेन सर्वाख्यानाधिकरणे विवृतत्वादिति द्रष्टव्यम्। इतिशब्दः प्रतिवचनसमाप्ति-द्योतकः ॥१५-१६॥

इति प्रश्नोपनिषत्तत्वप्रकाशिकाटीकायां प्रथमः प्रश्नः ॥१॥

सान्वयानुवाद—तत् = इसलिये, ये ह वै = जो कोई भी गृहस्थ मनुष्य, तत् प्रजापतिव्रतम् = उस प्रजापति व्रत का, चरन्ति = अनुष्ठान करते हैं, ते = वे,

मैथुनम् = जोड़े को, उत्पादयन्ते = उत्पन्न करते हैं, येषां तपः = जिनमें तप, ब्रह्मचर्यम् = और ब्रह्मचर्य है, येषां सत्यम् = जिनमें आत्म-परमात्म सम्बन्धी विचार हैं, तेषाम् एव = उन्हीं को, एषः ब्रह्मलोकः = यह ब्रह्मलोक मिलता है, येषु न = जिनमें न तो, जिह्मम् = कपटता, अनृतम् = और झूठ है, च = और, न माया = न दम्भ ही है, तेषाम् = उन्हीं को, असौ विरजः ब्रह्मलोकः इति = निर्दोष दिव्य ब्रह्मलोक मिलता है ॥१५-१६॥

व्याख्या—अब पहले बतलाये हुये दो तरह के उपासकों को मिलने वाले भिन्न-भिन्न फल का वर्णन करते हैं—जो लोग प्रजापति शब्दप्रतिपाद्य अन्न का व्रतानुष्ठान करते हैं वे ब्रह्मचर्य से हीन जोड़े को उत्पन्न करते हैं अर्थात् पुत्र-पुत्रीरूप जोड़े को पैदा करते हैं और उन्हीं को यह पुत्र, पशु आदि लक्षण युक्त लोक मिलता है। जिनमें ब्रह्मचर्य, तपस्या और आत्म परमात्म-विचार है उन्हीं को वह परम वैष्णव पद मिलता है॥ जिनमें दम्भ नहीं है और जो किसी से कपटता नहीं करते तथा 'एक ही परमात्मा अव्यय ईश्वर भगवान् श्रीहरि प्रत्यगात्मरूप से और दृश्य-रूप से कृत्स्न भूत में हैं' इस प्रकार की जिनकी भावना है उन्हीं को वह परम वैष्णव पद मिलता है।

॥ प्रथम प्रश्न समाप्त ॥१॥

•

अथ द्वितीयः प्रश्नः

अथ हैनं भार्गवो वैदर्भिः पप्रच्छ। भगवन् कत्येव देवाः प्रजां विधारयन्ते ? कतर एतत् प्रकाशयन्ते ? कः पुनरेषां वरिष्ठ इति ॥१॥

तत्त्वप्रकाशिका—देहेन्द्रियमनःप्राणादिभ्यो व्यतिरिक्तः प्रत्यगात्मा इति प्रतिपादनाय प्रश्नानवतारयति—कबन्धिप्रश्नानन्तरम् एनं ह पिप्पलादं महर्षिं भार्गवो वैदर्भिः पप्रच्छ = पृष्टवान्। हे भगवन् ! कतरे = कियत्संख्याका देवाः स्थावरजङ्गमात्मिकां प्रजां विधारयन्ते = विशेषेण धारयन्ते। एतेषु कतरे देवा एतच्छरीरं तत्कार्यं प्रकाशयन्ते. कोऽसौ पुनरेषां वरिष्ठः = प्रधानः ॥१॥

सान्वयानुवाद—अथ हैनम् = कबन्धि प्रश्ना के बाद इन प्रसिद्ध महर्षि पिप्पलाद से, वैदर्भिः भार्गवः = विदर्भदेशीय भार्गव ने, पप्रच्छ = पूछा, भगवन् ! = हे भगवन्, कति देवाः एव = कितने ही देव, प्रजां विधारयन्ते = प्रजा को विशेष रूप से धारण करते हैं, कतरे एतत् = उनमें से कौन-कौन इसे, प्रकाशयन्ते = प्रकाशित करते हैं, पुनः = फिर, एषाम् = इन सबमें, कः = कौन, वरिष्ठः = सर्वश्रेष्ठ है, इति = यही मेरा प्रश्न है।

व्याख्या—कबन्धि के प्रश्नानन्तर इस मन्त्र में भार्गव जी ने महर्षि पिप्पलाद से तीन बातें पूछी हैं—स्थावर एवं जङ्गमात्मिका प्रजा को धारण करने वाले कितने

संख्याक देवता हैं ? इनमें कौन-कौन देवता इस शरीर को-उसके कार्य को प्रकाशित करने वाले हैं ? वह कौन इन सबमें वरिष्ठ-प्रधान है ?॥१॥

तस्मै स होवाचाऽऽकाशो ह वा एष देवो वायुरग्निराप: पृथिवी वाङ्मनश्चक्षुः श्रोत्रं च। ते प्रकाश्याभिवदन्ति वयमेतद्बाणमवष्टभ्य विधारयामः ॥२॥

तत्त्वप्रकाशिका—एवं पृष्टवते तस्मै स होवाच। ह वा इति प्रसिद्ध्यतिशये। एष प्रसिद्ध आकाश:। देवो गमनशील: प्रसिद्धो वायुरग्निराप: पृथिवी पञ्चमहाभूतानि शरीरारम्भकाणि। वाक्पदोपलक्षितानि कर्मेन्द्रियाणि चक्षु:श्रोत्रपदेन ज्ञानेन्द्रियाणि। ते आकाशादयो देवा: सर्वे मिलिता आत्मनो माहात्म्यं प्रकाश्याभिवदन्ति स्म। किमिति। वयं बाणवत् सञ्चारशीलमेतत्पुरोवर्ति शरीरमवष्टभ्यावलम्ब्य विस्पष्टं धारयाम इत्यर्थ: ॥२॥

सान्वयानुवाद—स: ह = उन प्रसिद्ध महर्षि ने, तस्मै उवाच = उनसे कहा, आकाश: ह वा एष: देव: = निश्चय ही यह प्रसिद्ध आकाश देवता है, वायु: = वायु, अग्नि: = अग्नि, आप: = जल, पृथिवी, वाक् = वाणी, चक्षु: च श्रोत्रम् मन: = नेत्र, श्रोत्र तथा मन, ते प्रकाश्य = वे प्रकाश कर, अभिवदन्ति = अभिवादन करते हैं, वयम् एतत् बाणम् = हमने इस शरीर को, अवष्टभ्य = अवलम्बन कर, विधारयाम: = धारण किया है।

व्याख्या—इस प्रकार पूछनेवाले भार्गव जी को महर्षि पिप्पलाद ने कहा—आकाश, वायु, अग्नि, जल और पृथिवी इन्हीं पञ्चमहाभूतों से प्राणियों के ये स्थूल शरीर बनते हैं। यह पाञ्चभौतिक शरीर काल, कर्म और गुणों के आधीन है। साँप के मुँह में पड़े हुए पुरुष के समान यह पराधीन शरीर दूसरों की रक्षा ही क्या कर सकता है ? (श्रीमद्भा.१।१३।४५) इसलिये गमनशील आकाशरूप सर्वव्यापक परमात्मा ही सबके धारक हैं। वाक् शब्द से उपलक्षित पञ्च कर्मेन्द्रियाँ, नेत्र और श्रोत्र (कान) पद से पञ्च ज्ञानेन्द्रियाँ और मन—ये सब अपने माहात्म्य प्रकाशित करके अभिवादन किये रहते हैं। ये इस शरीर को प्रकाशित करके आपस में कहने लगे कि हमने शरीर का अवलम्बन कर लिया है ॥२॥

तान् वरिष्ठः प्राण उवाच। मा मोहमापद्यथाऽहमेवैतत्पञ्चधात्मानं प्रविभज्यैतद् बाणमवष्टभ्य विधारयामीति। तेऽश्रद्दधाना बभूवुः ॥३॥

तत्त्वप्रकाशिका—तानेवमभिमानवतो वरिष्ठो मुख्य: प्राण उवाच = उक्तवान् मामैवं मोहमापद्यथाविवेकितयाभिमानं मा कुरुत यस्मादहमेवैतद्बाणं पुरोवर्ति शरीरमवष्टभ्याहमेव स्वात्मानं पञ्चधा विभज्य धारयामि इत्युक्तवति च तस्मिंस्तेऽश्रद्दधाना अप्रत्ययवन्तो बभूवु: कथमेतदिति ॥३॥

सान्वयानुवाद—तान् = उनसे, वरिष्ठ: प्राण: = मुख्य प्राण, उवाच = बोला, मोहम् = मोह में, मा आपद्यथ = न पड़ो, अहम् एव = मैं ही, एतत् आत्मानम् =

अपने इस आत्मा को, पञ्चधा विभज्य = पाँच भागों में विभक्त करके, एतद् बाणम् = इस पुरोवर्त्ति शरीर को, अवष्टभ्य = अवलम्बन कर, विधारयामि = धारण करता हूँ, इति ते = यह सुनकर वे, अश्रद्दधाना: बभूवुः = अविश्वासी बने रहे ।।३।।

व्याख्या—इस प्रकार जब सम्पूर्ण पञ्च महाभूत, समस्त इन्द्रियाँ और अन्तःकरणरूप देवता परस्पर विवाद करने लगें, तब इन अभिमान वालों से मुख्य प्राण ने कहा—तुमलोग इस प्रकार विवेकहीन–अज्ञानवश आपस में अभिमान मत करो, तुममें से किसी में भी इस शरीर को धारण करने या सुरक्षित रखने की शक्ति (ताकत) नहीं है। इसे मैंने ही अपने को पञ्चधा (प्राण, अपान, समान, व्यान और उदानरूप पाँच भागों में) बाँटकर शरीर का अवलम्बन कर धारण कर रखा है। मुख्य प्राण के इस प्रकार कहने पर उन देवताओं ने उस पर विश्वास नहीं किया ।।३।।

सोऽभिमानादूर्ध्वमुत्क्रमत इव तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रामन्ते तस्मिंश्च प्रतिष्ठमाने सर्व एव प्रातिष्ठते। तद्यथा मक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रामन्ते तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रातिष्ठन्त एवं वाङ्मनश्चक्षुः श्रोत्रं च ते प्रीताः प्राणं स्तुन्वन्ति ।।४।।

तत्त्वप्रकाशिका—स मुख्यप्राणस्तेषां प्रत्यायनायाभिमन्यत इत्यभिमानो देहस्त-स्मादूर्ध्वमुत्क्रमत इव किञ्चिदूर्ध्वमुदक्रामत्। अथ तस्मिन् प्राण उत्क्रामति सतीतरे सर्वे देवाः शरीरधारणादौ स्वस्थितौ चासमर्था उत्क्रामन्ते उदक्रामन्। अस्य यादृच्छकत्व-परिहाराय पुनस्तस्मिन् प्राणे प्रतिष्ठमाने शरीर एव विप्रतिष्ठति सर्व एव देवाः शरीरे विप्रतिष्ठन्ते प्रतिष्ठिताः। तत्र निदर्शनम्। तत् तत्र लोके यथा मधुमक्षिका मधुकराः मधुकरराजानं प्रधानमधुमक्षिकां मधुस्थानादुत्क्रमन्तीम् उत्क्रामन्ते तस्याञ्च प्रतिष्ठितायां स्वयं सर्वा एव विप्रतिष्ठन्ति एवं वागादयो देवा इति। इत्थमन्वयव्यतिरेकाभ्यां प्राणस्य वरिष्ठत्वेऽवधारिते प्रीतास्ते देवास्त्वमेव सर्वदेवादिषु स्थित्वा तन्नामा तद्गुणक्रियादि-प्रवर्तक इति प्राणं स्तुन्वन्ति = अस्तुवन्। तदुच्यते ।।४।।

सान्वयानुवाद—सः = वह मुख्य प्राण, अभिमानात् = अभिमान से, ऊर्ध्वम् उत्क्रमते = मानो उस देह से ऊपर की ओर बाहर निकलने लगा, तस्मिन् उत्क्रामति = उस प्राण के बाहर निकलने पर, अथ इतरे सर्वे एव = उस प्राण के साथ-ही-साथ अन्य सब, उत्क्रामन्ते = शरीर से बाहर निकलने लगे, च = और, तस्मिन् प्रतिष्ठमाने = उस प्राण के ठहर जाने पर, सर्वे एव विप्रतिष्ठन्ते = सब देवता ही ठहर गये। तद्यथा = जैसे, मधुकरराजानम् = मधुमक्खियों के राजा के, उत्क्रामन्तम् = निकलने पर, सर्वाः एव = सारी ही, मक्षिकाः उत्क्रामन्ते = मधुमक्खियाँ बाहर निकल जाती हैं, च = और, तस्मिन् = उसके, प्रतिष्ठमाने = बैठ जाने पर, सर्वाः एव = सब-की-सब, विप्रतिष्ठन्ति = बैठ जाती हैं, एवम् = इस प्रकार, वाक् चक्षुः श्रोत्रम् मनः च = वाणी, नेत्र, श्रोत्र (कान) और मन, ते = वे, प्रीताः प्राणं स्तुन्वन्ति = प्रसन्न होकर प्राण का स्तवन करने लगे ।।४।।

व्याख्या—वह मुख्य प्राण इस शरीर से थोड़ा ऊपर की ओर उठने लगा। फिर तो उसके ऊपर उठने पर सब-के-सब देवता लाचार होकर उसी के साथ बाहर निकलने लगें। कोई भी शरीरधारणादि में स्थिर नहीं रह सकें। उस प्राण के स्थिर हो जाने पर समस्त देवता ही शरीर में स्थित हो गये। जैसे लोक में मधुमक्खियों के राजा जब अपने स्थान से उड़ता है, तब उसके साथ ही वहाँ बैठी हुई अन्य सब मधुमक्खियाँ भी उड़ जाती हैं और जब वह बैठ जाता है तब अन्य सब भी बैठ जाती हैं, इस प्रकार की दशा इन सब वागादि देवताओं की भी हुई। इस प्रकार अन्वयव्यतिरेक द्वारा प्राण का ही श्रेष्ठत्व अवधारित किये जाने पर वे सब देवता बड़े प्रसन्न हुए। आप ही समस्त देवताओं में स्थिर रहकर उस नाम से उस गुण-क्रिया आदि के प्रवर्तक हैं। वाणी, चक्षु, श्रोत्र इत्यादि और मन आदि अन्तःकरण वे सब प्राण की स्तुति करने लगें ॥४॥

सम्बन्ध—प्राण को ही परब्रह्मस्वरूप श्रीपुरुषोत्तम का स्वरूप मानकर उपासना करने के लिए उसका सर्वात्मरूप से महत्त्व कहा जाता है—

एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्देवः सदसच्चामृतञ्च यत् ॥५॥

तत्त्वप्रकाशिका—एष मुख्यप्राणोऽग्निरूपेण तपति। एष प्राण एव सूर्यः। सर्वेषां प्राणसत्तास्थितिकत्वात्। यदधीना यस्य सत्ता तत्तदेवेति भण्यत इति रीतिमनुसृत्य सामानाधिकरण्यव्यपदेशो द्रष्टव्यः। रयिर्देवश्चन्द्रमा इति यावत्। सदसच्छब्दौ चेतनाचेतनपरौ स्थूलसूक्ष्मपरौ वा। अमृतपदेन भगवद्भावापत्तिरूपा मुक्तिरुच्यते तस्या अपि तदधीनत्वात् ॥५॥

सान्वयानुवाद—एषः अग्निः तपति = यह मुख्य प्राण अग्निरूप से तपता है, एषः सूर्यः = यह प्राण ही सूर्य है, एषः पर्जन्यः = यही मेघ है, (एषः) मघवान् = यही इन्द्र है, एषः वायुः = यही वायु है, एषः देवः = यह प्राण ही देव है, पृथिवी = पृथिवी, रयिः = रयि, यत् = जो, सत् = सत्, च = और, असत् = असत् है, अमृतं च = और अमृत यह प्राण ही है ॥५॥

व्याख्या—वे वाणी आदि समस्त देवता प्राण का स्तवन करते हुए बोले—यह प्राण ही अग्निरूप से तपता है। यही सूर्य है, जो सम्पूर्ण जगत् को प्रकाशता है। यही मेघ है, यही इन्द्र है जो वर्षा करते हैं। यही वायु है और यही देव, पृथिवी और रयि है तथा सत् और असत् अर्थात् स्थूल और सूक्ष्म एवं उससे भी श्रेष्ठ जो अमृतस्वरूप श्रीभगवद्भावापत्तिरूपा मुक्ति है वह भी प्राण है।

अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम्।
ऋचो यजूꣳषि सामानि यज्ञः क्षत्रं ब्रह्म च ॥६॥

तत्त्वप्रकाशिका—अरा चक्रस्य मध्यदेशो नेमिस्तस्य निमेरन्तरालवर्तीनि काष्ठानि। यथा अरा रथनाभौ अर्पिता एवं प्राणे सर्वं प्रतिष्ठितम्। सर्वशब्दार्थं विश-

दयति—ऋच इति। तथर्चो यजूंषि सामानीति त्रिविधा मन्त्रास्तत्साध्यश्च यज्ञः क्षत्रं सर्वस्य पालयितृ ब्रह्म च यज्ञादिकर्तृत्वाधिकृतम्। इदमुपलक्षणम्, तेन सर्वस्य स्थावर-जङ्गमात्मकप्राणिमात्रस्य ग्रहणम् ॥६॥

सान्वयानुवाद—रथनाभौ = रथ के पहिये की नाभि में लगे हुए, अरा इव = अरों की भाँति, ऋचः = ऋग्वेद की ऋचाएँ, यजूंषि = यजुर्वेद के मन्त्र, सामानि = सामवेद के गानविशेष मन्त्र, यज्ञः = यज्ञ, ब्रह्म = ब्राह्मण, क्षत्रं च = और क्षत्रिय, सर्वं प्राणे प्रतिष्ठितम् = सब प्राण में प्रतिष्ठित है ॥६॥

व्याख्या—जिस प्रकार रथ के मध्य देश की नाभि में लगे हुए अरे रथ के नाभि में समाश्रित रहते हैं उसी प्रकार ऋग्वेद की सकल ऋचाएँ, यजुर्वेद के समस्त मन्त्र, गान-विशेष सामवेद इन वेदत्रय द्वारा त्रिविध मन्त्र और उसके साध्य यज्ञादि शुभकर्म, यज्ञादि शुभकर्म करने वाले ब्राह्मण, सबका पालन करने वाले क्षत्रिय आदि अधिकारिगण तथा सम्पूर्ण स्थावर-जङ्गम स्वरूप प्राणिमात्र प्राण के आधार पर ही टिके हुए हैं। सब का आश्रय एकमात्र प्राण ही है ॥६॥

प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे। तुभ्यं प्राण प्रजास्त्विमा बलिं हरन्ति यः प्राणैः प्रतितिष्ठसि ॥७॥

तत्त्वप्रकाशिका—परोक्षतया स्तुतः प्राणोऽपरोक्षतया स्तूयते—यः प्रजापतिः प्रजानां रक्षकः स त्वमेव। गर्भे प्राणादिरूपेण चरसि पश्चात्पितुः मातुश्च सदृशः सन् प्रतिजायसे। हे प्राणेमा देवाद्याः प्रजास्तुभ्यं त्वदीयाः यद्यस्मात् त्वं प्राणैः = चक्षुरादिभिः सह धारणादिकं कुर्वञ्छरीरे प्रतितिष्ठसि तस्माद् बलिमन्नादिकमुपहरन्ति ॥७॥

सान्वयानुवाद—प्राण = हे प्राण! त्वम् एव = तुम ही, प्रजापतिः = प्रजापति, (असि = हो), (त्वम् एव = तुम ही), गर्भे चरसि = गर्भ में विचरते हो, तु = निश्चय ही, इमाः प्रजाः = ये सब प्रजा, तुभ्यम् = तुम्हारे लिए, बलिं हरन्ति = अन्नादि उपहार (भेंट) करते हैं, यः = जो, प्राणैः = चक्षुरादि इन्द्रियों के साथ, प्रतितिष्ठसि = सब के शरीर में स्थित हो रहा है ॥७॥

व्याख्या—हे प्राण! जो प्रजाओं का रक्षक है वह तुम ही हो, गर्भ में प्राणादिरूप से विचरते हो, बाद में पिता-माता के सदृश होकर शरीर धारण करते हो। ये सारी प्रजा तुम्हारे लिये ही चक्षुरादि इन्द्रियों के साथ धारणादिक करते हुए शरीर में स्थित अन्नादि का उपहार करती हैं ॥७॥

देवानामसि वह्नितमः पितॄणां प्रथमा स्वधा।
ऋषीणां चरितं सत्यमथर्वाङ्गिरसामपि ॥८॥

तत्त्वप्रकाशिका—देवानाम् = इन्द्रियादीनाम्, वह्नितमः = यज्ञभागवाहकतमोऽसि, पितॄणां प्रथमा स्वधा = पितृभ्यो देयमन्नं तस्या अपि वाहकस्त्वमेवासि। त्वमेवाथर्वाङ्गिरसामृषीणां चरितमाचारः सत्यवचनञ्चासि ॥८॥

व्याख्या—इन्द्रियादि देवताओं के लिए यज्ञ के हिस्सों को पहुँचाने वाले अनुत्तम अग्नि तुम्हीं हो और तुम पितरों के लिये पहली स्वधा हो अर्थात् पितरों के लिये देय अन्न का भी वाहक तुम ही हो। अथर्वा एवं अङ्गिरा आदि ऋषियों के द्वारा आचरित सत्य वचन भी तुम ही हो ॥८॥

इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता।
त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः ॥९॥

तत्त्वप्रकाशिका—इन्द्रः परमेश्वरस्त्वं हे प्राण! तेजसा सर्वसंहारलक्षणेन त्वं रुद्रः। स्थितौ च परिसमन्ताद्रक्षिता परिपालयिता त्वमेव जगतः। त्वमन्तरिक्षेऽजस्रं चरसि उदयास्तमयाभ्यां सूर्यस्त्वमेव च सर्वेषां ज्योतिषां पतिः ॥९॥

व्याख्या—हे प्राण! तुम इन्द्र अर्थात् परमेश्वर हो, सब के संहारलक्षण (स्वरूप) तुम रुद्र हो, जगत् का परिपालन करने वाले तुम ही हो। तुम ही अन्तरिक्ष में निरन्तर विचरते हो, तुम ही उदय एवं अस्त स्वरूप सूर्य हो और समस्त ज्योतिर्गणों के पति (स्वामी) हो ॥९॥

यदा त्वमभिवर्षस्यथेमाः प्राण ते प्रजाः।
आनन्दरूपास्तिष्ठन्ति कामायान्नं भविष्यतीति ॥१०॥

तत्त्वप्रकाशिका—हे प्राण! यदा त्वं पर्जन्यरूपोऽभिवर्षसि, अथ = तदा ते त्वदीया इमा मानुषादिप्रजाः, कामाय यथेष्टमन्नं भविष्यतीति निश्चित्यानन्दरूपा आनन्दवत्यस्तिष्ठन्ति ॥१०॥

व्याख्या—हे प्राण! जब तुम मेघरूप होकर पृथिवीलोक में सब ओर वर्षा करते हो तब तुम्हारी ये मनुष्यादि प्रजा 'हम लोगों की जीविका के लिये यथेष्ट अन्न उत्पन्न होगा' ऐसा निश्चय करके आनन्दरूप हो जाती है ॥१०॥

व्रात्यस्त्वं प्राणैकर्षिरत्ता विश्वस्य सत्पतिः।
वयमाद्यस्य दातारः पिता त्वं मातरिश्वनः ॥११॥

तत्त्वप्रकाशिका—हे प्राण! त्वं व्रात्यः = संस्काररहितः, ब्रह्मणेऽपि एकः = मुख्यः, मन्त्रद्रष्टर्षिरसि विश्वस्यात्ता = संहर्त्ता च, त्वमेव सतां = साधूनां, पतिः = रक्षकोऽसि त्वमेव। वयं तवाद्यस्य = भोग्यस्य दातारस्त्वत्पूजकाः। कुतः ? हे मातरिश्व = मातरिश्वन्! त्वं नोऽस्माकं पिताऽसि मातरिश्वन इत्यत्र नकारद्विश्रवणं छान्दसत्वाद् द्रष्टव्यम् ॥११॥

व्याख्या—हे प्राण! तुम संस्काररहित हो, ब्रह्मा के भी एक मुख्य मन्त्रद्रष्टा ऋषि हो और विश्व का भक्षक = संहार करने वाले तुम ही हो। हम लोग तुम्हारे लिए भोजन-सामग्री देने वाले तुम्हारे पुजारी है। क्योंकि तुम ही साधुओं की रक्षा करने वाले एवं हमारे पिता हो।

या ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे य च चक्षुषि।

या च मनसि सन्तता शिवां तां कुरु मोत्क्रमीः ॥१२॥

तत्त्वप्रकाशिका—एवं स्तुत्वा प्रकृतमुच्यते—या त इति। या ते त्वदीया तनूः मूर्त्तिर्वाचि प्रतिष्ठिता। या श्रोत्रे या च चक्षुषि या च मनसि सन्तता सम्यग्व्याप्य वर्त्तमाना एवमन्येष्वपि तत्त्वेषु या प्रतिष्ठिता तां शिवां = शान्तां कुरु। मोत्क्रमीः = वागादिभ्यः तथोत्क्रमणं मा कार्षीः ॥१२॥

सान्वयानुवाद—या ते तनूः = जो तेरी मूर्त्ति, वाचि = वाणी में, प्रतिष्ठिता = स्थित है, या श्रोत्रे = जो श्रोत्र (कानों) में, या चक्षुषि = जो चक्षु (आँखों) में, या मनसि = जो मन में, सन्तता = व्याप्त है, ताम् = उसको, शिवाम् = कल्याणमय, कुरु = बना ले, मा उत्क्रमीः = उत्क्रमण न कर ॥१२॥

व्याख्या—हे प्राण ! जो तेरी मूर्त्ति वाणी, श्रोत्र, चक्षुरादि समस्त इन्द्रियों में और मन में सम्यक् व्याप्त होकर वर्तमान एवं अन्य तत्त्वों में स्थित है उसको शान्तमय कर ले। वागादि से उठकर बाहर न जा ॥१२॥

प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम्।
मातेव पुत्रान् रक्षस्व श्रीश्च प्रज्ञां च विधेहि न इति ॥१३॥

इत्यथर्ववेदीयप्रश्नोपनिषदि द्वितीयः प्रश्नः ॥२॥

तत्त्वप्रकाशिका—वागादिषु प्राणस्य प्रतिष्ठितत्वं कुतः ? यत एतत्सर्वं वागादिकं प्राणस्य तव वशे वर्त्तते। न त्वां विना प्रवर्तितुं क्षमम्। न केवलमध्यात्मं त्वदधीनं किन्तु त्रिदिवे = स्वर्गे यत्प्रतिष्ठितम्। दैवादिकञ्चेति यावत्, तदपि प्राणाधीनम्। वागादिषु स्थित्वा च त्वमस्मान् पुत्रानिव रक्षस्व = पालय, श्रीः = श्रियं, प्रज्ञां = प्रज्ञानं प्रकाशकत्वं शक्तिश्च, नोऽस्माकं विधेहि = कुर्विति स्तुवन्तीति सम्बन्धः ॥१३॥

इति प्रश्नोपनिषत्तत्त्वप्रकाशिकाटीकायां द्वितीयः प्रश्नः ॥२॥

सान्वयानुवाद—इदं = यह दृश्यमान नामरूपात्मक जगत्, यत् त्रिदिवे = जो स्वर्गलोक में, प्रतिष्ठितम् = स्थित है, सर्वम् = वह सब, प्राणस्य = प्राण के, वशे = अधीन (वर्त्तते) है। माता पुत्रान् इव = जैसे माँ अपने पुत्रों की रक्षा करती है, रक्षस्व = वैसे तू हमारी रक्षा कर, च = और, नः श्रीः = हमें कान्ति, प्रज्ञाम् = प्रज्ञान और शक्ति, विधेहि इति = प्रदान कर ॥१३॥

व्याख्या—वागादि देवता प्राण के ही अधीन हैं, प्राण के बिना वे सक्रिय-सचेष्ट नहीं हो सकते, केवल यह प्राणाधीनत्व वागादि देवताओं के ही नहीं स्वर्ग में स्थित देवगण भी प्राण के अधीन हैं। अन्त में प्रार्थना करते हैं—हे प्राण ! जिस प्रकार माता अपने पुत्रों की रक्षा करती है, उसी प्रकार तू हमारी रक्षा कर एवं हम लोगों को प्रज्ञा और शक्ति प्रदान कर ॥१३॥

द्वितीय प्रश्न समाप्त ॥२॥

•

अथ तृतीय: प्रश्न: ।।३।।

अथ हैनं कौसल्यश्चाश्वलायन: पप्रच्छ। भगवन्कुत एष प्राणो जायते कथमायात्यस्मिञ्छरीर आत्मानं वा प्रविभज्य कथं प्रातिष्ठते केनोत्क्रमते कथं बाह्यमभिधत्ते कथमध्यात्ममिति ।।१।।

तत्त्वप्रकाशिका—अथ हैनं कौसल्यश्चाश्वलायन: पप्रच्छ। भगवन्! कुत: कस्मात्पुरुषादेष उक्तलक्षण: प्राणो जायते? कथं कस्मात्कारणादस्मिन् शरीरे प्राण आयाति प्रवर्त्तते? आत्मानं प्रविभज्य च कथं प्रातिष्ठते प्रतितिष्ठति? के ते विभागास्तैश्च किङ्कुर्वन् कुत्र स्थानविशेषे तिष्ठतीति यावत्। तस्मिन्नुत्क्रान्ते सर्वेऽप्युत्क्रान्ता इत्युक्तम्। तत्र केन प्रविभागेन जीवादीनादायोत्क्रामति प्राणस्य वशे सर्वं यत्त्रिदिवे प्रतिष्ठितमित्युक्तं तत्र केन प्रकारेण बाह्यमधिभूतादिकम् अभिधत्ते धारयति। कथञ्चाध्यात्ममभिधत्ते ।।१।।

सान्वयानुवाद—अथ ह एनम् = इसके बाद इन महर्षि से, कौसल्य: आश्वलायन: च पप्रच्छ = कोसलदेशीय आश्वलायन ने पूछा, भगवन्! एष: प्राण: = हे भगवन्! यह प्राण, कुत: जायते = किससे उत्पन्न होता है? अस्मिन् शरीरे = इस शरीर में, कथम् आयाति = कैसे आता है? वा आत्मानम् = तथा अपने को, प्रविभज्य = विभाजित करके, कथं प्रतितिष्ठते = किस प्रकार स्थित होता है? केन उत्क्रमते = किस ढंग से उत्क्रमण करता है? कथं बाह्यम् अभिधत्ते = किस प्रकार बाह्य अधिभूतादिक को भलीभाँति धारण करता है? कथम् अध्यात्मम् इति = किस प्रकार अध्यात्म को भलीभाँति धारण करता है? ।।१।।

व्याख्या—इस मन्त्र में आश्वलायन मुनि ने महर्षि पिप्पलाद से कुल छ: बातें पूछी हैं—(१) किस पुरुष से यह बताया गया लक्षण प्राण उत्पन्न होता है? (२) किस कारण से इस शरीर में प्राण आता है? (३) अपने को विभाजित करके किस प्रकार शरीर में स्थित रहता है? (४) किस विभाग से जीवादि को लेकर निकलता है? (५) किस प्रकार बाह्य अधिभूतादिक को धारण करता है? (६) तथा मन-इन्द्रियादि अध्यात्म = आध्यात्मिक जगत् को किस प्रकार धारण करता है? ।।१।।

तस्मै स होवाचातिप्रश्नान्पृच्छसि ब्रह्मिष्ठोऽसीति तस्मात्तेऽहं ब्रवीमि ।।२।।

तत्त्वप्रकाशिका—इत्येवं पृष्टवते तस्मै स होवाच। यस्मादेव त्वमतिप्रश्नान् प्रश्नयोग्यान् अर्हसि अर्थान् पृच्छसि तस्मात्त्वं ब्रह्मिष्ठो = वेदविचारवानसि, नह्यन्यथैवंविधा: प्रश्ना: सम्भवन्ति। यस्मात्त्वं ब्रह्मिष्ठोऽसि तस्मात्तेऽहं = तत्तुभ्यमुत्तरं ब्रवीमि ।।२।।

सान्वयानुवाद—तस्मै स ह उवाच = उन महर्षि ने उनसे स्पष्ट कहा- अतिप्रश्नान् पृच्छसि = तुम प्रश्नों के योग्य अर्थों को पूछ रहे हो, ब्रह्मिष्ठ: असि

इति = वेदों के विचारवान् हो, तस्मात् = इसलिये, अहम् = मैं, ते = तुमसे, ब्रवीमि = कहता हूँ ॥२॥

व्याख्या—इस प्रकार पूछनेवाले आश्वलायन मुनि से महर्षि पिप्पलाद ने कहा—तुम प्रश्नों के योग्य अर्थों को पूछ रहे हो, इसलिए तुम वेदों के विचारवान् हो। अन्यथा इस प्रकार प्रश्न सम्भव नहीं हो सकते, क्योंकि तुम ब्रह्मिष्ठ हो। अत: मैं तेरे उन प्रश्नों का उत्तर देता हूँ ॥२॥

आत्मन एष प्राणो जायते। यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनोऽधिकृतेनायात्यस्मिञ्छरीरे ॥३॥

तत्त्वप्रकाशिका—इत्येवं प्रशस्याद्यप्रश्नोत्तरमुच्यते—एष एवं माहात्म्योऽपि प्राण: आत्मन: = परमात्मन: सकाशाज्जायते। 'एतस्माज्जायते प्राणो मन: सर्वेन्द्रियाणि च' इति श्रुतेरपि द्रष्टव्यम्। कस्मात् कारणादस्मिञ्छरीरे प्राण आयाति इति प्रश्नस्योत्तरमाह—यथैषेति। यथैषा छाया पुरुषे आतता अत्यन्तं शरीराधीना वर्त्तते एवमेवैतस्मिन् पुरुषे = जीवे एतन्मनोऽधिकृतेनायत्नमन्तरेणाततमविनाभावेन संश्रितमेवं प्राणेऽप्यकृतेनायत्नेनास्मिञ्छरीर आयाति। मन:प्राणयो: पुरुषच्छायावत्पुरुषाविनाभूतत्वात् पुरुषेण सहैव सम्बन्धो न प्राणगमने पृथक्कारणमपेक्षितमिति भाव: ॥३॥

सान्वयानुवाद—एष: प्राण: = यह प्राण, आत्मन: = परमात्मा से, जायते = उत्पन्न होता है, यथा = जिस प्रकार, एषा छाया = यह छाया, पुरुषे = पुरुष पर शरीर के अधीन है, (तथा = उसी प्रकार) एतत् = यह (मन), एतस्मिन् = इस (पुरुष) में, आततम् = संश्रित है, अस्मिन् शरीरे = इस शरीर में, मनोकृतेन = मन के किये हुए निश्चय से, आयाति = आता है ॥३॥

व्याख्या—इस प्रकार महर्षि पिप्पलाद प्रशंसा करके पहले प्रश्न का उत्तर देते हैं—यह प्राण परमात्मा से उत्पन्न हुआ है। 'किस कारण से प्राण इस शरीर में आता है' इस प्रश्न का उत्तर देते हुए कहते हैं—जैसे किसी मनुष्य की छाया उसके अधीन रहती है उसी प्रकार इस मन के द्वारा किये हुए सङ्कल्प-विकल्प बिना यत्न से इस शरीर में आते हैं। मन और प्राण का पुरुष के साथ ही सम्बन्ध है, पुरुष की छाया की भाँति पुरुष के बिना अरूपत्व है। प्राण चले जाने पर अलग कारण अपेक्षित नहीं करता ॥३॥

यथा सम्राडेवाधिकृतान्विनियुङ्क्ते। एतान् ग्रामानेतान् ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण: इतरान् प्राणान् पृथक् पृथगेव सन्निधत्ते ॥४॥

तत्त्वप्रकाशिका—आत्मानं प्रविभज्य कथं प्रतिष्ठित इति तृतीयप्रश्नस्योत्तरं निर्वक्ति—यथा लोके सम्राट् सार्वभौमोऽधिकृतानुयोगिनो विनियुङ्क्ते। कथं त्वमेतान् पाटलिपुत्रादीन् ग्रामानधितिष्ठस्व तदाधिपत्येनातिष्ठस्वेत्येकम्। अन्यच्च त्वमेतान् कौशाम्बीप्रभृतीन् ग्रामानधितिष्ठस्वेति। एवमेव मुख्यप्राण इतरान् भिन्नानात्मनो जातत्वा-

दात्मप्रविभागान् प्राणान् वायून् पृथक् पृथगेव स्थानेषु सन्निधत्ते स्थापयति। स्वयञ्च तत्तत्क्रियाप्रवर्तकतया तत्र प्राणादिपञ्चरूपोऽवतिष्ठते। तथा च प्राणादिपञ्चकस्य मुख्य-प्राणनियोज्यत्वेन भिन्नत्वं तदधीनस्थितिप्रवृत्तिकत्वेनाभिन्नत्वमिति सिद्धान्तितमिति भावः ॥४॥

सान्वयानुवाद—यथा = जिस प्रकार, सम्राट् एव = सार्वभौम महाराज स्वयं ही, एतान् ग्रामान् एतान् ग्रामान् अधितिष्ठस्व = इन गाँवों में तुम रहो, इन गाँवों में तुम रहो, इति = इस प्रकार, अधिकृतान् = अधिकारियों को, विनियुङ्क्ते = अलग-अलग नियुक्त करता है, एवम् एव = उसी प्रकार, एषः प्राणः = यह मुख्य प्राण, इतरान् प्राणान् = दूसरे प्राणों को, पृथक् पृथक् एव = अलग-अलग ही, सन्निधत्ते = स्थापित करता है ॥४॥

व्याख्या—जैसे लोक में सार्वभौम महाराज अपने अनुयायी कार्यकर्त्ताओं की नियुक्ति करता है। 'तुम इन पाटलिपुत्रादि ग्रामों में रहो' और दूसरे को 'तुम इन कौशाम्बी प्रभृति ग्रामों में रहो', उसी प्रकार मुख्य प्राण अपने वायुओं को पृथक्-पृथक् स्थानों में ही स्थापित करता है। प्राण, अपान, समान, व्यान और उदान इन पाँचों का मुख्य प्राण नियोज्यरूप से भिन्न है और मुख्य प्राण के अधीन स्थिति-प्रवृत्तिरूप से अभिन्न समझना चाहिये ॥४॥

पायूपस्थेऽपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रातिष्ठते मध्ये तु समानः। एष ह्येतद् भुक्तमन्नं समं नयति तस्मादेताः सप्तार्चिषो भवन्ति ॥५॥

तत्त्वप्रकाशिका—पृथक् पृथगित्युक्तं विव्रियते। पायूपस्थ इत्यादिना पायुश्चोपस्थश्च पायूपस्थम्। तत्र मलादेरपनयनादपानं वायुमात्मनो रूपेणापानेनाधिष्ठितं सन्निधत्त इति सम्बन्धः। चक्षुश्च श्रोत्रञ्च चक्षुःश्रोत्रं, तस्मिन् मुखनासिकाभ्यां सह मुखे नासिकायाञ्चेति यावत्। प्राणः स्वयं मुख्य एव श्वासादिप्रणयनात् प्राणनाम्ना रूपेण प्राणवायुमधिष्ठाय विप्रतिष्ठति। समानस्तु समाननामानं वायुमधिष्ठाय मध्ये प्राणापान-योर्नाभिदेश इति यावत्। प्रतितिष्ठति तदधिष्ठाता। स चैष यस्मादेतद् भुक्तमन्नं समं यथा तथा शरीरावयवं नयति तेन समाननामेति शेषः। किन्तेन तस्मादन्नस्य समीकरणादेताः सप्तार्चिषः सप्तज्ञानेन्द्रियवृत्तयो भवन्ति ॥५॥

सान्वयानुवाद—प्राणः = वह मुख्य प्राण, पायूपस्थे = गुदा और उपस्थ में, अपानम् = अपान को, स्वयम् = स्वयं, मुखनासिकाभ्याम् = मुख और नासिका द्वारा, चक्षुःश्रोत्रे = नेत्र और श्रोत्र में, प्रातिष्ठते = स्थित रहता है, मध्ये तु = बीच में, प्राण और अपान में अर्थात् नाभिदेश में, समानः = समान रहता है, एषः हि = यह वायु ही, एतत् भुक्तम् अन्नम् = इस खाये हुए अन्न को, समं नयति = समस्त शरीर के अवयवों में पहुँचाता है, तस्मात् = उससे, एताः सप्त = ये सात, अर्चिषः = ज्वालाएँ, भवन्ति = उत्पन्न होती हैं ॥५॥

व्याख्या—अब मुख्य प्राण, अपान और समान इन तीनों का पृथक्-पृथक् वासस्थान और कार्य-विवरण बतलाया जाता है—स्वयं प्राण ही मुख और नासिका द्वारा विचरता हुआ नेत्र और श्रोत्र में स्थित रहता है तथा गुदा और उपस्थ में अपान को स्थापित करता है। मलादि को शरीर से (अपनयन) बाहर निकाल देना–यह अपान का कर्म है। मुख्य प्राण ही शरीर के मध्यभाग–नाभिदेश में समान को रखता है। यह समान पेट में डाले हुए अन्न को शरीर के अवयवों में जैसा ले जाना चाहिये वैसे ही (समभाव से) पहुँचाता है। इसलिये इसे समान कहते हैं। उस अन्न के सारभूत रस से ही इस शरीर में समीकरण होने से ये सात ज्वालाएँ = सात ज्ञानेन्द्रियों की वृत्तियाँ उत्पन्न होती हैं। दो कान, दो आँख, दो नाक और एक मुँह (रसना)—ये सात उत्पन्न होते हैं ॥५॥

हृदि ह्येष आत्मा। अत्रैतदेकशतं नाडीनां तासां शतं शतमेकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्त्यासु व्यानश्चरति ॥६॥

तत्त्वप्रकाशिका—एषः = प्रत्यगात्मा, हृदि = हृदये, यत्र समानरूपेण प्राणस्तिष्ठति तत्र स्वयमपि वर्त्तते। अत्र = अस्मिन् हृदये, यदेतदेकशतमेकोत्तरशतं नाडीनां प्रधाननाडीनां भवति। तासां नाडीनां मध्ये एकैकस्यां नाड्यां शतं शतं प्रतिशाखानाड्यो भवन्ति पुनस्तासाञ्च प्रतिशाखानाड्यो भवन्तीति वक्तव्यम्। एवञ्च सम्भूय प्रतिशरीरं तासां प्रतिशाखानाडीनां द्वासप्ततिसहस्राणि जानीयात्। प्रतिशाखानाडीसहस्राणां द्वासप्ततिमिति द्वितीया षष्ठ्यर्थे योजनीया, किञ्चातः। आसु नाडीषु व्यानो व्यानवायुमधिष्ठाय चरति ॥६॥

सान्वयानुवाद—एषः हि आत्मा = यह जीवात्मा, हृदि = हृदय में, यहाँ समानरूप से प्राण रहता है, अत्र = इस हृदय में, एतत् = यह, नाडीनाम् एकशतम् = नाडियों का एक शतक है, तासाम् = उनमें से, एकैकस्याम् = एक-एक नाडी में, शतं शतम् = एक-एक सौ प्रतिशाखा नाडियाँ हैं, द्वासप्ततिः द्वासप्ततिः = बहत्तर-बहत्तर, प्रतिशाखानाडीसहस्राणि = प्रतिशाखानाडियाँ, भवन्ति = होती हैं, आसु = इनमें, व्यानः चरति = व्यानवायु विचरण करता है ॥६॥

व्याख्या—यहाँ समानरूप से प्राण रहता है, वही हृदय में स्वयं जीवात्मा भी है। उसमें एक सौ नाडियाँ हैं, उन नाडियों के बीच में एक-एक नाडी में एक-एक सौ प्रतिशाखानाडियाँ हैं, फिर उनमें से प्रतिशाखानाडियाँ होती हैं अर्थात् प्रत्येक शाखानाडी की बहत्तर-बहत्तर हजार प्रतिशाखानाडियाँ हैं। इस प्रकार कुल मिलाकर प्रतिशरीर में प्रतिशाखानाडियाँ बहत्तर करोड़ नाड़ियाँ हैं। इन सब में व्यानवायु विचरण करता है ॥६॥

अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम् ॥७॥

तत्त्वप्रकाशिका—व्यानस्य प्रवृत्तिं वक्तुमुच्यते—अथोदानस्तूदानवायुमधि-

ष्ठायैकया नाड्या सुषुम्नयोर्ध्वगतिश्चरति। स तत्र चरन् पुण्येन जीवकृतं पुण्यं निमित्तीकृत्य पुण्यं = स्वर्गादिलोकम्। अत एवोर्ध्वनयनादुदानः। पापेन पापं नरकादिकं दुःखबहुलं लोकं नयति। उभाभ्यां समप्रधानाभ्यां पुण्यपापाभ्यां समदुःखसुखं मनुष्यलोकं नयति। एतेन केनोत्क्रामत इति चतुर्थप्रश्नस्योत्तरमुक्तम्भवति ॥७॥

सान्वयानुवाद—अथ एकया = इसके बाद एक नाडी से, उदानः ऊर्ध्वः = उदानवायु ऊपर की ओर विचरता है, पुण्येन = पुण्यकर्मों के द्वारा, पुण्यम् लोकम् = पुण्यलोकों में, नयति = ले जाता है, पापेन = पापकर्मों से, पापम् = पापयोनियों में ले जाता है, उभाभ्याम् एव = पाप और पुण्य दोनों प्रकार के कर्मों द्वारा, मनुष्यलोकम् = मनुष्यलोक में ले जाता है ॥७॥

व्याख्या—'सुषुम्णा' नामक एक नाडी से उदानवायु शरीर में ऊपर की ओर विचरण करता है। यह नाड़ी हृदय से निकलकर ऊपर मस्तक में गयी है। वह वहाँ पर विचरता हुआ जीव द्वारा किये गये पुण्य कर्मों को निमित्त करके स्वर्गादि उच्च लोकों में ले जाता है। इसलिये ऊपर की ओर ले जाने से इसे 'उदान' कहते हैं। पापकर्मों से नरकादि दुःखबहुल लोकों में ले जाता है और जो पाप और पुण्य दोनों समान प्रधान समान दुःख और सुख फल भोगने के लिए उनको मनुष्यलोक में ले जाता है ॥७॥

आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः। पृथिव्यां या देवता सैषा पुरुषस्यापानमवष्टभ्यान्तरा यदाकाशः स समानो वायुर्व्यानः ॥८॥

तत्त्वप्रकाशिका—कथं बाह्यमित्यादिप्रश्नद्वयं परिह्रियते—चक्षुषि भवं चाक्षुषं प्राणं प्रकाशेनानुगृह्णानः रूपोपलब्धौ चक्षुष आलोकं कुर्वन् बहिरादित्यरूपेणोदेति प्राणादित्ययोः प्राणत्वेनादित्यत्वेन रूपेण भेदः। प्राणाधीनत्वेन प्राणात्मकत्वादभेदः पृथिव्यां प्राणकलादेवता सैषा पुरुषस्यापानवृष्टिमवष्टभ्याकृष्य वशीकृत्याध एवापकर्षणेनानुग्रहं कुर्वती वर्त्तते। यदेतदन्तरा मध्ये द्यावापृथिव्योर्यः आकाशस्तद्रथो वायुराकाशः स समानः समानमनुगृह्णानो वर्त्तते। समानस्वान्तराकाशरथत्वसाम्यात्। सामान्येन यो बाह्यो वायुः स व्याप्तिसामान्याद् व्यानः व्यानमनुगृह्णानो वर्त्तत इति भावः ॥८॥

सान्वयानुवाद—आदित्यः ह वै = यह सूर्य ही, बाह्यः प्राणः = बाह्य प्राण है, एषः हि = यही, एनं चाक्षुषम् = इस नेत्रसम्बन्धी, प्राणम् = प्राण पर, अनुगृह्णानः = अनुग्रह करता हुआ, उदयति = उदित होता है, पृथिव्याम् = पृथिवी में, या देवता = जो देवता है, सा एषा = वही यह, पुरुषस्य = पुरुष के, अपानम् = अपान वायु को, अवष्टभ्य = वश में करके रहता है, अन्तरा = पृथिवी और स्वर्ग के बीच, यत् आकाशः = जो आकाश है, सः समानः = वह समान है, वायुः व्यानः = वायु ही व्यान है ॥८॥

व्याख्या—'कथं बाह्यम्' इत्यादि प्रश्नद्वय का परिहार करते हैं—नेत्रसम्बन्धी (चाक्षुष) प्राण पर प्रकाश द्वारा अनुग्रहण करता हुआ रूपों की उपलब्धि-देखने की

शक्ति, बाहर सूर्य रूप से उदय होता है। प्राण और सूर्य का प्राण रूप से तथा सूर्य रूप से भेद है। प्राण के अधीन होने से अभेद है। पृथिवी कला देवता है, वही पुरुष के अपानवायु को खींचकर वश में करके नीचे अपकर्षण द्वारा अनुग्रह करता है। पृथिवी और स्वर्ग के बीच जो आकाश है वह रथ वायु आकाश है। वह समानवायु समानवायु पर अनुग्रह करता है। जो बाह्य वायु है वह व्याप्ति सामान्य होने से व्यान वायु है तथा व्यान पर अनुग्रह करता हुआ रहता है ॥८॥

तेजो ह वा उदानस्तस्मादुपशान्ततेजाः ।
पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः ॥९॥
यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः ।
सहात्मना यथासङ्कल्पितं लोकं नयति ॥१०॥

तत्त्वप्रकाशिका—तेजो ह वेति। बाह्यं तेज उदान उन्नयनहेतुत्वात् यस्माद्धेतोस्तेजस एवोदानशब्दितोन्नयनहेतुत्वं तस्मादेवोपशान्ततेजाः, अपगतदेहौष्ण्यः सम्मुमूर्षुर्जीवो यच्चित्तो यस्मिंश्चित्तं यस्य स यच्चित्तः यत्काम इति यावत्। देवतिर्यगादिशरीरकामो भवति तत्कामनावशेन पुनर्भवं जन्मान्तरं लब्धुं वाङ्मनसि सम्पद्यते। 'वाङ्मनसि दर्शनाच्छब्दाच्च' (ब्र.सू.४।२।१) इति श्रुतिसूत्राभ्यां मनसा सह संयोगमापन्ने वागादिभिरिन्द्रियैः सहितं प्राणं सम्मुमूर्षुर्जीव आयाति। प्राणस्तेजसोदानेन युक्तः परमात्मना सह जीवं यथासङ्कल्पितं तेन जीवेन मरणकाले यादृशः सङ्कल्पितः स्मृतस्तथाविधं लोकं नयति प्रापयति। ततश्च तेजसा सहितस्य प्राणस्योन्नयनहेतुत्वात् तेजसोऽप्युन्नयनहेतुत्वेनोदानत्वं युक्तमिति भावः ॥९-१०॥

सान्वयानुवाद—तेजो ह वै = तेज ही, उदानः = उदान है, तस्मात् = इसलिये, उपशान्ततेजाः = जिसके शरीर का तेज शान्त हो जाता है, वह (मुमूर्षु जीव) मनसि = मन में, सम्पद्यमानैः इन्द्रियैः = विलीन हुई इन्द्रियों के साथ, पुनर्भवम् = पुनर्जन्म को प्राप्त होता है। एषः = यह मुमूर्षु जीवात्मा, यच्चित्तः = जिस कामनावाला होता है, तेन = उस कामना-वासना के साथ, प्राणम् आयाति = वागादि इन्द्रियों के सहित प्राण में स्थित हो जाता है, प्राणः = मुख्य प्राण, तेजसा युक्तः = तेज से युक्त, आत्मना सह = अपने सहित, यथासङ्किल्पतम् = उसके सङ्कल्पानुसार, लोकं नयति = लोक में जाता है ॥१०॥

व्याख्या—बाह्य तेज ही उदान है, क्योंकि ऊपर की ओर ले जाने से इसे उदान कहते हैं। बाहरी तेज को ही उदान शब्द से कहा जाता है। उसका उष्णत्व धर्म है। जिसके शरीर से वह उदानवायु = उष्ण (गर्मी) निकल जाता है, उसका शरीर गरम नहीं रहता है, अतः तेज = गरम उपशान्त होते ही जीव मन में विलीन हुई इन्द्रियों के साथ पुर्नजन्म को प्राप्त होता है ॥९॥

प्राण तेज से युक्त परमात्मा के साथ जीवात्मा का जैसा संकल्प होता है, वैसा ही लोक योनि को प्राप्त करता है। ब्रह्मज्ञानी मरणकाल में जैसा स्मरण करता है वैसा ही लोक योनि को प्राप्त करता है।

जड़भरत ने कहा है—मैं पूर्वजन्म में भरत नाम का राजा था। ऐहिक तथा पारलौकिक विषयों का त्याग कर श्रीभगवान् की उपासना में लगा रहता था। एक मृग में आसक्ति के कारण मरणकाल में उसके स्मरणवश मृगयोनि में जाना पड़ा, किन्तु भगवान् श्रीकृष्ण की उपासना से मेरी मृगयोनि की स्मृति आज तक नष्ट नहीं हुई। इसलिये यह अनित्य नाशवान् शरीर न जाने कब अचानक एक दिन नष्ट हो जायेगा। यदि मरण काल में श्रीभगवान् का चिन्तन न होकर मन-चित्त स्त्री, पुत्र एवं कुटुम्बादि पर आसक्त हो गया तो पुनः इस जन्म-जरा-मरणरूप संसार में नाना योनियों में भटकना पड़ेगा ॥१०॥

य एवं विद्वान् प्राणं वेद न हास्य प्रजा हीयतेऽमृतो भवति तदेष श्लोकः ॥११॥

तत्त्वप्रकाशिका—एवम्भूतप्राणोपासकस्य फलमुच्यते—यो विद्वानेवमुक्तलक्षणं प्राणं वेद विजानाति उपासते इति यावत्। नास्योपासकस्य प्रजा हीयते। अविच्छिन्नसन्तानो भवति। परिशुद्धप्रत्यगात्मस्वरूपज्ञानपूर्वकब्रह्मोपासनप्रीतिद्वाराऽमृतः मोक्षहेतुश्च भवति ॥११॥

व्याख्या—पहले बताये गये प्राण के स्वरूप को जो विद्वान् जानता है, उसकी उपासना करता है उस विद्वान् उपासक की अविच्छिन्न सन्तान परम्परा होती है एवं परिशुद्ध प्रत्यगात्म-स्वरूप का ज्ञानपूर्वक ब्रह्म की उपासना में अनुराग-प्रेम-प्रीति द्वारा मोक्ष का कारण बन जाता है ॥११॥

उत्पत्तिमायतिं स्थानं विभुत्वञ्चैव पञ्चधा। अध्यात्मञ्चैव प्राणस्य विज्ञायामृतमश्नुते विज्ञायामृतमश्नुत इति ॥१२॥

इत्यथर्ववेदीयप्रश्नोपनिषदि तृतीयः प्रश्नः ॥३॥

तत्त्वप्रकाशिका—उत्पत्तिं प्राणस्य परमात्मनः सकाशात्। आयतिं मनसा सहागमनमस्मिञ्छरीरे। स्थानम् = पायूपस्थस्थानेषु स्थितिं, विभुत्वं यथा सम्राडेवाधिकृतानित्युक्तं साम्यलक्षणम्। अध्यात्मं प्राणादिरूपेण पञ्चधा स्थितिम्। चशब्देनादित्यादिरूपेण पञ्चधा बाह्यावस्थानयोः परिग्रहः। एतत्सर्वं विशेषेण ज्ञात्वाऽमृतं मोक्षमश्नुते प्राप्नोति। द्विरुक्तिः प्रतिवचनसमाप्तिबोधनाय ॥१२॥

इति प्रश्नोपनिषत्तत्त्वप्रकाशिकाटीकायां तृतीयः प्रश्नः ॥३॥

सान्वयानुवाद—प्राणस्य = प्राण की, उत्पत्तिम् = उत्पत्ति, आयतिम् = आगमन, स्थानम् = स्थितिः, विभुत्वम् एव = विभुत्व ही है, च = और, पञ्चधा अध्यात्मम् एव च = पाँच तरह के अध्यात्म को, विज्ञाय = विशेषरूप से जानकर ही, अमृतम् अश्नुते = अमृत को प्राप्त कर लेता है, अमृतम् अश्नुते इति = अमृत को प्राप्त कर लेता है ॥१२॥

व्याख्या—प्राण की उत्पत्ति परमात्मा से होती है, मन के साथ आगमन इस शरीर में उसका स्थान है एवं पायु और उपस्थ स्थानों में स्थिति; जैसे सम्राट् अपने अधिकारियों को। अध्यात्म प्राणादिरूप से पाँच प्रकार की स्थिति है। 'च' शब्द से सूर्यरूप से पाँच प्रकार बाह्य अवस्थानों का परिग्रहण है। यह सब विशेषरूप से जानकर जीवात्मा मोक्ष को प्राप्त कर लेता है। द्विरुक्ति प्रतिवचनसमाप्ति बोधन के लिये है ॥१२॥

तीसरा प्रश्न समाप्त ॥३॥

•

अथ चतुर्थः प्रश्नः

अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ। भगवन्नेतस्मिन् पुरुषे कानि स्वपन्ति कान्यस्मिन् जाग्रति कतर एष देवः स्वप्नान् पश्यति कस्यैतत्सुखं भवति कस्मिन्नु सर्वे सम्प्रतिष्ठिता भवन्ति ॥१॥

तत्त्वप्रकाशिका—भगवन्नेतस्मिन् पुरुषे शरीरिणि स्वपति सति कानि स्वपन्ति स्वव्यापारादुपरमन्ते। कानि अस्मिन् पुरुषे स्वपिति सति जाग्रति स्वव्यापारं कुर्वन्ति। सर्वेषामुपरमे शरीरातस्थानासम्भवात्। सर्वेन्द्रियाणामुपरतत्वादेष देवः जीवः कतरः कीदृशः सन् स्वप्नान् पदार्थान् पश्यति। कस्यैतत्सुखं कस्य हेतोरेतद्वैषयिकं सुखम्। एते सर्वे कस्मिन् प्रतिष्ठिताः ॥१॥

सान्वयानुवाद—अथ = इसके बाद, गार्ग्यः सौर्यायणी = गर्गगोत्र में उत्पन्न सौर्यायणी ऋषि ने, ह एनम् = महर्षि (पिप्पलाद) से, पप्रच्छ = पूछा, भगवन् = हे भगवन्, एतस्मिन् पुरुषे = इस शरीर में, कानि स्वपन्ति = कौन-कौन सोते हैं, अस्मिन् कानि जाग्रति = इसमें कौन-कौन जागते हैं, एषः कतरः देवः = यह कौन देवता, स्वप्नान् पश्यति = स्वप्नों को देखता है, एतत् सुखम् = यह सुख, कस्य भवति = किसको होता है, सर्वे कस्मिन् = सब किसमें, नु = निश्चितरूप से, सम्प्रतिष्ठिताः भवन्ति इति = सम्यक् प्रकार से प्रतिष्ठित रहते हैं ॥१॥

व्याख्या—हे भगवन्! (१) इस मनुष्य-शरीर में कौन-कौन सोते हैं अर्थात् अपने व्यापार से उपरम होते हैं? (२) कौन-कौन जागते हैं अर्थात् अपना-अपना व्यापार करते हैं? (३) सारी इन्द्रियाँ उपरत हो जाने से यह जीव कैसा होकर स्वप्न-पदार्थों को देखता है? (४) निद्रा अवस्था में वैषयिक सुख का अनुभव किसको होता है? (५) ये सब किसमें सम्यक् स्थित हैं? इस प्रकार गार्ग्य मुनि ने महर्षि पिप्पलाद से पाँच बातें पूछी हैं ॥१॥

तस्मै स होवाच। यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति। ताः पुनःपुनरुदयतः प्रचरन्त्येवं ह वै

तत्सर्वं परे देवे मनस्येकीभवति। तेन तर्ह्येष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते ॥२॥

तत्त्वप्रकाशिका—एवं पृष्टवते तस्मै स होवाच। हे गार्ग्य ! यथार्कस्यास्तमदर्शनं गच्छतः सतः सर्वा एव मरीचयः सर्वेऽपि रश्मयः एतस्मिन् दृश्यमाने तेजोरूपमण्डले एकीभवन्ति। तत्रैकीभूता इव दृश्यन्ते। प्रकाशनादिव्यापारादुपरमन्त इति यावत्। ताः पुनस्ते तु रश्मयोऽर्कस्य पुनरुदयतः सतः प्रचरन्ति। तस्मान्मण्डलान्निर्गत्य लोके प्रचरन्त्य इव दृश्यन्ते स्वस्वव्यापारं कुर्वन्तीति यावत्। एवं खल्वेतत् सर्वमिन्द्रियदेवताजातं परे इतरेभ्य उत्कृष्टे देवे द्योतनादिगुणयुक्ते मनस्येकीभवति। तेन श्रोत्रादीन्द्रियदेवतानामुपरतत्वेन पुरुषो न शृणोति, न पश्यति, न जिघ्रति, न रसयते, न स्पृशते, नाभिवदते, नाऽऽदत्ते, नेयायते = न गच्छति। स्वपितीत्याचक्षते। एतेन कानि स्वपन्तीति प्रश्नस्य समाधानमुक्तं भवति। बाह्यज्ञानेन्द्रियकर्मेन्द्रियाणि स्वपन्तीत्युक्तत्वात् ॥२॥

सान्वयानुवाद—सः तस्मै ह उवाच = महर्षि पिप्पलाद ने गार्ग्य मुनि से स्पष्ट कहा, गार्ग्य = हे गार्ग्य ! यथा = जिस प्रकार, अस्तं गच्छतः अर्कस्य = अदर्शन होते हुए सूर्य की, सर्वाः मरीचयः = सारी किरणें, एतस्मिन् तेजोमण्डले = इस तेजोमण्डल में, एकीभवन्ति = एक हो जाती हैं, उदयतः ताः = उदय होने पर वे, पुनः पुनः = बार-बार, प्रचरन्ति = सब ओर फैलती हैं, एवं ह वै = ठीक ऐसे ही, तत्सर्वम् = वे सब इन्द्रियाँ, परे देवे मनसि = परम देव मन में, एकीभवति = एक हो जाती हैं, तेन तर्हि एषः पुरुषः = इस कारण उस समय यह जीवात्मा, न शृणोति = सुनता नहीं है, न पश्यति = देखता नहीं है, न जिघ्रति = सूँघता नहीं है, न रसयते = स्वाद नहीं लेता है, न स्पृशते = स्पर्श नहीं करता है, न अभिवदते = बोलता नहीं है, न आदत्ते = ग्रहण नहीं करता है, न आनन्दयते = मैथुनसुख को भोगता नहीं है, न विसृजते = मल-मूत्र का त्याग नहीं करता है, न इयायते = चलता नहीं है, स्वपिति इति आचक्षते = उस समय वह सो रहा है—इस प्रकार लोग कहते हैं ॥२॥

व्याख्या—इस प्रकार पूछने वाले गार्ग्यजी से महर्षि पिप्पलाद ने कहा—हे गार्ग्य ! जिस प्रकार सूर्य के अस्त (अदर्शन) होते ही समस्त किरणें इस दृश्यमान तेजमण्डल में एक ही हो जाती हैं; अर्थात् वहाँ एक ही रूप जैसे दिखलायी देता है। पुनः वे किरणें सूर्य के पुनः उदय होने पर सब ओर फैल जाती हैं अर्थात् उस मण्डल से निकलकर इस लोक में जैसे फैलती हुई दिखलाई देती हैं। इस प्रकार यह सब इन्द्रियदेवता उत्कृष्ट द्योतनादि गुणयुक्त मन में एक हो जाते हैं। इसलिये उस समय यह जीवात्मा न तो सुनता है, न देखता है, न सूँघता है, न स्वाद लेता है, न स्पर्श करता है, न बोलता है, न ग्रहण करता है, न चलता है, न मल-मूत्र का त्याग करता है और न मैथुनसुख को ही भोगता है। लोग कहते हैं कि इस समय यह सो रहा है। 'कानि

स्वपन्ति' इस प्रश्न का समाधान इसके द्वारा हो गया; बाहर की ज्ञान-इन्द्रियाँ और कर्म-इन्द्रियाँ सोती हैं—इस प्रकार की उक्ति होने से ॥२॥

प्राणाग्नय एवैतस्मिन् पुरे जाग्रति। गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो यद्गार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राणः ॥३॥

तत्त्वप्रकाशिका—कानि जाग्रतीत्यस्योत्तरमाह—स्वप्नवत्सु बाह्यकरणेष्वेतस्मिन् नवद्वारे पुरे देहे प्राणाग्नयो जाग्रति शरीरधारणरूपस्वव्यापारं कुर्वन्ति। कथं तेषामग्न्यादित्वमिति उच्यते—गार्हपत्य इत्यादि। तेषां प्राणानां मध्ये एषोऽपानो गार्हपत्यः = गार्हपत्यसदृशः। सादृश्यञ्च पश्चिमत्वेन। व्यानोऽन्वाहार्यपचनो दक्षिणाग्निः। होमाङ्गत्वसाम्यात्। यस्माद्गार्हपत्यादाः हवनीयः प्रणीयते। प्राणोऽप्यपानात् तस्मात्प्रणयनात् प्रणयनसाम्यात् प्राण आहवनीयः ॥३॥

सान्वयानुवाद—एतस्मिन् पुरे = इस नौ द्वारस्वरूप देह में, प्राणाग्नयः एव = पाँच प्राणरूप अग्नियाँ ही, जाग्रति = जागती रहती हैं, एषः ह वै अपानः = यह अपान ही, गार्हपत्यः = गार्हपत्य अग्नि है, व्यानः = व्यान, अन्वाहार्यपचनः = अन्वाहार्य-पचन नामक दक्षिणाग्नि है, गार्हपत्यात् यत् प्रणीयते = गार्हपत्य अग्नि से जो उठाकर ले जायी जाती है, (सः = वह) आहवनीयः = आहवनीय अग्नि, प्रणयनात् = प्रणयन प्रकर्षरूप से ले जाये जाने के कारण ही, प्राणः = प्राण कहलाता है ॥३॥

व्याख्या—कौन-कौन जागते हैं—इसका देते हैं—स्वप्नावस्था में बाह्य सारी इन्द्रियों के लय हो जाने पर इस नौ द्वारवाले शरीर में प्राणरूप अग्नियाँ ही जागती हैं अर्थात् शरीरधारणरूप अपना व्यापार करती हैं। उन प्राणों के बीच में यह अपान ही गार्हपत्य अग्नि है। व्यान अन्वाहार्यपचन नामक दक्षिणाग्नि है। जिस गार्हपत्य अग्नि से आहवनीय अग्नि प्रणयन करती है और उससे प्रकर्ष रूप से उठाकर ले जाये जाने के कारण प्राण ही आहवनीय अग्नि है ॥३॥

यदुच्छ्वासनिःश्वासावेतावाहुती समं नयतीति स समानः। मनो ह वाव यजमानः। इष्टफलमेवोदानः स एनं यजमानमहरहर्ब्रह्म गमयति ॥४॥

तत्त्वप्रकाशिका—यद्यस्मात् द्वावेतौ उच्छ्वासनिःश्वासौ त एवाहुतीसमं यथाकालं नयति। तस्मादाहुत्योः समं नयनसाम्यात्समानः सोऽध्वर्युरिति यावत्। तत्र मननान्मनो जीवो यजमानः। पराधीनफलप्राप्तिसाम्यादित्युत्तरार्थं वचनम्। उदान इष्टफलम्। यज्ञफलप्रतिपादक उद्गातेति यावत्। फलप्रतिपादकत्वसाम्यात्। कथमुदानस्य फल-प्रतिपादकत्वं स उदानो ह्येनं यजमानं जीवमहरहः प्रतिदिनं सुषुप्तावििति यावत्। ब्रह्म सुषुम्नागतं गमयति प्रापयति ॥४॥

सान्वयानुवाद—यत् उच्छ्वासनिःश्वासौ = जो ऊर्ध्वश्वास और अधोश्वास हैं, एतौ = ये दोनों, आहुती = आहुतियाँ हैं, समं नयति = यथासमय पहुँचाती हैं, सः समानः = वह समान कहलाता है, मनः ह वाव यजमानः = मन ही यजमान है,

इष्टफलम् एव = अभीष्ट फल ही, उदानः = उदान है, सः एनं यजमानम् = वह इस यजमान को, अहः अहः = प्रतिदिन, ब्रह्म गमयति = ब्रह्म तक पहुँचाता है ।।४।।

व्याख्या—ये दोनों-ऊर्ध्वश्वास और अधोश्वास ही दो आहुतियाँ समरूप से यथासमय पहुँचाते हैं इसलिये आहुतियाँ नयन के समानता से वह अध्वर्यु कहलाता है। उसमें मनन से जीव ही यजमान है, यज्ञ के फलों का प्रतिपादन करने वाला उदान ही उद्‌गाता है। वही उदान ही इस मनरूपी यजमान जीव को प्रतिदिन सुषुप्ति में सुषुम्ना तक ले जाता है ।।४।।

अत्रैष देवः स्वप्ने महिमानमनुभवति। यद्दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनुशृणोति देशदिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति दृष्टञ्चादृष्टञ्च श्रुतञ्चाश्रुतञ्चानुभूतञ्चाननुभूतञ्च सच्चासच्च सर्वं पश्यति सर्वः पश्यति ।।५।।

तत्त्वप्रकाशिका—कतर एष देवः स्वप्नान् पश्यतीत्यस्योत्तरमाह—अत्रैतस्यामवस्थायां मन इन्द्रियोपरम इति यावत्। एष देवो जीवः स्वप्ने महिमानमात्मनो महत्त्वमन्यच्चानुभवति तत्र च यमर्थं पश्यति तं प्राग्दृष्टमेवानुपश्यति, यः प्राक्श्रुतस्तं श्रुतमेवार्थं शब्दं स्वप्ने शृणोति एवमन्यदप्यनुभूतमेवानुभवति नाननुभूतम्। किमस्मिन्नैव देशेऽनुभूतमेवानुभवति ? नेति किन्तु देशान्तरे दिगन्तरे च यत्प्रत्यनुभूतं पुनः पुनरनुभूतं तदेव स्वप्ने पुनः पुनः प्रत्यनुभवति। नाप्यस्मिन्नेव जन्मन्यनुभूतमनुभवतीति नियमः किन्त्वन्यस्मिन् जन्मन्येव दृष्टमदृष्टञ्च जन्मान्तरे दृष्टम्। एवमुत्तरत्रापि। अनुभूतमननुभूतमिन्द्रियान्तरेण। सत् विद्यमानञ्चानुभवति। असत् विद्यमानञ्चानुभवति, सर्वः पश्यति स्वयञ्च सर्वोऽनेकप्रकारः सन् सर्वं पश्यति। बाह्यकरणानामुपरतव्यापारत्वात् स्वाप्निकैरीश्वरसृष्टैः शरीरेन्द्रियैर्द्रष्टृत्वादिमान् सन्ननुभवतीति भावः ।।५।।

सान्वयानुवाद—अत्र स्वप्ने = इस स्वप्न अवस्था में, एषः देवः = यह देव (जीवात्मा), महिमानम् = महिमा का, अनुभवति = अनुभव करता है। यद् दृष्टम् दृष्टम् = जो बार-बार देखा हुआ है, अनुपश्यति = उसी को पीछे देखता है, श्रुतं श्रुतम् अर्थम् एव अनुशृणोति = बार-बार सुनी हुई बातों को ही पीछे सुनता है, देशदिगन्तरैः च = नाना देश और दिशाओं में, प्रत्यनुभूतम् = अनुभव किये हुये विषयों को, पुनः पुनः = बार-बार अनुभव करता है, दृष्टं च अदृष्टं च = देखे हुए और न देखे हुए को भी, श्रुतं च अश्रुतं = सुने हुए और न सुने हुए को भी, अनुभूतं च = अनुभव किये हुये और, अननुभूतं च = अनुभव न किये हुये को भी, सत् च असत् च = विद्यमान और अविद्यमान को भी, सर्वम् = सब को, पश्यति = देखता है, सर्वः = स्वयं अनेक प्रकार होकर देखता है ।।५।।

व्याख्या—यह कौन देवता स्वप्नों को देखता है-इसका उत्तर देते हुए कहते हैं—इस स्वप्न अवस्था में मन और इन्द्रियाँ उपरति को प्राप्त हो जाती हैं। यह जीव स्वप्न अवस्था में अपने महत्त्व का अनुभव करता है और जिस अर्थ को देखता है उस

पहले देखे हुए को अनुभव करता है। सुने हुए अर्थ = शब्द को स्वप्न में सुनता है। इस प्रकार अन्य अनुभव किये हुये विषयों को अनुभव करता है। अनुभव न किये हुए को भी क्या इस देश में ही अनुभव किये हुए को ही अनुभव करता है ? ऐसा नहीं है, अन्य देश में और अन्य दिशा में जो पुनः-पुनः अनुभव किये हुए शब्दादि विषय को ही स्वप्न अवस्था में बार-बार अनुभव करता है। इस जन्म में भी नहीं अनुभव किये हुए को अनुभव करता है-ऐसा नियम नहीं है। किन्तु अन्य जन्म में ही देखा हुआ और न देखा हुआ जन्मान्तर में देखा है। अनुभव किये हुए तथा अनुभव न किये हुए इन्द्रियों के बिना सत् और असत्, विद्यमान और अविद्यमान को स्वयं अनेक प्रकार का होकर सबको देखता है ॥५॥

स यदा तेजसाऽभिभूतो भवति। अत्रैष देवः स्वप्नान्न पश्यत्यथ तदैतस्मिञ्छरीर एतत्सुखं भवति ॥६॥

तत्त्वप्रकाशिका—चतुर्थं परिहर्त्तुमुच्यते—स्वप्ने वर्त्तमानः स जीवो यदा तेजसा परमात्मनाऽभिभूतो भवति सम्पन्नो भवति सम्यरिष्वक्तो भवतीति यावत्। तदा स्वप्नान् पदार्थान् न पश्यति मनसोऽप्युपरतत्वान्न जीवः स्वप्नान् पश्यतीति यावत्। एतेन कतरो देवः स्वप्नान् पश्यतीति प्रश्नस्योत्तरमुक्तं भवति। मनोमात्रपरिशेषसमये स्वाप्निकानर्थान् पश्यति प्रत्यगात्मा न ब्रह्म सम्पत्तिसमये। कस्यैतत्सुखं भवतीत्यस्य प्रश्नस्य समाधानमाह-अथेति। प्रत्यगात्मनो यत्सुखं भवति तदेतस्मिन् शरीरे सत्येव भवति। शरीरमेव वैषयिकसुखहेतुरित्युक्तं भवति ॥६॥

सान्वयानुवाद—सः यदा = वह जब, तेजसा अभिभूतः = तेज से अभिभूत, भवति = होता है, अत्र एषः देवः = इस स्थिति में यह जीवात्मा, स्वप्नान् = स्वप्नों को, न पश्यति = नहीं देखता, अथ = तथा, तदा = उस समय, एतस्मिन् शरीरे = इस शरीर में, एतत् सुखं भवति = इस सुख का अनुभव होता है ॥६॥

व्याख्या—स्वप्न में वर्त्तमान वह जीव जब परमात्मा से सम्पन्न = समालिङ्गन होता है तब स्वाप्निक पदार्थों को नहीं देखता। इसके द्वारा कौन देवता स्वप्नों को देखता है-इस प्रश्न का उत्तर हो गया। मन मात्र परिशेष समय में स्वाप्निक अर्थों को देखता है, जीवात्मा ब्रह्म सम्पत्ति समय में नहीं। यह सुख किसको होता है-इस प्रश्न का समाधान करते हैं—जीवात्मा का जो सुख होता है वह इस शरीर में ही होता है; शरीर ही वैषयिक सुख का कारण है ॥६॥

स यथा सोम्य वयांसि वासो वृक्षं सम्प्रतिष्ठन्ते।
एवं ह वै तत्सर्वं पर आत्मनि सम्प्रतिष्ठते ॥७॥

तत्त्वप्रकाशिका—कस्मिन्नर्थे सर्वे प्रतिष्ठिता भवन्तीत्यस्योत्तरमाह—सोम्य = सोमार्ह तत्र दृष्टान्तः। यथा वयांसि = पक्षिणो वासो यत्रात्मनो निवासः तं वृक्षं सम्प्रतिष्ठन्ते। अभिगच्छन्ति तमाश्रित्य तिष्ठन्ति। एवं खल्वेतत्सर्वं पृथिव्यादितत्त्वजातं परे ब्रह्मणि वासुदेवे सम्प्रतिष्ठते तदाधारमेव वर्त्तते ॥७॥

सान्वयानुवाद—सः = वह, यथा = जिस प्रकार, वयांसि = पक्षी, वासो वृक्षम् = अपने निवासस्थान वृक्ष पर, सम्प्रतिष्ठन्ते = उसके सहारे ठहरते हैं, एवं ह वै तत्सर्वम् = ठीक वैसे ही वह सब, परे आत्मनि = परमात्मा में, सम्प्रतिष्ठते = भली भाँति अच्छी प्रकार से ठहरता है ।।७।।

व्याख्या—किसमें सब प्रतिष्ठित रहते हैं—इसका उत्तर देते हैं—हे सोम्य! जिस प्रकार पक्षिगण सायंकाल में लौटकर यहाँ अपने निवासरूप वृक्ष पर पहुँचते हैं और उसके आश्रित होकर ठहरते हैं, ठीक उसी प्रकार यह सब पृथिवी आदि तत्त्वसमूह परब्रह्मस्वरूप वासुदेव में सम्प्रतिष्ठित हैं। क्योंकि भगवान् श्रीवासुदेव ही सबके परम आश्रय (एकमात्र सहारे) हैं ।।७।।

पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च तेजमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यञ्च श्रोत्रञ्च श्रोतव्यञ्च घ्राणञ्च घ्रातव्यञ्च रसश्च रसयितव्यञ्च त्वक् च स्पर्शयितव्यञ्च वाक् च वक्तव्यञ्च हस्तौ चादातव्यञ्चोपस्थश्चानन्दयितव्यञ्च पायुश्च विसर्जयितव्यञ्च पादौ च गन्तव्यञ्च मनश्च मन्तव्यञ्च बुद्धिश्च बोद्धव्यञ्चाहङ्कारश्चाहङ्कर्त्तव्यञ्च चित्तञ्च चेतयितव्यञ्च तेजश्च विद्योतयितव्यञ्च प्राणश्च विधारयितव्यञ्च ।।८।।

एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता योद्धा कर्त्ता विज्ञानात्मा पुरुषः । स परेऽक्षर आत्मनि सम्प्रतिष्ठते ।।९।।

तत्त्वप्रकाशिका—सर्वशब्दार्थं प्रपञ्चयति—पृथिवीत्यादिना पञ्चमहाभूतान्युच्यन्ते, पृथिवीमात्रा चेत्यादिना गन्धादिपञ्चतन्मात्राः चक्षुश्चेत्यादिना दशेन्द्रियाणि, द्रष्टव्यमित्यादिना नामरूपादितद्विषयाः, मन इत्यादिनान्तःकरणपञ्चकं, मन्तव्यञ्चेत्यादिना तद्विषयाः, तेजश्शब्देन चेतना गृह्यते। प्राणो मुख्यो धारकस्तेन विधारयितव्यं पृथिव्यादिकं सर्वम् अतश्चोपपन्नं तस्य सर्वाश्रयत्वमिति। कथं सर्वस्वं तदधीनत्वमित्युच्यते-एष हीति। चक्षुरादीनामेतेषामेष हि दर्शनादिशक्तिप्रदः, अत्र बोद्धा कर्त्ता विज्ञानात्मेति निर्देशादात्मनो ज्ञातृत्वमेव न ज्ञानस्वरूपमिति वदन्तस्तार्किकाश्च ज्ञानत्वमेव न ज्ञातृत्वमिति वदन्तो मायावादिनश्च निरस्ता भवन्ति ।।९।।

व्याख्या—इस मन्त्र में सर्व शब्द के अर्थ का विस्तार से वर्णन करते हैं—पृथिवी आदि पञ्च महाभूत और उनकी गन्ध आदि पञ्च तन्मात्रा। जैसे कि स्थूल पृथिवी और उसका कारण गन्धतन्मात्रा, स्थूल जल और उसका कारण रसतन्मात्रा, स्थूल तेज और उसका कारण रूपतन्मात्रा, स्थूल वायु और उसका कारण स्पर्शतन्मात्रा, स्थूल आकाश और उसका शब्दतन्मात्रा और चक्षु आदि दस इन्द्रियाँ; जैसे कि चक्षु-इन्द्रिय और उसके द्वारा श्रीभगवान् की प्रतिमाओं का और उनके भक्तों का दर्शन, श्रोत्र-इन्द्रिय और उसके द्वारा उनकी पुण्यकथा का श्रवण, घ्राण-इन्द्रिय और उसके द्वारा श्रीभगवान् के चरणकमलों पर चढ़ी श्रीमती तुलसी की दिव्य सुगन्ध लेना, रसना-इन्द्रिय और

उसके द्वारा श्रीभगवच्चरित्र का गान करना, त्वक्-त्वचा इन्द्रिय से यह क्षणभङ्गुर एवं दुर्लभ मनुष्यदेह, जिससे सर्वात्मा श्रीभगवान् की सेवा करने का अपूर्व सुअवसर मिलता है। वाक्-इन्द्रिय अर्थात् वाणी जिससे श्रीभगवान् का गुणानुवाद किया जाता है। दोनों हाथों से उनकी सेवा, दोनों पैरों से उनके क्षेत्र तथा तीर्थों की यात्रा, उपस्थ से इन्द्रिय मैथुन सन्तान के निमित्त ही कहा गया है, न कि इन्द्रियसुख के लिये। गुदा-इन्द्रिय द्वारा मल का त्याग किया जाता है। मन, बुद्धि, चित्त, अहङ्कार और अन्तःकरण; जैसे कि मन के द्वारा मनन , बुद्धि के द्वारा विचार-विमर्श, चित्त के द्वारा चिन्तन अहङ्कार ही उसका स्वरूप है और जीवों के अन्तःकरण में सारी कामना-वासना छिपी रहती हैं। पृथिवी आदि सबके उस परब्रह्मस्वरूप श्रीपुरुषोत्तम ही एकमात्र आश्रय हैं। यह विज्ञानात्मा-विशेष ज्ञानस्वरूप जीवात्मा ही देखने वाला, स्पर्श करने वाला, सुनने वाला, सूँघने वाला, रसास्वादन लेने वाला, मनन करने वाला, जानने वाला कर्त्ता पुरुष है तथा अक्षर = अविनाशी परमात्मा में सम्यक् प्रतिष्ठित है।

परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य। स सर्वज्ञः सर्वो भवति तदेष श्लोकः ॥१०॥

तत्त्वप्रकाशिका—स विज्ञानात्मा पुरुषो यादृशलक्षणमेतमेवंविधमच्छायं ज्ञानसङ्कोचकं कर्मछायाशब्देनोच्यते अच्छायमपापम् अत एवाशरीरम्। प्राकृतशरीर-रहितम्। तस्मादेवालोहितम् = लोहितादिरूपरहितम्। शुभ्रं = शुद्धम्। प्राकृतरूपाद्य-भावेऽपि अप्राकृतशुभ्रादिरूपयुक्तं वा अत एवाक्षरं न क्षरतीति क्षरणशून्यम्। हे सोम्य ! यो वेदयते = विजानाति स सर्वज्ञः सर्वप्रधानस्य सर्वकारणस्य च परिज्ञानात्सर्वज्ञो भवति। सर्वस्यापि कर्मादिर्ज्ञानस्य फलं परमात्मज्ञानं प्राप्तमनेनेति वा। उपासकः स्तूयते तत्सर्वं भवति तदेष श्लोक इति तद्ब्रह्माभिमुखीकृत्यैवैष श्लोकः ॥१०॥

सान्वयानुवाद—सः यः ह वै = वह यह जो (पुरुष), तत् अच्छायम् = वह छायारहित, अशरीरम् = शरीररहित, अलोहितम् = लालरङ्ग से रहित, शुभ्रम् अक्षरम् = शुद्ध अक्षर को, वेदयते = जानता है, सः = वह, परम् अक्षरम् एव प्रति-पद्यते = परम अक्षर को ही प्राप्त हो जाता है, सः = वह, सर्वज्ञः = सब जानता है, सर्वः भवति = सब होता है।

व्याख्या—वह ज्ञानस्वरूप पुरुष पापरहित, प्राकृत शरीररहित, लाल-पीला आदि रूपरहित शुद्ध है इसलिये अक्षर = क्षरणशून्य है। हे सोम्य ! जो इस प्रकार जानता है वह सर्वप्रधान और सर्वकारण के परिज्ञान से सर्वज्ञ हो जाता है। उपासक की स्तुति करते हैं—वह सब हो जाता है, उस ब्रह्म को सम्मुख कर यह श्लोक है ॥१०॥

विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र।
तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेशेति ॥११॥

इत्यथर्ववेदीयप्रश्नोपनिषदि चतुर्थः प्रश्नः ॥४॥

तत्त्वप्रकाशिका—विज्ञानात्मा = विज्ञानरूपो जीवः प्राणश्चक्षुरादयः तद्विषया रूपादयश्च भूतानि पृथव्यादीनि तन्मात्राश्च सर्वैः देवैरभिमानिसूर्याद्यैः सह यत्र यस्मिन्नक्षरे ब्रह्मणि सम्प्रतिष्ठन्ति तदेतदक्षरं वेदयते विजानाति यः पुरुषः, सोम्येति कस्यचित्सम्बुद्धिः, स उक्तप्रकारेण सर्वज्ञः, सर्वं परं ब्रह्माविवेशाविष्ट एव ध्रुवमाविशत्येवेति ॥११॥

इति प्रश्नोपनिषत्तत्त्वप्रकाशिकाटीकायां चतुर्थः प्रश्नः ॥४॥

सान्वयानुवाद—यत्र = जिसमें, प्राणाः = चक्षुरादि इन्द्रियाँ, भूतानि = पृथिवी आदि पाँचों महाभूत, सर्वैः देवैः सह = अभिमानी सभी सूर्य आदि देवों के सहित, विज्ञानात्मा = विशेष ज्ञानस्वरूप आत्मा, सम्प्रतिष्ठन्ति = भलीभाँति अच्छी प्रकार से ठहरते हैं, सोम्य = हे सोम्य ! तत् अक्षरम् = उस अक्षर (परमात्मा) को, यः तु = जो कोई, वेदयते = जानता है, सः सर्वज्ञः = वह सर्वज्ञ है, सर्वम् एव = सर्वरूप परब्रह्म में, आविवेश = प्रविष्ट हो जाता है ॥११॥

व्याख्या—चक्षुरादि इन्द्रियाँ और उसके विषय रूपादि, पृथिवी आदि पञ्चमहाभूत और उनकी तन्मात्राएँ तथा अभिमानी समस्त सूर्यादि देवों के साथ ज्ञानस्वरूप जीवात्मा जिस अक्षर ब्रह्म में सम्यक् प्रतिष्ठित (स्थित) है वही इस अक्षर परमात्मा को जो कोई जान लेता है वह सर्वज्ञ है और वह निश्चय ही ब्रह्म में प्रविष्ट हो जाता है ॥११॥

॥ चतुर्थ प्रश्न समाप्त ॥४॥

•

अथ पञ्चमः प्रश्नः

अथ हैनं शैब्यः सत्यकामः पप्रच्छ। स यो ह वै तद्भगवन्मनुष्येषु प्रयाणान्तमोङ्कारमभिध्यायीत। कतमं वाव स तेन लोकं जयतीति। तस्मै स होवाच ॥१॥

तत्त्वप्रकाशिका—भगवन्नेतेषु मनुष्येषु स यः कश्चित् प्रयाणान्तं = प्रयाणपर्यन्तं यावच्छरीरादुत्क्रमणं तावदिति यावत्। ओङ्कारमोमित्यादिक्रियमाणं परमात्मानमभिध्यायीत सर्वदा चिन्तयेदोमिति मन्त्रेणेत्यभिप्रायः। स पुरुषस्तेन ध्यानेन कतमं लोकं जयति प्राप्नोतीत्येवं पृष्टवते तस्मै स होवाच पिप्पलादः ॥१॥

सान्वयानुवाद—शैब्यः सत्यकामः = शिबिपुत्र सत्यकाम ने, अथ ह एनम् = उसके बाद इन महर्षि पिप्पलाद से, पप्रच्छ = पूछा, भगवन् = हे भगवन् ! मनुष्येषु = मनुष्यों में से, सः यः ह वै = वह जो कोई, प्रयाणान्तम् = प्रयाणपर्यन्त, तत् ओङ्कारम् = उस ओंकार का, अभिध्यायीत = सदा-सर्वदा ध्यान करता है, सः = वह, तेन = उस ध्यान से, कतमम् लोकम् = किस लोक को, वाव जयति = भलीभाँति जीतता (प्राप्त करता) है। तस्मै सः ह उवाच = उससे उन महर्षि ने कहा ॥१॥

व्याख्या—हे भगवन्! इन मनुष्यों में से वह जो कोई मृत्युपर्यन्त अर्थात् जब तक शरीर से प्राण निकलता तब तक ओङ्कार किये जाने वाले परमात्मा का सर्वदा चिन्तन करे। ओम् इस मन्त्र से वह पुरुष उस ध्यान से किस लोक को प्राप्त करता है, इस प्रकार पूछने वाले सत्यकाम से महर्षि पिप्पलाद ने स्पष्ट कहा ॥१॥

एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोङ्कारः।
तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति ॥२॥

तत्त्वप्रकाशिका—यदोङ्कारः तदेतत् परञ्चापरञ्च ब्रह्म यस्मात् प्रणवो मुख्यतः परमात्मनः प्रतिपादकः, यस्माच्च तत्प्रतिमानत्वेन मुख्यविरञ्च प्रतिपादकश्च तस्माद् विद्वान् प्रणवेनोपासकः, एतेनैवोपासनाख्येनायतनेन गमनसाधनेन। परापरब्रह्मणोरेकतर-मन्वेति प्राप्नोति ॥२॥

सान्वयानुवाद—सत्यकाम = हे सत्यकाम! एतत् वै = यह निश्चय ही, यत् ओङ्कारः = जो ओङ्कार है, परम् च अपरम् च ब्रह्म = पर और अपर ब्रह्म है, तस्मात् = इसलिये, विद्वान् एतेन एव = विद्वान् पुरुष इसके द्वारा ही, आयतनेन = गमनसाधन द्वारा, एकतरम् अन्वेति = परापरब्रह्म में से किसी एक को प्राप्त करता है ॥२॥

व्याख्या—मुख्य रूप से प्रणव परमात्मा का ही प्रतिपादन करने वाला 'णूयते प्रकर्षेण स्तूयते अनेनेति परमात्मा' = अच्छे प्रकार से जिसके द्वारा परमात्मा की स्तुति = स्तवन किया जाता है वह प्रणव ओङ्कार है।

स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभि-सम्पद्यते। तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवति ॥३॥

तत्त्वप्रकाशिका—अकारोकारमकारख्यांशत्रययुक्तो हि प्रणवः। तत्र स उपासको यद्येकमात्रमेका मात्रा वाचिका यस्य तं परमात्मानं प्रणवेनाभिध्यायीत कामप्येकामेव मात्रां सम्यग्विदित्वा इतरे अविज्ञायेति यावत्। तर्हि स उपासकस्तेनैव ध्यातेन परमात्मना संवेदित एहीति सम्बोधित इव देहपातानन्तरं क्षिप्रमेव जगत्यां पृथिव्यामभिसम्पद्यते जन्मनेति शेषः। कथं कीदृशं जन्मेति। तमुपासकमृचः ऋग्वेदाभिमानिदेवताः पृथिव्यां मनुष्यलोकं मनुष्यशरीरं द्विजाग्र्यलक्षणमुपनयन्ते प्रापयन्ति। स च तत्र जन्मनि तपसा = अनशनादिना, ब्रह्मचर्येण = मैथुनवर्जनेन, श्रद्धया = आस्तिक्यबुद्ध्या सम्पन्नस्तत्फल-रूपं महिमानमनुभवति ॥३॥

सान्वयानुवाद—सः यदि = वह अगर, एकमात्रम् = एकमात्रावाचिका इस प्रणव विद्या का, अभिध्यायीत = भलीभाँति ध्यान-चिन्तन करता है, सः तेन एव = वह उस ध्यान से ही, संवेदितः = अपने ध्येय परमात्मा की अच्छी तरह जानकारी हो जाती है, तूर्णम् एव = जल्दी ही, जगत्याम् = पृथिवी में, अभिसम्पद्यते = उत्पन्न होता है,

तम् ऋचः = उसको ऋग्वेद की ऋचाएँ, मनुष्यलोकम् उन्नयन्ते = मनुष्यशरीर प्राप्त करा देती है, तत्र सः = वहाँ वह, तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नः = तपस्या, ब्रह्मचर्य और श्रद्धा से युक्त होकर, महिमानम् = महिमा का, अनुभवति = अनुभव करता है ॥३॥

व्याख्या—अकार, उकार और मकार इन तीनों से युक्त ही प्रणव है। अगर उपासक एक मात्रावाचिका इस प्रणव विद्या से उस परमात्मा की भलीभाँति उपासना करता है तो वह उपासक उसके द्वारा ही सम्यक् ज्ञात होकर मरने पर शीघ्र ही पृथिवी पर जन्म लेता है। उस उपासक को ऋग्वेद के अभिमानी देवता मनुष्यशरीर प्राप्त करा देते हैं। उस जन्म में वह व्रतोपवास, सन्तानोत्पत्ति, मैथुन इन्द्रियसुखवर्जन और अस्तिक्य-बुद्धि से सम्पन्न होकर उसके फलरूप महिमा का अनुभव करता है। इन तीनों मात्राओं में से कोई भी एकमात्रा को भी भलीभाँति जानकर दूसरों को न जानकर करने पर भी वही फल मिलता है ॥३॥

अथ यदि द्विमात्रेण मनसि सम्पद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम्। स सोमलोके विभूतिमनुभूय पुनरावर्त्तते ॥४॥

तत्त्वप्रकाशिका—अथ यदि द्विमात्रेणापरब्रह्मवाचकेन प्रणवेन यस्य मनसि अपरब्रह्मध्यानं सम्पद्यते सङ्गतो भवति। तर्हि स उपासको यजुर्भिर्यजुर्वेदाभिमानिदेवताभिरन्तरिक्षस्थं सोमलोकमुन्नीयते नीतश्च। स तत्र सोमलोके विभूतिमैश्वर्यमनुभूय पुनरावर्त्तते = ततश्च्यवते ॥४॥

सान्वयानुवाद—अथ यदि = इसके बाद अगर, द्विमात्रेण = दो मात्राओं से, मनसि सम्पद्यते = मन में सम्पन्न होता है, सः यजुर्भिः = वह यजुर्वेद के अभिमानी देवताओं द्वारा, अन्तरिक्षम् = अन्तरिक्ष में स्थित, सोमलोकम् = चन्द्रलोक को, उन्नीयते = ऊपर की ओर पहुँचाया जाता है, सः सोमलोके = वह उस चन्द्रलोक में, विभूतिम् अनुभूय = ऐश्वर्य का अनुभव करके, पुनः आवर्त्तते = पुनः इस लोक में (आवर्त्तन) लौट आता है ॥४॥

व्याख्या—श्रीमद्भागवत (३।३२।३) में कहा है कि 'गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति'। गर्भाधान से लेकर मरणपर्यन्त वे नाना प्रकार के यज्ञों द्वारा सकाम क्रियाएँ किया करते हैं, पर उन्हें न कभी आत्म-अनात्म और परमात्मस्वरूप का ज्ञान होता है, जन्म-जरा-मरणरूप संसार प्रवाह में ही भटकते रहते हैं, देह का त्याग कर धूममार्ग से चन्द्रलोक को जाते हैं। वहाँ कुछ दिनों तक नाना प्रकार के ऐश्वर्य का उपभोग कर और सोम का पानकर पुण्य क्षीण होने पर वे फिर यहीं नीचे ढकेल दिये जाते हैं ॥४॥

यः पुनरेतं त्रिमात्रेणैवोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नः। यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना

विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते तदेतौ श्लोकौ भवतः ॥५॥

तत्त्वप्रकाशिका—यत एव तस्माद्यस्तु पुरुष एतं पुरुषं त्रिमात्रेण तिस्रो मात्रा अपि सम्यग्विदित्वेति यावत्। ओमित्यक्षरेण परमात्मानमभिध्यायीत स ध्याता ध्येयं परमेश्वरमपरोक्षीकृत्य तेजोरूपे सूर्ये सम्पन्नस्तं प्राप्तो भवति। सूर्यं प्राप्य चासौ यथा पादोदरः सर्वस्त्वचा जीर्णया विनिर्मुच्यते। एवं खलु स ध्यानी पाप्मना प्रारब्धेन विनिर्मुक्तो भवति। विधूतपापश्च सामभिः = सामाभिमानिदेवताभिः ब्रह्मलोकं सत्याख्य-मुन्नीयते। स उपासकः एतस्मात्सत्यलोकपतेर्जीवघनाज्जीवसारात्सकलजीवोत्तमादिरञ्चात् परात्परमुत्तमोत्तमं पुरिशयं सकलजीवशरीरेषु शयितं पुरुषं पूर्णं वासुदेवमीक्षते। भगवानिति शब्दोऽयं तथा पुरुष इत्यपि निरुपाधित्वं च वर्त्तते वासुदेवे सनातन इति स्मृतिवचनमनुसन्धेयम् ॥५॥

सान्वयानुवाद—पुनः यः = पुनः जो, त्रिमात्रेण = तीन मात्राओं से, ओम् इति = प्रणवरूप (एकाक्षररूप), एतेन अक्षरेण एव = इस अक्षर के द्वारा ही, एतं परम् पुरुषम् = इस परम पुरुष का, अभिध्यायीत = सदा ध्यान करता है, सः तेजसि = वह तेजोरूप, सूर्ये सम्पन्नः = सूर्य में सम्पन्न होता है, यथा पादोदरः = जिस तरह साँप, त्वचा विनिर्मुच्यते = केंचुली से बिल्कुल अलग हो जाता है, एवम् ह वै = ठीक उसी तरह, सः पाप्मना = वह पाप से, विनिर्मुक्तः = सदा के लिए छूट जाता है, सः सामभिः = वह सामवेद के अभिमानी देवताओं द्वारा, ब्रह्मलोकम् = ब्रह्मलोक में, उन्नीयते = ऊपर ले जाया जाता है, स एतस्मात् जीवघनात् = वह इस जीवसमुदाय से उत्तम ब्रह्मा से, परात्परम् = उत्तमोत्तम, पुरिशयम् = शरीर रूप नगर में शयन करने वाले, पुरुषम् = परमपुरुष को, ईक्षते = देखता है, तत् एतौ = वह ये, श्लोकौ भवतः = दो श्लोक (मन्त्र) हैं ॥५॥

व्याख्या—जो उपासक इस परमपुरुष परमात्मा को तीन मात्राओं से भलीभाँति जानकर 'ओम्' इस एकाक्षर मन्त्र द्वारा उनका निरन्तर ध्यान करता है वह ध्यान करने वाला ध्येय परमेश्वर का साक्षात् करके तेजोरूप सूर्य में सम्पन्न होकर उसे प्राप्त हो जाता है। वह जैसे सूर्य को पाकर सर्प जीर्ण त्वचा से अलग हो जाता है। इसी प्रकार श्रीभगवत्स्वरूप का ध्यान करने वाला साधक प्रारब्ध कर्म से विनिर्मुक्त होता है। सामवेद के अभिमानी देवताओं द्वारा सत्य नामक सर्वोपरि ब्रह्मलोक में पहुँचाये जाते हैं। वह उपासक इस सत्यलोक के स्वामी जीवसार समस्त जीवों से उत्तम ब्रह्मा उससे उत्तम सभी जीवों के शरीरों में अन्तर्यामी रूप से स्थित परिपूर्णानन्द श्रीपुरुषोत्तम का दर्शन करता है, फिर उसकी पुनरावृत्ति नहीं होती है। वह अज्ञान-अन्धकाररूपी मायाजाल से छूटकर श्रीभगवद्भाव को प्राप्त हो जाता है। इस विषय में मन्त्र पढ़ते हैं ॥५॥

तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनुविप्रयुक्ताः।
क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः ॥६॥

तत्त्वप्रकाशिका—तिस्रोऽकाराद्याः प्रणवमात्राः। अनविप्रयुक्ताः = विप्रयुक्ताः न भवन्तीत्यविप्रयुक्ताः, न अविप्रयुक्ता अनविप्रयुक्ता विप्रयुक्ता इत्यर्थः। अन्योन्यसक्ताः = परस्परं युग्मतया सम्बद्धाः। बाह्याभ्यन्तरमध्यमासु = तारमन्द्रमध्यमरूपासूच्चारण-क्रियासु प्रयुक्ता उच्चारिता मृत्युमत्यो भवन्ति, नापुनरावृत्तिफलं प्रापयन्तीत्यर्थः। तासु सम्यक् प्रयुक्तासु तिस्रोऽपि सम्यक् ज्ञात्वोच्चारितासु सतीषु योगाभिज्ञः पुमान् न कम्पते अपुनरावृत्तिफलं प्राप्नोति ॥६॥

सान्वयानुवाद—तिस्रः मात्राः = अकार, उकार और मकार ये तीनों मात्राएँ, अन्योन्यसक्ताः = परस्पर युग्मरूप से सम्बद्ध, प्रयुक्ताः = प्रयोग की गयी है, अनवि-प्रयुक्ताः = इनका अलग-अलग अर्थों में प्रयोग किया गया है, मृत्युमत्यः = मृत्यु से युक्त हैं, बाह्याभ्यन्तरमध्यमासु = बाहर, भीतर और बीच की, क्रियासु = क्रियाओं में, सम्यक् प्रयुक्तासु = सम्यक् प्रयोग किये जाने पर, ज्ञः न कम्पते = जानने वाला काँपता नहीं है ॥६॥

व्याख्या—श्रीभगवान् ने गीताजी (८।१३) में कहा है—ओम् इस प्रणवस्वरूप एकाक्षर ब्रह्म का उच्चारण करता हुआ, मेरा अनुस्मरण (चिन्तन) करता हुआ जो शरीर का परित्याग करता है वह (देवयान-मार्ग से) परम गति को प्राप्त होता है। जहाँ से फिर दुबारा इस लोक में लौटकर आना नहीं पड़ता है। योगसूत्र में कहा है—प्रणव उसका वाचक है (योगसूत्र १।२८)। इसलिये इस मन्त्र में 'तिस्रो मात्रा मृत्युमत्यः' ऐसा कहकर मन्त्रद्रष्टा ऋषि ने उल्लेख किया है ॥६॥

ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत् तत्कवयो वेदयन्ते।
तमोङ्कारेणैवायतनेनान्वेति विद्वान् यत्तत्छान्तमजरममृतमभयं परञ्चेति ॥७॥

इत्यथर्ववेदीयप्रश्नोपनिषदि पञ्चमः प्रश्नः ॥५॥

तत्त्वप्रकाशिका—एतदर्थं विवरणार्थो द्वितीयो मन्त्रः—एकमात्रज्ञानपूर्वकोपास-नादृग्भिरेतं पृथिव्याख्यं मानुषं लोकमुपासको नीयते। द्विमात्राज्ञानपूर्वकोपासनाद्यजुर्भि-रन्तरिक्षं तत्रत्यं सोमलोकं नीयते। यत्तत्कवयः = सूरयः, वेदयन्ते = जानन्ति ज्ञापयन्ति वा परात्परं ब्रह्म यत्तच्छान्तं = सुखोत्कर्षसीमाभूमिरूपम्। अजरम् = जरादिवर्जितं परा-त्परं सर्वोत्तमं तं तद् ब्रह्मोङ्कारेणैवायनेन अयनं = साधनमोङ्कारं मात्रात्रयात्मकं सम्यक् ज्ञात्वेति यावत्। सामभिरन्वेतीति। इतिशब्दो वाक्यपरिसमाप्त्यर्थ; ॥७॥

इति प्रश्नोपनिषत्तत्त्वप्रकाशिकाटीकायां पञ्चमः प्रश्नः ॥५॥

सान्वयानुवाद—ऋग्भिः = एक मात्रा की ज्ञानपूर्वक उपासना से उपासक ऋचाओं द्वारा, एतम् = इस पृथिवी नामक मनुष्यलोक में पहुँचाया जाता है, यजुर्भिः = दूसरी दो मात्राओं की ज्ञानपूर्वक उपासना से उपासक यजुर्वेद की श्रुतियों द्वारा, अन्तरिक्षम् = अन्तरिक्ष में अर्थात् सोमलोक में पहुँचाया जाता है, सामभिः = सामवेद की श्रुतियों द्वारा, तत् = उस ब्रह्मलोक में पहुँचाया जाता है, यत् = जिसको,

कवयः = सूरीजन, वेदयन्ते = जानते हैं, विद्वान् = ज्ञानवान् उपासक, ओङ्कारेण = ओङ्काररूप, आयतनेन एव = साधन द्वारा ही, तम् अन्वेति = उन परब्रह्मस्वरूप श्रीपुरुषोत्तम को प्राप्त कर लेता है, यत् = जो, तत् = वह, अजरम् = जरारहित, अमृतम् = मृत्युरहित, अभयम् = भयरहित, (अतः) परम् शान्तम् = परम शान्त है।

पञ्चम प्रश्न समाप्त ॥५॥

•

अथ षष्ठः प्रश्नः

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ। भगवन् हिरण्यनाभः कौसल्यो राजपुत्रो मामुपेत्यैतं प्रश्नमपृच्छत। षोडशकलं भारद्वाज पुरुषं वेत्थ। तमहं कुमारमब्रुवं नाहमिमं वेद यद्यहमिममवेदिषं कथं ते नावक्ष्यमिति समूलो वा एष परिशुष्यति योऽनृतमभिवदति तस्मान्नार्हाम्यनृतं वक्तुं स तूष्णीं रथमारुह्य प्रवव्राज। तं त्वा पृच्छामि क्वासौ पुरुष इति ॥१॥

तत्त्वप्रकाशिका—प्रष्टव्यार्थेऽतिशयितबुभुत्सां स्वस्य ज्ञापयितुं पूर्ववृत्तान्त-कथनम्। भगवन् हिरण्यनाभो नामतः कोसलायां भवः कौसल्यः कस्यचिद्राज्ञः पुत्रो मामुपेत्य प्राप्य एनं वक्ष्यमाणं प्रश्नं प्रष्टव्यमर्थमपृच्छतापृच्छत्। हे भारद्वाज! षोडश-कलो नाम कश्चित् पुरुषोऽस्ति इति सामान्यतो मया श्रुतं तं षोडशकलं पुरुषं त्वं वेत्थ विशेषतो जानासि किम्? कोऽसौ पुरुषः? क्व चास्ते? का नाम षोडशकलाः? कथञ्च तस्य षोडशकलात्वमित्यादि। यदि च जानासि तं तर्हि मह्यं ब्रूहीति एवं पृष्टवन्तं कुमारं पूर्ववयसि वर्त्तमानं, हिरण्यनाभमहमब्रुवम्। अहमिमं त्वया पृष्टं षोडशकलं पुरुषं न वेद = न जानामि। कुतः यद्यहमिमं पुरुषमवेदिषं = विदितवान् अहमभविष्यं तर्हि कथं कस्माद्योग्याय ते तुभ्यं नावक्ष्यमिति। अतो नाहमिमं वेद। किञ्च यः पुरुषोऽ-नृतमभिवदति। स एष समूलः परिशुष्यति वै। सर्वात्मनागतसारो भवति। तेनार्जितं समस्तमपि सुकृतं नश्यतीति यावत्। यत एवं तस्माज्ज्ञात्वाऽपि न जानामीत्यनृतं वक्तुं दोषज्ञोऽहं नार्हामि नार्हो भवामीत्येवमनेकप्रकारतः प्रत्यायितः सलज्जया तूष्णीं किमप्य-वदन् रथमारुह्य प्रवव्राज। यथागतं तथा गतवान्। एवं तदाप्रभृति ज्ञातव्यतया मम हृदि वर्तमानं पुरुषं त्वां पृच्छामि किमिति असौ षोडशकलः पुरुषः क्वास्ते कश्चासौ षोडशकलः काश्च ताः कलाः कथं च षोडशकलः पुरुष इत्यादि ॥१॥

सान्वयानुवाद—अथ ह एनम् = इसके बाद इन महर्षि (पिप्पलाद) से, भारद्वाजः = भरद्वाज के पुत्र, सुकेशा = सुकेशा ने, पप्रच्छ-भगवन् = हे भगवन्!, कौसल्यः = कोसल देश में उत्पन्न, हिरण्यनाभः = हिरण्यनाभ नाम के किसी राजन्य बालक ने, माम् उपेत्य = मेरे पास आकर, एनं प्रश्नम् = यह प्रश्न, अपृच्छत = पूछा, भारद्वाज = हे भारद्वाज! षोडशकलम् = सोलह कलाओं वाले, पुरुषम् = पुरुष को, वेत्थ = जानते हो, तम् कुमारम् = उस कुमार से, अहम् = मैंने, अब्रुवम् = कहा,

अहम् = मैं, इमम् = इसे, न वेद = नहीं जानता, यदि = अगर, अहम् अवेदिषम् = मैं इसे जानता होता, ते = तुझे, कथम् न अवक्ष्यम् इति = क्यों नहीं कहता, एषः वै = यह (वह) निश्चय ही, समूलः = मूल के साथ, परिशुष्यति = सब ओर से सूख जाता है, यः = जो, अनृतम् = झूठ, अभिवदति = कहता है, तस्मात् = इसलिये, अनृतम् = झूठ, वक्तुम् = कहने में, न अर्हामि = समर्थ नहीं हूँ, सः = वह, तूष्णीम् = चुपचाप, रथम् = रथ पर, आरुह्य = सवार होकर, प्रवव्राज = चला गया, तम् = उसी बात को, त्वा = तुमसे, पृच्छामि = मैं पूछता हूँ, असौ पुरुषः = वह पुरुष, क्व इति = कहाँ है ? ॥१॥

व्याख्या—हे भारद्वाज ! सोलह कलाओं वाला कोई पुरुष है—यह सामान्यतः मैंने सुना है, उसे तुम विशेषरूप से जानते हो क्या ? वह पुरुष कौन है, कहाँ रहता है, क्या नाम है ? अगर उसे तुम जानते हो तब मुझे बताओ। सोलह कलाओं वाले पुरुष को मैं नहीं जानता, अगर मैं इस पुरुष को जानता तब तुम्हें क्यों नहीं बताता ? इसलिये मैं नहीं जानता हूँ। जो पुरुष झूठ कहता है उसके उपार्जित समस्त सुकृत भी नाश हो जाते हैं। धर्मशास्त्र का वचन है कि—

'स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसङ्कटे।
गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम्' ॥

स्त्रियों के मनाने में, हास-परिहास में, विवाह में, जीविका के विषय में, प्राण-सङ्कट में, गौ-ब्राह्मण की रक्षा के लिये एवं किसी की हिंसा हो रही हो तो झूठ बोलना भी निन्दित नहीं माना जाता है। वह कुछ भी न कहकर जैसे रथ पर सवार होकर आया था, वैसे ही लौट गया। अब मैं तुमसे उसी सोलह कलाओं वाले पुरुष के विषय में पूछ रहा हूँ ॥१॥

तस्मै स होवाच। इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्तीति ॥२॥

तत्त्वप्रकाशिका—इति पृष्टवते तस्मै स होवाच—प्राणाद्याः षोडशसंख्याकाः कला इहैवेति। हे सोम्य ! यस्मिन् पुरुषे, एता वक्ष्यमाणाः प्राणाद्याः षोडशसंख्याकाः कलाः स जीवस्य शरीरस्य भोगाः प्रभवन्ति यस्मादुत्पद्यन्ते यस्मिंश्च प्रविष्टा भवन्ति मुक्ताः सत्यो यमाश्रित्य वर्त्तन्ते। अनेन षोडशकलत्वं तस्य कथमिति परिहृतं भवति। स पुरुषः परमात्मा इहैवान्तःशरीरे हृदयपुण्डरीकाकाशमध्ये आस्ते नावश्यं तद्दर्शनाय दूरं गन्तव्यमित्यभिप्रायः ॥२॥

सान्वयानुवाद—सः ह = महर्षि पिप्पलाद ने, तस्मै = सुकेशा से, उवाच = कहा, सोम्य = हे सोम्य ! इह = यहाँ, अन्तःशरीरे = इस शरीर के अन्दर, एव = ही, सः पुरुषः = वह पुरुष (परमात्मा) है, यस्मिन् = जिसमें, एताः षोडश = ये सोलह, कलाः = कलाएँ, प्रभवन्ति इति = उत्पन्न होती हैं ॥२॥

व्याख्या—हे सोम्य ! जिस पुरुष में ये प्राण आदि सोलह संख्या वाली कलाएँ हैं वह जीव के शरीर का भोग जिससे उत्पन्न होती हैं और जिसमें प्रविष्ट होती हैं, मुक्त होकर जिसके सहारे रहती हैं इसके द्वारा उसका षोडशकलत्व इसका क्यों है परिहार हो जाता है। वह पुरुष परमात्मा इस शरीर के हृदयकमल आकाश के मध्य में ही विराजमान है। उसके दर्शन के लिए दूर नहीं जाना चाहिये—यही इस मन्त्र का अभिप्राय है ॥२॥

स ईक्षाञ्चक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति ॥३॥

स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनः। अन्नमन्नाद्वीर्यं तपो मन्त्राः कर्मलोका लोकेषु च नाम च ॥४॥

तत्त्वप्रकाशिका—यस्मिन्नेताः षोडशकलाः प्रभवन्तीत्युक्तं प्रपञ्चयते—स पुरुषः कल्पादौ कलाः सृजानीतीक्षाञ्चक्रे चिन्तितवान् पुनश्च कस्मिन् पुरुषे शरीरादुत्क्रान्तेऽहमुत्क्रान्तो भविष्यामि। कस्मिन् वा तत्र प्रतिष्ठितेऽहमपि प्रतिष्ठास्यामि प्रतिष्ठो भविष्यामि। कोऽनुमद्वशीकरणक्षमभक्तिज्ञानादिसम्पन्नो यं निमित्तीकृत्याहं कलाः सृजानीत्येवमीक्षित्वा तादृशः प्राणेति निश्चित्य सः पुरुषः प्राणमसृजत। प्राणात्प्राणं निमित्तीकृत्य श्रद्धां जीवस्यास्तिक्यनिष्ठामसृजत्। ततः खं वायुर्ज्योतिरापः पृथिवीत्येतानि शरीरोपादानभूतानि इन्द्रियं चक्षुरादिप्रवृत्तावुपकरणं मनः प्रधानकारणम्। अन्नं तत्स्थितिकारणं तस्माच्चान्नादन्नं निमित्तीकृत्य वीर्यं शरीरहेतुभूतं तपो जीवस्य ज्ञानादिहेतुतया सुखसाधनं मन्त्राः ऋगादिवेदाः ज्ञानादिहेतवः कर्म पुण्यापुण्यलक्षणं सुखादिनिमित्तं लोकाः गोलका इन्द्रियाश्रयीभूताः। नाम च देवदत्तादय इत्येताः कलापुरुषेण सृष्टा इत्यर्थः ॥३-४॥

सान्वयानुवाद—सः = उसने, ईक्षांचक्रे = ईक्षण किया, कस्मिन् उत्क्रान्ते = किसके निकल जाने पर, अहम् उत्क्रान्तः = मैं निकल जाऊँगा, वा = तथा, कस्मिन् प्रतिष्ठिते = किसके स्थित रहने पर, प्रतिष्ठास्यामि इति = मैं प्रतिष्ठित रहूँगा सः = उसने, प्राणम् असृजत = प्राण की रचना की, प्राणात् श्रद्धाम् = प्राण को निमित्त करके श्रद्धा अर्थात् जीव की आस्तिक्य निष्ठा को उत्पन्न किया, खम्, वायुः, ज्योतिः, आपः, पृथिवी = आकाश, वायु, तेज, जल और पृथिवी, मनः इन्द्रियम् = मन और चक्षु आदि इन्द्रियाँ, अन्नम् = अन्न, अन्नात् वीर्यम् = अन्न को निमित्त करके वीर्य शरीर के हेतुभूत, तपः = जीव के ज्ञानादि हेतुरूप से सुखसाधन, मन्त्राः = ऋग् आदि वेद सम्यक् ज्ञानादि के कारण, कर्म = पुण्यापुण्य शुभाशुभ, च लोकाः = और चौदह भुवन, लोकेषु नाम च = उन-उन लोकों में देवदत्त आदि नाम की रचना कलापुरुष ने किया है ॥३-४॥

व्याख्या—उस परमपुरुष परमात्मा श्रीपुरुषोत्तम ने कल्प के आदि में कलाओं को बनाया है। उसने विचार किया कि शरीर से पुरुष के निकल जाने पर मैं भी निकल जाऊँगा और उसके स्थिर रहने पर मैं भी स्थिर रहूँगा। कौन मुझे वशीकरण करने में समर्थ भक्ति व ज्ञानादि से सम्पन्न है जिसको निमित्त करके मैं कलाओं का निर्माण करूँ ? इस प्रकार निश्चय करके उसने प्राण की रचना की। उसके बाद अज्ञानी पुरुषों

को शुभ कर्मों में प्रवृत्त कराने वाली श्रद्धा अर्थात् आस्तिक्य निष्ठा का सृजन किया। उसके बाद आकाश, वायु, तेज, जल और पृथिवी इन पाँच महाभूत शरीर के उपादान रूप हैं। उपाधि भेद से प्राण, अपान, समान, व्यान और उदान तथा मन, बुद्धि, चित्त, अहङ्कार और अन्तःकरण ये पाँच मन की वृत्तियाँ हैं जो एक मन के ही अवान्तर भेद हैं। पाँच ज्ञानेन्द्रियाँ और पाँच कर्मेन्दियाँ हैं। मन की एक वृत्ति अभिमान भी है। अभिमान का आधार शरीर है (श्रीमद्भा. ५।११।९)। उसके बाद अन्न, वीर्य, तप, मन्त्र, कर्म, चौदह लोक और लोकों में सबके नाम तथा रूपों का कलापुरुष भगवान् श्रीपुरुषोत्तम ने सृजन किया है। भगवान् श्रीकृष्ण ने पञ्चमहाभूतों से मनुष्य, पशु-पक्षी, ऋषि और देवता आदि के शरीररूप पुरों की रचना की है तथा वे ही इन पुरों में जीवरूप से शयन करते हैं, इससे उनका एक नाम 'पुरुष' है। (श्रीमद्भा. ७।१४।३०)

स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे समुद्र इत्येवं प्रोच्यते। एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति तदेष श्लोकः ॥५॥

तत्त्वप्रकाशिका—स दृष्टान्तः यथा लोके इमा नद्यः स्यन्दमाना = स्रवन्त्यः, समुद्रायणाः समुद्रायनं गतिरात्मभावो यासां ताः समुद्रात्मिकाः समुद्रात् पृथक् स्थितिप्रतिपत्तिका भूत्वा समुद्रं प्राप्यास्तं गच्छन्ति अदर्शनं यान्ति तासां नदीनां नामरूपे गङ्गायमुना इत्यादिलक्षणे भिद्येते = विनश्यतः। तदेव दर्शयति—समुद्र इत्येवं प्रोच्यते। तथाऽस्य परिद्रष्टुरनुभवितुर्जीवस्य भोगोपकरणभूता इमाः षोडशापि कला निरुपाधिक-पुरुषशब्दप्रतिपाद्यं पुरुषं वासुदेवं प्राप्यास्तं गच्छन्ति। भोगाय समर्था न भवन्तीत्यर्थः। तत्र हेतुमाह—पुरुषायणा इति। परमात्मसङ्कल्पाधीनस्वरूपस्थितिप्रवृत्तिका इत्यर्थः। आसां कलानां नामरूपे नस्तः। तदेव स्पष्टयति—पुरुष इत्येवं प्रोच्यते एष जीवोऽकल इति प्रोच्यते। तत एवामृतो भवति। कलानिमित्तं हि मरणमस्येत्यर्थः। तत्परमात्म-स्वरूपमधिकृत्य वक्ष्यमाणः श्लोक इत्यर्थः ॥५॥

सान्वयानुवाद—सः = वह, यथा = जिस प्रकार, इमाः = ये, नद्यः = नदियाँ, स्यन्दमानाः = बहती हुई, समुद्रायणाः = समुद्र की ओर जाती हुई, समुद्रम् = समुद्र को, प्राप्य = पाकर, अस्तं गच्छन्ति = अदर्शन हो जाती हैं, च = और, आसाम् = इनके, नामरूपे = नाम-रूप, भिद्येते = विनष्ट हो जाते हैं, समुद्रः इति एवम् = यह समुद्र है इस प्रकार, प्रोच्यते = कहा जाता है, अस्य परिद्रष्टुः = सब ओर से देखने वाला इस (जीव का), इमाः = ये, षोडशकलाः = सोलह कलाएँ, पुरुषायणाः = जिनका परमात्मा के अधीन स्वरूप स्थिति प्रवृत्ति है, पुरुषम् = परमात्मा श्रीपुरुषोत्तम को, प्राप्य = पाकर, अस्तं गच्छन्ति = भोग के लिए समर्थ नहीं हो सकते हैं, च = और, आसाम् = इनके, नामरूपे = नाम-रूप, भिद्येते = नहीं होते हैं, पुरुषः इति एवम् = यह पुरुष है इस प्रकार, प्रोच्यते = कहा जाता है, सः एषः = वही यह,

अकलः = कलारहित, अमृतः = मृत्युरहित, भवति = होता है, तत् एषः श्लोकः = उस परमात्मस्वरूप का अधिकार करके कहा जानेवाला यह श्लोक है ॥५॥

व्याख्या—जिस प्रकार लोक में नदियाँ बहती हुई समुद्र अयन गमनात्मभाव जिनके वे (नदियाँ) समुद्रात्मिका समुद्र से अलग स्थिति प्रतिपत्तिका होकर समुद्र को पाकर अदर्शन (लोप) हो जाती हैं। उन नदियों के गङ्गा तथा यमुना इत्यादि लक्षण विनष्ट हो जाते हैं। वैसे ही अनुभव करनेवाले जीव का भोगों के उपकरणरूप पहले मन्त्र में बतायी हुई सोलह कलाएँ भी निरुपाधिक पुरुषशब्दप्रतिपाद्य पुरुष वासुदेव को पाकर भोग के लिए समर्थ नहीं हो सकता है। उसमें हेतु देते हैं—पुरुषायणाः अर्थात् परमात्मा के ही सङ्कल्पाधीन स्वरूप-स्थिति-प्रवृत्तिवाले हैं। उस समय इन सोलह कलाओं के नाम-रूप नहीं होते। यह जीव अलग (कलारहित) है—ऐसा कहा जाता है, उसके बाद अमृत होता है। कलानिमित्त ही इसका मरण है। उस परमात्मस्वरूप का अधिकार करके बताया जाने वाला यह मन्त्र है—॥५॥

अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः। तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति ॥६॥

तान् होवाचैतावदेवाहमेतत्परं ब्रह्म वेद। नातः परमस्तीति ॥७॥

ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति। नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥८॥

इत्यथर्ववेदीयप्रश्नोपनिषदि षष्ठः प्रश्नः ॥६॥

तत्त्वप्रकाशिका—अरा रथनाभाविव कलाः = प्राणाद्या यस्मिन् प्रतिष्ठितास्तं वेद्यं पुरुषार्थकामैर्ज्ञातव्यं पुरुषं = वासुदेवं वेद यथा जानीध्वं हे शिष्या इति कस्यचिद्वाक्यम्। ततश्च मृत्युः संसारो वो युष्मान् मा परिव्यथाः = मा परिव्यथयतु परमपुरुषाज्ञाने संसारव्यथा भवेत् सा भवतां मा भवत्विति। एतत् प्रश्नवचनार्थं प्रसङ्गादुपसंहरति—अत इति। एवं पिप्पलादस्तेभ्यस्तत्त्वमुपदिश्य तान् भारद्वाजादीन् प्रत्युवाच। किल एतत्। उक्तलक्षणं परं ब्रह्म अहमेतावदुक्तमात्रमेव वेद नातः परं मया विदितमस्तीति। एवमुपदिष्टास्ते मुनयस्तमाचार्यमर्चयन्तः प्रणामादिना पूजयन्तः इदमूचुः। भगवंस्त्वं हि नः पिता = निरुपाधिकोपकारकः कथं यस्त्वमस्माकम्। अविद्यायाः परं पारं तारयसि = अतारयः। को हि नामैवमुपकुर्यादिति। एतमाख्यायिकां समाप्य वेदपुरुषः शिष्यशिक्षार्थमाह-नमः परमऋषिभ्यः। द्विर्वचनमादरार्थम्।

अनादिनिवृत्तपथप्रवर्त्तकब्रह्मविद्योपदेशकलोकाचार्यश्रीसनन्दनादिप्रवर्तितश्री १०८
महामुनीन्द्रभगवन्निम्बार्काचार्यचरणोपबृंहितवैदिकसत्सम्प्रदायानुगतपूज्यपाद-
निखिलरसिकचूडामणिश्री १०८ स्वामिहरिदासपदाश्रिताश्रितपरम-
विरक्तमहानुभावश्री १०८ स्वामिनीशरणपादपद्मचञ्चरीकेण विदुषा
श्रीअमोलकरामेण पूर्वाचार्योक्तितः संगृहीता तत्त्वप्रकाशिका-
टीकासंवलिता इति प्रश्नोपनिषद्।

सान्वयानुवाद—इव (यथा) = जिस प्रकार, रथनाभौ = रथ की नाभि पर, अराः = अरे लगे रहते हैं, (तथा) यस्मिन् = जिसमें, कलाः = कलाएँ, प्रतिष्ठिताः = प्रतिष्ठित हैं, तम् वेद्यम् पुरुषम् = उस जानने योग्य पुरुष को, वेद = जानो, यथा = जिससे, (हे शिष्यो !) वः = तुम लोगों को, मृत्युः = मृत्यु, मा परिव्यथाः = व्यथा (कष्ट) न दे सके ॥ तान् ह उवाच = उन शिष्यों से महर्षि ने स्पष्ट कहा— एतत् परम् ब्रह्म = इस परम ब्रह्म को, अहम् = मैं, एतावत् एव = इतना ही, वेद = जानता हूँ, अतः परम् = इससे आगे, न अस्ति इति = नहीं है ॥ ते = उन छः मुनियों ने, तम् अर्चयन्तः = आचार्य पिप्पलाद का पूजन किया, त्वम् हि = आप ही, नः = हमारे, पिता (हैं), यः = जिन्होंने, अस्माकम् = हम लोगों को, अविद्यायाः = अविद्या के, परम् पारम् = दूसरे पार, तारयसि इति = पहुँचा दिया है, नमः परमऋषिभ्यः = श्रेष्ठ ऋषि के लिये नमस्कार है, नमः परमऋषिभ्यः = श्रेष्ठ ऋषि के लिये नमस्कार है ॥६-८॥

व्याख्या—शरीर छोड़ने वाले जीवात्मा के जो उसके उपकरणरूप ये—१. नाम, २. वाग्, ३. मन, ४. सङ्कल्प, ५. चित्त, ६. विज्ञान, ७. ध्यान, ८. बल, ९. अन्न, १०. जल, ११. तेज, १२. आकाश, १३. स्मर, १४. आश, १५. और १६. प्राण—इन सोलह कलाओं में कर्मव्यतिरिक्त पन्द्रह कलाएँ हैं वे अपने कारण को प्राप्त होती हैं। इन्द्रियाँ उनके अधिष्ठाता सूर्यादि में संयोगविशेष को प्राप्त होती हैं और उनके जो किये गये कर्म अप्रवृत्त फल हैं वे सब तथा विज्ञानमय जीवात्मा परब्रह्म में एक हो जाते हैं ॥७॥

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् नामरूपाद् विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥८॥

तत्त्वप्रकाशिका—यथेति। यथा स्यन्दमानाः = गच्छन्त्यो नद्यः समुद्रं प्राप्य नामरूपे विहाय च भगवतीभागरथीत्यादिशुक्लानीलेत्यादिनामरूपाभ्यां विमुक्ताः सन्त्यो-ऽस्तं गच्छन्ति समुद्रे = समुद्रसाधारणनामरूपे भजन्ति। तथा विद्वान् अपि नामरूपाद् = देवदत्ततिर्यगादिलक्षणाद्, विमुक्तः परात्परं पुरुषं परमात्मानमुपैति। परमात्मासाधारण-नामरूपे सत्यं ज्ञानमित्यादिश्रुत्युक्तसत्यज्ञानादिनाम 'आदित्यवर्णं तमसः परस्तादि'त्यादि श्रुत्युक्ताप्राकृतरूपं च प्रश्नोपनिषदि स्पष्टम्। यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे समुद्र इत्येवं प्रोच्यत इत्यादिना ॥८॥

सान्वयानुवाद—यथा = जिस प्रकार, स्यन्दमानाः = बहती हुई, नद्यः = नदियाँ, नामरूपे = नामरूप को, विहाय = छोड़कर, समुद्रे = समुद्र में, अस्तं गच्छन्ति = डूब या मिल जाती हैं, तथा = उसी प्रकार, विद्वान् = तत्त्वज्ञानी, नामरूपात् = नामरूप से, विमुक्तः = मुक्त होकर, परात्परम् दिव्यम् पुरुषम् = परात्पर दिव्य पुरुष परमात्मा को, उपैति = प्राप्त हो जाता है ॥८॥

व्याख्या—इस मन्त्र का सारांश यह है कि—जिस प्रकार शुक्ला भगवती गङ्गा, नीला यमुना इत्यादि नदियाँ पर्वतों से निकलती हैं और उनके जल स्वयं ही नीचे की ओर बहते हुए समुद्र में जाकर मिल जाते हैं। उस समय वे शुक्ला और नीले रङ्ग की मालूम नहीं पड़ती हैं। उसी प्रकार विद्वान् पुरुष भी नामरूप से मुक्त होकर परात्पर दिव्य पुरुष परमात्मा को प्राप्त हो जाता है ॥८॥

स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति।
तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥९॥

तत्त्वप्रकाशिका—स इति। यः कश्चिद्ध वै किल लोकं तत्परमं ब्रह्म वेद स ब्रह्मैव भवति। ध्वस्तावरणप्रभाविशिष्टदीपवदाविर्भूतबृहज्ज्ञानगुणविशिष्टो भवतीत्यर्थः। आनुषङ्गिकप्रयोजनमाह—नास्य विदुषः कुले अब्रह्मविद् भवति। किञ्च शोकमिष्ट-वैकल्यनिमित्तं मानसं तापं पापं च तरति = अतिक्रामति। गुहाग्रन्थिभ्यः = अनादि-कर्मनिरूपितमायासम्बन्धतत्कार्यरागद्वेषादिभ्यो विमुक्तः सन् अमृतो मुक्तो भवत्याविर्भूता-पहतपाप्मत्वादिगुणाष्टकविशिष्टो भवतीत्यर्थः ॥९॥

व्याख्या—यह बिल्कुल ही सच्ची बात है कि जो कोई उस परम ब्रह्म को जान लेता है वह ब्रह्म ही हो जाता है। अर्थात् अज्ञान से ज्ञान ढका हुआ है, अज्ञान का पर्दा विध्वंस हो जाने पर प्रभाविशिष्ट दीप की भाँति आविर्भूत बृहद् ज्ञान व गुणों से वह विशिष्ट हो जाता है। आनुषङ्गिक प्रयोजन बताते हैं—इस विद्वान् के कुल में ब्रह्म को न जानने वाला कोई नहीं होता है। ब्रह्मवित् होने के कारण वह शोक से पार हो जाता है और पाप से तर जाता है। इष्ट वैकल्य निमित्त मानस सन्ताप ही शोक है। अनादि कर्मनिरूपित माया का सम्बन्ध और उसका कार्य राग-द्वेषादि से मुक्त होकर वह अमृत (मुक्त) हो जाता है तथा आविर्भूत अपहत-पाप्मत्वादि गुणाष्टक से विशिष्ट हो जाता है ॥९॥

तदेतदृचाऽभ्युक्तम्—
क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः।
तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् ॥१०॥

तत्त्वप्रकाशिका—एतद्ग्रन्थद्वारकब्रह्मविद्यासम्प्रदाने विधिमुपदर्शयन्नुपसंहरति—तदिति। तद्विद्यासम्प्रदानविधानमभिमुखीकृत्य ऋचा = मन्त्रेणोक्तं, क्रियावन्तः = नित्य-नैमित्तिककर्मानुष्ठानयुक्ताः, श्रोत्रियाः = अधीतश्रुतयः, ब्रह्मनिष्ठाः = ब्रह्मबोद्धुमिच्छवः, श्रद्धयन्तः सन्तः, एकऋषि एकर्षिरूपात्रसाध्यतया एकर्षिशब्दोदितमग्निहोत्रं स्वयं जुह्वते, ये तेषामेवैतां ब्रह्मप्रतिपादिकामुपनिषद्रूपां विद्यां प्रब्रूयात्। शिरोव्रतं = शिर-स्यङ्गारधानिकाधारणलक्षणाथर्वणानां वेदव्रतत्वेन प्रसिद्धं यैस्तु यथाविधि चीर्णमनुष्ठितं तेषामेव च वदेत नान्येषाम् ॥१०॥

व्याख्या—उस ब्रह्मविद्या के सम्प्रदान-विधान को सम्मुख करके इस मन्त्र से

कहा गया है कि जो नित्य प्रातःसन्ध्या-वन्दनादि, नैमित्तिक एकादशीव्रत, सूर्य व चन्द्र-ग्रहण में स्नान-दानादि सत्कर्मों का अनुष्ठान करनेवाले, श्रुतियों को पढ़ने वाले, ब्रह्म को जानने की इच्छा रखने वाले श्रद्धा रखते हुए स्वयं अग्नि में हवन करते हैं और जिन्होंने विधिवत् शिरोव्रत का अनुष्ठान किया है उन्हीं को यह ब्रह्मविद्या बतलावे, दूसरों को नहीं ॥१०॥

तदेतत्सत्यमृषिरङ्गिराः पुरोवाच नैतदचीर्णव्रतोऽधीते ।
नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥११॥

इति तृतीयमुण्डके द्वितीयः खण्डः ।

इति मुण्डकोपनिषत्समाप्ता ॥

•

तत्त्वप्रकाशिका—तदेतत् सत्यमक्षरमङ्गिरा ऋषिः पूर्वं शौनकाय यथोवाच तथाऽन्योऽपि मुमुक्षवे ब्रूयात्। एतद्ग्रन्थरूपमचीर्णव्रतो नाधीते = न पठति। इयं ब्रह्मविद्या येभ्य ऐतिह्यक्रमेण प्राप्ता तान् ब्रह्मादीन् नमस्यति नम इति, द्विर्वचनं विद्यासमाप्तिद्योतनपरम्। सर्वोऽयं मुण्डकग्रन्थः परमात्मपरः। इति प्रथमाध्यायद्वितीयतृतीयपादयोरदृश्यत्वादिगुणको धर्मोक्तेः द्युभ्वाद्यायतनस्वशब्दादित्यधिकरणद्वयकौस्तुभप्रभायां द्रष्टव्यः ॥११॥

॥ इति तृतीयमुण्डके द्वितीयः खण्डः ॥

मुण्डकोपनिषद्व्याख्या मिताऽस्तु सुगमाक्षरा।
सङ्गृहीता मया स्वीयबोधाय नान्यबुद्धये ॥१॥
श्रीमुकुन्दप्रसादेन लब्धवेदान्तबुद्धिना।
ईक्षणीया मुदा सद्भिश्चापल्यं क्षम्यतां मम ॥२॥

इति सनकसम्प्रदायप्रवर्त्तकाद्याचार्य श्री १०८ श्रीमहामुनीन्द्रभगवन्निम्बार्काचार्योपबृंहितवैदिकानादिसत्सम्प्रदायानुगतनिखिलशास्त्रपारावारीणातिसृत्वरकीर्तिधवलीकृतदिङ्मण्डलेन स्वाभाविकद्वैताद्वैतसिद्धान्तसमर्थनदक्षजगद्विजय्याचार्य श्री १०८ केशवकाश्मीरिभट्टेन निर्मिता मुण्डकोपनिषद्व्याख्या सम्पूर्तिमगात्।

व्याख्या—उस ब्रह्मविद्यारूप इस सत्य (अक्षर) को अङ्गिरा ऋषि ने पहले शौनक ऋषि को जैसे उपदेश दिया था वैसे ही दूसरा व्यक्ति भी मुमुक्षु को उपदेश करे। जिसने विधिवत् शिरोव्रत का अनुष्ठान नहीं किया हो, वह इसे नहीं पढ़ सकता है। परम ऋषियों को नमस्कार है, परम ऋषियों को नमस्कार है। इस प्रकार दो बार ऋषियों को नमस्कार विद्या की समाप्ति का द्योतक है ॥११॥

ॐ भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः ! शान्तिः !! शान्तिः !!!

(पाठकवृन्द शान्ति पाठ का अर्थ उपनिषद् के प्रारम्भ में देखें ।)

इति श्रीमन्निम्बार्कमहामुनीन्द्रमतानुवर्त्ति श्रीमत्परमहंसपरिव्राजकाचार्यत्याग-
मूर्त्तिस्वामिधनञ्जयदासजीकाठियाबाबा तर्क-तर्कव्याकरणतीर्थपाद-
पद्मान्तेवासी योगिराजस्वामिराधाविहारिदासजी काठियाबाबा-
चरणारविन्दचञ्चरीक डॉ. स्वामी द्वारकादासजी
काठियाबाबा कृत अन्वयार्थ-तत्त्वप्रभा
नाम्नी हिन्दी टीका में अथर्ववेदीय
मुण्डकोपनिषद् समाप्त ।

●

माण्डूक्योपनिषद्

शान्तिपाठः

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितं यदायुः॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

(इसका अर्थ मुण्डकोपनिषद् के प्रारम्भ में देखें।)

आनन्दमजरं नित्यं निखिलं गुणसागरम्।
राधारमणमिष्टार्थं प्रपद्ये पुरुषोत्तमम्॥१॥
पान्तु नो वासुदेवस्य श्रीपादाम्बुजरेणवः।
मूर्ध्नि दधुर्विधीशेन्द्रा यान्निजाभीष्टप्राप्तये॥२॥
निम्बभानुपदद्वन्द्वं प्रणमामि मुहुर्मुहुः।
यद्वन्दनेन मन्दोऽपि लभते तत्समानताम्॥३॥
श्रीनिवासं गुरुं वन्दे करुणावरुणालयम्।
बादरायणसूत्राणां भाष्यकारं मुनीश्वरम्॥४॥
नत्वाऽन्यान् देशिकान् मान्यान् पूर्वाचार्योक्तितः खलु।
माण्डूक्योपनिषद्व्याख्यां करिष्येऽहं यथामति॥५॥

विषयविरक्तस्य शमदमादिसाधनसम्पन्नस्य भगवद्दिदृक्षालम्पटस्य गुरुभक्तिसम्पन्नस्य मुमुक्षोरनिष्टनिवृत्तिपूर्वकं परमानन्दावाप्तये समस्तव्यस्तप्रणवप्रतिपाद्यस्य भगवतो वासुदेवस्य रमाकान्तस्योपास्तिमाह—

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव॥१॥

तत्त्वप्रकाशिका—अव रक्षणगतिकान्तिप्रवेशेत्यादिधातोः प्रवेशार्थकस्यावतेः कर्मणि मनिन् प्रत्यये टेर्लोपे 'ज्वरत्वरे'त्यादिनोपधाकारस्य वकारस्य चोठि सवर्णे दीर्घे च सति ऊम् इति जायते। 'सार्वधातुकार्धधातुकयोरि'ति गुणे च सति ओमिति निष्पन्नम्। ओतं प्रविष्टं चेतनाचेतनजातमस्मिन्नित्योम् ओमिति प्रणवप्रतिपाद्यं यत् तदेतदक्षरं सत्यं ब्रह्मैव सन्निकृष्टतरवस्तुवाचको ह्येतच्छब्दः। परमात्मनः सर्वान्तरयामित्वेन सन्निहितत्वादेतदित्युच्यते। तदिदं प्रणववाच्यं ब्रह्मगुणपूर्णत्वात् सर्वमित्युच्यते। प्रागुपदर्शितं प्रणवस्याभिधेयमुक्तं प्रवृत्तिनिमित्तं किमिति जिज्ञासायां त्रिकालातीतत्वमित्याह—

तस्येत्यादिना। तस्य परब्रह्मण उप समीपे वाचकत्वेन स्थितस्योङ्कारस्य विशेषणाख्यानं प्रवृत्तिनिमित्तं कथ्यत इत्यर्थः। तत्किमित्यत आह–भूतमिति। ओमित्युक्तं ब्रह्मभूतं भवद् भविष्यमिति योजना कालत्रये विद्यमानमक्षरं ब्रह्म सदैकरसमित्यर्थः। इदं सर्वमित्युक्तं पूर्णत्वमक्षरादन्यस्य नेत्याह—सर्वमोङ्कार एवेति। ओङ्कार एव सर्वमिति योजना भूतं भवद् भविष्येत्युक्तं प्रवृत्तिनिमित्तं त्रिकालातीतं यच्चेत्यादिना। कालत्रयविकाररहितं त्रिकालातीतञ्च यदन्यद्वस्त्वस्ति तदप्योङ्कार एव। ओङ्पदवाच्यमक्षराख्यं ब्रह्मैव न ततोऽन्यत्तादृशमित्यर्थः ॥१॥

सान्वयानुवाद—ॐ इति एतत् = ओम् ऐसा यह, अक्षरम् = अक्षर, इदम् सर्वम् = यह सब, तस्य = उसका, उपव्याख्यानम् = उपव्याख्यान है, भवत् = वर्त्तमान, भविष्यत् = भविष्य, भूतम् = जो बीत चुका है, इति सर्वम् = यह सब, ओङ्कार एव = ओङ्कार ही है, च = और, यत् = जो, त्रिकालातीतम् = तीनों कालों से अतीत, अन्यत् = दूसरा, तदपि = वह भी, ओङ्कार एव = ओङ्कार ही है ॥१॥

व्याख्या—विषयों से विरक्त, शम-दम आदि साधनों से सम्पन्न श्रीभगवान् को देखने के लिये उत्कट लालसा गुरुभक्तिसम्पन्न मुमुक्षु पुरुष की अनिष्ट निवृत्तिपूर्वक परमानन्द की प्राप्ति के लिए समस्त-व्यस्त प्रणवप्रतिपाद्य भगवान् श्रीपुरुषोत्तम की उपासना को बताते हैं—स्थावर-जङ्गम रूप सम्पूर्ण जगत् इसमें प्रविष्ट है, ऐसा यह ओम् है। ओम् ऐसा प्रणवप्रतिपाद्य जो वह यह अक्षर सत्य ब्रह्म ही सन्निकृष्टतर वस्तु-वाचक ही एतत् शब्द है। परमात्मा सर्वान्तर्यामिरूप से सन्निहित रहने से 'एतत्' ऐसा कहा जाता है। अर्थात् परमात्मा में सर्वान्तर्यामित्व सन्निहित है। वही यह प्रणववाच्य ब्रह्म के गुण पूर्णत्व होने से 'सर्व' (सब कुछ) ऐसा कहा जाता है। पहले दर्शाया गया प्रणव का अभिधेय उक्त प्रवृत्तिनिमित्त क्या है? इस जिज्ञासा पर कहते हैं—त्रिकालातीतत्व उस परब्रह्म के समीप में वाचक रूप से स्थित ओङ्कार का विशेष आख्यान प्रवृत्तिनिमित्त कहा जाता है। वह कौन है? इस पर कहते हैं—ओम् इस प्रकार कहा गया ब्रह्मरूप भूत, भविष्य और वर्त्तमान तीनों कालों में विद्यमान अक्षरब्रह्म सदा एकरस है। यह सब इस प्रकार बताया गया है–पूर्ण अक्षर से दूसरा नहीं है; यह भी कहा गया है कि प्रवृत्तिनिमित्त तीनों कालों से अतीत और अक्षर से दूसरा कोई तत्त्व नहीं है। यच्च इत्यादि से तीनों कालो में विकार रहित और तीनों कालों से अतीत जो अन्य वस्तु है वह भी ओङ्कार ही है। 'ओङ्' पदवाच्य अक्षर नामक ब्रह्म ही है, उससे दूसरा वैसा नहीं है ॥१॥

सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥२॥

तत्त्वप्रकाशिका—ब्रह्मणः पूर्णत्वं कुत इत्यतस्तत्र प्रमाणं सूचयन्नाह—एतद् ब्रह्मोङ्कारप्रतिपाद्यमक्षराख्यं परं ब्रह्म सर्वं गुणपूर्णमित्येतत् हि पूर्णमद इत्यादि-श्रुतिप्रसिद्धम्। चतुर्मुखप्रभृतीनां प्रत्यगात्मनां नियन्तुः कस्यचित् पूर्णत्वत्रिकालातीत-त्वयोः स्वीकर्तव्यत्वादवधारणमयुक्तमित्यतः सोऽपि परमात्मेवेत्याह—अयमात्मा ब्रह्मै-

वेति। चतुर्मुखादिषु स्थितोऽयमात्माऽनादि कर्त्ता प्रतीयते सोऽपि ओङ्कारपदवाच्यो भगवान् वासुदेव एवेत्यर्थः। एवं समस्तप्रणवप्रतिपाद्यभगवदुपास्तिमभिधायेदानीं प्रणवांशाका-रमकारोकारनादप्रतिपाद्यानां विश्वतैजसप्राज्ञतुरीयाणामुपास्तिम्, अकारः प्रथममात्रेत्यत्र वक्तुमादौ प्रस्तावयति—सोऽयमात्मेति। यः चतुर्मुखादीनामादानकर्तृत्वेनाभिहितः सोऽय-मात्मोङ्कारवाच्यो भगवान् चतुष्पात्। चत्वारः पादा अंशा यस्यासौ चतुष्पादित्यर्थः ॥२॥

ननु के ते चत्वारः पादाः कानि च तेषां स्थानानि कश्च तेषां व्यापारः किंविधं च रूपं किञ्च तेषां भोग्यमित्यतो नान्तःप्रज्ञमित्यादिना वक्तुं विश्वतैजसप्राज्ञानां स्थानादीनि तावदाह–जागरितस्थान इत्यादिना। तृतीयः पाद इत्यनेन तत्र विश्वस्य स्थानादिकं दर्शयति।

सान्वयानुवाद—हि = चूँकि, एतत् = यह, सर्वम् = सब, ब्रह्म = ब्रह्म है, अयम् = यह, आत्मा = परमात्मा, ब्रह्म = ब्रह्म है, सः = वह, अयम् = यह, आत्मा = परमात्मा, चतुष्पात् = चार चरणोंवाला है ॥२॥

व्याख्या—ब्रह्म के पूर्णत्व का प्रतिपादन करते हुए १. जगत्पाद, २. जीवपाद, ३. ईश्वरपाद और ४. अक्षरपाद–इस प्रकार श्रुतियों में जगह-जगह चतुष्पाद ब्रह्म के स्वरूप का निरूपण किया गया है। यह ओङ्कारप्रतिपाद्य अक्षर नामक परब्रह्म सब गुणों से पूर्ण है। श्वेताश्वतरोपनिषद् में उल्लिखित है—'उद्गीतमेतत्परमं तु ब्रह्म तस्मिंस्त्रयं सुप्रतिष्ठाक्षरञ्च' ॥ अर्थात्—यह परब्रह्म वेदान्त में वर्णित है, उनमें तीन (जीव, जगत्, ईश्वर ये तीन) सुप्रतिष्ठित हैं और वह अक्षर रूप से वर्त्तमान है। यद्यपि इस वाक्य में केवलमात्र अक्षरपाद का ही स्पष्ट रूप से उल्लेख है, अन्य तीन रूपों का स्पष्ट रूप से उल्लेख नहीं है तथापि वही श्वेताश्वतरोपनिषद् में स्पष्ट रूप से वर्णित है—'ज्ञाज्ञौ द्वावजावीशानीशावजा .....ह्यकर्त्री त्रय यदा विन्दते ब्रह्ममेतत्' ॥ अर्थात्—ज्ञ = सर्वज्ञ ईश्वर, अज्ञ = असर्वज्ञ = अल्पज्ञ अर्थात् अनीश्वर जीव, ये दोनों ही अज = जन्मरहित हैं और भोक्ता = जीव के भोग्य विषय सम्पादन में नियुक्ता प्रकृति भी अजा है। जब अज्ञ जीव उन तीनों रूपवाले ब्रह्म को प्राप्त होता है तब ब्रह्म से अभिन्न हो जाने से वह भी अनन्त, विश्वरूप और अकर्त्ता हो जाता है। ऊपर बताये गये प्रकार से श्रुति, बादरायणप्रणीत ब्रह्मसूत्र और उसके निम्बार्कभाष्य में ब्रह्म के जगत्पाद, जीवपाद, ईश्वरपाद और अक्षरपाद इस प्रकार चतुष्पाद कहे गये हैं। और—

'पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते' ॥

अर्थात् वह इन्द्रिय आदि से अतीत कारण रूप ब्रह्म 'पूर्ण है', यह कार्यात्मक जगद्रूप ब्रह्म भी पूर्ण है। पूर्ण कारणरूप ब्रह्म से पूर्ण जगद्रूप कार्य अभिव्यक्त होता है, पूर्णरूप इस कार्यात्मक जगत् के पूर्णत्व को ग्रहण करके प्रलयकाल में पूर्ण ब्रह्म ही अवशिष्ट (शेष) रहता है। इस वाक्य में ब्रह्म जो चतुष्पाद है, वेद ने उसी का प्रतिपादन किया है। कौन वे चार चरणों वाले हैं और कितने उनके स्थान हैं, कौन-सा उनका

व्यापार है, किस प्रकार उनका रूप है और उनका भोग्य क्या है, कैसा है ? श्रुति उसी विश्व के स्थानादि को दिखलाती है—

जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः ॥३॥

तत्त्वप्रकाशिका—जागरितं स्थानमक्ष्यादिरूपं यस्यासौ तथोक्तः। चक्षुःस्थान इत्यर्थः। बहिःप्रज्ञः = बहिष्ठं वस्तु ज्ञापयति बाह्यपदार्थविषयकसंविति निर्मितिति यावत्। सप्ताङ्गः = द्वौ पादौ चत्वारो हस्ता हस्तिकर इति सप्ताङ्गवान्। एकोनविंशतिमुखः। तत्राष्टादशमुखानि प्रमाकाराणि, मध्यमं तु गजाकारमिति शेषः। स्थूलभुक्—स्थूलान् = बाह्यान् विषयान्, जीवेन्द्रियद्वारा भुङ्क्ते इत्यर्थः। वैश्वानरः = विश्यते ज्ञानेन प्रविश्यते इति व्युत्पत्त्या ज्ञानविषयीभूतं स्थूलं विश्वशब्दोक्तं भोक्तृत्वेन तत्सम्बन्धी वैश्वः अनशनान्तरः वैश्वश्चासौ नरश्चेति वैश्वानरः। विश्व इति यावत्। प्रथमः = पादः प्रथमांशः ॥३॥

व्याख्या—जाग्रत् स्थान अक्षि (नेत्र) आदि रूप जिसका वह जागरित (जाग्रत्) स्थान है। जागतिक वस्तु को जाननेवाला बाह्य पदार्थ विषयक ज्ञानवान्। सात अङ्ग हैं-दो पैर, चार हाथ और अङ्गुलि सात अङ्गोंवाला। उसमें अठारह मुख प्रमाकार तथा बीच का गजाकार। स्थूल बाह्य विषयों को जीव इन्द्रिय द्वारा भोगता है, ज्ञान के द्वारा प्रवेश करता है-इस व्युत्पत्ति से ज्ञान का विषय स्थूल विश्व शब्द से कहा गया भोक्तृत्व, उससे सम्बन्ध रखनेवाला वैश्व है। जो विश्व अर्थात् बहुत हो और नर हो उसे वैश्वानर कहते हैं। अर्थात् संक्षेप में यह कह सकते हैं कि विश्वरूप सर्वरूप नराकार वैश्वानर परमात्मा ही है। वैश्वानर सनातन पूर्णब्रह्म परमात्मा का पहला पाद है ॥३॥

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः ॥४॥

तत्त्वप्रकाशिका—एवं विश्वस्य स्थानादिकं निरूप्य तैजस्य स्थानादिकं निरूपयति—स्वप्नं = मनोरूपं स्थानं यस्यासौ तथोक्तः। अन्तःप्रज्ञः = अन्तःस्थितवासनामयपदार्थान् प्रकर्षेण ज्ञापयति जानाति चेत्यन्तःप्रज्ञ इति, जानातेः कः। सप्ताङ्ग एकोनविंशतिमुख इति पूर्ववद् व्याख्येयम्। प्रविविक्तभुक् = जाग्रत्पदार्थानुभवजन्यवासनोत्पादकत्वेन तद्रूपत्वात् स्वप्नस्थितं वस्तु जाग्रत्पदार्थविलक्षणत्वात् प्रविविक्तमुच्यते। तद्भुङ्क्ते तदनुभवजन्यभोगवानित्यर्थः। तैजसो द्वितीयः पादो द्वितीयांशः ॥४॥

व्याख्या—मनोरूप स्थान जिसका है, अन्तःप्रज्ञः = भीतर स्थित वासनामय पदार्थों को अच्छी तरह से जानता है, सात अङ्गोंवाला—पूर्वोक्त एकोनविंशति मुख, जाग्रत् पदार्थों का अनुभवजन्य कर्म वासनाओं को उत्पन्न करने वाला उसी रूप होने से स्वप्न स्थित वस्तु जाग्रत् पदार्थों से विलक्षण होने से प्रविविक्त कहा जाता है। उसी को भोगता है, उसके अनुभवजन्य भोगवाला तैजस का द्वितीय (दूसरा) पाद (अंश) है ॥४॥

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ॥५॥

तत्त्वप्रकाशिका—एवं विश्वतैजसयोः स्थानं निर्वाच्य प्राज्ञस्य स्थानं प्रदर्शनपर उत्तरग्रन्थः प्राज्ञस्य सुषुप्तिस्थानं कीदृशमिति जिज्ञासायां लक्षणोक्त्याऽऽदौ तन्निरूपयति—यत्र यस्यामवस्थायां सुप्त अज्ञानावृतः। मन आदीन्द्रियाणामुपरतत्वात् न कामं काम्यमानमर्थं न कामयते न कञ्चन स्वप्नपदार्थं पश्यति तत् स्थानं सुषुप्तमित्युच्यते। सुषुप्तमेव स्थानं यस्य स सुषुप्तस्थानः हृदयाकाशरूप इति यावत्। एकीभूतः प्रत्यहं विश्वतैजसाभ्यामेकीभावस्यापद्यमानत्वेनैकीभूत इत्युच्यते। प्रज्ञानघन एव। सुषुप्तिसमये घनं तज्जीवं जानाति प्रज्ञापयति जीवस्येति प्रज्ञानघनः। प्रपूर्वादन्तर्णीतण्यर्थाज्ज्ञा अवबोधन इति। 'कृत्यल्युटो बहुलम्' (पा.सू.३।३।११३) बहुलग्रहणात्कर्मणि ल्युट्यनादेशे प्रज्ञानः प्रज्ञापितो घनो जीवो येन स प्रज्ञानघन इति विग्रहः। आनन्दमयः आनन्दप्रचुरः, पूर्णानन्द इति यावत्। आनन्दभुक् विषयभोगं विनाऽप्यभिव्यक्तकेवलस्वरूपभूतानन्दभुक्। तेन विश्वतेजसोर्व्यावृत्तिः। तयोः स्थूलान्तरविषयभोगेनानन्दोक्तेः। हीत्येतदुभयं विशेषानन्तशक्तिभ्याम् उपपन्नमिति प्रसिद्धं सूचयति। चेतोमुख = ज्ञानरूपमुखः। मुखेत्युपलक्षणं, ज्ञानरूपसर्वावयव इत्यर्थः। एतादृशः प्राज्ञः तृतीयः पादः तृतीयोंऽशः, आनन्दमयत्वं चेतोमुखत्वं यत्प्राज्ञस्य कथितं तदितररूपत्रयेऽपि बोध्यम् ॥५॥

व्याख्या—जिस अवस्था में सोया हुआ व्यक्ति अज्ञान से आवृत रहता है, मन आदि इन्द्रियों के उपरत हो जाने से काम्यमान अर्थ को नहीं चाहता है। किसी भी स्वप्न पदार्थ को देखता नहीं है वह स्थान सुषुप्त है, ऐसा कहा जाता है। सुषुप्त ही स्थान है जिसका वह सुषुप्तस्थान हृदयाकाशरूप है। जो एकरूप है, प्रतिदिन विश्व और तैजस का एकरूप भावापन्न बताया जाता है। जो एकमात्र घनीरूप ज्ञानस्वरूप है। सुषुप्ति समय में ज्ञानघन वह जीव को जानता है। अर्थात् आनन्दमय, आनन्दप्रचुर तथा पूर्णानन्द आनन्द का ही भोक्ता विषय भोग के बिना भी अभिव्यक्त केवल स्वरूपभूत आनन्द को भोगता है। उसके द्वारा विश्व और तेज की व्यावृत्ति हुई। विश्व और तेज दोनों का स्थूलान्तर विषयभोग द्वारा आनन्द की उक्ति (कथन) है। ये दोनों विशेष अनन्त शक्ति द्वारा उत्पन्न होते हैं यही सिद्ध हुआ। ज्ञानरूप जिसका मुख है अर्थात् समस्त अवयव ही ज्ञानस्वरूप है। इस प्रकार तृतीय पाद, तृतीय अंश आनन्दमयत्व ज्ञानरूपत्व जो प्राज्ञ का स्वरूप कहा गया है उससे भिन्न तीन रूपों में भी जानना चाहिये ॥५॥

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥६॥

तत्त्वप्रकाशिका—एवं विश्वादीनां त्रयाणां महिमानां निरूप्यान्तःप्रज्ञमित्यादिना

तुरीयमहिमानं पृथग्वक्तुं चतुर्णामपि महिमानं युगपदादावाह—एष चतूरूपो भगवान् सर्वेषामीश्वरः। एष सर्वज्ञः सर्वान्तर्यामी, एष सर्वस्य योनिः कारणम्। एतदेव विशदयति–भूतानां प्रभवाप्ययौ। भूतानां प्रभवः प्रभवत्यस्मादिति प्रभवः। अप्येत्यस्मिन्नित्यप्ययः। एतौ हि यस्मात्। चतूरूपोपेताद्धरेः सकाशाद्भवत इति ॥६॥

व्याख्या—इस प्रकार विश्वादि तीनों की महिमा का निरूपण करके 'अन्तःप्रज्ञम्' इत्यादि द्वारा चौथी महिमा को अलग से कहने के लिए चारों की महिमा को एक साथ ही बतलाते हैं—ये चतूरूप भगवान् सबके ईश्वर हैं। ये सर्वज्ञ, सबके अन्तर्यामी और ये ही सबके कारण हैं। इसी बात को विस्तार से बताते हैं—इन्हीं सर्वेश्वर भगवान् से समस्त प्राणियों की उत्पत्ति और प्रलय (संहार) होता है ॥६॥

अथ गौडपदीयकारिका:

बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ॥१॥

तत्त्वप्रकाशिका—स्वोक्तदार्ढ्याय ब्रह्मदृष्टान् मन्त्रान् प्रमाणत्वेन वक्तुं प्रतिजानीते। अत्रैते श्लोका भवन्ति—अत्र जागरितस्थान इत्याद्यर्थे। एते वक्ष्यमाणा ब्रह्मदृष्टा मन्त्राः प्रमाणतया भवन्तीत्यर्थः। विश्वो बहिःप्रज्ञः, तैजसोऽन्तःप्रज्ञः, प्राज्ञः प्रज्ञानघन इत्यत्र मन्त्रं पठति—बहिरिति। विश्वो वैश्वानरः। बहिःप्रज्ञ इत्याद्युक्तरीत्या स्पष्टार्थाः। एक एव भगवान् विश्वादिरूपेण त्रिधा बहिःप्रज्ञत्वादिप्रकारत्रयोपेतत्वेन च स्मृतः ॥१॥

व्याख्या—अपने बताये हुए को दृढ करने के लिए ब्रह्मदृष्ट मन्त्रों को प्रमाण रूप से कहने के लिए प्रतिज्ञा करते हैं—इस विषय में ये श्लोक हैं अर्थात् ये कहे जानेवाले ब्रह्मदृष्ट मन्त्र प्रमाण रूप से हैं। बाहर की ओर प्रज्ञावाला है, विभु–व्यापक विश्व ही भीतर प्रज्ञावाला है जो तैजस है तथा प्रज्ञानघन है। एक ही भगवान् श्रीपुरुषोत्तम विश्व (वैश्वानर), तैजस और प्राज्ञ रूप तीन प्रकार से युक्त बताया गया है ॥१॥

दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः।
आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ॥२॥

तत्त्वप्रकाशिका—जागरितस्थानः स्वप्नस्थानः सुषुप्तस्थान इत्युक्तार्थे मन्त्रं पठति—हृदयस्थ आकाशे त्रिधा स्थानत्रयवत्त्वेन देहे व्यवस्थित इत्यर्थः ॥२॥

व्याख्या—दक्षिण नेत्र में तथा मुख में विश्व, मन के भीतर तैजस और हृदयस्थित आकाश में प्राज्ञ तीन प्रकार जाग्रत, स्वप्न और सुषुप्त स्थान वाले देह में स्थित है ॥२॥

विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक्।
आनन्दभुक् तथा प्राज्ञस्त्रिधा भोगं निबोधत ॥३॥

तत्त्वप्रकाशिका—स्थूलभुक् प्रविविक्तभुगानन्दभुगित्युक्तार्थे मन्त्रं पठति—स्थलभुगित्याद्युक्तार्थं त्रिधा प्रकारत्रयेण भोगं विश्वादीनाम् ॥३॥

व्याख्या—विश्व (परमात्मा) ही इस स्थूल जगत् का नित्य भोक्ता है, तैजस ही सूक्ष्म जगत् का नित्य भोक्ता है तथा प्राज्ञ आनन्द का नित्य भोक्ता है। इस तरह तीन प्रकार से विश्वादि का भोग बताया गया है ॥३॥

स्थूलं तर्पयते विश्वं प्रविविक्तन्तु तैजसम्।
आनन्दश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत ॥४॥

तत्त्वप्रकाशिका—तत्रैव मन्त्रान्तरं पठति—स्थूलं भोग्यं वस्तुकर्त्ता विश्वं कर्म तर्पयते। तैजसं प्राज्ञमुभयत्र तर्पयते इत्यनुवर्त्तते। आनन्दम्। आनन्दः तृप्तिं विश्वादीनां नित्यतृप्तस्य स्थूलादिना तृप्तिः क्रीडारूपा बोध्या ॥४॥

व्याख्या—वही दूसरा मन्त्र पढ़ते हैं—स्थूल भोग्य वस्तु से किये जानेवाले कर्म का तर्पण अर्थात् निष्काम होकर सम्पूर्ण कर्म विश्वरूपी भगवान् को समर्पित करना ही तर्पण है, तैजस तथा प्राज्ञ को। जैसे कि श्रीभगवान् ने कहा है—'तर्पयन्त्यङ्ग मां विश्वमेते पृथुकतण्डुलाः' ॥ (श्रीमद्भा. १०।८१।९) 'अङ्ग हे सखे ! एते पृथुकतण्डुलाः मां विश्वं तर्पयन्ति'। हे मित्र ! ये चिउड़े मुझ विश्व को तृप्त करने वाले हैं। इसी प्रकार विश्व, तैजस और प्राज्ञ नित्य तृप्त का स्थूलादि द्वारा तृप्ति क्रीडारूप जाननी चाहिये ॥४॥

त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्त्तितः।
वेदैतदुभयं यस्तु स भुञ्जानोऽपि न लिप्यते ॥५॥

तत्त्वप्रकाशिका—जागरितादिस्थानेषु विश्वादिरूपो भोक्ता स्थूलादिरूपं तद्भोज्यं चेत्युभयं सर्वथा ज्ञेयमित्याशयवान् तद्वेतुः फलमाह—धामशब्दो गृहापरपर्यायस्थानवाची तथा च त्रिषु दक्षिणाक्षिमुख इत्यादिनोक्तेषु जागरितादिधामसुस्थानेषु भोक्ता विश्वो हि स्थूलभुगित्यादिनोक्तप्रकीर्तितो विश्वादिः, तस्य स्थूलादिकं भोज्यं स्थूलं तर्पयत इत्यादिना कीर्त्तितमेतदुभयञ्च। यो वेद स भुञ्जानोऽभ्यवहारादिकं कुर्वाणोऽपि न लिप्यते। अहं भोक्ता ममेदं भोज्यमित्यभिमानरहितो भवति विश्वादिरूपस्य, हरेरेव भोक्तृत्वज्ञानादित्यर्थः ॥५॥

व्याख्या—जाग्रत् आदि स्थानों में विश्वादि रूप भोक्ता, स्थूलादि रूप उसके भोज्य और दोनों सर्वथा ज्ञेय हैं। इस प्रकार आशयवाले उसे जाननेवाले का फल बताते हैं—तीनों धामों में जो भोज्य है, जो भोक्ता-भोगनेवाला बताया गया है, जो इन दोनों को जानता है वह भोगनेवाला भी लिप्त नहीं होता अर्थात् मैं भोक्ता हूँ, मेरा यह भोज्य है इस प्रकार के अभिमान से वह रहित होता है। विश्व आदि रूप श्रीहरि के ही भोक्तृत्व ज्ञान से-यही सारांश निकला। धाम शब्द गृह के अपर पर्याय स्थानवाची शब्द है ॥५॥

प्रभवः सर्वभावानां सतामिति विनिश्चयः ।
सर्वं जनयति प्राणश्चेतोंऽशून् पुरुषः पृथक् ॥६॥

तत्त्वप्रकाशिका—एष योनिः सर्वस्येत्यत्र मन्त्रं पठति—चतूरूपो हरिरेव सर्वभावानां वस्तूनां प्रभव उत्पादक इति निश्चयरूपं ज्ञानं सतामेवासतां त्वन्यथेति भावः। एतदेव विवृणोति—सर्वं जनयति इति। सर्वस्य प्रणेतृत्वात्प्राणः। पुरि शेतेऽसौ पुरुषः विश्वादिचतूरूपो हरिः सर्वमचेतनं स्वरूपेण जनयति चेतोंऽशून् ज्ञानरश्मियुक्तान् चेतनान् जीवान् पृथग् जडवैलक्षण्येन जनयतीत्यर्थः ॥६॥

व्याख्या—चतूरूप श्रीहरि ही समस्त वस्तुओं के उत्पादक हैं—ऐसा निरूपरूप ज्ञान सज्जनों को ही है, असत् दुर्जनों के लिए तो अन्यथा भाव है। इसी बात को बताते हैं—परमात्मा सब जड़-चेतन जगत् की रचना करते हैं, उन्हीं में प्रणेतृत्व है अतः वे सबके प्राण हैं। सभी प्राणियों के हृदय रूप पुरी (नगर) में सोते हैं इसलिए वे परमात्मा विश्वादि चतूरूप श्रीहरि अचेतन को स्वरूप से उत्पन्न करते हैं और ज्ञानरश्मि से युक्त चेतन जीवों को अलग से अर्थात् जड़ से सर्वथा पृथक् रूप से रचते हैं ॥६॥

विभूतिं प्रभवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः ।
स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ॥७॥

तत्त्वप्रकाशिका—एवं विनिश्चित्य इत्यत्र सतां वैपरीत्येन निश्चय इत्यर्थात् प्राप्तं तदुभयं व्यनक्ति—केचित् सृष्टिचिन्तकाः सृष्टिस्वरूपनिरूपणे दक्षत्वाभिमानवन्तो ब्रह्मस्वरूपपरिणामवादिनोऽसन्तः प्रभवं विभूतिं जीवजडतया विविधया भवनं ब्रह्मणो मन्यन्ते। अयं पक्ष अविकारितया श्रुत्यादिप्रसिद्धस्येश्वरस्यैतादृशविविधभवनाङ्गीकारे हीनत्वादिदोषप्राप्त्याऽयुक्त इति हृदयम्। अन्यैः प्रच्छन्नबौद्धैर्मायाभिरेषा सृष्टिः स्वप्नमायासरूपा स्वप्नपदार्थसृष्टिसदृशी ऐन्द्रजालिकमायासदृशी वा न यथार्थेति विकल्पिता निश्चितेत्यर्थः। अयमपि पक्षः पूर्णशक्तेः कुतो माया सर्वज्ञत्वात् स्वप्नवत् कुतः याथातथ्यतोऽर्थान् व्यदधात्, असक्तः सत्यसृष्टौ मायासृष्टिं वितन्वते अनन्ताचिन्त्यविभवः कथं तामीहते हरिः वैधर्म्याच्च न स्वप्नादिवदित्यादिश्रुतिस्मृतिसूत्रविरुद्धत्वादुपेक्ष्यः ॥७॥

व्याख्या—सृष्टि के स्वरूप निरूपण में विद्वानों का बड़ा मतभेद है—विभूति को जीव-जड़ रूप से सृष्टि मानते हैं, दूसरे कुछ लोग स्वभाव को, मीमांसक कर्म को और प्रच्छन्न बौद्ध मायावादी कहते हैं कि मायाओं के द्वारा यह सृष्टि स्वप्न माया सरूपा है, यथार्थ नहीं है मिथ्या है; ऐसा निर्णीत किये हैं।

इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः ।

तत्त्वप्रकाशिका—सृष्टिविषये सिद्धान्तं निरूपयति—प्रभोः अविकारिणो मायातीतस्य हरेः सकाशाद्या सृष्टिरखिलस्य जगतः सा इच्छामात्रम्। इच्छामात्राधीनेति सृष्टिविषये यथार्थनिश्चयवन्तो ब्रह्मादयः प्राहुः। अनेन ब्रह्मणो जगज्जन्मादिकर्तृत्वमेव

सिद्धान्त इत्युक्तं भवति। एवं सिद्धान्तकर्त्तारं प्रति पूर्वपक्षमध्ये सिद्धान्तमभिधाय पुनः पूर्वपक्षान्निरूपयति—काल इत्यादिना।

व्याख्या—सृष्टि के विषय में सिद्धान्त का निरूपण करते हैं—अविकारी मायातीत भगवान् श्रीहरि से जो अखिल जगत् की सृष्टि होती है वह इच्छामात्र है। सृष्टि के बारे में ठीक-ठीक निश्चय करने वाले ब्रह्मादि देवगण ऐसा बतलाये हैं। अर्थात् यह सारा जगत्प्रपञ्च श्रीहरि से ही उत्पन्न होता है। इस विवेचन से ब्रह्म में ही इस जगत् का जन्म आदि कर्त्तृत्व है, ऐसा सिद्धान्त बताया गया है। इस प्रकार सिद्धान्त कर्त्ता के प्रति पूर्वपक्ष के बीच में सिद्धान्त बताकर पुनः पूर्वपक्ष से निरूपण करते हैं।

कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः ॥८॥

तत्त्वप्रकाशिका—कालस्यैव सर्वोत्तमत्वेन चिन्तकाः भूतानां कालादेवोत्पत्तिं मन्यन्ते। उपलक्षणमेतत्। यदृच्छा नियतिः स्वभावप्रधानचतुर्मुखादीनां निरासः पुरुषप्रभुपदाभ्यामेव द्रष्टव्यः। तथाहि कालप्रधानयोर्जडत्वेन कर्त्तृत्वायोगात् रुद्रस्य पत्युरसामञ्जस्यादित्युक्तन्यायेन दुष्टत्वात्। ब्रह्मणोऽप्येको नारायण आसीन्न ब्रह्मेत्यादिना प्रलयेऽभावावगमेन जगत्कर्त्तृत्वायोगेनैते पक्षा अयुक्ता एव। अतो भगवान् वासुदेवः सर्वस्य कर्त्तेति पक्षः साधीयान् ॥८॥

व्याख्या—सर्वोत्तम रूप से चिन्तन करनेवाले विद्वान् भूतों की सृष्टि काल से ही मानते हैं। यह उपलक्षण है। यदृच्छा, नियति, स्वभाव, प्रधान और ब्रह्मादि का निराकरण हो गया। पुरुष और प्रभु पद से ही जानना चाहिये। काल और प्रधान (जड़ प्रकृति) जड़ होने से उन दोनों में कर्त्तृत्व नहीं हो सकता है। इसलिये काल तथा जड़ प्रकृति को जगत् का कारण नहीं माना जा सकता है। रुद्र पशुपति का मत भी स्वीकार्य नहीं है, चूँकि वह युक्तियुक्त तथा वेदसम्मत नहीं है और ब्रह्मा में भी जगत्कर्त्तृत्वादि नहीं हो सकता है। श्रुतिप्रमाण से जाना जाता है—एक नारायण ही थे, ब्रह्मा नहीं। प्रलयकाल में नारायण के नाभिकमल से ब्रह्मा की उत्पत्ति हुई है अतः वे जगत् के कारण नहीं हो सकते। भगवान् श्रीवासुदेव ही समस्त जगत् के कर्त्ता है, यही पक्ष ही श्रुतियों द्वारा साधित होता है ॥८॥

भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥९॥ इति।

इत्यथर्ववेदीयमाण्डूक्योपनिषदि प्रथमः खण्डः ॥१॥

तत्त्वप्रकाशिका—ब्रह्मण इच्छामात्रेण यत्स्रष्टृत्वमुक्तं तच्च न सम्भवति। यतः तस्य चाप्तसमस्तकामत्वेन प्रयोजनाभावादन्यथा स्वार्थप्रवृत्तौ पूर्णकामत्वहानिः, परार्थ-प्रवृत्तावनन्तदुःखबहुलं जगत्सृजतः करुणावत्वादिहानिरित्यतोऽत्रापि सिद्धान्तं प्रदर्शयितुं मन्त्रान्तरं पठति—अतृप्तस्यैव हरेः भोगार्थं = भोगाख्यप्रयोजनाय, सृष्टिरित्यन्ये मन्यन्ते। अपरे तु क्रीडार्थं सृष्टिः-क्रीडायाः। तत्रापि सिद्धान्तमाह-देवस्येति। देवस्य

एषोऽयं जगत्सर्जनादिरूपो व्यापारः क्रीडारूपत्वात्स्वभाव एव, न तेन प्रयोजनापेक्षा:; यथोक्तं भगवता श्रीबादरायणेन–'लोकवत्तु लीलाकैवल्यम्'। (ब्र.सू. २।१।३३) आप्त-समस्तकामस्यापि परब्रह्मणो विचित्रसृष्टौ प्रवृत्तिलीलैव केवला न तत्र प्रयोजनोद्देश इत्याह —आप्तकामस्य = पूर्णकामस्य, का स्पृहा = न कापीत्यर्थः। इतिशब्दो रूपत्रय-निरूपणसमाप्तौ ॥९॥

इत्यथर्ववेदीयमाण्डूक्योपनिषत्तत्त्वप्रकाशिकाटीकायां प्रथमः खण्डः ॥१॥

व्याख्या—श्रीभगवान् ने यह विश्व अपनी क्रीडा के लिए ही बनाया है (श्रीमद्भा.८।२२।२०)। वे अपने भक्तों के परमकल्याणार्थ (मोक्ष के लिये) नाना रूप धारण कर लीलाएँ करते हैं, जिन्हें सुनकर जीव किसी भी प्रकार से उनकी शरण में आ जायें। अतः उनके भोग के लिये और कुछ लोग उनकी क्रीडा के लिए सृष्टि मानते हैं। परमात्मा का यह जगत्-सर्जन आदिरूप व्यापार क्रीडारूप ही है; जैसा कि भगवान् ब्रह्मसूत्रकार ने कहा है—भगवान् श्रीपुरुषोत्तम की लीला लोक की भाँति होती है, जो मोक्षदायिनी है। वे आप्तसमस्तकाम हैं। उन्हें किसी भी वस्तु का प्रयोजन नहीं है, न तो किसी से किसी वस्तु की अपेक्षा है और न स्पृहा है; चूँकि वे परिपूर्णकाम हैं।

॥ प्रथम खण्ड समाप्त ॥१॥

उपनिषत्

नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्। अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपञ्चो-पशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥७॥

तत्त्वप्रकाशिका—पादत्रये व्याख्याते व्याख्येयत्वेन क्रमवशात्प्राप्तं तुरीयं पादं व्याख्यातुमुत्तरग्रन्थप्रवृत्तिस्तत्रमुखेन तत्स्वरूपं निरूपयति—नान्तःप्रज्ञं–देहान्तःस्थिता ये स्वाप्नपदार्थास्तान् न प्रज्ञापयतीति नान्तःप्रज्ञः तम् = स्वप्नावस्थाया अकर्त्तारमित्यर्थः। न बहिःप्रज्ञं–बहिःस्थिता पदार्था जाग्रत्कालीनास्तान् न प्रज्ञापयतीति न बहिःप्रज्ञः तम् = जाग्रद् अवस्थाया अकर्त्तारमित्यर्थः। नोभयतःप्रज्ञं–बहिःशब्दादिकं जानाति अन्तः स्वं न च पश्यति। कस्याञ्चिदवस्थायां तामुभयज्ञानशब्दवाच्यावस्थायाञ्च न प्रज्ञापयतीति नोभय-यतःप्रज्ञः तम्। एतदवस्थाप्रवर्त्तकौ विश्वतैजसाविति सम्प्रदायविदः। न प्रज्ञानघनं घने-त्यज्ञानावृतस्य जीवस्य सुषुप्त्यवस्था कालसुखानाञ्च प्रज्ञापनं यस्मान्न भवत्यसौ न प्रज्ञानघनस्तम् = सुषुप्त्यवस्थाया अकर्त्तारमित्यर्थः। न प्रज्ञं प्रज्ञाशब्दोक्ता सम्प्रज्ञात-समाध्यवस्था अकर्त्तारमित्यर्थः। नाप्रज्ञम्–चरमदेहमुत्सृज्य मुक्तिं गच्छन्तां ज्ञानप्रदो न भवतीति नाप्रज्ञस्तम्। अदृष्टम्–मुख्यप्राणानुग्रहाभावेनामुक्तो यस्तेनादृश्यमानत्वाद-दृष्टस्तम्। अव्यवहार्यम्–मुक्तिं विना संसारे ग्रहणापरपर्यायव्यवहाराद्यविषयत्वादव्य-वहार्यस्तम्। अग्राह्यमित्यर्थः। अलक्षणम्–विश्वादित्रयवत् जाग्रदाद्यवस्थाप्रवर्त्तकत्व-रूपानुमापकधर्मशून्यत्वादलक्षणस्तम्। अचिन्त्यम्–अनुमापकधर्मशून्यत्वादेवानुमिति-

रूपचिन्ताविषयो न भवतीत्यचिन्त्यस्तम्। अव्यपदेश्यम्–व्यवहारस्य व्यवहर्तव्यज्ञान-साध्यत्वादचिन्त्यत्वादेव व्यपदेष्टुमशक्यत्वादव्यपदेश्यस्तम्। ऐकात्म्यप्रत्ययसारम्–एकः प्रधान आत्मापूर्ण एकश्चासौ आत्मा च एकात्मा स्वार्थे ष्यञ्। ज्ञानरूपत्वात् प्रत्यय आनन्दरूपत्वात्सारः। ऐकात्म्यश्चासौ प्रत्ययश्चासौ सारश्चेति तथोक्तस्तम्। प्रपञ्चोपशमम्–गुणादिभिर्विस्तृतत्वात् प्रपञ्चः। उशब्द उच्छब्दवद् उपशब्दोऽप्युत्कृष्टवाची। शमशब्द-श्चानन्दरूपत्ववाची. तथा चोत्कृष्टानन्दरूपत्वादुपशमः प्रपञ्चश्चासावुपशमश्च प्रपञ्चोपशम-स्तम्। यद्वा प्रपञ्चस्य देहस्य सम्बन्धरूपस्योपशमो नाशो यस्माद्भवत्यसौ प्रपञ्चोपशमः तम्। शिवम्–निर्दुःखरूपत्वाच्छिवस्तम्। अद्वैतम्–वस्तुस्वरूपापेक्षया अन्यथा प्रत्ययो द्वैतं तच्छमयतीत्यद्वैतस्तम् = अन्यथा प्रत्ययाकरणमित्यर्थः। एतादृशमात्मनस्तुर्यं पादं मन्यन्त औपनिषदा मन्यन्ते। सोऽयमात्मा चतुष्पादित्युक्तमुपसंहरति–स इति। स विश्वादिरूपेण चतुष्पादात्मा आद्यानादिकर्त्ता स एव मुमुक्षुभिर्विशेषेण ज्ञेय इत्यर्थः ॥७॥

व्याख्या—पीछे तीन पादों की व्याख्या कर चुके हैं, इस समय क्रम से प्राप्त चौथे पाद के व्याख्यान के लिये उत्तरग्रन्थ की प्रवृत्ति, उसमें श्रुति द्वारा ब्रह्म के स्वरूप का निरूपण किया जा रहा है–ब्रह्म के उभयलिङ्ग का प्रतिपादन स्वयं ब्रह्मसूत्रकार महर्षि बादरायण ने किया है—'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि'। (३।२।११) पूर्ववर्णित विश्व (वैश्वानर), तैजस और प्राज्ञ परमात्मा के इन नामों का निर्देश श्रीमद्भागवत (७।१५।५४) में भी मिलता है—'विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात्'। अर्थात् परमात्मा का चौथा स्वरूप या पाद है–इस प्रकार वैदान्तिक मानते हैं—वह आत्मा (परमात्मा) है, वही विशेष रूप से जानने योग्य है। इस मन्त्र की संस्कृत टीका अतिसरल–सुबोध है अतः उसका अर्थ लिखा नहीं जा रहा है। नान्तःप्रज्ञं इत्यादि मन्त्र का अर्थ श्रीमद्भागवतकार महर्षि श्रीकृष्णद्वैपायन ने समाधि में कितने ही सुन्दर ढंग से सङ्कलन किया है—

'स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद् बहिश्च।
देहेन्द्रियासुहृदयानि चरन्ति येन सञ्जीवितानि तदवेहि परं नरेन्द्र' ॥
(श्रीमद्भागवत ११।३।३५)

पिप्पलायनजी बोले–हे नरेन्द्र! इस जगत् के जन्म, पालन और संहार का अभिन्न निमित्तोपादानकारण होते हुए भी जो स्वयं कारणरहित हैं तथा जाग्रत्, स्वप्न और सुषप्ति अवस्था में रहते हुए भी जो तुरीय अवस्था में स्थित हैं; जिनकी प्रेरणा से देह, इन्द्रिय, मन और प्राण सब सक्रिय होकर अपने-अपने कार्य में निरत रहते हैं वे ही पूर्णब्रह्म परमात्मा श्रीकृष्ण हैं, तुम उन्हीं को जानो। यही उनका स्वरूप है। अतः उन्हीं को विशेष रूप से जानना चाहिये ॥७॥

कारिकाः

निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः।

तत्त्वप्रकाशिका—अस्मिन्नर्थे ब्रह्मदृष्टान् मन्त्रान् संवादयन्नाह। अत्रैते श्लोका

भवन्ति। प्रपञ्चोपशममिति तुरीयस्य सर्वानिष्टनिवृत्तिकारणत्वमुक्तं तत्र तावन्मन्त्रं पठति—सर्वदुखानां निवृत्तेः कारणमिति शेषः। ईशानः–ईशान् = ब्रह्मादीन्, अनति = प्रेरयतीति ईशानः = प्रभुः स्वामी। अव्ययः सदैकरसः।

व्याख्या—तुरीय अवस्था में स्थित सभी तरह के अनिष्टों को दूर करने वाले कारण ब्रह्म का स्वरूप पीछे कहा गया है। उनके बारे में मन्त्र पढ़ते हैं—सारे दुःखों की निवृत्ति से कारण शेष रहता है। जो ब्रह्मादि देवगणों को प्रेरित करता है वह ईशान, प्रभु, स्वामी सदा-सर्वदा एकरस है-ऐसा कहा गया है।

अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥१०॥

तत्त्वप्रकाशिका—अद्वैतमित्युक्तार्थे मन्त्रं पठति—अद्वैतः = मिथ्याज्ञाननिवर्तकः। सर्वभावानां भवन्ति देहयोगेनोत्पद्यन्त इति भावाः जीवास्तेषां कर्तरि षष्ठी। तैः मुक्तिं गमिष्यद्भिर्देव उपास्यो विभुः समर्थः कारणभूतः तुर्यस्तुरीयः स्मृतः मन्त्रदृग्भिरिति शेषः ॥१०॥

व्याख्या—यहाँ 'अद्वैत' का अर्थ इस प्रकार समझना चाहिये—जिसके समान तथा जिससे बढ़कर दूसरा नहीं है वह अद्वैत = अद्वितीय महान्-से-महान् श्रीकृष्ण है। शरीर के सम्बन्ध से समस्त जड-चेतन जीवों की उत्पत्ति होती है। सारी प्रजा मैथुन धर्म द्वारा ही सृष्टि करती है। गर्भ को धारण करनेवाली माता और बीज को स्थापित करने वाला पिता श्रीभगवान् ही है (श्रीमद्भगवद्गीता १४।४)। इसलिये वे सबके उपास्यदेवता हैं, सर्वसमर्थ कारणरूप परमपिता हैं जो तुरीय अवस्था में स्थित रहते हैं; ऐसा मन्त्रद्रष्टा महर्षियों ने बताया है ॥१०॥

कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिद्ध्यतः ॥११॥

तत्त्वप्रकाशिका—नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनमिति तुरीयस्य विश्वादिभ्यस्त्रिभ्यो वैधर्म्यमुक्तं तत्र मन्त्रं पठति—अथ विश्वादीनां बद्धत्वोक्तिरन्यगतबन्धस्य तदधीनत्वात् तदधीनत्वादर्थवदिति न्यायेन वा बन्धयतीति बद्ध इति कर्तृव्युत्पत्त्या वेति ज्ञातव्यं न तु बद्धत्वं सर्वमानविरुद्धत्वात्। कार्यं भ्रमः कारणमनादिकर्मात्मिकाऽविद्या विश्वतैजसौ कार्यकारणरूपद्विविधबन्धवन्तौ प्रज्ञः कारणरूपैकबन्धनात्कार्यकारणाकारेण द्वावपि बन्धौ तुरीये न स्त इत्यर्थः। ननु विश्वतैजसयोर्द्विविधबन्धवत्त्वेन प्राज्ञतुरीयाभ्यां भेदेऽपि परस्परं व्यावर्त्तकधर्माभावेन कथं भेद इति चेदुच्यते। अविद्यारूपकारणबद्धत्वस्योभयत्राविशिष्टत्वेऽपि कार्यबद्धत्वे वैलक्षण्यसद्भावात्। तथाहि—अविद्यातत्कार्यस्वातन्त्र्यादिविषयकजाग्रत्कालीनभ्रमरूपो भयबन्धप्रदो विश्वः। अविद्यातत्कार्यजाग्रत्कालीनभ्रमकार्यस्वाप्नभ्रमरूपो भयबन्धप्रदस्तैजसः। न च स्वप्नस्य जाग्रत्कालीनभ्रमकार्यत्वं कथमिति शङ्क्यम्। 'अदृष्टे चाश्रुतेऽभावेन भाव उपजायते' इति वचनेन तत्संस्कारद्वारा तत्कारणकत्वस्य सत्त्वात्। द्वौ तौ तुर्ये न सिद्ध्यत इत्यनेन

तुरीयस्य सर्वथाऽबन्धकत्वमुक्तम्। तेनार्थात् सर्वज्ञानप्रदत्वं तस्येति सूचितं भवति। तथा च नाप्रज्ञमित्युक्तार्थेऽप्ययं मन्त्रः प्रमाणमिति द्रष्टव्यम् ॥११॥

व्याख्या—सातवें मन्त्र में आत्मा को बताया गया है कि—'जो न भीतर की ओर प्रज्ञावाला है, न बाहर की ओर प्रज्ञावाला है, न दोनों ओर प्रज्ञावाला है, न प्रज्ञानघन है, न जाननेवाला है,⋯यह तुरीय अवस्था है विश्व। तैजस और प्राज्ञ एवं जाग्रत्, स्वप्न और सुषप्ति–तीनों अवस्थाओं से शून्य आत्मा को वैधर्म्य कहा गया है। इस विषय पर निम्नलिखित मन्त्र पढ़ते हैं—ये दोनों विश्व और तैजस कार्य-कारण के आकार से बँधे हैं और प्राज्ञ तो कारणबद्ध है, वे दोनों तुरीय अवस्था में नहीं रहते हैं। महर्षि बादरायण का यह सिद्धान्त है—'तदधीनत्वादर्थवत्'। (ब्र.सू. १।४।३) इस संसार में जितने अर्थवान् शक्ति-शक्तिमान् विभूति-विभूतिमान्⋯इत्यादि हैं वे सब-के-सब उस परमात्मा के अधीन हैं। वही इस जड़-चेतन रूप जगत् का कर्त्ता-धर्त्ता और संहर्त्ता है। श्रीभगवान् के अनन्य परमभक्त श्रीप्रह्लादजी ने उनकी स्तुति करते हुए श्रीमद्भागवत (७।९।३२) में कहा है—हे भगवन्! इस चराचर समस्त विश्व को स्वयं ही अपने उदर (पेट) में समेटकर आप आत्मसुख का अनुभव करते हुए चेष्टारहित होकर महाप्रलय-कालीन प्रलयसलिल के मध्य में शयन करते हैं। उस समय योग द्वारा बाह्य दृष्टि को बन्दकर आप अपनी योगनिद्रा में रहते हुए तुरीय अवस्था में स्थित रहते हैं। उस समय आप न तो तमोगुण और न विषयों को ही ग्रहण करते हैं। इसी प्रकार योगी पुरुष भी समाधि में स्थित रहते हैं, उस समय वे तुरीय अवस्था में स्थित रहते हैं; उस समय उनको बाहर का कुछ भी ज्ञान नहीं रहता है ॥११॥

नात्मानं न परं चैव न सत्यं नापि चानृतम्।
प्राज्ञः किञ्चन संवेत्ति तुर्यं तत्सर्वदृक् सदा ॥१२॥

तत्त्वप्रकाशिका—न प्रज्ञानघनमित्युक्ते प्राज्ञाद्वैधर्म्यं मन्त्रं पठति—प्राज्ञः, आत्मानं = स्वरूपं, परान् = जीवाज्ञानसुषुप्त्यवस्थाकालसुखेभ्योऽन्यान् पदार्थान् सत्या-नृतशब्दलक्षितं तत्कार्यं पुण्यं पापं च न संवेत्ति। णिजन्तमेतत् न संवेदयतीत्यर्थः। इतरेषामसंवेदनरूपक्रियाप्रदाने प्राज्ञस्यैव स्वतन्त्रत्वात्। न संवेत्तीति श्रुतावुक्तं स्वतन्त्रे कर्तृशब्दः स्यादिति वचनादवगन्तव्यम्। तुर्यमिति सर्वदृगित्येतदपि णिजन्तम्। तथा च तुरीयं रूपमात्मानं परान् ज्ञानोत्तरकृतपुण्यं चैतत्सर्वं मुक्तौ दर्शयतीति सर्वदृगित्यर्थः। अनेनाप्रज्ञमित्युक्तं सर्वज्ञानप्रदत्वञ्च प्रमाणितं भवतीति ज्ञातव्यम् ॥१२॥

सान्वयानुवाद—न आत्मानम् = न आत्मा को, न परान् = न दूसरों को, न सत्यम् = न सत्य को, अपि च = और भी, न अनृतम् = न झूठ को, प्राज्ञः = प्राज्ञ, किञ्चन = कुछ, संवेत्ति = भलीभाँति जानता है, सदा = हमेशा, सर्वदृग् = सबको देखनेवाला, तुर्यम् = तुरीय अवस्था में स्थित है ॥१२॥

व्याख्या—'न प्रज्ञानघनम्' सातवें मन्त्र में ऐसा कहा गया है, प्राज्ञ से वैधर्म्य में मन्त्र पढ़ते हैं—प्राज्ञ स्वरूप को, जीव की अज्ञान-सुषुप्ति अवस्था काल में सुखों से

दूसरे पदार्थों को सत्य अनृत शब्द से लक्षित पुण्य और पाप को नहीं जानता है, न जाना जा सकता है। दूसरे असंवेदनरूप क्रिया प्रदान में प्राज्ञ की ही स्वतन्त्रता है। नहीं जानता है, ऐसा श्रुति में कहा गया है। स्वतन्त्र में कर्तृ शब्द है, इस वचन से जानना चाहिये। तुरीय रूप आत्मा (स्वरूप) को दूसरों को ज्ञानोत्तर कृत यह सब सर्वद्रष्टा मुक्ति में दिखलाता है। इस विवेचन से 'अप्रज्ञम्' जो कहा गया था, सर्वज्ञानप्रदत्व प्रमाणित होता है—ऐसा जानना चाहिये ॥१२॥

द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः।
बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते ॥१३॥

तत्त्वप्रकाशिका—शिवमद्वैतमिति। तुरीयस्योक्तमद्वैतमिति विशेषणं सुषुप्तज्ञान इत्यादौ प्राज्ञस्वरूपकथनपरे वाक्ये प्राज्ञस्याभिप्रेतम्। अतः प्राज्ञतुरीययोरद्वैततत्त्वं समानमित्यत्र मन्त्रं पठति—प्राज्ञतुरीययोरुभयोर्देहादिविषयस्वातन्त्र्यभ्रमरूपद्वैतस्याग्रहणकारणत्वं तुल्यमित्यर्थः। नात्मानमित्यादिना प्राज्ञतुरीययोर्वैधर्म्यं चोक्त्वा द्वैतस्येति साम्यं चोक्त्वा पुनर्वैधर्म्यं प्रकारान्तरेणाह-बीजेति। देहगेहादौ स्वातन्त्र्यबुद्धिबीजभूता मूलाविद्यायुतः प्राज्ञस्तस्यास्तदधीनत्वेन प्राज्ञस्य तत्प्रवर्त्तकत्वात् तद्युक्तत्वं युक्तम्। मृत्युयुतः स्वामीत्यादाविवेति द्रष्टव्यम्। सा च मूलाविद्या तुर्ये न वर्त्तते तत्प्रवर्त्तको न भवतीत्यर्थः ॥१३॥

सान्वयानुवाद—द्वैतस्य = द्वैत का, अग्रहणम् = ग्रहण नहीं है, उभयोः = दोनों, प्राज्ञतुर्ययोः = प्राज्ञ और तुरीय का, तुल्यम् = बराबर है, बीजनिद्रायुतः =कारण निद्रा से युक्त, प्राज्ञः = प्राज्ञ, च = और, सा = वह (मूलाविद्या), तुर्ये = तुरीय अवस्था में, न विद्यते = नहीं रहती है ॥१३॥

व्याख्या—प्राज्ञ और तुरीय दोनों देह आदि विषय स्वातन्त्र्य भ्रमरूप द्वैत का ग्रहण नहीं है, कारणता तुल्य है। 'नात्मानम्' इत्यादि द्वारा प्राज्ञ और तुरीय का वैधर्म्य बताकर द्वैत की समता कहकर पुनः वैधर्म्य दूसरी तरह से बताते हैं-देह-गेह आदि में स्वातन्त्र्य बुद्धि कारणरूप मूल अविद्या से युक्त प्राज्ञ उसके अधीन है। वह मूला अविद्या तुरीय अवस्था में नहीं रहती हैं, न उसका प्रवर्त्तक होता है ॥१३॥

स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया।
न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः ॥१४॥

तत्त्वप्रकाशिका—विश्वतैजसयोर्द्विविधबन्धत्वेन साम्यं प्राज्ञस्यैकबन्धत्वेन, ताभ्यां वैलक्षण्यं सर्वबन्धशून्यत्वेन तुरीयस्य, त्रिभ्यो वैधर्म्यं कार्यकारणावित्यनेनोक्तं तत्रैव मन्त्रान्तरं पठति—स्वप्नः = कार्यरूपो भ्रमः, निद्रा = अविद्या, आद्यौ = विश्वतैजसौ स्वप्ननिद्रायुतौ। उक्तरीत्या कार्यकारणबद्धौ। प्राज्ञस्त्वस्वप्ननिद्रया = स्वप्नशब्दोक्तकार्यभ्रमं विना निद्रया अविद्यया युतः। कारणमात्रबद्ध इत्यर्थः। निश्चिताः = यथार्थनिश्चयवन्तः, तुरीये निद्रां स्वप्नं च नैव पश्यन्ति, सर्वथा कार्यकारणबन्धशून्यत्वेनैव तं पश्यन्तीत्यर्थः ॥१४॥

सान्वयानुवाद—आद्यौ = विश्व और तैजस दोनों, स्वप्ननिद्रायुतौ = स्वप्न और निद्रा से युक्त, निद्रया = निद्रा से, प्राज्ञः तु अस्वप्नः = प्राज्ञ तो अस्वप्न है, न निद्राम् = न निद्रा को, न चैव स्वप्नम् = और न स्वप्न को, निश्चिताः = निश्चय करने वाले, तुर्ये = तुरीय अवस्था में, पश्यन्ति = देखते हैं ॥१४॥

व्याख्या—जब कोई सोया हुआ रहता है तब वह नींद में नाना तरह के स्वप्नों को देखता है, परन्तु यहाँ वैसा नहीं है। ठीक-ठीक निश्चय करनेवाला तत्त्वज्ञानी पुरुष विश्व, तैजस, स्वप्न-निद्रा से युक्त स्वप्नों को नहीं देखते, क्योंकि तुरीय अवस्था में वे न निद्रा लेते हैं और न तो स्वप्न को देखते हैं, उस समय तो वे समाधि में रहते हैं और समाधि के द्वारा सारी वस्तुओं को भलीभाँति जान लेते हैं ॥१४॥

अन्यथा गृह्णतः स्वप्नो निद्रातत्त्वमजानतः।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥१५॥

तत्त्वप्रकाशिका—नन्वेतादृशतुरीयस्य प्राप्तिः कदेत्याशङ्कापरिहारायाह—तत्त्वं स्वतन्त्रत्वं भगवतोऽजानतः पुंसो या निद्राऽविद्याऽस्ति तयाऽन्यथा गृह्णतोऽहं ममेत्यादि-जाग्रत्कालीनस्वातन्त्र्यभ्रमयुक्तस्य स्वप्नः स्वप्नदर्शित्वभ्रमो भवति, जाग्रदवस्थायां स्वा-तन्त्र्यादिविषयभ्रमजन्यसंस्कारेण जाग्रत्कालीनमिदमिति स्वप्नरूपो भ्रमो भवति। एवंरूपे तयोर्विपर्यासे जाग्रत्स्वप्नभ्रमयोर्विपरिवर्त्तने क्षीणे सति पद्यत इति पदं तुरीयमश्नुते प्राप्नोतीत्यर्थः ॥१५॥

सान्वयानुवाद—अन्यथा = दूसरे प्रकार से, अजानतः = न जानता हुआ, निद्रातत्त्वम् = निद्रा तत्त्व को, गृह्णतः = ग्रहण करनेवाले (व्यक्ति का), स्वप्नः = स्वप्न भ्रम होता है, तयोः = स्वप्न और भ्रम, विपर्यासे = क्षीण हो जाने पर, तुरीयपदम् = तुरीयपद को, अश्नुते = प्राप्त कर लेता है ॥१५॥

व्याख्या—श्रीभगवान् के स्वतन्त्रत्व को न जाननेवाले व्यक्ति की जो निद्रा अर्थात् अविद्या है उससे अन्यथा ग्रहण करता हुआ अहन्ता-ममता इत्यादि जाग्रत्-कालीन स्वातन्त्र्य भ्रम युक्त स्वप्न देखनेवाले व्यक्ति में भ्रम होता है। जाग्रत् अवस्था में स्वातन्त्र्यादि विषय भ्रमजन्य संस्कार द्वारा जाग्रत्कालीन 'इदम् इति' = यह इस प्रकार का अपना स्वप्न भ्रम होता है। इस प्रकार जाग्रत् और स्वप्न भ्रम के क्षीण हो जाने पर वह तुरीयपद को प्राप्त हो जाता है ॥१५॥

अनादिमायया सुप्तो यदा जीवः प्रबुद्ध्यते।
अजमनिद्रमस्वप्नमद्वैतं बुद्ध्यते तदा ॥१६॥

तत्त्वप्रकाशिका—नन्वनादि-अविद्याबद्धस्य जीवस्य जाग्रत्स्वप्नयोर्विपर्यासक्षय एव कथं स्यादित्यतो यदा सद्गुरूपदेशादिना भगवत्प्रबोधोदयस्तदैवेत्याशयेनाह—अनादेर्विष्णोरनादिभूतया मायया इच्छया तदधीनतया प्रकृत्या च सुप्तः स्वापितो जीवो यदा ईश्वरेच्छयैव सद्गुरूपदेशेन प्रबुद्ध्यते प्रबोधमायाति श्रवणादिमान् भवतीति यावत्। तदा अजं = जनिरहितम्, अनिद्रम् = अज्ञानरहितम्, अस्वप्नं = स्वप्नाद्युपलक्षित-

जाग्रदवस्थातीतम्, अद्वैतम् = अन्यथाज्ञानशून्यं भगवन्तं, बुध्यतेऽपरोक्षतो जानातीत्यर्थः । अनन्तरं विपर्यासक्षयो भवतीति भावः ॥१६॥

सान्वयानुवाद—अनादिमायासुप्तः = अनादि माया से सोया हुआ, जीवः = जीवात्मा, यदा = जब, प्रबुद्ध्यते = जागता है, अजम् = जनिरहित, अनिद्रम् = निद्रारहित, अस्वप्नम् = स्वप्नरहित, अद्वैतम् = अद्वैत श्रीभगवान् को, तदा = तब, बुद्ध्यते = जानता है ॥१६॥

व्याख्या—अनादि भगवान् श्रीविष्णु की अनादिरूपा माया = इच्छा से उसके अधीन प्रकृति द्वारा सोया हुआ जीव जब ईश्वर की इच्छा से ही सद्गुरु के उपदेश से ज्ञान को प्राप्त करता है। अर्थात् आत्मा के श्रवण, मनन तथा निदिध्यासन करनेवाला हो जाता है तब वह जनिरहित, अज्ञानरहित, स्वप्न आदि उपलक्षित जाग्रत् अवस्थातीत, अन्यथा ज्ञानशून्य श्रीभगवान् को अपरोक्ष रूप से जान लेता है ॥१६॥

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥१७॥

तत्त्वप्रकाशिका—नन्वहं ममेत्यादिस्वस्वामिभावसम्बन्धरूपप्रपञ्चो यदि जीवस्वभावः स्यात्तदा भगवदनुग्रहादपि कथं निवर्तेतेत्याशङ्कायां स न जीवस्वभावः किन्त्वाभिमानिको भगवदिच्छाधीन एव अतः तज्ज्ञानजनिततत्प्रसादान्निवृत्त्युपपत्तिरित्याशयेनाह—प्रपञ्चः देहादिनिरूपितस्वस्वामिभावरूपः जीवस्याभिमानाद् विद्येत अस्वाभाविकतयाऽभगवद्वशत्वेन च विद्यते इत्यङ्गीकारो यदि भवेत् तथापि भगवज्ज्ञानात् निवर्तेतैव नात्र संशय इत्यर्थः । ननु भगवज्ज्ञानादपि कथं तन्निवृत्तिरित्यतो भगवदिच्छाधीनत्वात् तदिच्छयैव निवृत्तिर्युक्तेत्याशयेनाह—मायामात्रमिति । अद्वैतं महद्भिर्यथावत्तया ज्ञातं ब्रह्मादिवस्तुजातमज्ञैर्द्वैतं द्वितीयेन प्रकारेण ज्ञातं तद्वैपरीत्येन ज्ञातः तच्च मिथ्याज्ञानं तेषां मायामात्रं भगवदिच्छया मात्रं निर्मितं जातमित्यर्थः । तथा च तादृशमिथ्याज्ञानस्यानादितोऽनुवृत्तस्यापीच्छया जातत्वेनास्वाभाविकत्वात्तत्प्रसादेन तन्निवृत्तिर्युक्तेति भावः । उक्तं हि—संसारबन्धस्थितिमोक्षहेतुः—

'दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' ॥ (गी.)

इति श्रीमुखवचनस्य जागरूकत्वात् । इदमत्राकूतम् । ननु चेतनाचेतनात्मकवस्तुनो विद्यमानत्वात् । अद्वैतानुपपत्त्या कथमद्वैतमुच्यते, न च ब्रह्मणश्चेतनाचेतनयोश्च स्वरूपेणाभिन्नत्वान्नाद्वैतानुपपत्तिस्तथात्वे गुणदोषसाङ्कर्यप्रसक्तेर्दुर्वारत्वात् । स्वाभाविकभेदाभेदवादेऽपि ब्रह्मणः स्वत एव जीवभावाभ्युपगमाद् गुणवद्दोषाश्च स्वाभाविका भवेयुरिति निर्दोषब्रह्मतादात्म्योपदेशविरुद्धा एवेति चेन्न; यतो न वयं स्वरूपेण जीवेश्वरयोरैक्यमभ्युपगच्छामः येनोक्तापत्तिः प्रसज्येत, किन्तु इतरेतरात्यन्तविलक्षणत्वेन ब्रह्मणश्चेतनाचेतनयोश्च स्वरूपेण भिन्नत्वं प्रतिपादयामः, तत्र चेतनस्याणुत्वेन निर्देशार्हत्वम् अचेतनस्य च स्थूलत्वेन ब्रह्मणस्तयोर्वैलक्षण्येनेति विवेकः । यथा ब्रह्मणश्चेतना

त्रेतनयोश्च स्वाभाविकभेदस्तथैवाभेदः सर्वात्मत्वसर्वनियन्तृत्वसर्वव्यापकत्वस्वतन्त्रसत्व-सर्वाधारत्वधर्मपुरस्कारेण भेदः ब्रह्मात्मकत्वतन्नियम्यत्वतद्व्याप्यत्वतत्तन्त्रसत्त्वपराधेयत्वेन स्वरूपेणाभेदः एतद्रूपेणाद्वैतज्ञानं द्वैतज्ञानञ्च यथार्थज्ञानमेतद्वैपरीत्येन ज्ञानं मिथ्याज्ञान-मिति ॥१७॥

व्याख्या—उपनिषदों को 'वेदान्त' शब्द से पुकारा जाता है। श्रीमद्भागवत समस्त उपनिषदों का सार है। 'सर्ववेदान्तसारं हि श्रीभागवतमिष्यते'। (श्रीमद्भा. १२।१३।१५) श्रीमद्भागवत में इस मन्त्र का अनुवाद अक्षरशः तो नहीं है लेकिन भावार्थ लगभग एक ही स्पष्ट लक्षित हो रहा है—

> 'बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते।
> मायामात्रमिदं राजन् नानात्वं प्रत्यगात्मनि' ॥ (श्रीमद्भा. १२।४।२५)

हे राजन्! जाग्रत्, स्वप्न और सुषुप्ति ये तीनों अवस्थाएँ बुद्धि की हैं, प्रत्यगात्मा में नानात्व यह मायामात्र है। मन्त्रार्थ देखिये—यदि = अगर, प्रपञ्चः विद्येत = प्रपञ्च हो, निवर्तेत = टल जायें, निवृत्त हो जायें, न संशयः = इसमें संशय नहीं है। मायामात्रमिदम् = यह मायामात्र है। परमार्थतः द्वैतमद्वैतम् = परमार्थतः द्वैताद्वैत है। जैसे कि दूसरे शास्त्रीय ग्रन्थों में वर्णित है—

> 'द्वैतं चैव तथाद्वैतं द्वैताद्वैतं तथैव च।
> न द्वैतं नापि चाद्वैतमिति तत्पारमार्थिकम्' ॥ (दक्षसं. ७।४८)

द्वैत, अद्वैत और द्वैताद्वैत ये तीनों प्रकार के मत हैं। इनमें द्वैत या अद्वैत पारमार्थिक नहीं हैं, द्वैताद्वैत ही परमार्थिकि हैं।

> 'अन्तर्यामी जगद्रूपी सर्वसाक्षी निरञ्जनः।
> भिन्नाभिन्नस्वरूपेण स्थितो वै परमेश्वरः' ॥ (बृ.ना.पु. ३।२७)

सभी प्राणियों में अन्तर्यामी रूप से जड़जगत्प्रपञ्च रूप से सर्वद्रष्टा निर्मलस्वरूप परमेश्वर परमात्मा भिन्नाभिन्न स्वरूप से अर्थात् भेदाभेद सम्बन्ध से स्थित हैं।

परमभागवत श्रीप्रह्लादजी ने कहा है—

'प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम्'। (श्रीमद्भा. ७।६।२१)

स्वयं श्रीभगवान् प्रत्यगात्म स्वरूप से और दृश्य-प्रपञ्च रूप से लक्षित हो रहे हैं। 'सर्वं खल्विदं ब्रह्म' इति श्रुतेः ॥१७॥

> **विकल्पो न निवर्तेत कल्पितो यदि केनचित्।**
> **उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥१८॥**

तत्त्वप्रकाशिका—उक्तमेव पूर्ववाक्यार्थं विशदयन्नुपसंहरति—देहादौ स्वीयता-भिमानलक्षणबन्धरूपो विकल्पो यदि केनचिदज्ञानिना कल्पितः। उपदेशात् = श्रीगुरु-कृताद् भगवदुपदेशाच्छ्रवणरूपात् तज्ज्ञानादपरोक्षज्ञानद्वारा न निवर्तेतापितु निवर्तेतैव।

उक्तार्थेऽप्रामाण्यशङ्कापरिहारायाह—अयं वाद इति। ब्रह्मणि प्रागुपदर्शितप्रकारेण यथावज्ज्ञाते सति द्वैतं देहगेहादौ स्वस्वामिभावसम्बन्धज्ञानरूपमन्यथाज्ञानं न विद्यते निवर्तेत। तदनन्तरं भगवद्भावापत्तिरूपां मुक्तिमेतीत्ययं सतां वादः सिद्धान्तः। अतो नात्राप्रामाण्यशङ्काकलङ्कावकाश इति भावः ॥१८॥

इत्यथर्ववेदीयमाण्डूक्योपनिषत्तत्त्वप्रकाशिकाटीकायां द्वितीयः खण्डः ॥२॥

व्याख्या—यदि देह आदि में अपना अभिमान लक्षण बन्धन रूप विकल्प की कोई अज्ञ व्यक्ति कल्पना करता है तो श्रीगुरु के द्वारा किये गये श्रीभगवद्-उपदेश अर्थात् आत्मा के श्रवण-मनन रूप ज्ञान से अपरोक्ष ज्ञान द्वारा शिष्य का देहाभिमान छूट जाता है। ब्रह्म में पहले दिखाये गये प्रकार से ठीक-ठीक मालूम हो जाने पर द्वैत अर्थात् देह-गेह आदि में अपना स्वामिभाव सम्बन्ध ज्ञान रूप अन्यथा ज्ञान नहीं रहता है, निवृत्त हो जाता है। वह सर्वथा बन्धनों से छूट जाता है और देहात्मबुद्धि को छोड़ देता है। इसके बाद ही वह श्रीभगवद्भावापत्तिरूपा मुक्ति को प्राप्त हो जाता है। यही सज्जनों का सिद्धान्त है। अतः यहाँ पर अप्रामाण्य की शङ्का के कलङ्क को बिल्कुल ही अवकाश नहीं है ॥१॥

द्वितीय खण्ड समाप्त ॥२॥

उपनिषत्

सोऽयमात्माऽध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकार मकार इति ॥१॥

तत्त्वप्रकाशिका—एवं चतुरो विश्वादीन्निरूप्य तेषामेव चतुर्णां प्रणवांशाकारोकारमकारनादं प्रतिपाद्यस्वरूपं महिमानं वक्तुमुत्तरखण्डद्वयम्; तत्राद्यखण्डं विश्वादीनां त्रयाणां प्रणवांशाकारादित्रयप्रतिपाद्यत्वं वक्तुमनूद्यते—सोऽयं विश्वादिचतूरूप आत्मा अध्यक्षरं सर्वतोऽधिकत्वादधि, अविनाशित्वादक्षरमोमित्याक्रियत इत्योङ्कारः। यद्वक्तुमुक्तमनूदितं तन्निरूपयितुं प्रस्तावयति—अधिमात्रमिति। अधि अधिकाः पूर्णा मात्रा यस्यासौ अधिमात्रः। कस्ता मात्रा इत्यत आह–पादा मात्रा इति। पादाः = अंशाः, मात्रा = मात्राशब्दवाच्याः। ते पादा अपि क इत्यत आह—अकार इत्यादिना। अत्र नादोऽपि ग्राह्यः ॥१॥

सान्वयानुवाद—सः = वह, अयम् = यह, आत्मा = परमात्मा, अध्यक्षरम् = अधि अक्षर, ओङ्कारः = ओङ्कार, अधिमात्रम् = अधिमात्रा, पादाः = पाद, मात्राः मात्रा च = मात्राएँ और मात्राएँ, पादाः = पाद (चरण), अकारः उकारः मकारः इति = अकार, उकार और मकार है ॥१॥

व्याख्या—इस प्रकार विश्व, तैजस, प्राज्ञ और परमात्मा का स्वरूप निरूपण करके उन चारों का प्रणवांश अकार, उकार, मकार और नाद प्रतिपाद्य स्वरूप-महिमा को कहने के लिये दो उत्तर को प्रस्तुत करते हैं। पहले खण्ड में विश्वादि तीनों क

प्रणवांश अकारादि त्रय प्रतिपाद्यता की व्याख्या है। वह यह विश्वादि चतूरूप आत्मा सब ओर से अधिक होने से, अविनाशी होने से अक्षर 'ओम्' ऐसा उच्चारण किया जाता है। अधिक (ज्यादा) हैं पूर्ण मात्राएँ जिसकी वह अधिमात्र कहलाता है। कौन-कौन वे मात्राएँ हैं ? इस पर कहते हैं—पाद (चरण) अंश मात्राशब्द वाच्य है। वे पाद भी हैं- अकार, उकार, मकार और नाद ॥१॥

जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राप्तेरादिमत्त्वाद्वाप्नोति ह वै सर्वान् कामानादिश्च भवति य एवं वेद ॥२॥

तत्त्वप्रकाशिका—तत्राकारवाच्यः क इत्यत आह—जागरितेति। यो जागरितस्थानो वैश्वानरः भगवतः प्रथममात्रा = प्रथमोंऽशो विश्वः, स अकारः = अकारवाच्यः। विश्वे अकारप्रवृत्तौ निमित्तद्वयं निर्वक्ति–आप्तेरादिमत्त्वाद्वेति। आप्तेर्जीवस्य विषयानापयति प्रापयतीत्याप्तिस्तन्निमित्तात्। आमिमत्वाद्वा। सुषुप्त्यवस्थातो जाग्रदवस्थायां प्रत्यागमने विश्वस्य प्राज्ञाद्विभज्यमानत्वेन प्राज्ञरूपादिमत्त्वम्। स्वप्नादुत्थाने तैजसाद् विभज्यमानत्वेन तैजसरूपादिमत्त्वमस्तीत्येवमादिमत्त्वाद्वा आ इत्युच्यते इत्यर्थः। आप्त्यादिमत्वरूपनिमित्तद्वयेनाकारवाच्यतया विश्ववेत्तुः फलमाह—आप्नोतीति। य एवं निमित्तद्वयेन विश्वस्याकारवाच्यत्वं वेद स सर्वान् कामान् काम्यान् विषयान्विश्वानुग्रेण प्राप्नोति ॥२॥

सान्वयानुवाद—जागरितस्थानः = जाग्रत् स्थान, वैश्वानरः = वैश्वानर, अकारः = अकार, प्रथमा = पहली, मात्रा = मात्रा है, आप्तेरादिमत्त्वात् = आप्ति (जीव) आदिमत्त्व होने से, ह वै = निश्चय ही, सर्वान् कामान् = समस्त कामनाओं को, प्राप्नोति = प्राप्त हो जाता है, च = और, आदिः = पहले, भवति = होता है, यः = जो, एवम् = इस प्रकार, वेद = जानता है ॥२॥

व्याख्या—विश्व, तैजस और प्राज्ञ ये तीनों में अकार वाच्य कौन है ? इस पर कहते हैं—जो जाग्रत् स्थान वैश्वानर है श्रीभगवान् की प्रथममात्रा अर्थात् प्रथम अंश विश्व, वह अकार वाच्य है। विश्व में अकारप्रवृति पर निमित्तद्वय का निर्वचन करता है, आप्त जीव को विषयों को प्राप्त कराता है। इस प्रकार आप्ति उसके निमित्त होने से आप्ति कहा। सुषुप्ति अवस्था से जाग्रत् अवस्था में प्रत्यागमन होने पर विश्व का प्राज्ञ से विभाजन रूप से प्राज्ञ रूपादिमान है। स्वप्न से उठने पर तैजस से विभाजन रूप से तैजस रूपादिमान हो जाता है। इस प्रकार आदिमान होने से 'अ' ऐसा कहा जाता है। आप्त्यादिमान रूपनिमित्त दो से तथा अकार वाच्य रूप से विश्ववेत्ता का फल बतलाते हैं—जो इस प्रकार निमित्त दो से विश्व की अकारवाच्यता को जानता है वह सारे विषयों को विश्व के अनुग्रह से प्राप्त हो जाता है ॥२॥

स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति नास्याब्रह्मवित् कुले भवति य एवं वेद ॥३॥

तत्त्वप्रकाशिका—उकारवाच्यः क इत्यत आह—यः स्वप्नस्थानस्तैजसो द्वितीया

मात्रा स उकारः = उकारवाच्यः। तत्रोकारशब्दप्रवृत्तौ निमित्तद्वयमाह–उत्कर्षादुभय-त्वाद्वेति। शरीराभिमानादुत्थाप्योद्धृत्य स्वप्नमण्डलं प्रति वासनामयपदार्थानुभवार्थ कर्षतीत्युत्कर्षस्तस्मात्। बाह्यव्यापारोपरतिरूपनिद्रायाः स्वाप्नविषयानुभवस्य च हेतुत्वादुभयत्वं तस्माद्वा उकारवाच्य इत्यर्थः। एवं निमित्तद्वयेन तैजसस्योकारवाच्यत्व-वेतुः फलमाह—उत्कर्षतीत्यादिना। एवं निमित्तद्वयेन तैजसोङ्कारवाच्यत्वं यो वेद स ज्ञानसन्ततिमुत्कर्षति। ज्ञानसन्तत्योत्कृष्टो भवतीत्यर्थः। समानश्च भवति स्नेहाद् द्वेष-भावाच्च सर्वमुक्तानां मध्यस्थो भवति। अस्यैवमुकारवाच्यतया तैजसवेतुः कुलेऽब्रह्मवित् पुत्रो न भवति। ब्रह्मवित्पुत्रो भवतीत्यर्थः ॥३॥

सान्वयानुवाद—स्वप्नस्थानः = स्वप्न स्थान, तैजसः = तैजस, उकारः = उकार, द्वितीया = दूसरी, मात्रा = मात्रा है, उत्कर्षात् = उत्कर्षण, उभयत्वात् = स्वप्न और तैजस इन दोनों का, वा = निश्चय ही, उत्कर्षति = उत्कर्षण होता है, ह वै = निश्चय ही, ज्ञानसन्ततिम् = ज्ञानसन्तति को, च = और, समानः = समान, भवति = होता है, अस्य = इसके, कुले = कुल में, अब्रह्मवित् = ब्रह्म को न जाननेवाला, न = नहीं, भवति = होता है, यः = जो, एवम् = इस प्रकार, वेद = जानता है ॥३॥

व्याख्या—जो स्वप्नस्थान तैजस दूसरी मात्रा है वह उकारवाच्य है। उसमें उकार शब्द की प्रवृत्ति पर निमित्तद्वय से कहा—शरीराभिमान से उठकर अपने सूर्यमण्डल के प्रति वासनामय पदार्थों के अनुभव के लिए कर्षण करता है। बाह्य व्यापारों से उपरत रूप निद्रा का और स्वप्न विषय अनुभव का कारण दोनों उकारवाच्य हैं। इस प्रकार निमित्तद्वय द्वारा तैजस की उकारवाच्यता को जाननेवाले विद्वान् का फल बताते हैं—इस प्रकार निमित्तद्वय द्वारा तैजस की ओङ्कारवाच्यता को जो जानता है वह ज्ञान का सम्यक् विस्तार करके उत्कृष्ट होता है। स्नेह से और द्वेष भाव से तथा समस्त मुक्तों में मध्यस्थ होता है। इस प्रकार उकार वाच्यरूप से तैजस को जानने वाले इस व्यक्ति के कुल में ब्रह्म को नहीं जानने वाला पुत्र नहीं होता अर्थात् ब्रह्म को जाननेवाला पुत्र ही होता है ॥३॥

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद ॥४॥

तत्त्वप्रकाशिका—मकारवाच्यः क इत्यत आह—यः सुषुप्तस्थानः प्राज्ञो भगवतस्तृतीया मात्रा स मकारो मकारवाच्यः। प्राज्ञे मकारप्रवृत्तौ निमित्तद्वयमाह—मितेर-पीतेर्वेति। मितिरन्तर्गतिः, तथा च सुषुप्तौ जीवमात्मन्यन्तर्गमयतीति हेतोः। तथाऽपीतेः सुषुप्तौ बाह्यज्ञानलयकर्तृत्वाद्वा मकारवाच्य इत्यर्थः। 'मानं ज्ञानं लयश्चैव मर्यादा चापि कथ्यते' इति वचनात्। एवं निमित्तद्वयेन प्राज्ञस्य मकारवाच्यवत्वेतुः फलमाह–मिनोति ह वा इत्यादिना। एवं निमित्तद्वयेन प्राज्ञस्य मकारवाच्यत्वं यो वेद स इदं सर्वं जगन्मिनोति। प्रत्यणूनामपि जीवानां प्रकाशतो व्याप्तेः सत्त्वात् प्रकाशस्यान्तर्गमयति। अणुमात्रस्थितं पदार्थजातं जानातीति यावत्। अपीतिर्दुःखादेः संसारस्य विलापकश्च भवतीत्यर्थः ॥४॥

सान्वयानुवाद—सुषुप्तस्थानः = सुषुप्त स्थान, प्राज्ञः = प्राज्ञ, मकारः = मकार, तृतीया = तीसरी, मात्रा = मात्रा है, मितेः = मिति (मान) का, वा = अथवा, अपीतेः = दुःखबहुल संसार का, ह वै = निश्चय ही, इदम् = यह, सर्वम् = सब, मिनोति = माप लेता है, च और, अपीतिः = अपीति, भवति = हो जाता है, यः = जो, एवम् = इस प्रकार, वेद = जानता है ॥४॥

व्याख्या—मकारवाच्य कौन है ? इस पर कहते हैं—जो सुषुप्तस्थान प्राज्ञ भगवान् की तीसरी मात्रा है वह मकारवाच्य है। प्राज्ञ में मकारप्रवृत्ति पर निमित्तद्वय बतलाते हैं—मिति अन्तर्गति तथा सुषुप्ति में जीव को अपने भीतर ले जाती है-इस हेतु से अपीति है। सुषुप्ति अवस्था में बाह्य ज्ञान का लय कर्त्तृत्व मकारवाच्य है। मान ज्ञान और लय ही मर्यादा भी कहा जाता है, ऐसा वचन है। इस प्रकार निमित्तद्वय द्वारा प्राज्ञ की मकारवाच्यता को जानने वाले व्यक्ति का फल बताते हैं—इस प्रकार निमित्तद्वय द्वारा प्राज्ञ की मकारवाच्यता को जो जानता है वह इस सारे जगत् को माप लेता है। जीव अणु होते हुए भी अपने धर्मभूत ज्ञान द्वारा समस्त पदार्थों को जान लेता है और दुःखादि संसार का विलापक हो जाता है ॥४॥

कारिकाः

विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटम् ।
मात्रासम्प्रतिपत्तौ स्यादाप्तिसामान्यमेव च ॥१९॥

तत्त्वप्रकाशिका—जागरितस्थान इत्यादिनोक्तार्थे विश्वाससम्पादनाय ब्रह्मदृष्टान् मन्त्रान्संवादयन्नाह—अत्रैते श्लोका भवन्ति। अत्रैत इति। तत्र जागरितस्थान इत्याद्यर्थे मन्त्रं पठति-विश्वस्येति। विश्व अकारवाच्य इत्येव विश्वस्यात्वविवक्षामुक्तरीत्या अकारवाच्यत्वविवक्षां कृत्वेति यावत् मात्रासम्प्रतिपत्तौ मात्राया विश्वलक्षणभगवदंशस्य सम्प्रतिपत्तौ ध्याने क्रियमाणे सति अस्य धातुरुत्कटं विस्पष्टं यथा भवति तथाऽऽदिसामान्यम्। उक्तरीत्या विश्वस्य प्राज्ञतैजसरूपादिमत्त्वं विद्यते तदुपासकस्यापि भवतीत्येवमादिमत्त्वेन साम्यं भवति। शब्दसाम्यमेवात्र द्रष्टव्यम्। तथाप्तिसामान्यम्। उक्तरीत्याप्तिमत्त्वेनापि साम्यं स्यात् भवतीत्यर्थः ॥१९॥

सान्वयानुवाद—विश्वस्य = विश्व का, अत्वविवक्षायाम् = अत्व विवक्षा में, आदिसामान्यम् = आदि सामान्य, उत्कटम् = उत्कट है, मात्रासम्प्रतिपत्तौ = मात्रा की सम्यक् प्रतिपत्ति में, स्यात् = हो, च = और, आप्तिसामान्यम् एव = आप्तिसामान्य ही ॥१९॥

व्याख्या—इस विषय में ये श्लोक हैं-जाग्रत्स्थान इत्यादि अर्थ में मन्त्र पढ़ते हैं—विश्व अकारवाच्य है, विश्व की अत्व-विवक्षा को कही गयी रीति से अकार वाच्यत्व विवक्षा करके मात्रा का विश्व-लक्षण भगवान् के अंश का भलीभाँति बोध तथा ध्यान किये जाने पर धाता का उत्कट-विस्पष्ट जैसा होता है वैसा आदिसामान्य है। बतायी

गयी रीति से विश्व का प्राज्ञ और तैजस रूपादिमान होता है, उसके उपासक का भी होता है। इस प्रकार आदिमान रूप से समता है। शब्दसमता ही यहाँ जानना चाहिये तथा आप्ति सामान्य है-उक्त रीति से आप्तिमान रूप से भी समता है ॥१९॥

तैजसस्योत्वविज्ञान उत्कर्षो दृश्यते स्फुटम्।
मात्रासम्प्रतिपत्तौ स्यादुभयत्वं तथाविधम् ॥२०॥

तत्त्वप्रकाशिका—स्वप्नस्थान इत्याद्यर्थे मन्त्रं पठति—तैजसस्येति। तैजसस्योकारवाच्यत्वविज्ञाने, उक्तरीत्या उकारवाच्यत्वविवक्षां कृत्वा मात्रासम्प्रतिपत्तौ तैजसलक्षणभगवदंशध्याने। अस्योपासकस्य स्फुटमुत्कर्षः ज्ञानोत्कर्षरूपं फलं विद्यते। तथाविधं भगवन्निष्ठोभयत्वसदृशमुभयत्वञ्च विद्यते। निद्रास्वप्नविषयानुभवश्च भगवता क्रियते इति तस्योभयत्वम्। अस्याप्युपासकस्य बाह्येन्द्रियोपरमरूपनिद्रामुक्तौ भवति। बाह्येन्द्रियाणि जडानि सर्वाण्यपि नश्यन्तीति यावत् स्वरूपेन्द्रियेण विषयानुभवश्च भवतीत्युभयत्वं विद्यते भवतीत्यर्थः ॥२०॥

सान्वयानुवाद—तैजसस्य = तैजस का, उत्वविज्ञानः = उत्व-विशेष ज्ञान, उत्कर्षः = उत्कृष्ट, स्फुटम् = स्फुट, दृश्यते = देखा जाता है, तथाविधम् = उसी प्रकार, मात्रासम्प्रतिपत्तौ = मात्रा की सम्यक् प्रतिपत्ति में, उभयत्वम् = उभयता, स्यात् = हो ॥२०॥

व्याख्या—तैजस की उकारवाच्यता भलीभाँति जान लेने पर बतायी गयी रीति से उकार-वाच्यत्व की विवक्षा करके मात्रा की ठीक-ठीक जानकारी में तैजस का स्वरूप श्रीभगवान् के अंश का ध्यान-चिन्तन करने पर उपासक व्यक्ति का ज्ञान-उत्कर्ष रूप फल होता है। उसी प्रकार श्रीभगवान् में निष्ठा उभयत्व सदृश और उभयत्व है, निद्रा में स्वप्न-विषयों का अनुभव भगवान् के द्वारा किया जाता है, ऐसा उभयत्व है। इस उपासक को भी बाह्य-इन्द्रिय-उपरम रूप निद्रा छूट जाने पर अनुभव होता है। बाहर की सारी जड़ इन्द्रियाँ समूल नष्ट हो जाती हैं। स्वरूप इन्द्रिय द्वारा विषयों का अनुभव होता है, यही उभयत्व है ॥२०॥

मकारभावे प्राज्ञस्य मानसामान्यमुत्कटम्।
मात्रासम्प्रतिपत्तौ तु लयसामान्यमेव च ॥२१॥
त्रिषु धामसु यस्तुल्यं सामान्यं वेत्ति निश्चितम्।
स पूज्यस्सर्वभावानां वन्द्यश्चैव महामुनिः ॥२२॥

तत्त्वप्रकाशिका—सुषुप्तिस्थान इत्याद्यर्थे मन्त्रं पठति—प्राज्ञस्य मकारभावे = मकारवाच्यत्वे उक्तरीत्या मकारवाच्यत्वविवक्षां कृत्वा मात्रासम्प्रतिपत्तौ प्राज्ञरूपभगवदंशध्यानेऽस्योत्कटं मानसामान्यम्। उक्तरीत्या स्वान्तर्यामित्वेन साम्यमुक्तरीत्या लयकर्तृत्वेन च साम्यञ्च भवतीत्यर्थः ॥२१॥

यत् अकाराद्यभिधेयविश्वाद्युपासकानां सर्वकामावाप्त्यादिफलमुक्तं तत्सत्यमेव,

कुत इति चेत्। अकाराभिधेयविश्वाद्युपासकाः सर्वकामाप्त्यादिमन्त इति वेत्तुरपि फलोक्तेः। न हि तस्य मिथ्यात्वतद्वेत्तुः फलं भविष्यतीत्याशयेनाह—त्रिष्विति। यो निश्चितो निश्चितरूप ज्ञानवानधिकारी। त्रिषु धामसु तेजःस्वरूपञ्च गृहं प्राज्ञधामेति गीयत इति वचनात्। विश्वादिस्वरूपेषु अकारादिवाच्यतयोपासकेनोपासितेषु सत्सूपजायमानं यदुपासकस्योपास्यत्वेन आप्त्यादिमत्त्वरूपं सामान्यं साम्यं तत्तुल्यम्। मोक्षपर्य्य-वसायित्वादविकारीति वेत्ति। सर्वभावानां कर्त्तरि षष्ठी। सर्वभावैः = सर्वजीवैः, पूज्यो वन्द्यश्च भवति, महामुनिश्च भवतीत्यर्थः ॥२२॥

सान्वयानुवाद—मकारभावे = मकार होने पर, प्राज्ञस्य = प्राज्ञ का, मानसामान्यम् = मान सामान्य, उत्कटम् = उत्कृष्ट है, च = और, मात्रासम्प्रतिपत्तौ = मात्रा की सम्यक् प्रतिपत्ति में, तु = तो, लयसामान्यम् एव = लयसामान्य ही है। त्रिषु = तीनों, धामसु = धामों में, यत् = जो, तुल्यम् = तुल्य, सामान्यम् = सामान्य, वा इति = ऐसा, निश्चितम् = निश्चयरूप अधिकारी है, सः = वह, सर्वभावा-नाम् = समस्त जीवों से, पूज्यः = पूजनीय, च वन्द्यः = वन्दनीय, एव = ही, महामुनिः = महामुनि होता है ॥२१-२२॥

व्याख्या—जो निश्चयरूप ज्ञानवान् अधिकारी ऊपर बताये गये प्रकारों से तेजः-स्वरूप गृह प्राज्ञ धाम, विश्वादि स्वरूपों में अकारादि वाच्यरूप से उपासक के द्वारा उपासित सन्तों में उपजायमान जो उपासक का उपास्य रूप से आप्त्यादिमान् सामान्यसमता को मोक्ष पर्यवसायित्व अविकारी ऐसा जानता है। वह सभी जीवों द्वारा पूजनीय एवं वन्दनीय होता है और महामुनि होता है। पूर्व मन्त्र की व्याख्या स्पष्ट है अतः अनुवाद का विस्तार से विराम देते हैं ॥२१-२२॥

अकारो नयते विश्वमुकारश्चापि तैजसम्।
मकारश्च पुनः प्राज्ञं नामात्रे विद्यतेऽगतिः ॥२३॥

तत्त्वप्रकाशिका—विश्वाद्युपासकानां सर्वकामावाप्त्यादिफलमुक्तम्। तत्प्राप्तिरूप-फलान्तरञ्चास्तीत्याह—अकारः = अकारवाच्यो विश्वः, तथा ध्यातः विश्वं स्वं प्रति नयति उपासकं नयतीत्यर्थः। एवमुत्तरत्रापि व्याख्येयम्। विश्वादीनां जाग्रदादिप्रवर्त्तकत्वेन तत्तदवस्थायां जीवेन गम्यत्ववत्तुरीयस्य तदभावात् तत्प्रयुक्तं गम्यत्वमपि नास्तीत्याशङ्कां परिहरति–नामात्र इति। विश्वादिवत्तत्प्रत्यहमेकीभावे विभागयोरभावे नामात्रो यस्तुरीय-स्तस्मिन्नगतिः कर्मणि क्तिन् भावप्रधानश्च निर्देशः। अगम्यता नास्तीति सोऽपि उपासकः। प्राप्य एव। आत्मानं संविशतीति तस्यापि गम्यत्ववचनात्। तथा च न जाग्रदादिप्रवृत्तिकारणत्वं गम्यत्वे प्रयोजकमिति भावः ॥२३॥

इत्यथर्ववेदीयमाण्डूक्योपनिषत्तत्त्वप्रकाशिकाटीकायां तृतीयः खण्डः ॥३॥

सान्वयानुवाद—अकारः = अकार, विश्वम् = विश्व को, नयति = ले जाता है, च = और, अपि = भी, तैजसम् = तैजस को, पुनश्च मकारः = मकार, प्राज्ञम् =

प्राज्ञ को, नामात्रे = दोनों एक हो जाने पर, अगतिः = गतिरहित, विद्यते = होता है ॥२३॥

व्याख्या—अकारवाच्य विश्व तथा ध्यान करते विश्व अपने प्रति उपासक को ले चलता है। इस प्रकार आगे भी व्याख्यान करना चाहिये। विश्व, तैजस और प्राज्ञ, जाग्रत्, स्वप्न और सुषुप्ति के प्रवर्त्तक रूप से उस-उस अवस्था में जीव द्वारा गम्यत्व की भाँति तुरीय अवस्था का, उसके अभाव से उसके द्वारा प्रयुक्त गम्यत्व भी नहीं है ? इस शङ्का का परिहार करते हैं—विश्वादि की तरह उसके प्रति अहम् (अहमर्थ) एकीभाव = एक हो जाने पर विभागों के अभाव में भिन्न अंश रहित नहीं होता, जो तुरीय है उसमें अगति कर्म में क्तिन् प्रत्यय हुआ, भाव प्रधान निर्देश है। अगम्यता नहीं है वह भी उपासक प्राप्य ही है ॥२३॥

उपनिषत्

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद ॥१॥

इति माण्डूक्योपनिषत्समाप्ता

तत्त्वप्रकाशिका—नान्तःप्रज्ञमित्यनेनोक्तं तुरीयमात्मनः पादं गुणानुवादपुरस्सरं नादप्रतिपाद्यत्वं दर्शयति—अव्यवहार्यादिकं प्राग् व्याख्यातम्। तथा च योऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत अमात्रः चतुर्थस्तृतीयः, स ओङ्कारस्तदवयवभूतनादपदप्रतिपाद्यः। नादप्रतिपाद्यत्वेन तुरीयोपासकस्य फलमाह—आत्मेति। य एवमात्मत्वाव्यवहार्यत्वादिना तुरीयं नादप्रतिपाद्यं वेद स आत्मैव भूत्वा देहाभिमानं त्यक्त्वा आत्मना प्रसन्नेन परमात्मना तुरीयप्रसादादिति यावत्। आत्मानं तुरीयं संविशति। प्रविश्य स्वेच्छया स्वयोग्यभोगान् भुञ्जानः सुखमास्त इति भावः ॥१॥

सान्वयानुवाद—अमात्रः = भिन्न अंश से रहित, चतुर्थः = चौथा, अव्यवहार्यः = जो व्यवहार का विषय नहीं है, प्रपञ्चोपशमः = जो इस जगत्प्रपञ्च-भूतसमुदाय से सर्वोत्कृष्ट आनन्द रूप है, शिवः = सुमङ्गल कल्याणकारी है, अद्वैतः = जिसके जोड़े का कोई नहीं है, ओङ्कारः एव = (वह) ओङ्कार ही है। आत्मा एव = आत्मा ही है, यः = जो, एवम् = इस प्रकार, वेद = जानता है, (सः = वह) आत्मना = परमात्मा की प्रसन्नता से, आत्मानम् = नित्य लीलानिकुञ्ज में, संविशति = प्रवेश करता है ॥१॥

व्याख्या—पीछे सातवें मन्त्र में बताये गये परमात्मा के स्वरूप को जो मुमुक्षु व्यक्ति जानता है वह इस प्रकार आत्मत्व-अव्यवहार्यत्वादि से तुरीय नादप्रतिपाद्य को जान लेता है और वह आत्मा ही होकर देहाभिमान को छोड़कर परमात्मा की प्रसन्नता से उनकी नित्य लीला में प्रवेश कर अपने योग्य भोगों को भोगता हुआ अनन्त ब्रह्मसुख का निरवच्छिन्न रूप से अनुभव करता हुआ रहता है। श्रीमद्भागवत (३।२९।३४) में कहा गया है—'ईश्वरो जीवकलया प्रविष्टो भगवानिति'। इस प्रकार भगवान् ईश्वर

जीवरूप से सब प्राणियों में प्रविष्ट है। 'वासुदेवः सर्वमिति' (गी. ७।१९) सब वासुदेव स्वरूप है। श्रीभगवान् की प्राप्ति के प्रतिबन्धक देहाभिमान और मत्सर ही हैं।

कारिका:

ओङ्कारं पादशो विद्यात् पादा मात्रा न संशयः।
ओङ्कारं पादशो ज्ञात्वा न किञ्चिदपि चिन्तयेत् ॥२४॥

तत्त्वप्रकाशिका—स्वोक्तार्थे ब्रह्मदृष्टान् मन्त्रान् प्रमाणयति-अत्रेति। तानेवोदाहरति-अत्रैते श्लोका भवन्ति—पादशः पादैः। कः पादशब्दार्थ इत्यत आह-पादा इति। . मात्रा = अंशाः, तथा चोङ्कारं भगवन्तमकारादिभिः, पादैः = अंशैः प्रतिपाद्यं विद्यात्। तत्रोङ्कारं तुरीयं पादशः नादरूपांशप्रतिपाद्यत्वेन ज्ञात्वा किञ्चित् सांसारिकं विषयजातं न चिन्तयेत् न चिन्तयति। तमेव प्रविश्यानन्दाविर्भावमेतीति भावः ॥२४॥

सान्वयानुवाद—ओङ्कारम् = ओङ्कार को, पादशः = चरणों से, विद्यात् = जानो, पादाः = पाद, मात्राः = अंश (है), न संशयः = इसमें संशय नहीं है, ओङ्कारम् = ओङ्कार को, पादशः = पैरों से, ज्ञात्वा = जानकर, किञ्चित् अपि = कुछ भी, न चिन्तयेत् = चिन्तन न करे ॥२४॥

व्याख्या—कौन पाद शब्द का अर्थ है ? इस पर कहते हैं—ओङ्काररूप भगवान् को मकारादि अंशों द्वारा प्रतिपाद्य जानो। उसमें ओङ्कार चारों पादों से नाद रूप अंश प्रतिपाद्य रूप से जानकर किञ्चित् सांसारिक विषयों की चिन्ता न करे। इस प्रकार भली भाँति जानकर परमात्मा में ही प्रवेश करके आनन्द-आविर्भाव को प्राप्त करता है अर्थात् श्रीभगवान् की नित्य लीला में प्रवेश करता है ॥२४॥

युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम्।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥२५॥

तत्त्वप्रकाशिका—संसारं तितीर्षुणावश्यमोङ्कारप्रतिपाद्यश्चतूरूपो भगवान् ध्यातव्य इत्यत्र मन्त्रं पठति—प्रणवे = जाग्रदादिप्रणयनात्प्रणवशब्दवाच्ये चतूरूपे परब्रह्मणि वासुदेवे चेतो युञ्जीत। प्रणवस्वरूपमेवाह—प्रणव इति। ब्रह्मेति गुणैर्बृहत्वात् पूर्णत्वात् ब्रह्म। ततः किं फलमित्यत आह-प्रणव इति। प्रणवस्य निर्भयत्वादेव तत्र नित्यं मनोयोगयुक्तस्यापि भयं नास्तीत्यर्थः ॥२५॥

सान्वयानुवाद—प्रणवे = प्रणव में, चेतः = चित्त (मन) को, युञ्जीत = लगावे, प्रणवः = प्रणव (ओङ्कार), निर्भयम् = भयरहित, ब्रह्म = ब्रह्म है, प्रणवे = प्रणव में, नित्ययुक्तस्य = नित्य युक्त व्यक्ति का, क्वचित् = कहीं किसी से, भयम् = भय, न विद्यते = नहीं होता है ॥२५॥

व्याख्या—'तस्य वाचकः प्रणवः' (यो.सू. १।२८); 'तज्जपस्तदर्थभावनम्' इत्यादि योगसूत्रों में भी बताया गया है कि ब्रह्म का वाचक प्रणव है, प्रणवस्वरूप ब्रह्म का (अपने इष्टदेवता का) जप और उसके अर्थ की भावना करनी चाहिये। इसलिये

स्वयं भगवान् श्रीकृष्ण ने ओङ्कार को ही 'एकाक्षर' ब्रह्म कहा है—'ओमित्येकाक्षरं ब्रह्म' (गी. ८।१३)। अतः प्रणव निर्भय ब्रह्म है। प्रणव में सदा युक्त साधक का संसार में किसी से भय नहीं होता ॥२५॥

प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतः।
अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः ॥२६॥

तत्त्वप्रकाशिका—विश्वादिरूपाणां परस्परं भगवता च सह न गुणतारतम्यमित्याह—अपरमपरः पूर्वतनो मूलरूपपूर्वावतारात्मा प्रणवो हरिर्ब्रह्म पूर्णं हि प्रसिद्धमेतत्। परः पश्चात् नो विश्वाद्यवताररूपः प्रणवो हरिश्च ब्रह्म पूर्णम्। पूर्वावतारे पश्चिमावतारे पूर्णतैव न क्वचिदपि न्यूनतेति भावः। पूर्णत्वसम्भावनाय तत्स्वरूपं निरूपयति—अपूर्व इत्यादिना। प्रणवस्तत्प्रतिपाद्यो विश्वादिचतूरूपो भगवान्। अपूर्वः-न विद्यते पूर्वं कारणं यस्यासौ तथोक्त अनादिरित्यर्थः। अनन्तरः-न विद्यते अन्तरो नाशो यस्यासौ तथोक्तः। न विद्यतेऽन्यो जगतोऽन्तरः अन्तःस्थितः यस्मादसौ तथोक्त इत्यप्यर्थो द्रष्टव्यः, सर्वस्य हृदये स्थितमिति वक्ष्यमाणत्वात्। अबाह्यः-न विद्यतेऽन्यो जगद्-बाह्यो यस्मादसौ तथौक्तः सर्वगतत्वात् तथा। अनपरः-न विद्यतेऽपरः स्थितिकर्त्ता यस्येति तथोक्तः पराधीनस्थित्यभावात् तथा। न विद्यते व्ययो यस्य स शश्वदेकप्रकारः ॥२६॥

व्याख्या—अपर पूर्वतन मूल रूप पूर्वावतार आत्मा प्रणव भगवान् श्रीहरि परब्रह्म पूर्ण ही है, यह प्रसिद्ध है। पीछे हमारे विश्व आदि अवतार रूप प्रणव और श्रीहरि परब्रह्म पूर्ण ही है। पहले अवतार में तथा पीछे के अवतार में पूर्णता ही है, कहीं भी किसी अंश से न्यूनता नहीं है अर्थात् सर्वतः परिपूर्ण है। पूर्णता की सम्भावना के लिये उसके स्वरूप का निरूपण करते हैं—प्रणव उसके प्रतिपाद्य विश्वादि चतूरूप भगवान्। जिसके पूर्व (पहले) कारण नहीं है वह अपूर्व कहलाता है, वैसे अनादि कहा गया है। जिसका अन्तर (नाश) नहीं है, उसे 'अनन्तर' कहते हैं। अन्य नहीं हैं जगत् के भीतर स्थित है-ऐसा भी अर्थ जानना चाहिये। जगत् के रूप में स्वयं वही हैं। इस मन्त्र में परब्रह्मस्वरूप भगवान् श्रीकृष्ण का सर्वगतत्व बताया गया है। जैसे कि श्रीमद्भागवतकार महर्षि बादरायण ने कहा है—

'न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम्।
पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः' ॥ (श्रीमद्भा. १०।९।१३)

वह सदा एक प्रकार, सर्वाधिष्ठान, सर्वरूप, सर्वगत, सर्वान्तर्यामी, स्वेच्छाधीन, परेच्छानधीन, पूर्ण सनातन ब्रह्म-ये सब उन्हीं श्रीकृष्ण में ही घटते हैं, ऐसा जानना चाहिये ॥२६॥

सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ॥२७॥

तत्त्वप्रकाशिका—प्रणवप्रतिपाद्यस्य विश्वादिचतूरूपस्य परब्रह्मणः पूर्व इत्यादिना

सृष्ट्यादिकर्त्ताऽन्यो नास्तीत्युक्तं, न केवलमेतावत् किन्तु स्वयमेव सर्वस्य कर्त्तेति वदंस्तदुपासकस्य फलं दर्शयति—सर्वस्य = जगतः, आदिः = कारणं, मध्यं = स्थितिकर्त्ता, अन्तः = संहारकः, एवेति निश्चये। ज्ञानिनः फलमाह—एवमिति। जगदुत्पत्तिस्थितिलयकर्तृत्वब्रह्मत्वेन सर्वस्माद्भिन्नं ब्रह्मात्मकत्वतन्नियम्यत्वतद्व्याप्यत्वतत्तन्त्रत्वादिना अभिन्नं च प्रणववाच्यं हरिं ज्ञात्वा तदनन्तरं प्रारब्धभोगानन्तरं तद् ब्रह्म व्यश्नुते विशेषेण प्राप्नोति सदा सत्त्वेऽपि स्थानविशेषाभिप्रायेणेत्युक्तिः ॥२७॥

सान्वयानुवाद—सर्वस्य = सम्पूर्ण जगत् का, आदिः = कारण, मध्यम् = पालन करनेवाला, च तथा एव = और वैसे ही, अन्तः = संहार करनेवाला, हि = निश्चय ही, प्रणवः = प्रणव है, एवं हि = इस प्रकार ही, प्रणवम् = प्रणव को, ज्ञात्वा = जानकर, अनन्तरम् = इसके बाद, तद् = उस ब्रह्म को, व्यश्नुते = प्राप्त होता है ॥२७॥

व्याख्या—निश्चय ही एकाक्षर ओङ्कार प्रणवस्वरूप ब्रह्म भगवान् श्रीहरि जड़-चेतन रूप दृश्यमान जगत् का आदि कारण, उत्पत्ति, पालन और संहार करनेवाले हैं। इसमें संशय नहीं है। जगत् की उत्पत्ति, स्थिति, लयकर्तृत्व, ब्रह्मरूप में सब से भिन्न, ब्रह्मात्मक, ब्रह्मनियम्य, ब्रह्मव्याप्य आदि होने से यह समस्त चराचर जगत् ब्रह्म से अभिन्न है। उपासक इस प्रकार प्रणववाच्य भगवान् श्रीहरि को जानकर प्रारब्ध कर्मों को भोगने के बाद ही ब्रह्म को प्राप्त करता है ॥२७॥

प्रणवं हीश्वरं विद्यात्सर्वस्य हृदि संस्थितम्।
सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति ॥२८॥
अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः।
ओङ्कारो विदितो येन स मुनिर्नेतरो जनः॥
स मुनिर्नेतरो जनः ॥२९॥

इत्यथर्ववेदीयमाण्डूक्योपनिषदि तृतीयः खण्डः ॥

तत्त्वप्रकाशिका—प्रणवपदवाच्यस्य परब्रह्मणो महिमानमाह—ईश्वरं = सर्वनियन्तारम्। प्रणवं = हरिं, सर्वस्य हृदि स्थितम्। विद्यात् = उपासीत। 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। तमेव शरणं गच्छ सर्वभावेन भारत' ॥ इति श्रीमुखवचनम्। एवं सर्वव्यापिनमोङ्कारमोमित्यादिक्रियमाणत्वादोङ्कारस्तं मत्वा = उपास्य, धीरः = ज्ञानी, न शोचति एवं प्रणवप्रतिपाद्यविश्वादिचतूरूपभगवज्ज्ञानिनः स्तुवन्नुपनिषदं समापयति—अमात्रः = भिन्नांशरहितः यद्वा अंशरहितः, मूलरूपेण स्थित इति यावत्। अनन्तमात्रः = पुनरनन्तांशः, द्वैतस्योपशमः = स्वोपासकानां सर्वानिष्टनिवर्तकः, शिवः = निर्दुःखसुखस्वरूपः। ओमित्यादिक्रियमाणत्वादोङ्कारो विश्वादिचतूरूपो हरिः। येन = अधिकारिणा, विदितः = सम्यक् श्रवणादिना ज्ञातः। स एव मुनिरपरोक्षज्ञानी भवति। इतरो जनस्तु न मुनिरित्यर्थः। उपनिषदर्थस्य सर्वस्यावधारणार्थमन्ते द्विरुक्तिः ॥२८-२९॥

निम्बभानुपदद्वन्द्वं सर्वाघनुत्तये नमः ।
अशेषफलदातारं भक्तजनहृदि स्थितम् ॥१॥

इति सनकसम्प्रदायप्रवर्त्तकाद्याचार्यश्री १०८ श्रीमहामुनीन्द्रभगवन्निम्बार्का-
चार्योपबृंहितवैदिकानादिसत्सम्प्रदायानुगतनिखिलशास्त्रपारावारीणाति-
सृत्वरकीर्तिधवलीकृतदिङ्मण्डलेन स्वाभाविकद्वैताद्वैत-
सिद्धान्तसमर्थनदक्षजगद्विजय्याचार्य श्री १०८
केशवकाश्मीरिभट्टेन निर्मिता माण्डूक्योपनिषद्-
व्याख्या सम्पूर्तिमगात् ।

व्याख्या—प्रणवपदवाच्य परब्रह्म की महिमा को बताते हैं—सब के नियन्ता ईश्वर, प्रणव श्रीहरि सब के हृदय में स्थित हैं; उनकी उपासना करनी चाहिये, उन्हीं की शरण में जाना चाहिये। इस प्रकार सर्वव्यापी, ओङ्कार, ओम् इत्यादि श्रुतिप्रसिद्ध पहले 'ॐ' ऐसा उच्चारण करके सर्वगुणसम्पन्न सगुण-साकार श्रीपति कृष्ण की उपासना करके धीर–ज्ञानी व्यक्ति शोक नहीं करता। इस प्रकार प्रणवप्रतिपाद्य विश्वादि चतूरूप भगवत्तत्त्वज्ञ व्यक्ति की स्तुति करते हुये उपनिषद् का समापन करते हैं—भिन्न अंश रहित अथवा मूल रूप से स्थित, अनन्त मात्रावाले अर्थात् अनन्त (असंख्य) अंशवाले, अपने उपासकों के समस्त अनिष्टों को दूर करनेवाले, सुख-शान्ति-कल्याण करनेवाले पुरुषोत्तम श्रीकृष्ण ही हैं। जो अधिकारी श्रवण, मनन और निदिध्यासन द्वारा ओङ्कार ब्रह्म श्रीकृष्ण को जानता है वही मुनि है, वही अपरोक्ष ज्ञानी होता है, इतर जन मुनि नहीं है। वह मुनि है इतर जन मुनि नहीं है। अन्त में दो बार आवृत्ति उपनिषद् के सम्पूर्ण अर्थों को हृदय में अवधारण करने के लिये सूचित किया है ॥२८-२९॥

इति श्रीमन्निम्बार्कमहामुनीन्द्रमतानुवर्त्ति श्रीमत्परमहंसपरिव्राजकाचार्यत्याग-
मूर्त्तिस्वामिधनञ्जयदासजी काठियाबाबा तर्क-तर्कव्याकरणतीर्थपाद-
पद्मान्तेवासी योगिराजस्वामिराधाविहारिदासजी काठियाबाबा-
चरणारविन्दचञ्चरीक डॉ. स्वामी द्वारकादासजी
काठियाबाबा कृत अन्वयार्थ-तत्त्वप्रभा
नाम्नी हिन्दी टीका में अथर्ववेदीय
माण्डूक्योपनिषद् समाप्त ।

●

तैत्तिरीयोपनिषद्

अथ शिक्षावल्ली

ॐ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्। ॐ शान्तिः! शान्तिः!! शान्तिः!!! ॥१॥

॥ इति शिक्षाध्याये प्रथमोऽनुवाकः ॥१॥

श्रीकृष्णाय नमस्तस्मै राधिकानन्ददायिने।
परमानन्दसन्दोहसान्द्रानन्दवपुष्मते ॥१॥
निम्बादित्यस्य पादाब्जं लोचनानन्ददायकम्।
सकलार्थप्रदं नृणां प्रणमामि पुनः पुनः ॥२॥
श्रीनिवासं गुरुं वन्दे करुणावरुणालयम्।
बादरायणसूत्राणां भाष्यकारं गुणार्णवम् ॥३॥
सकलान् देशिकान् नत्वा पूर्वाचार्योक्तितः खलु।
तैत्तिरीयस्य च व्याख्यां व्याकरिष्ये यथामति ॥४॥

अनेकजन्मादिसहसन्तापोपतप्यमानस्य पुंसः यदि दैववशात् महतां सङ्गः स्यात्तदा संसाराद् विरज्यते, ततो विरक्तस्य शमदमादिसाधनसम्पन्नस्य गुरुभक्त्यैकनिष्ठस्य श्रीभगवद्दिदृक्षालम्पटस्योपासकस्यात्यन्तिकानिष्टनिवृत्तिपूर्वकं परमानन्दाप्तिहेतुभूतानन्ताचिन्त्यापरमितस्वरूपगुणशक्तिवैभवपरब्रह्मभूतश्रीवासुदेवस्वरूपविषयकज्ञानाय प्रवृत्तापीयं तैत्तिरीयोपनिषदन्यस्य व्याख्यानावरुद्धत्वेन न तज्ज्ञापनसमर्था अतस्तद्व्याख्या पूर्वाचार्योक्तितः प्रतन्यते।

तत्रादौ आदित्यसंस्थितो भगवान् वासुदेवो ब्रह्माणं प्रति ब्रह्मविद्यामनुतिष्ठन् भृगुर्विघ्नपरिहारार्थमेतद्विद्याप्रवर्त्तकत्वादिन्द्रियादिप्रेरकत्वाद्वा मित्रादिदेवान् प्रार्थयते—शं नो मित्र इत्यादिना।

तत्त्वप्रकाशिका—मित्रो देवता नोऽस्मभ्यं शं सुखमुदिश्य भवतु। सुखप्रदो भवत्वित्यर्थः। एवं वरुणाद्या देवा नः शमुद्दिश्य भवन्त्वित्यर्थः। उरुक्रम इति विष्णोर्विशेषणम्। उरुरुत्कृष्टः क्रमः पराक्रमो वा यस्यासावुरुक्रमः। ब्रह्मणे चतुर्मुखाय नमः। हे वायो! ते तुभ्यं नमः। पुनस्तं वायुमपरोक्षतः प्रार्थयते—त्वमेवेति। त्वं प्रत्यक्षम्। अक्षमक्षं प्रति प्रेरकतया स्थितत्वात् प्रत्यक्षशब्दवाच्योऽसि। ब्रह्मासि ब्रह्म-

त्मकोऽसि। यस्माद् ब्रह्मात्मकोऽसि तस्मात् त्वामेव प्रत्यक्षं ब्रह्मात्मकं वदिष्यामि, शिष्येषु उपदिशामि। ऋतं सत्यमित्यत्रापि त्वामित्यनुवर्त्तते। ऋतं यथार्थज्ञानवन्तं सत्यं यथार्थ-ज्ञानपूर्वकं वक्तारं कर्त्तारमित्यर्थः। तत् ब्रह्मात्मकं वायुरूपं श्रोतारं मामवतु तत् वक्तारं विद्योपदेष्टारं चावतु। पुनरवतु मामवतु वक्तारमित्युक्तिरादरार्था। उत्तरत्र प्रवर्त्तनीयायां विद्यायां प्रसक्तविघ्नानां शान्तिरस्त्वित्याह—शान्तिरिति। आध्यात्मिकाधिदैविकाधि-भौतिकविघ्नपरिहाराभिप्रायेण त्रिवारं शान्त्युक्तिः ॥१॥

॥ इति प्रथमोऽनुवाकः ॥

सान्वयानुवाद—ॐ = इस एकाक्षर ब्रह्म के नाम का उच्चारण करके उपनिषद् का प्रारम्भ करते हैं, नः = हमारे लिये, मित्रः = मित्र देवता, शम् = सुखप्रद हों, वरुणः = वरुण देवता, शम् = सुखप्रद हों, नः = हमारे लिये, अर्यमा = अर्यमा, शम् भवतु = सुखप्रद हों, इन्द्रः = इन्द्र, बृहस्पतिः = बृहस्पति, नः = हमारे लिये, शम् = सुखप्रद हों, उरुक्रमः = उत्कृष्ट पराक्रमवाले, विष्णुः = भगवान् विष्णु, नः = हमारे लिये, शम् = सुखप्रद हों, ब्रह्मणे = परब्रह्म के लिये हमारा, नमः = नमस्कार है, वायो = हे वायुदेव ! ते = तुम्हारे लिये, नमः = नमस्कार है, त्वम् एव = तुम ही, प्रत्यक्षम् = प्रत्यक्ष, ब्रह्म असि = ब्रह्म हो, वदिष्यामि = कहूँगा, ऋतम् = प्रिय मधुर वाणी, वदिष्यामि = कहूँगा, सत्यम् = सत्य, वदिष्यामि = कहूँगा, तत् = वह (ब्रह्म), माम् = मेरी, अवतु = रक्षा करें, तत् = वह, वक्तारम् = वक्ता की (कहनेवाले आचार्य की), अवतु = रक्षा करें, माम् अवतु = मेरी रक्षा करें, वक्तारम् अवतु = वक्ता की रक्षा करें, ॐ शान्तिः शान्तिः शान्तिः ॥

व्याख्या—मित्र, अर्यमा, इन्द्र, वरुण आदि देवगण हम सबके लिए सुखप्रद हों। जिनका उत्कृष्ट पराक्रम अथवा पादविक्षेप है वे भगवान् श्रीविष्णु हम सभी के लिये सुख-शान्तिप्रद हों। ब्रह्म के लिये नमस्कार है। हे वायुदेव ! तुमको नमस्कार करते हैं। तुम्हीं प्रत्यक्ष ब्रह्म हो, सभी व्यक्तियों के नेत्रों के प्रति प्रेरक रूप से स्थित हो अतः तुम प्रत्यक्ष शब्दवाच्य हो। तुम ब्रह्मस्वरूप हो। श्रीभगवान् ने उद्धवजी से श्रीमद्भागवत (११।१९।३७-३८) में कहा है—

'सत्यं च समदर्शनम्। ऋतं च सूनृता वाणी'। सभी वस्तुओं में सम = मुझ ब्रह्म का दर्शन करना यही सत्य है और जो नहीं देखते है उनके लिये जगन्मिथ्या है। प्रिय मधुर वाणी बोलना ऋत है। वह ब्रह्मात्मक वायुरूप श्रोता मेरी रक्षा करें और वह वक्ता विद्योपदेष्टा की रक्षा करें। पुनः मेरी रक्षा करें तथा वक्ता की रक्षा करें—ऐसा दो बार आदरार्थ है। आगे प्रवर्त्तनीय विद्या में प्रसक्त विघ्नों की शान्ति (शमन) हो। ॐ शान्तिः शान्तिः शान्तिः—इस प्रकार तीन बार कहने का यह मतलब है कि आध्यात्मिक, आधिदैविक और आधिभौतिक विघ्नों के परिहार के अभिप्राय से तीन बार कहा गया है।

प्रथम अनुवाक समाप्त ॥१॥

•

ॐ शीक्षां व्याख्यास्यामः । वर्णस्स्वरः । मात्रा बलम् । साम सन्तानः । त्युक्तः शीक्षाध्यायः ॥२॥

॥ इति द्वितीयोऽनुवाकः ॥

तत्त्वप्रकाशिका—ब्रह्मविद्याभ्यसनेच्छोरधिकारिण: पूर्वशिक्षणीयमर्थं प्रतिजानीते-शीक्षामिति। शिक्ष्यते इति शिक्षा शिक्षणीयमर्थमित्यर्थ:। व्याख्यास्यामो विशेषेण ख्यास्याम:। तामेव शिक्षामाहु:, वर्ण इत्यादिना वर्ण: ज्ञातव्य इति शेष:। वर्ण: = अकारादिवर्णानामुच्चारणस्थानं कण्ठादिज्ञातव्यम्। स्वर: = उदात्तानुदात्तादिस्वरितादिरूपो ज्ञातव्य:। मात्रा = अकारादिरूपा एकैको वर्णो ज्ञातव्य:, बलं = वर्णोच्चारणहेतुभूत: स्पृष्टेषत्स्पृष्टविवृतादिस्वरूप: प्रयत्नो ज्ञातव्य:। साम = वर्णानां सन्धि: ज्ञातव्य:। सन्तान: = वर्णानां परम्परा पदवाक्यादिरूपो वर्णसमुदाय इति यावत्। उपसंहरति—इत्युक्तमिति। शीक्षाध्याय: शिक्षणीयानामर्थानामध्यायोऽध्ययनमुपदेश: इत्येवमस्माभि: कृत इत्यर्थ: ॥२॥

॥ इति द्वितीयोऽनुवाकः ॥

सान्वयानुवाद—ओं = ऐसा उच्चारण करके, शीक्षाम् = अब हम शिक्षा का, व्याख्यास्याम: = व्याख्यान करेंगे, वर्ण: = वर्ण, स्वर: = स्वर, मात्रा: = मात्रा, बलम् = बल, साम = साम, सन्तान: = सन्तान, इति = इस प्रकार, शीक्षाध्याय: = शिक्षा का अध्याय, उक्त: = कहा गया है।

व्याख्या—अकार आदि वर्णों का ठीक-ठीक उच्चारण स्थान कण्ठादि को जानना चाहिये तथा ककार आदि व्यञ्जन वर्णों का पाठविधि-परिचय गुरु की शिक्षा के अनुसार होना चाहिये। जैसे दन्त्य 'स' के स्थान में तालव्य 'श' या मूर्धन्य 'ष' का उच्चारण नहीं करना चाहिये। उदात्त, अनुदात्त आदि स्वरितादि रूपों को जानना चाहिये। क्योंकि मन्त्रों में स्वरभेद होने से उनका अर्थ बदल जाता है अत: उदात्तादि स्वरों का ध्यान रखना चाहिये। अन्यथा अशुद्ध स्वरों का उच्चारण करनेवाला अनिष्ट का भागी होता है (यथेन्द्रशत्रु:)। इसी तरह मात्राएँ हैं; जैसे ह्रस्व और दीर्घ अकारादि एक-एक वर्ण को जानना चाहिये। वर्णों का उच्चारण हेतुभूत स्पृष्ट, ईषत्स्पृष्ट, विवृत आदि स्वरूप प्रयत्नों को समझना चाहिये। साम = वर्णों की सन्धि को समझना चाहिये। सन्तान = वर्णों की परम्परा पद-वाक्य आदिरूप वर्णसमुदाय ये सब जानना परमावश्यक है। ऐसा शिक्षणीय अर्थों का अध्याय-अध्ययन उपदेश वेदों ने किया है।

॥ द्वितीय अनुवाक समाप्त ॥२॥

•

सह नौ यशः । सह नौ ब्रह्मवर्चसम् ।

अथातः संहिताया उपनिषदं व्याख्यास्यामः । पञ्चस्वधिकरणेषु अधि-

लोकमधिज्यौतिषमधिविद्यमधिप्रजमध्यात्मम्। ता महसꣳहिता इत्याचक्षते ॥३॥

तत्त्वप्रकाशिका—शन्नो मित्र इत्यादिना आदौ देवता प्रार्थने कृतेऽपि प्रतिविद्यमभीष्टफलार्थं देवताप्रार्थनं कर्त्तव्यमित्याशयेन। अथातः संहिताया इति वक्ष्यमाणविद्याप्रवृत्त्यर्थं पुनर्मित्रादिदेवान् प्रति अभीष्टफलं प्रार्थयते—सः मित्रादिवाय्वन्तो देवसमुदायो नौ गुरुशिष्ययोर्निर्विघ्नविद्यासमाप्तिसम्पादनेन यशो यशस्करोऽस्तु। सह नौ ब्रह्मवर्चसं वेदाध्ययनजनितवर्चो विशेषकरश्च भवतु। हेति मित्रादीनां यश आदि दातृत्वं प्रसिद्धमिति दर्शयति। संहिता वर्णानां सन्निकर्षस्तद्विषयमुपासनं वक्तुं प्रतिजानते ऋषयः। अथात इति। अथ = वर्णशिक्षाव्याख्यानन्तरम्। संहितायाः वर्णसम्बन्धिनीमुपनिषदं पञ्चस्वधिकरणेषु प्रकरणेषु व्याख्यास्यामः सम्यक् कथयामः। अधिकरणनामान्याह—अधिलोकमित्यादिना। लोकमधिकृत्य वर्त्तमानमधिलोकं तन्नामकं प्रथमप्रकरणम्। ज्योतिषां समूहो ज्यौतिषं, तदधिकृत्य वर्त्तमानमधिज्यौतिषं तन्नामकं द्वितीय-प्रकरणम्। विद्यामधिकृत्य वर्त्तमानमधिविद्यं तन्नामकं तृतीयप्रकरणम्। प्रजा अधिकृत्य वर्त्तमानमधिप्रजं तन्नामकं चतुर्थप्रकरणम्। आत्मानमधिकृत्य वर्त्तमानमध्यात्मं तन्नामकं पञ्चमप्रकरणम्। ता एताः संहिताः भगवदधिष्ठानत्वेन महासंहिता इत्याचक्षते विद्वांसः ॥३॥

सान्वयानुवाद—नौ = हम (गुरु और शिष्य) दोनों का, यशः = यश, सह = एक साथ बढ़े, सह = एक साथ ही, नौ = हम दोनों का, ब्रह्मवर्चसम् = ब्रह्मतेज बढ़े, अथ = अनन्तर, अतः = यहाँ से, अधिलोकम् = अधिलोक, अधिज्यौतिषम् = अधिज्यौतिष, अधिविद्यम् = अधिविद्य, अधिप्रजम् = अधिप्रज, अध्यात्मम् = अध्यात्म, पञ्चसु = पाँच, अधिकरणेषु = अधिकरणों में, संहितायाः = संहिता के, उपनिषदं व्याख्यास्यामः = उपनिषद् का व्याख्यान करेंगे। ताः = इन सबको, महासंहिताः = महासंहिता, इति आचक्षते = ऐसा कहते हैं ॥

व्याख्या—वह मित्रादि वायु पर्यन्त देवसमुदाय हम गुरु और शिष्य के निर्विघ्न विद्या-समाप्ति सम्पादन द्वारा यशस्कर हो। साथ ही हम दोनों का वेदाध्ययन-जनित वर्च विशेषकर हो। संहिता वर्णों के संनिकर्ष, उसके विषय उपासना को कहने के लिये ऋषि प्रतिज्ञा करते हैं। वर्णशिक्षा व्याख्यान के बाद संहिता के वर्ण सम्बन्धिनी उपनिषद् पाँच अधिकरणों (प्रकरणों) में भलीभाँति कहेंगे। जैसे लोक का अधिकरण या अधिकार करके वर्त्तमान अधिलोक—उस नाम का पहला प्रकरण; इस प्रकार ज्योति, विद्या, प्रजा और आत्मा पञ्च प्रकरणात्मक श्रीभगवान् के अधिष्ठान रूप से विद्वान् इसे महासंहिता कहते हैं ॥३॥

अथाधिलोकम्। पृथिवी पूर्वरूपम्। द्यौरुत्तररूपम्। आकाशः सन्धिः। वायुः सन्धानम्। इत्यधिलोकम् ॥४॥

तत्त्वप्रकाशिका—अथैवं प्रतिज्ञानन्तरमधिलोकं निरूप्यते। तदेव विवृणोति—पृथिवीत्यादिना। पृथिवी पूर्वरूपं पूर्वो वर्णः पूर्वरूपम्। संहितायाः पूर्वे वर्णे पृथिवीसंस्थत्वेन भगवद्रूपमुपासीतेत्यर्थः। द्यौः प्रकाशस्वरूपमुत्तररूपं संहिताया उत्तरवर्णे

प्रकाशस्वरूपत्वेन भगवद्रूपमुपासीत। आकाशोऽन्तरिक्षलोकः सन्धिर्मध्यं पूर्वोत्तररूपयोः सन्धीयेतेऽस्मिन् पूर्वोत्तररूपे। वायुः सन्धानम्। सन्धिकार्यभूता सन्ध्यक्षरव्यवहरणरूपा सन्धानक्रिया सन्धानशब्देनोच्यते। उपसंहरति—इत्यधिलोकमिति ॥४॥

सान्वयानुवाद—अथाधिलोकम् = इस प्रकार प्रतिज्ञा के बाद अधिलोक का निरूपण किया जाता है। पृथिवी पूर्वरूपम् = पृथिवी पूर्वरूप (पूर्व वर्ण), द्यौरुत्त-ररूपम् = द्युलोक उत्तररूप, आकाशः = आकाश, सन्धिः = इन दोनों की सन्धि (मिलन)। वायुः सन्धानम् = वायु सन्धान, इति अधिलोकम् = इस प्रकार अधिलोक की संहिता कही गयी ॥४॥

व्याख्या—इस प्रकार प्रतिज्ञा के अनन्तर अधिलोक का निरूपण किया जाता है। पृथिवी पूर्व वर्ण पूर्वरूप है। संहिता के पूर्व वर्ण में पृथिवी संस्था के रूप में भगवद् रूप की उपासना करे। द्युलोक प्रकाशस्वरूप उत्तररूप संहिता के उत्तरवर्ण में प्रकाश स्वरूप से भगवान् के रूप की उपासना करे। आकाश–अन्तरिक्षलोक सन्धि पूर्व और उत्तर के मध्य है। इस पूर्वोत्तर रूप में सम्पन्न हो जाता है। सन्धि कार्यरूप सन्धि अक्षर व्यवहरणरूप सन्धान क्रिया सन्धान शब्द से कहा जाता है ॥४॥

अथाधिज्यौतिषम्। अग्निः पूर्वरूपम्। आदित्य उत्तररूपम्। आपः सन्धिः। वैद्युतः सन्धानम्। इत्यधिज्यौतिषम् ॥५॥ अथाधिविद्यम्। आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनꣳ सन्धानम्। इत्यधिविद्यम् ॥६॥ अथाधिप्रजम्। माता पूर्वरूपम्। पितोत्तररूपम्। प्रजा सन्धिः। प्रजननꣳ सन्धानम्। इत्यधिप्रजम् ॥७॥

अथाध्यात्मम्। अधरा हनुः पूर्वरूपम्। उत्तरा हनुरुत्तररूपम्। वाक् सन्धिः। जिह्वा सन्धानम्। इत्यध्यात्मम्। इतीमा महासꣳहिताः। य एवमेता महासꣳहिता व्याख्याता वेद। सन्धीयते प्रजया पशुभिः। ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन ॥८॥

॥ इति तृतीयोऽनुवाकः ॥

तत्त्वप्रकाशिका—अथाधिलोकनिरूपणानन्तरमधिज्यौतिषं निरूप्यते। सूर्यः अग्निः पूर्वरूपं संहितायाः पूर्ववर्णरूपम्। आदित्यः भौमः। संहिताया उत्तरवर्णरूपम्। एवमग्रेऽपि योजनीयम्। आपो नीराणि। विद्युत् एव वैद्युतोऽचिरप्रभवः। आचार्यो गुरुः। अन्तेवासी शिष्यः। विद्याऽऽचार्येणोच्चमाना प्रवचनम्। गुरुशिष्ययोः प्रकर्षेणोच्चारणं विधायाः। माता जननी पिता जनकः। प्रजा पुत्रादिः। प्रजननमुत्पत्तिः प्रजायाः। अधरा हनुरधरोष्ठमारभ्य चिबुकफलकाक्रान्ता। उत्तरा हनुरुत्तरमोष्ठमारभ्यानासामूलम्। वाग् वर्णोच्चारणशक्तिं ताल्वादिस्थमिन्द्रियम्। जिह्वा प्रसिद्धा। इतीमाः। इत्येवमिमाः महासंहिताः व्याख्याता इत्यर्थः। महासंहितावेत्तुः फलमाह—य एवमिति। योऽधिकारी एवं

पूर्वोक्तप्रकारेणैता व्याख्याताः महासंहिता, वेद = जानात्युपासीत । सन्धीयते सम्बध्यते प्रजया = पुत्रादिलक्षणया पशुभिर्गवादिभिः । ब्रह्मवर्चसेन वेदाध्ययनजनिततेजसा अन्नाद्येन अन्नञ्च तदाद्यञ्चान्नाद्यं तेन व्रीहियवादिनेत्यर्थः । सुवर्ग्येण स्वर्गेण लोकेन प्रजादिभिः सम्पन्नो भवतीत्यर्थः ॥५-८॥

॥ इति तृतीयोऽनुवाकः ॥

व्याख्या—अन्वयार्थ सरल होने से शब्दार्थ नहीं लिखा गया है। अधिलोक निरूपण के बाद अधिज्यौतष का निरूपण किया जाता है। सूर्य एवं अग्नि पूर्वरूप संहिता के पूर्व वर्णरूप हैं। आदित्य-भौम संहिता के उत्तर वर्णरूप है। इस प्रकार आगे भी जोड़ना चाहिये। आपः = जल, वैद्युतः = बिजली, आचार्यः = गुरुदेव, अन्तेवासी = शिष्य, प्रवचनं = गुरु के द्वारा बताया गया उपदेश। अर्थात् गुरु और शिष्य के सम्यक् प्रकार से विद्या के उच्चारण को प्रवचन कहा जाता है। माता = जननी, पिता = जनक। प्रजा = पुत्रादि। प्रजा की उत्पत्ति को प्रजनन शब्द से बताया गया है। अधरा हनुः = नीचे ओष्ठ से आरम्भ करके जबड़ा तक पूर्वरूप है। उत्तरा हनुः = ऊपर के ओष्ठ से लेकर नासामूल तक उत्तररूप है। वाक् = वाणी, वर्णों का उच्चारण करने में समर्थ ताल्वादिस्थ इन्द्रियाँ सन्धि हैं। इस प्रकार ये महासंहिताएँ कही गयी हैं। जो अधिकारी इस प्रकार पहले बताये गये प्रकार से इन बतायी हुई महासंहिताओं को जानता है वह पुत्रादि सन्तानों से, पशुओं—गौ-बछड़ों से, वेदाध्ययन जनित तेज से, धान-जौ-अन्नादि से, स्वर्गलोक से प्रजाओं के साथ सम्पन्न हो जाता है॥

॥ तृतीय अनुवाक समाप्त ॥

•

यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात् सम्बभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देवधारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय ॥९॥

तत्त्वप्रकाशिका—वेदविद्याभ्यासिनः प्रतिभाप्रज्ञापरपर्यायमेधादिना भाव्यम्। अतस्तत्प्राप्त्यर्थं विद्या निरूप्यते—यश्छन्दसामृषभ इत्यादिना। तत्रादौ मेधां प्रार्थयते—यश्छन्दसामिति। यः छन्दसां = वेदानाम्, ऋषभः = अधिपतिः, विश्वरूपः = पूर्णरूपः, यश्चामृतात्। एकवचनं बहुवचनार्थे। अमृतेभ्योऽपौरुषेयत्वेन नित्येभ्यो जरामरणादिविध्वंसनहेतुतयाऽमृतसमानेभ्यो वा च्छन्दोभ्यो वयः सुपर्ण इत्यादिवाक्येभ्योऽधि सम्बभूव। सुव्यक्ततया प्रतिपाद्यः तदुक्तप्रकारेणोपास्त्या प्रकटो बभूवेति वा स इन्द्रो भक्ताभिलषितदाता वेदव्यासरूपो हरिर्मयोपासितः सन्, मा = मां, मेधया मोक्षार्थकवेदविद्याभ्यासहेतुभूतया प्रज्ञया स्पृणोतु बलयतु प्रज्ञाबलयुक्तं करोतु। हे देव! वेदव्यास! एवं मेधासम्पत्त्यनन्तरम्। अहं त्वत्प्रसादादमृतस्य वेदस्य धारणो धारको भूयासम्। मोक्षार्थं वेदविद्याश्रवणजनिततत्त्वज्ञानवान् भूयासमिति यावदित्यर्थः। पुनः

प्रार्थनीयान्तरमाह—शरीरमिति। हे देव! मे शरीरं विचर्षणं = विचक्षणं योग्यम्भवतु। सर्वेन्द्रियाणां भगवत्परत्वं प्रार्थयते जिह्वा-मे इत्यादिना। हे देव! मे मम जिह्वा मधुमत्तमा। मदधिर्मध्विति प्रोक्तो मदः सुखमिहोच्यते। मदाधीयतेऽस्मिन्निति मधु ब्रह्म। अतिशयेन तद्वती। तत्प्रतिपादिका भवतु। कर्णाभ्यां भूरि पूर्णं ब्रह्म विश्रुवं विशेषेण शृणवानि। इदमुपलक्षणम्। चक्षुषा तद्रूपाणि पश्यामीत्यादि द्रष्टव्यम्। हे देव! त्वं ब्रह्मणः वेदस्य कोश आवासो निधिरसि मेधया पिहितः। आच्छादितोऽसि पूर्णोऽसीति यावत्। पुनः प्रार्थनीयान्तरमाह—हे देव! मे मया श्रुतं दिव्यवेदार्थं गोपाय = गोपय। अयोग्यं प्रत्युपदेशविषये बुद्धिमदत्वारक्षस्वेत्यर्थः। गुपू रक्षण इति धातोः यद्वा मदीयं श्रुतमर्थं गोपाय। अविस्मृतं कुरु। श्रुतं मे मा प्रहासीरिति शाखान्तरोक्तेरयमर्थः ॥९॥

सान्वयानुवाद—यः = जो, छन्दसाम् = वेदों के, ऋषभः = अधिपति, विश्वरूपः = पूर्णरूप है, अमृतात् = अमृतस्वरूप, छन्दोभ्यः = वेदों से, अधि सम्बभूव = प्रकट हुआ है, सः = वह, इन्द्रः = परम ऐश्वर्यवान्, मा = मुझे, मेधया = मेधा से, स्पृणोतु = सम्पन्न करे, देव = हे देव! अमृतस्य धारणः = अमृत को धारण करनेवाला, भूयासम् = हो जाऊँ, मे = मेरा, शरीरम् = शरीर, विचर्षणम् = विचक्षण योग्य हो, मे जिह्वा = मेरी जीभ, मधुमत्तमा = प्रिय मधुरभाषिणी हो जाय, कर्णाभ्याम् = कानों द्वारा, भूरि = अधिक, विश्रुवम् = सुनता रहूँ, मेधया = मेधा से, पिहितः = आच्छादित हो, ब्रह्मणः = ब्रह्म के, कोशः = कोश, असि = हो, मे = मेरे, श्रुतम् = सुने हुए दिव्य वेदार्थ को, गोपाय = रक्षा करो ॥९॥

व्याख्या—जो वेदों के अधिपति पूर्णरूप अमृतस्वरूप है, अमृतों से अपौरुषेय है। नित्यों से जरा-मरणादि विध्वंसन हेतुरूप से, अमृत के समान छन्दों से, वय-सुपर्ण इत्यादि वाक्यों से तथा सुव्यक्त रूप से प्रतिपाद्य बताये गये प्रकार से उपासना द्वारा प्रकट हुआ वह इन्द्र भक्ताभिलषित दाता वेदव्यासरूप श्रीहरि मेरे द्वारा उपासित होकर मुझे मेधा से मोक्षार्थक वेदविद्या अभ्यास हेतुभूत प्रज्ञा से प्रज्ञाबल युक्त करे। हे देव वेदव्यास! इस प्रकार मेधासम्पत्ति के बाद मैं आपके प्रसाद (प्रसन्नता) से वेद का धारण करनेवाला हो जाऊँ। मोक्ष के लिए वेदविद्या श्रवणजनित तत्त्वज्ञानवान् हो जाऊँ। हे देव! मेरा शरीर विचक्षण योग्य हो। समस्त इन्द्रियों की भगवत्परक प्रार्थना करते हैं—मेरी जिह्वा मधुमत्तमा हो। मदधि मधु ऐसा कहा गया है, मद सुख इस लोक में कहा जाता है, मधु नाम ब्रह्म का है। मेरी जिह्वा ब्रह्म की प्रतिपादिका हो। कानों से पूर्ण ब्रह्म को विशेष रूप से सुनता रहूँ। आँखों से उनका दर्शन करता रहूँ, हाथों से उनकी सेवा करता रहूँ। हे देव! तू वेद के कोश आवासनिधि हो। मेधा से आच्छादित हो, पूर्ण हो। हे देव! मेरे सुने हुए दिव्य वेदार्थ की रक्षा करो अथवा मेरे सुने हुए अर्थ की रक्षा करो ॥९॥

आवहन्ती वितन्वाना। कुर्वाणा चीरमात्मनः।
वासाꣳसि मम गावश्च। अन्नपाने च सर्वदा।
ततो मे श्रियमावह। लोमशां पशुभिः सह स्वाहा ॥१०॥

तत्त्वप्रकाशिका—मेधादिसम्पन्नस्याद्यान्नवस्त्राद्यभावे सति मनः क्षोभेण विद्या न सम्यक् प्रतिष्ठिता भवत्यतस्तदर्थं काञ्चनविद्यामाह—आवहन्तीति। हे स्वाहा! स्वीयं स्वीकुरुते। स्वीयमेव हविरादिकं भ्रान्त्या जीवानां स्ववत्प्रतीतं स्वीकुरुत इति स्वाहा, स चासावश्चेति स्वाहेति सम्बुद्धिः, गोविन्देति शेषः। आत्मनो जीवसमूहान्नादिसर्वभोगान् आवहन्ती प्रापयन्ती। अजां ग्राममनयदितिवत् द्विकर्मता वा। इदानीमिति शेषः। मम पशुभिः = अश्वादिभिः सह वासांसि गावो गाः। अन्नपाने च कुर्वाणा वर्त्तते यतः। अतः तां लोमशां सुशिखण्डोपशोभितां श्रियं लक्ष्मीं मे मयि सर्वदा आवह स्थापय उत्तरत्रापि निश्चलां कुर्वित्यर्थः ॥१०॥

सान्वयानुवाद—मम आत्मनः = मेरे अपने लिए, अचीरम् = जल्दी ही, वासांसि = हर तरह के कपड़े, च = और, गावः = गौएँ, च = और, अन्नपाने = खाने-पीने का पदार्थ, सर्वदा = हमेशा, आवहन्ती = प्राप्त कराने वाली, वितन्वाना = विस्तार करनेवाली, कुर्वाणा = उन्हें बनानेवाली, लोमशाम् = रोएँवाले अश्व आदि, पशुभिः सह = पशुओं के सहित, श्रियम् = लक्ष्मी को, मे = मेरे लिए, आवह = स्थापित कर। ततः = इसलिये, 'स्वाहा' कहकर तुझे आहुति दी जाती है ॥१०॥

व्याख्या—मेधादि से सम्पन्न व्यक्ति के अन्न-वस्त्रादि का अभाव होने पर मनः क्षोभ से विद्या भलीभाँति स्थिर या हमेशा कण्ठस्थ रह नहीं सकती, अतः उसके लिये काञ्चन विद्या को कहते हैं—हे स्वाहा! यह अपनी वस्तु को स्वीकार करती है, अपने ही हवि इत्यादि भ्रान्ति से जीवों के अपने समान प्रतीत को स्वीकार करती है, स्वाहा यह सम्बोधन है। जीवसमूहों के अन्नादि सारे भोग पदार्थों को प्राप्त करा देती है। उनका विस्तार करनेवाली, मेरे अश्वादि पशुओं के साथ वस्त्र, गौएँ, अन्न एवं जल को देनेवाली है। अतः उस सुशिखण्ड से उपशोभित लक्ष्मी मेरे घर में हमेशा के लिये स्थापित कर दें और आगे के लिये भी निश्चल कर दीजिये ॥१०॥

आमायन्तु ब्रह्मचारिणः स्वाहा। विमायन्तु ब्रह्मचारिणः स्वाहा। प्रमायन्तु ब्रह्मचारिणः स्वाहा। दमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा। यशो जनेऽसानि स्वाहा। श्रेयान्वस्यसोऽसानि स्वाहा। तं त्वां भग प्रविशानि स्वाहा। स मा भग प्रविश स्वाहा। तस्मिन् सहस्रशाखे। निभगाहं त्वयि मृजे स्वाहा ॥११॥

तत्त्वप्रकाशिका—अभ्यस्ता विद्या शिष्येभ्यो व्याख्यातैव ज्ञानाधिक्येन सम्पादकतया सम्पूर्णा भवति नान्यथा। 'आचार्यात्पादमादत्ते पादं शिष्यस्य बुद्धितः। पादं सब्रह्मचारिभ्यः पादं व्याख्यानकौशलादि'ति वचनात्। अतस्तदर्थं शिष्यसम्पत्तिं प्रार्थयते—आमायान्त्विति। हे स्वाहा! मा मां प्रति ब्रह्मचारिणः शिष्याः। आयन्तु आयान्तु विविधा विविधगोत्रोत्पन्नाः प्र = प्रकृष्टाः ज्ञानप्रकर्षवन्तः, दमाः = इन्द्रियनिग्रहवन्तः, शमाः = भगवन्निष्ठबुद्धयः। व्याख्यातृयशः श्रुत्वैव हि दिग्भ्यः शिष्याः समायान्ति नान्यथा। अतस्तदर्थं यशः प्रार्थयते—यश इति। जने व्याख्यातृजनमध्ये

शिष्यागमनार्थं यशो यशस्वी असानि = भवानि । हे भग ! षड्गुणपूर्ण स्वाहा तं त्वा त्वां मनसा प्रविशानि सदा त्वामुपासीनो भवानि । हे भग ! स्वाहा स त्वं मा मां प्रविश मदुपास्तिविषयो भव । किन्तत इत्यत आह–तस्मिन्निति । हे भग ! स्वाहा सहस्रशाखे = बहुरूपे तस्मिंस्त्वयि मनसा प्रविष्टोऽहं त्वामुपासीन इति यावत् । अपरोक्षज्ञानद्वारा पापमप्रारब्धं निमृजे = प्रक्षालये ॥११॥

सान्वयानुवाद—ब्रह्मचारिणः = ब्रह्मचारीगण, मा = मरे पास, आयन्तु = आयें, स्वाहा = 'श्रीविष्णवे स्वाहा' ऐसा उच्चारण करके आहुति दें, ब्रह्मचारिणः = ब्रह्मचारिगण, विमायन्तु = निष्कपट हों, स्वाहा = 'माधवाय स्वाहा' ऐसा कहकर आहुति दें, ब्रह्मचारिणः = ब्रह्मचारिगण, प्रमायन्तु = प्रकृष्ट अप्रतिहत ज्ञान वाले हों, स्वाहा = 'श्रीमन्नारायणाय स्वाहा' ऐसा मन्त्रोच्चारण करके नित्य नियम से हवन करें । ब्रह्मचारिणः = ब्रह्मचारिलोग, दमायन्तु = इन्द्रिय निग्रह वाले हों, स्वाहा = मूलमन्त्र का जप करते हुए स्वाहा कहते हुए हवन करें । ब्रह्मचारिणः = ब्रह्मचारिगण, शमायन्तु = श्रीभगवन्निष्ठ बुद्धिवाले हो, जने = लोक में, यशः = यशस्वी, असानि = होऊँ, स्वाहा पूर्ववत् । वस्यसः = श्रीमानों की अपेक्षा, श्रेयान् = अधिक श्रीमान्, असानि = हो जाऊँ, भग = हे भगवन् ! तं त्वा = उस आप में, प्रविशानि = मैं प्रविष्ट हो जाउँ, भग = हे भगवन् !, सः = वह, मा = मुझमें, प्रविश = मेरी उपासना के विषय हो, तस्मिन् सहस्रशाखे = उस हजारों शाखावाले, त्वयि = आप में, अहं निमृजे भग = हे भगवन् ! मैं अपने पापों का प्रक्षालन कर लूँ ॥११॥

व्याख्या—स्वाहा शब्द के साथ चतुर्थी विभक्ति लगाकर जैसे 'विष्णवे' आहुति डालनी चाहिये । शिक्षागुरु कहते हैं—आमायन्तु = विविध गोत्र में उत्पन्न ब्रह्मचारिलोग मेरे पास विद्या पढ़ने के लिए आयें, प्रातःकाल स्वाहा पद के साथ प्रज्वलित अग्नि में आहुति दें । वे कपटशून्य हों, प्रकृष्ट ज्ञानवान् हों, इन्द्रिय-निग्रहवान् हों तथा भगवन्निष्ठ बुद्धिवाले हों । व्याख्यान करनेवाले के यश को सुनकर ही दिशाओं से शिष्य आते हैं, अन्यथा नहीं । व्याख्या करनेवाले व्यक्ति के बीच में शिष्य आगमनार्थ जन-जन में यशस्वी हों । हे भग ! छः गुणों से पूर्ण स्वाहा वह तुम मुझमें प्रविष्ट हो जा अर्थात् मेरी उपासना का विषय हो । हे भग ! स्वाहा बहुत रूप में तुम में मन से मैं प्रविष्ट हूँ अर्थात् तुम्हारी उपासना करता हूँ। अपरोक्ष ज्ञान द्वारा पाप-अप्रारब्ध को मैं प्रक्षालन कर लूँ ॥११॥

यथाऽऽपः प्रवता यन्ति । यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः धातरायन्तु सर्वतः स्वाहा । प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व ॥१२॥

॥ इति चतुर्थोऽनुवाकः ॥

तत्त्वप्रकाशिका—शिष्याश्चायत्नेनैवायान्त्विति सदृष्टान्तं प्रार्थयते—यथाप इति । यथा आपः, उन्नतप्रदेशे प्रविष्टा अनायासेन प्रवताः निम्नभूमीः । 'प्रवता स्यान्निम्नभूमिरि'ति वचनात् । निम्नप्रदेशानिति यावत् । उद्दिश्य यन्ति गच्छन्ति आयान्तीति

यावत्। यथा चाहर्जरम्। अहानि = जीर्णानि, गतानीति यावत्। यत्र भवन्ति सोऽहर्जरः संवत्सरः, तं प्रतिमासाः यथा प्रयन्ति तदन्तर्गता भवन्तीति यावत्। एवमेव हे धातः! सर्वजगदाधारकत्वादेव मां प्रति ब्रह्मचारिणः सर्वतो दिग्भ्य आयन्तु = आयान्तु। आगत्य च मदाज्ञायां यन्तु = तिष्ठन्तु। मदज्ञानुवर्तिनो भवन्त्विति यावत्। मोक्षं प्रार्थयते। प्रतिवेशोऽसीति। हे धातस्त्वमादौ मा मां प्रपद्यस्व पद्लृ गतौ णिजन्तं प्रकर्षेण गमय त्वत्समीपं प्रापय। पश्चात्त्वं प्रतिवेशो मुक्तौ मया प्रवेष्टुं योग्योऽसि। अनन्तरं मा मां प्रकर्षेण भाहि भा दीप्तौ णिच्, दीपय = प्रकाशय। आनन्दादिसर्वभोगदानेन मत्स्वरूपाविष्करणं कुर्विति यावत्। प्रपद्यस्व प्राप्नुहि च। 'तस्यैष आत्मा विवृणुते तनूं स्वामि'ति श्रुतेरिति भावः ॥१२॥

॥ इति चतुर्थोऽनुवाकः ॥

सान्वयानुवाद—यथा = जिस प्रकार, आपः = जल, प्रवता = निम्न प्रदेश में प्रविष्ट होकर, यन्ति = बहते हैं, यथा = जिस प्रकार, मासाः = महीने, अहर्जरम् = दिनों तथा मासों के बीतने पर संवत्सर, धातः = हे धातः! एवम् = इस प्रकार, माम् = मेरे पास, सर्वतः = सब ओर से, ब्रह्मचारिणः = ब्रह्मचारीगण, आयन्तु = आयें, स्वाहा = श्रीभगवान् की प्रसन्नता के लिये स्वाहा शब्द के साथ अग्नि में आहुति दें। प्रतिवेशः = मुक्ति में प्रवेश के लिये योग्य, असि = हो, मा = मुझे, प्रभाहि = भलीभाँति प्रकाशित कर, मा = मुझे, प्रपद्यस्व = प्राप्त हो जा ॥१२॥

व्याख्या—जिस प्रकार जल उन्नत प्रदेश में प्रवेश करते हुए अनायास निम्नभूमि होते हुए सागर में मिल जाते हैं। जिस प्रकार महीने दिनों के होते हैं वह अहर्जर संवत्सर उसे प्रतिमास (हर महीने) जैसे चले जाते हैं, उसी के अन्तर्गत होते हैं। इस प्रकार हे धातः! समस्त जगत् को धारण करने वाले मेरे प्रति ब्रह्मचारि लोग सारी दिशाओं से आयें। आकर मेरी आज्ञा में ठहरें, मेरी आज्ञा का पालन करनेवाले हों। मोक्ष की प्रार्थना करते हैं—हे धातः! तुम पहले मुझे प्राप्त हो जा। तुम्हारे समीप प्राप्त करा दो। पीछे तू मुक्ति में मेरे द्वारा प्रवेश के लिए योग्य है। इसके बाद मुझे प्रकाशित कर अर्थात् आनन्द इत्यादि समस्त भोग प्रदान द्वारा मेरे दिव्य स्वरूप को प्रकट कर दें और मुझे प्राप्त हो जा। यह परमात्मा उसके लिए अपने स्वरूप को प्रकट कर देता है। ऐसा कठोपनिषद् के मन्त्र में कहा गया है। यही इस चौथे अनुवाक का भावार्थ है ॥१२॥

॥ चतुर्थ अनुवाक समाप्त ॥४॥

•

भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः। तासामु ह स्मैतां चतुर्थीम्। माहाचमस्यः प्रवेदयते। मह इति। तद् ब्रह्म स आत्मा। अङ्गान्यन्या देवताः ॥१३॥

तत्त्वप्रकाशिका—पूर्ववेदविद्याभ्यासिनो मेधादिप्राप्त्यर्थं विद्यानिरूपिताः। सम्प्रति

व्याहृतिनिष्ठां विद्यामाह—भूर्भुवः सुवरित्यादिना। भूर्भुवः सुवरित्येताः वै प्रसिद्धाः तिस्रो व्याहृतयः। अनिरुद्धादिमूर्त्तयो वै प्रसिद्धाः, माहाचमस्यः। अतिचमत्कृतित्वान्माहाचमस्यनामा विष्णुस्तं याति जानाति इति माहाचमस्यो ब्रह्मा। समस्तव्याहृतीनां प्रवेताऽपि मह इति एतां व्याहृतिं पूर्णतत्त्वप्रतिपाद्यां वासुदेवाख्यां तासां तिसृणां व्याहृतीनां तत्प्रतिपाद्यानां चतुर्व्यूहमूर्तीनां चतुर्थीं चतुर्थीत्वेन प्रवेदयते जानाति इत्येतत् ह स्म प्रसिद्धमित्यर्थः। तत् व्याहृतिचतुष्टयप्रतिपाद्यं ब्रह्म बृहत्वात् स अनिरुद्धादि चतुरात्मा भगवान् श्रीकृष्ण आत्मा ब्रह्मादिसर्वदेवानामन्तर्यामी स्वामी वा अन्या देवताः ब्रह्माद्या अङ्गानि तेनैव जातत्वादागन्तुकानि। अप्रधानानि परिवारतया सेविका इति यावत्॥१३॥

सान्वयानुवाद—भूः = भूः, भुवः = भुवः, सुवः = स्व, इति = इस प्रकार, एताः = ये, वै = प्रसिद्ध, तिस्रः = तीन, व्याहृतयः = सङ्कर्षण, प्रद्युम्न और अनिरुद्ध, तासाम् = उन तीनों व्याहृतियों की, चतुर्थीम् = चौथी व्याहृति जो, महः इति = 'मह' इस नाम से शास्त्र में प्रसिद्ध है। एताम् = इस व्याहृति को, माहाचमस्यः = ब्रह्मा, प्रवेदयते = जानते हैं, तद् = वह, ब्रह्म = ब्रह्म है, सः = वह, आत्मा = परमात्मा है, अन्याः = अन्य, देवताः अङ्गानि = समस्त देवगण उसके अङ्ग हैं॥१३॥

व्याख्या—उपर्युक्त मन्त्र में भूः, भुवः, स्वः और महः इन चारों व्याहृतिरूपा चतुर्व्यूहरूपी ब्रह्मविद्या का उपदेश करके समस्त देवताओं को परब्रह्म श्रीकृष्ण का अङ्ग कहा गया है। जो मन्त्रमूर्त्ति हैं, जिनका वर्णन श्रीमद्भागवत (१।५।३७-३८) में किया गया है—

'नमो भगवते तुभ्यं वासुदेवाय धीमहि।
प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च॥
इति मूर्त्यभिधानेन मन्त्रमूर्त्तिममूर्त्तिकम्।
यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान्'॥

भगवते वासुदेवाय नमः, सङ्कर्षणाय नमः, प्रद्युम्नाय नमः, अनिरुद्धाय नमः, धीमहि = ध्यायेम। हे भगवन्! हम आप का ध्यान करते हैं; भगवान् वासुदेव, सङ्कर्षण, प्रद्युम्न और अनिरुद्ध को नमस्कार करते हैं। इस प्रकार जो विवेकी पुरुष चतुर्व्यूहरूपी वासुदेवादि नामचतुष्टय द्वारा प्राकृत मूर्ति रहित मन्त्रमूर्त्ति यज्ञपुरुष भगवान् श्रीकृष्ण की उपासना-अर्चना-वन्दना करता है वही व्यक्ति सम्यग्दर्शी एवं पूर्ण ज्ञानी है। अनिरुद्ध आदि चतुरात्मा भगवान् श्रीकृष्ण ब्रह्मादि समस्त देवताओं के अन्तर्यामी हैं, वे सब उनके अङ्ग हैं और श्रुतियाँ उन्हीं का ही साक्षात् प्रतिपादन करती हैं॥१३॥

भूरिति वा अयं लोकः। भुव इत्यन्तरिक्षम्। सुवरित्यसौ लोकः। मह इत्यादित्यः। आदित्येन वाव सर्वे लोका महीयन्ते। भूरिति वा अग्निः। भुव इति वायुः। सुवरित्यादित्यः। मह इति चन्द्रमाः। चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते। भूरिति वा ऋचः। भुव इति सामानि। सुवरिति यजूंषि। मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा महीयन्ते॥१४॥

तत्त्वप्रकाशिका—भूरादिव्याहृतिवाच्यानर्थान् दर्शयति—भूरिति वेति। भूः प्रथमा व्याहृतिः। इतिरनुकरणार्थः। वै स्मरणार्थम्। अयं प्रत्यक्षो लोको भूर्लोकः अन्तरिक्षं द्यावाभूम्योरन्तरालस्थो लोकः। असौ परोक्षो लोकः स्वर्गलोकः। अथवा भूरादिव्याहृतिवाच्यानां तन्नामकाऽनिरुद्धप्रद्युम्नसङ्कर्षणमूर्तीनामुपास्त्यर्थं नामान्तराणि निर्दिष्टानीति। मह इति व्याहृतिवाच्यो वासुदेव आदित्यः = आदित्यस्थः। वामन-रूपेणादितेः सुतत्वादादित्यशब्दवाच्यश्च। महशब्दोऽयम् अकारान्तो न तु सकारान्तः। तथात्वे महरित्यादिप्रयोगापत्तेरिति ज्ञातव्यम्। आदित्यस्य महत्त्वमुपपादयति—आदित्येन वावेति। प्रसिद्धादित्येन सर्वे लोकाः भूम्यन्तरिक्षादयो लोकाः महीयन्ते प्रकाशदानेन पूज्यन्ते प्रकाश्यन्त इति यावत्। इत्येतत् वाव प्रसिद्धम्, आदित्यस्थेन वासुदेवेन सर्वे लोकाः भूरादिशब्दवाच्या अनिरुद्धप्रद्युम्नसङ्कर्षणा महीयन्ते पूज्यन्ते स्वेच्छयेत्यर्थः। महो वासुदेवः चन्द्रमास्तत्र स्थितः। आह्लादकत्वात् चन्द्रमाशब्दवाच्यश्च। तस्य महत्त्व-मुपपादयति—चन्द्रमसेति। सर्वाणि ज्योतींषि। अग्निवाय्वादित्याख्यानि चन्द्रमसा महीयन्ते पूज्यन्ते अलङ्क्रियन्त इति यावत्। चन्द्रस्थेन वासुदेवेन सर्वाणि ज्योतींषि अग्निवाय्वादित्यसञ्ज्ञकानि अनिरुद्धादीनि महीयन्त इत्यर्थः। एवमुत्तरत्रापि योजना द्रष्टव्या, अर्थानुसारेण पादबद्धाक्षरा ऋचः। सामानि ऋच एव गीतिमत्यो, यजूंष्य-विवक्षितछन्दोरूपाणि गद्यानि। मह इति ब्रह्मोङ्कारः। अखिलवेदप्रतिपादितत्वात् बृहत्वाच्च सर्वे वेदा ऋगाद्याः महीयन्ते शोभन्ते तथा ब्रह्मणा वेदप्रतिपाद्येन बृहत्वात् तच्छब्दवाच्येन वासुदेवेन सर्वे वेदा ऋगादिशब्दवाच्या अनिरुद्धाद्याः ॥१४॥

सान्वयानुवाद—भूः = भूः, इति = अनुकरणार्थ, वै = स्मरणार्थ, अयम् = यह, लोकः = लोक, भुवः = भुव, इति, अन्तरिक्षम् = अन्तरिक्ष लोक, सुवः = स्व, इति, असौ = वह, लोकः = लोक, महः = मह, इति, आदित्यः = आदित्य, आदित्येन = आदित्य से, वाव = प्रसिद्ध, सर्वे = समस्त, लोकाः = लोक, महीयन्ते = पूजित होते हैं, भूः = भूः, इति, वा = स्मरणार्थ, अग्निः = अग्नि, भुवः = भुवः, इति, वायुः, सुवः = स्व इति, आदित्यः = आदित्य, महः = मह, इति चन्द्रमाः = चन्द्र, चन्द्रमसा = चन्द्र से, वाव = प्रसिद्ध, सर्वाणि = समस्त, ज्योतींषि = ज्योतियाँ, महीयन्ते = पूजित होती हैं। इति वै, ऋचः = ऋचाएँ, भुवः = भुवः, इति, सामानि = सामवेद, सुवः = स्व, इति यजूँषि = यजुर्वेद, महः = मह, इति ब्रह्म, ब्रह्मणा = ब्रह्म से, वाव = निश्चय ही, सर्वे = सब, वेदाः = वेद, महीयन्ते = पूजित होते हैं ॥१४॥

व्याख्या—भूः आदि व्याहृतिवाच्य अर्थों को बताया जा रहा है-भूः यह पहली व्याहृति है, इति शब्द अनुकरण के लिए है और 'वै' स्मरण के लिए है। यह प्रत्यक्ष भूर्लोक है। आकाश और पृथ्वी के अन्तराल में स्थित अन्तरिक्षलोक है। वह परोक्ष लोक स्वर्गलोक है। अथवा भूः आदि व्याहृतिवाच्य के नाम अनिरुद्ध, प्रद्युम्न, सङ्कर्षण मूर्त्ति की उपासना के लिए नामान्तर = दूसरे नामों के निर्देश किये गये हैं, ऐसा समझना चाहिये। 'मह' यह व्याहृतिवाच्य वासुदेव आदित्य है अर्थात् आदित्य में स्थित है।

साक्षात् परब्रह्म वामन रूप से अदिति के पुत्र होने से आदित्य शब्दवाच्य है। ठीक ही कहा है कि—

'सशङ्खचक्ररविमण्डलस्थितं कुशेशयाक्रान्तमनन्तमच्युतम्।
भजामि बुद्ध्या तपनीयमूर्तिं सुरोत्तमं चित्रविभूषणोज्ज्वलम्' ॥

विचित्र विभूषणों से उज्ज्वल, श्वेतकमलधारी, तपनीयविग्रह, शङ्ख-चक्रधारी, आदित्यमण्डल में स्थित अनन्त अच्युत भगवान् वासुदेव को मैं मन से भजता हूँ।

'अदितेर्धिष्ठितं गर्भं भगवन्तं सनातनम्'। 'वामनत्वाच्च वामनः'।

(श्रीमद्भागवत ८।१७।२४,१०।३।४२)

यह 'मह' शब्द आकारान्त है, सकारान्त नहीं। आदित्य के महत्त्व का उपपादन करते हैं—प्रसिद्ध आदित्य से समस्त लोक = भूमि, अन्तरिक्ष आदि लोक प्रकाशदान द्वारा पूजित होते हैं अर्थात् प्रकाशित हो रहे हैं। आदित्यस्थ भगवान् वासुदेव द्वारा समस्त लोक भूः आदि शब्दवाच्य अनिरुद्ध, प्रद्युम्न और सङ्कर्षण अपनी इच्छा से पूजित हो रहे हैं। मह वासुदेव चन्द्रमा उसमें स्थित है। आह्लादकत्व होने से चन्द्रमा शब्दवाच्य भगवान् वासुदेव है। उसके महत्त्व का उपपादन करते हैं—सारी ज्योतियाँ पूजित होती हैं। अर्थात् अग्नि, वायु और आदित्य चन्द्र से अलङ्कृत होते हैं। चन्द्रमा में स्थित वासुदेव द्वारा अग्नि, वायु और आदित्य संज्ञक अनिरुद्ध, प्रद्युम्न तथा सङ्कर्षण अलङ्कृत होते हैं। इस प्रकार उत्तरत्र भी जोड़ना एवं जानना चाहिये। अर्थानुसार पादबद्ध अक्षर ऋचाएँ हैं। अखिलवेदप्रतिपाद्य बृहत्तम तत् शब्दवाच्य भगवान् वासुदेव से निखिल वेद ऋग् आदि पदवाच्य अनिरुद्ध, प्रद्युम्न और सङ्कर्षण हैं ॥१४॥

भूरिति वै प्राणः। भुव इत्यपानः। सुवरिति व्यानः। मह इत्यन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते। ता वा एताश्चतस्रश्चतुर्धा। चतस्रश्चतस्रो व्याहृतयः। ता यो वेद। स वेद ब्रह्म। सर्वेऽस्मै देवा बलिमावहन्ति ॥१५॥

इति पञ्चमोऽनुवाकः ॥१५॥

तत्त्वप्रकाशिका—प्राण उच्छ्वासकर्मा। अपानो निःश्वासकर्मा। व्यानः प्राणापानसन्धिस्थो वीर्यवत् कर्महेतुः। अन्नमदनीयम्। मह इत्यन्नम्। अन्नेन प्रसिद्धेन सर्वे प्राणाद्याः महीयन्ते = पूज्यन्ते, आप्यायिता भवन्ति। तथाऽन्नस्थेन तच्छब्दवाच्येन वासुदेवेन सर्वे प्राणाः प्राणादिशब्दवाच्या अनिरुद्धाद्याः महीयन्ते इत्यर्थः। उपसंहरति—ता वा एता इति। अत्रैव प्रत्येकश इति पदद्वयमध्याहार्यं तथा च ता वा एताश्चतस्रोऽनिरुद्धादिमूर्तयः। एवं भूरिति वा अयं लोक इत्यादिप्रकारेण प्रत्येकश्चतुर्धा एवं सति षोडशमूर्तयः सम्पन्ना इत्यर्थः। एवं षोडशमूर्तिवेतुः फलमाह—चतस्रश्चतस्र इति या इति शेषः। याश्चतस्रः व्याहृतयो भूरादिव्याहृतिचतुष्टयप्रतिपाद्या अनिरुद्धादि-मूर्तयः, याश्च प्रत्येकशश्चतस्रश्चतस्रः भूरिति वा अयं लोक इत्यादिप्रकारेण षोडशमूर्तय इति यावत्। ताः यो माहाचमस्य नामा चतुर्मुखो वेद सः सावधारणमेतत् स एव ब्रह्म

वेद सम्यक् परमब्रह्मज्ञानी तस्यैव सम्यक् षोडशात्मस्वरूपवित्वादिति भावः। अस्मै सम्यक् षोडशात्मविदे सर्वे देवा बलिं = पूजां च, आ अतितरां वहन्ति = प्रापयन्ति, कुर्वन्तीति यावदित्यर्थः ॥१५॥

इति पञ्चमोऽनुवाकः ॥५॥

सान्वयानुवाद—भूः = भूः, इति, वै = ही, प्राणः = प्राण है, भुवः = भुवः इति, अपानः = अपान है, सुवः = स्वः, इति, व्यानः = व्यान है, महः = मह, इति, अन्नम् = अन्न है, अन्नेन = अन्न से, वाव = ही, सर्वे = सभी, प्राणाः = प्राण, महीयन्ते = तृप्त होते हैं, ताः = वे, वै = ही, एताः चतस्रः = ये चारों, चतुर्धा = चार प्रकार के हैं, चतस्रः चतस्रः = एक-एक करके चार-चार भेद होने से कुल सोलह, व्याहृतयः = व्याहृतियाँ हैं, ताः = उनको, यः। जो, वेद = जानता है, सः = वह, ब्रह्म = ब्रह्म को, वेद = जानता है, अस्मै = इस उपासक के लिए, सर्वे = सब, देवाः = देवता, बलिम् = पूजा, आवहन्ति = करते हैं ॥१५॥

व्याख्या—ऊपर लम्बी साँस लेना यह प्राण का कर्म है और अपान का कर्म निःश्वास = निर्गत साँसे, व्यान और अपान सन्धि में स्थित वीर्य की भाँति कर्म हेतु है। समस्त प्राण आदिप्रसिद्ध अन्न से ही आप्यायित होते हैं। अन्न में स्थित तत् शब्दवाच्य भगवान् वासुदेव से प्राण आदि शब्दवाच्य अनिरुद्ध, प्रद्युम्न और सङ्कर्षण अपनी इच्छा से पूजित होते हैं। वासुदेव, सङ्कर्षण, प्रद्युम्न और अनिरुद्ध ये चार प्राकृत मूर्त्ति रहित मन्त्रमूर्त्तियाँ हैं। यह लोक इत्यादि प्रकार से एक-एक करके चार प्रकार की हैं, इस प्रकार पदद्वय का अध्याहार करने पर सोलह मूर्तियाँ सम्पन्न होती हैं। सोलह मूर्त्ति को जाननेवाले व्यक्ति का फल बताते हैं—जो चारों व्याहृतियाँ हैं, भूः आदि व्याहृति नाम चतुष्टयप्रतिपाद्य अनिरुद्धादि मूर्त्तियाँ हैं, जो प्रत्येक चार-चार हैं। यह लोक इत्यादि प्रकार से सोलह मूर्त्तियाँ हैं। वे जो माहाचमस्य नामा चार मुखवाले ब्रह्मा जी जानते हैं, वह सावधारण यह वही ब्रह्म को भली-भाँति जानते हैं, वही परम ब्रह्मज्ञानी है। वही सम्यक् षोडशात्मस्वरूप को जाननेवाला है। इस सम्यक् षोडशात्मस्वरूप वेत्ता के लिए समस्त देवगण बलि पहुँचाते हैं अर्थात् उसे नाना प्रकार की वस्तुएँ भेंट करते हैं।

पञ्चम अनुवाक समाप्त ॥५॥

•

स य एषोऽन्तर्हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः। अमृतो हिरणमयः। अन्तरेण तालुके। य एष स्तन इवावलम्बते। सेन्द्रयोनिः। यत्रासौ केशान्तो विवर्त्तते। व्यपोह्य शीर्षकपाले ॥

तत्त्वप्रकाशिका—एवं भूरादिनामिनोऽनिरुद्धादेर्लोकादावुपास्तिमभिधाय देहे चोपास्तिमधिष्ठानकथनपूर्वमाह—स एष इत्यादिना। य एष प्रसिद्धः हृदयान्तराकाशो वर्त्तते तस्मिन् दहराकाशे सोऽयं मनोमयः मनः प्रधानः पुरुषोऽनिरुद्धोऽस्ति। स कीदृश

इत्यत आह—अमृत इत्यादि। अमृतः = देहनाशेऽपि नाशशून्यः। हिरण्मयः = हिरण्यं बाह्यसुखविलक्षणं सुखम्। मयट् चाधिक्यार्थे तथा चेतरविलक्षणपूर्णानन्दस्वरूप इत्यर्थः। प्रद्युम्नस्य स्थानमाह—अन्तरेणेति। तालुके = तालुकस्य अन्तरेण = मध्ये य एष प्रसिद्धः स्तन इव अजा गलस्तन इवावलम्बते सा इन्द्रस्य तन्नामकस्य प्रद्युम्नस्य योनिराधारस्थानम्। योनिशब्दापेक्षया सेति स्त्रीलिङ्गम्। सङ्कर्षणस्थानमाह—यत्रासाविति। यत्र यः विः सुपर्णरूपत्वात् विनायकः सङ्कर्षणः। असौ यत्र देहे केशान्तः प्रथमा सप्तम्यर्थे केशान्ते केशमूले वर्त्तते। वासुदेवस्थानमाह—व्यपोहीति। जगति व्यपगते सति प्रलयकाले स्थातृत्वेन व्यपः व्यपशब्दवाच्यः, हि तथात्वेन स्मृत्यादिप्रसिद्धः वासुदेवः। आशीर्षकपाले नञ् पर्य्युदासार्थः। तथा च शीर्षसम्बन्धिनीये कपाले उभयपार्श्वभागाविति यावत्। ताभ्यां भिन्ने स्थाने कपालादुपरिगतस्थान इति यावत् तिष्ठतीत्यर्थः॥

सान्वयानुवाद—सः = वह, यः = जो, एषः = यह, अन्तर्हृदये = हृदय के अन्दर, आकाशः = आकाश है, तस्मिन् = उसमें, अयम् = यह, हिरण्मयः = हिरण्मय, अमृतः = अमृत, मनोमयः = मनोमय, पुरुषः = पुरुष है। अन्तरेण तालुके = तालु के बीच में, यः = जो, एषः = यह, स्तनः इव = स्तन के समान, अवलम्बते = अवलम्बित है, सा = वह, इन्द्रयोनिः = इन्द्रयोनि है, यत्र = जहाँ, असौ = वह, केशान्तः = केशमूल में रहता है। व्यपः = परमात्मा, हि = निश्चय ही, अशीर्षकपाले = अशीर्ष कपाल में रहता है।

व्याख्या—शास्त्र में लिखा है—'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्'। इतिहास (महाभारत) और पुराणों द्वारा वेदोपनिषदों के अर्थों का स्पष्टीकरण करे। पुराणों के अर्थों को वेदों की भाँति जानना चाहिये। इस अनुवाक में भूः आदि नामवाले अनिरुद्ध आदि के लोकादि में उपासना बताकर देह में उपासना का अधिष्ठान बताते हैं—जो यह प्रसिद्ध हृदयपुण्डरीक के भीतर आकाश है उस दहराकाश में वही यह मनोमय = मनप्रधान पुरुष अनिरुद्ध है।

'मनो बुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम्।
चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया'॥ (श्रीमद्भा. ३।२६।१४)

अन्तःकरण एक ही है किन्तु लक्षणरूपा वृत्तिभेद से चार प्रकार का लक्षित होता है। जैसे मन, बुद्धि, अहङ्कार और चित्त। मन समस्त इन्द्रियों का अधीश्वर है, जिसके अधिष्ठाता देवता भगवान् अनिरुद्ध है। ज्ञान का उद्गमस्थान बुद्धि है, जिसके अधिष्ठाता देवता भगवान् प्रद्युम्न है। अहङ्कार-अभिमान के अधिष्ठाता देवता भगवान् सङ्कर्षण है। 'सङ्कर्षणमहमित्यभिमानलक्षणं यं सङ्कर्षणमित्याक्षते'। (५।२५।२) जीवों का शुद्ध चित्त वसुदेव शब्द से कहा जाता है, उसमें प्रकट होने के कारण परमात्मा का नाम वासुदेव पड़ा (श्रीमद्भागवत ४।३।२३)। इस प्रकार क्रमशः श्रीभगवान् मन, बुद्धि, अहङ्कार और चित्त के अधिठाता है। इस अनुवाक में ये ही चार बातें कही गयी हैं। दो श्लोकों से अन्तःकरण, अहङ्कार, बुद्धि और मन के अधिष्ठाता भगवान् वासुदेव, सङ्कर्षण, प्रद्युम्न और अनिरुद्ध को प्रणाम करते हैं—

'वासुदेवाय शान्ताय कूटस्थाय स्वरोचिषे ।
सङ्कर्षणाय सूक्ष्माय दुरन्तायान्तकाय च ॥
नमो विश्वप्रबोधाय प्रद्युम्नायान्तरात्मने ।
नमो नमोऽनिरुद्धाय पूर्णाय निभृतात्मने' ॥ (श्रीमद्भागवत ४।२४।३४-३६)

भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ । सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम् । वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति ॥१६॥

तत्त्वप्रकाशिका—पुनरपि भूरादिनामिनोऽनिरुद्धादेरधिदैवमग्न्यादावधिष्ठाने उपास्तिप्रकारमाह-भूरित्यग्न्यावित्यादिना । भूरिति नामाऽनिरुद्धोऽग्नौ प्रतितिष्ठति । संव्यवस्थितः । भुव इति कीर्त्तितः प्रद्युम्नो वायौ तिष्ठति, सुवरिति नामा सङ्कर्षण आदित्ये सूर्ये तिष्ठति । मह इति नामा वासुदेवो ब्रह्मणि चतुर्मुखे तिष्ठति । वासुदेवस्य परिच्छिन्ने चतुर्मुखाख्याधिष्ठाने स्थितत्वोक्त्या प्राप्तपरिच्छिन्नत्वशङ्कां परिहरति—आप्नोति इति । स्वाराज्यम् = स्वस्याधीनतया आसमन्ताद् विद्यमानं यद्राज्यमव्याकृताकाशादिकं जगत् तत् आप्नोति । मनसस्पतिम् = मनःशब्दोपलक्षितस्य ज्ञानक्रियाशक्तेरन्तःकरणपतिं फलयितारम् । वाक्पतिः । वागिति कर्मेन्द्रियमात्रस्योपलक्षणं वाचः पतिर्वाक्पतिः । चक्षुष्पतिः श्रोत्रपतिः स्पष्टम् । चक्षुःश्रोत्रयोर्ग्रहणं त्वग्घ्राणरसनानामुपलक्षणार्थम् । विज्ञानपतिः विज्ञानं बुद्धिस्तस्य पतिः । एतत् एतेषु वागादीन्द्रियेषु ततो नित्यं स्थित इत्यर्थः । मनोऽनधीतेन्द्रियाणां स्वस्य कार्यजननाक्षमत्वान्मनोऽधिष्ठितत्वं तावदिन्द्रियाणामपेक्षितं मनसि चानिरुद्धस्य सत्त्वेन तेषां तद्व्याप्तत्वप्राप्तौ मनोनामकानिरुद्धे वासुदेवस्य व्याप्ततयावस्थितत्वेन वागादीन्द्रियेषु वासुदेवस्तिष्ठतीति व्याप्त्या भवति वासुदेवो वागादिपतिरिति भावः ॥१६॥

सान्वयानुवाद—भूः = भूः, इति, अग्नौ = अग्नि में, प्रतितिष्ठति = प्रतिष्ठित होता है, भुवः = भुवः, इति, वायौ = वायु में प्रतिष्ठित होता है, सुवः = स्व, इति, आदित्ये = आदित्य में प्रतिष्ठित होता है, महः = मह, इति, ब्रह्मणि = ब्रह्म में प्रतिष्ठित होता है, स्वाराज्यम् = स्वराज्य को, आप्नोति = प्राप्त होता है, मनसस्पतिम् = मन के पति को, आप्नोति = प्राप्त होता है, वाक्पतिः = वाणी का पति, चक्षुष्पतिः = नेत्रों का पति, श्रोत्रपतिः = कानों का पति (पति = रक्षा करनेवाला), विज्ञानपतिः = विज्ञान का पति, एतत् = इन सबों में, ततः भवति = नित्य स्थित है।

व्याख्या—फिर से भूः आदि नामों का अनिरुद्ध आदि का अधिदैव अग्नि आदि अधिष्ठान में उपासना का प्रकार बताया जा रहा है—भूः इस नाम से प्रसिद्ध अनिरुद्ध अग्नि में सम्यक् व्यवस्थित है । भुवः इस कीर्ति से प्रद्युम्न वायु में स्थित है । स्वः इस सञ्ज्ञा से सङ्कर्षण सूर्य में स्थित है । 'मह' यह नाम है जिसका वह भगवान् वासुदेव ब्रह्मा में स्थित है । वासुदेव का परिच्छन्न होने पर चतुर्मुख (ब्रह्मा) नामक अधिष्ठान में स्थितत्व उक्ति से प्राप्त परिच्छिन्नत्व शङ्का का परिहार करते हैं—अपने अधीन रूप से

दिशा-विदिशा, ऊपर-नीचे, बाहर-भीतर सब ओर से विद्यमान जो राज्य अव्याकृत आकाशादि जगत् है उसे प्राप्त होता है। मन शब्द से उपलक्षित ज्ञान और क्रिया के अन्त:करण का पति (फलयिता) है। वही कर्मेन्द्रिय मात्र का उपलक्षण वाणी का पति है। नेत्रों और कानों का पति है। विज्ञान नामा बुद्धि का पति इन वाक् (वाणी) आदि इन्द्रियों में नित्य स्थित है। मन के अधिष्ठाता देवता अनिरुद्ध है और वाणी के अधिष्ठाता देवता वासुदेव है। जो वागीश नामक भगवान् का हयग्रीव स्वरूप है ॥१६॥

आकाशशरीरं ब्रह्म। सत्यात्मप्राणारामं मन आनन्दम्। शान्तिसमृद्धममृतम्। इति प्राचीनयोग्योपास्व ॥१७॥

इति षष्ठोऽनुवाकः ॥६॥

तत्त्वप्रकाशिका—प्रकृतस्यैव वासुदेवस्य महिमानमाह—आकाशेति। वासुदेवाख्यं ब्रह्म आकाशशरीरं = आकाशवत् व्याप्तशरीरं, सत्यात्मनिर्दोषगुणस्वरूपं प्राणारामम्। प्राणं = बलरूपं च, तत् आराममानन्दरूपं चेति प्राणारामम्। मन आनन्दम्। मन अवबोधन इति धातो: मनोज्ञानरूपं च तत् आनन्दरूपं चेति तथोक्तम्। शान्ति—शस्य = सुखस्य, तदुन्नतिपरम्पराया इति यावत्, अन्ति = अन्ते स्थितम्। निरवधिकसुखोन्नतियुक्तमित्यर्थ:। समृद्धम्—सं = सम्यक्, स्वत: अन्यप्रसादमन्तरेण ऋद्धम् = पूर्णम्। अमृतम् = नित्यमुक्तम्। हे प्राचीनयोग्य अधिकारवर्गेषु प्राधान्यात् प्राथमिकयोग्य इति पूर्वोक्तप्रकारेण। अनिरुद्धादिरूपिणं मामुपास्व = ममोपास्तिं कुर्विति चतुर्मुखं प्रति विष्णोर्वचनम् ॥१७॥

इति षष्ठोऽनुवाकः ॥६॥

सान्वयानुवाद—आकाशशरीरं ब्रह्म = आकाश के समान व्याप्त शरीर ब्रह्म, सत्यात्म = सत्यस्वरूप, प्राणारामम् = प्राणरूप और आनन्दरूप, मन आनन्दम् = ज्ञानरूप और आनन्दरूप, शान्ति = सुख के अन्त में स्थित, समृद्धम् = सम्यक् ऋद्ध = पूर्ण, अमृतम् = नित्यमुक्त, इति = पूर्वोक्त प्रकार से, प्राचीनयोग्य = हे प्राचीनयोग्य, उपास्व = मेरी उपासना कर ॥१७॥

व्याख्या—प्रकृत प्रकरण में स्थित भगवान् वासुदेव की ही महिमा का श्रुति प्रतिपादन करती है—परमात्मा वासुदेव नामक परम ब्रह्म आकाश की भाँति व्याप्त शरीर, सत्यस्वरूप, निर्दोष गुणस्वरूप, प्राण-बलरूप, आनन्दस्वरूप और ज्ञानस्वरूप है। सुख के अन्त में स्थित निरवधिक सुखोन्नति से युक्त, भलीभाँति स्वत: दूसरे के प्रसाद (प्रसन्नता) के बिना ऋद्ध = पूर्ण है और अमृत = नित्यमुक्त है। हे प्राचीन-योग्य = आद्य ऋषि ब्रह्मन्! पहले कहे गये प्रकार से चतुर्व्यूह रूपी मेरी उपासना करो, ऐसा चतुर्मुख ब्रह्मा के प्रति भगवान् श्रीविष्णु का वचन है ॥१७॥

षष्ठ अनुवाक समाप्त ॥६॥

•

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशः। अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि। आप ओषधयो वनस्पतय आकाश आत्मा। इत्यधिभूतम्। अथाध्यात्मम्। प्राणो व्यानोऽपान उदानः समानः। चक्षुः श्रोत्रं मनो वाक् त्वक्। चर्म माꣳसꣳ स्नावास्थिमज्जा। एतदधिविधाय ऋषिरवोचत्। पाङ्क्तं वा इदꣳ सर्वम्। पाङ्क्तेनैव पाङ्क्तꣳ स्पृणोतीति॥१८॥

इति सप्तमोऽनुवाकः॥७॥

तत्त्वप्रकाशिका—दिशः = प्राच्याद्याः। अवान्तरदिशः = आग्नेयाद्याः कोणाः। ओषधयः = फलपाकान्ताः व्रीह्यादयः। वनस्पतयः = अश्वत्थाद्याः। आत्मा = अहङ्कार-तत्त्वम्। इत्यधिभूतम्। भूतसम्बन्धपाङ्क्तम्। इति निरूपितमित्यर्थः। अथाध्यात्मम्। आत्मानं देहमधिकृत्य विद्यमानम्। तत्सम्बन्धीति यावत् पाङ्क्तं निरूप्यत इत्यर्थः। स्नावेन सहितम् अस्थिस्नावास्थि। एतत् पृथिव्यादिपाङ्क्तषट्कम्। अधिविधाय = अधिकृत्य। ऋषिः = मुख्यतो वेदद्रष्टा वासुदेवोऽवोचत्। किमवोचदित्यतस्तदेव दर्शयति–पाङ्क्तं वा इदमिति। इदं सर्वं पृथिव्यादिवाय्वादिकं पाङ्क्तं पञ्चत्वसङ्ख्य-योपेतं तथा चेदं पाङ्क्तं पृथिव्याद्यं पाङ्क्तषट्कं स्वयं हरिः पाङ्क्तेनैव पञ्चत्व-सङ्ख्योपेतेन नारायणादिरूपेण प्रविष्टः सन्निति शेषः, स्पृणोति वलयति स्वस्वकार्यक्षमं करोतीत्यर्थः॥१८॥

इति सप्तमोऽनुवाकः॥१७॥

सान्वयानुवाद—पृथिवी = पृथ्वी, अन्तरिक्षम् = आकाश और पृथ्वी के अन्तराल में स्थित लोक, द्यौः = स्वर्गलोक, दिशः = दिशाएँ, अवान्तरदिशः = अवान्तर दिशाएँ, अग्निः = अग्नि, वायुः = वायु, आदित्यः = सूर्य, चन्द्रमाः = चन्द्र, नक्षत्राणि = नक्षत्र, आपः = जल, ओषधयः = ओषधियाँ, वनस्पतयः = वनस्पतियाँ, आकाशः = आकाश, आत्मा = अहङ्कार तत्त्व, इति अधिभूतम् = यह अधिभूत है। अथ = इसके बाद, अध्यात्मम् = अध्यात्म का उपदेश करते हैं, प्राणः = प्राण, व्यानः = व्यान, अपानः = अपान, उदानः = उदान, समानः = समान, चक्षुः श्रोत्रम् = आँख, कान, मनः वाक् = मन, वाणी, त्वक् चर्म = त्वचा, चर्म, मांसम् = मांस, स्नावा = नाड़ी, अस्थि = हड्डी, मज्जा = मज्ज, एतत् = यह, अधिविधाय = अधिकार करके, ऋषिः = वेदद्रष्टा ने, अवोचत् = बोला, इदम् = यह, सर्वम् = सब, वा = निश्चय ही, पाङ्क्तम् = पाङ्क्त है, पाङ्क्तेन एव = पाङ्क्त से ही, स्पृणोति इति = अपने-अपने कार्य कर सकता है।

व्याख्या—पूर्व-पश्चिम आदि दिशाएँ, अवान्तर दिशाएँ–आग्नेय आदि कोण, ओषधियाँ—धान, जौ आदि; वनस्पतियाँ–अश्वत्थ आदि वृक्ष, आत्मा–अहङ्कार तत्त्व; इन्हें अधिभूत कहते हैं। इस प्रकार भूतों से सम्बन्ध पाङ्क्त (पंक्ति) का निरूपण किया गया है। इसके बाद आत्मा—देह का अधिकार करके विद्यमान, उससे सम्बन्धी पंक्ति का निरूपण किया जा रहा है—जैसे प्राण, व्यान, अपान, उदान और समान ये शरीर

के अन्दर रहने वाले हैं। आँख, कान, मन, वाणी, त्वचा, चर्म, मांस, नाड़ी के साथ हड्डी और मज्जा है। इस प्रकार अधिकार करके मुख्य रूप से वेदद्रष्टा वासुदेव ने कहा। क्या कहा है ? इस पर उसे ही दिखलाते हैं—यह सब पृथ्वी आदि तथा वायु आदि पाङ्क्त पञ्चत्व संख्या से युक्त तथा यह पाङ्क्त पृथ्वी आद्य पाङ्क्त षट्क स्वयं हरि पाङ्क्त से ही पञ्चत्व सङ्ख्यायुत नारायणादि रूप से प्रविष्ट होकर स्व-स्व कार्यक्षम करते हैं ॥१८॥

॥ सप्तम अनुवाक समाप्त ॥७॥

•

ओमिति ब्रह्म। ओमितीदꣳ सर्वम्। ओमित्येतदनुकृति ह स्म वा। अप्योश्रावयेत्याश्रावयन्ति। ओमिति सामानि गायन्ति। ओꣳशोमिति शस्त्राणि शꣳ सन्ति। ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति। ओमिति ब्रह्म प्रस्तौति। ओमित्यग्निहोत्रमनुजानाति। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति ब्रह्मैवोपाप्नोति ॥१९॥

॥ इत्यष्टमोऽनुवाकः ॥८॥

तत्त्वप्रकाशिका—वेदविद्याभ्यासिनः पूर्वभाविनीं प्रणवविद्यामाह—ओमिति ब्रह्मेत्यादिना। ओङ्कारवाच्यो ब्रह्म भगवान् वासुदेवो यद्यद्भगवतो रूपं तदिदं सर्वमोमिति शब्देनोच्यते। समस्तरूपसहितस्य भगवत ओङ्कारवाच्यत्वं कुतः सिद्धिमिति चेत्। भगवन्तमुद्दिश्य कर्मकर्त्तृभिः अध्वर्य्यादिभिर्नियमेन तदादावुच्चार्यमाणत्वादित्यभिप्रेत्याह—अप्य इति। अपि तस्मादोङ्कारस्य भगवद्वाचकत्वादेव भगवदुद्देशेन कर्मकर्त्तारोऽध्वर्यवः ओङ् श्रावयेत्याश्रावयन्ति। ओमित्युच्चार्य्य आश्रवयेत्याश्राव मन्त्रं पठन्ति। अन्यथा तत्र स्यादित्यर्थः। ननु कर्मकर्त्तृभिरध्वर्युभिः भगवदुद्देशेनोमित्युचार्याश्रावमन्त्रपाठेनोमित्यस्यैव भगवद्वाचकत्वं प्राप्तं न त्वोङ्कारस्येत्यत उक्तम्। ओमित्येतदनुकृतीति। ओङ् इत्येतत् ओमित्येतदनुकृति ओमित्येतदक्षररूपम्। ओङ्कारोकारयोरेकार्थत्वमेवेत्यर्थः। ह स्म वा इति निपातत्रयेणेदं सुप्रसिद्धमिति द्योतयति। तथा भगवदुद्देशेन कर्मकर्त्तारः। उद्‌गातारः ओमित्युचार्य सामानि गायन्ति उद्‌गान् मन्त्रान् पठन्ति। तथा भगवदुद्देशेन कर्मकर्त्तारो होतारः। ओमित्युच्चार्य्य ओङ् शों शावेति शस्त्राणि शंसन्ति मन्त्रविशेषान् पठन्ति। तथा भगवदुद्देशेन कर्मकर्त्ताऽध्वर्युरोमित्युच्चार्य ओधामोदैवतेति प्रतिगरं प्रतिगृणाति। प्रतिगिरसंज्ञं मन्त्रं विशेषं पठति। कर्मकर्त्ता ब्रह्माख्य ऋत्विक् ओमित्युचार्य प्रस्तौति। सोमस्य प्रकर्षेण प्रसवनकण्डनं करोति। यजमानः ओमित्युच्चार्य्याग्निहोत्रमनुजानाति। अनुतिष्ठतीति यावत्। तथाऽहं ब्रह्मपरं ब्रह्मोपाप्नुवानि प्राप्नुयामित्यभिप्रेत्य प्रवक्ष्यन् अञ्जसा स्वाध्यायकृत् ब्राह्मणः। ओमित्याह = ओमित्युच्चार्य्य स्वाध्यायं करोतीत्यर्थः। तस्य फलमाह—ब्रह्मैवेति। एवं जानन्त एते अध्वर्य्वाद्याः। ओङ्कारवाच्यं परब्रह्मैवाप्नोति। एकवचनं बहुवचनार्थे, आप्नुवन्ति = प्राप्नुवन्तीत्यर्थः ॥१९॥

॥ इत्यष्टमोऽनुवाकः ॥

व्याख्या—ओङ्कार शब्दवाच्य ब्रह्म भगवान् वासुदेव के जो-जो रूप हैं यह सब ओम् इस शब्द से कहे जाते हैं। समस्त रूप सहित भगवान् में ओङ्कारवाच्यत्व कैसे सिद्ध हो सकता है ? ऐसी शङ्का होने पर उसका प्रत्युत्तर देते हुए कहते हैं—श्रीभगवान् को उद्देश करके कर्म-कर्त्ता अध्वर्यु आदि द्वारा नियम से ओङ्कार का पहले उच्चारण किया जाता है। ऐसा ही स्मृतिशास्त्रों में कहा गया है—'ओमित्येकाक्षरं ब्रह्म' (श्रीमद्भगवद्गीता ८।१३); 'मामन्ते ब्रह्म यास्यथ' (श्रीमद्भागवत १०।७३।२३)। ओम् यह प्रणवात्मक एकाक्षर ब्रह्म है। श्रीभगवान् बीस हजार आठ सौ राजाओं से कहते हैं—तुमलोग अन्त में (शरीरपात होने पर) मुझ ब्रह्म को प्राप्त हो जाओगे। इसलिये ओङ्कार भगवान् का वाचक है। भगवान् के उद्देश से कर्म करने वाले अध्वर्यु 'ओङ्' सुनाइये-ऐसा कहने पर सुनाते हैं। 'ओम्' इस प्रकार उच्चारण करके मन्त्र पढ़ते हैं। 'ओम्' इस प्रकार की यह अनुकृति अक्षर रूप है। ओङ्कार और उकार में एकार्थता है। ह स्म और वा इन निपातत्रय से यह सुप्रसिद्ध है-इस प्रकार द्योतित करता है। सामवेद का गान करते हैं। भगवान् के उद्देश से कर्म करने वाले होता 'ओं शों' ऐसे विशेष मन्त्रों को पढ़ते हैं। भगवान् के उद्देश से कर्मकर्त्ता अध्वर्यु नामक ऋत्विज 'ओं' ऐसा पहले उच्चारण करके प्रतिगरसंज्ञक विशेष मन्त्रों को पढ़ते हैं। 'ओम्' ऐसा कहकर कर्मकर्त्ता ब्रह्मा नामक ऋत्विज सोम का अच्छी तरह प्रसवन कण्डन करते हैं। यजमान 'ओम्' इस प्रकार उच्चारण करके अग्निहोत्र का अनुष्ठान करते हैं। 'मैं परब्रह्म को प्राप्त करूँ' ऐसा अभिप्राय करके स्वाध्याय करने वाले ब्राह्मण 'ओं यों' कहकर (उच्चारण करके) स्वाध्याय करते हैं। इस प्रकार ये अध्वर्यु आदि श्रीभगवन्मुखोल्लासार्थ फलाभिसन्धिशून्य होकर सत्कर्म करनेवाले ओङ्कार शब्दवाच्य परब्रह्म को ही प्राप्त होते हैं ॥१९॥

॥ अष्टम अनुवाक समाप्त ॥८॥

•

ऋतं च स्वाध्यायप्रवचने च। सत्यं च स्वाध्यायप्रवचने च।
तपश्च स्वाध्यायप्रवचने च। दमश्च स्वाध्यायप्रवचने च।
शमश्च स्वाध्यायप्रवचने च। अग्नयश्च स्वाध्यायप्रवचने च।
अग्निहोत्रञ्च स्वाध्यायप्रवचने च। अतिथयश्च स्वाध्यायप्रवचने च।
मानुषञ्च स्वाध्यायप्रवचने च। प्रजा च स्वाध्यायप्रवचने च।
प्रजनश्च स्वाध्यायप्रवचने च। प्रजातिश्च स्वाध्यायप्रवचने च ॥२०॥

तत्त्वप्रकाशिका—ऋतं = यथार्थज्ञानम्। स्वाध्यायः = अध्ययनम्। प्रवचनम् = अध्यापनम्। एतानि कर्त्तव्यानीति शेषः। एवमुत्तरत्रापि कर्तव्यपदानुवृत्तिर्द्रष्टव्या। ऋतस्य कर्तव्यत्वं नाम सम्पाद्यत्वम्। सत्यम् = यथार्थज्ञानपूर्वकं यथार्थवचनं तत्पूर्वकं सत्कर्मकरणञ्च। तपः = एकादश्यादिषूपवासः श्रीभगवद्ध्यानञ्च। दमः = इन्द्रियनिग्रहः। शमः = बुद्धेः भगवन्निष्ठता। अग्नयः = अग्नीनां पूजा, अग्नीनामाधानं वा।

अग्निहोत्रं = तन्नामकं कर्म। अतिथयः = अतिथीनां पूजा। मानुषम् = स्वस्वज्ञानाधिक्येऽपि मानुषधर्मप्रवर्त्तनमेव कार्यं न तु ज्ञानाद्यैश्वर्यप्रकटनमयोग्येषु कार्यमित्यर्थः। प्रजा = शिष्यपुत्रादिरूपा। प्रजारक्षणमन्नज्ञानादिदानेन प्राप्तामयादिनिवारणेन च कर्त्तव्यमित्यर्थः। प्रजनः = पुनः प्रजननं पुत्ररूपेण सन्ततिकृतिः। प्रजातिः = उत्पन्ने तनये उपनयनादिकर्मभिः ब्रह्मण्यरूपप्रकृष्टजातिकरणम्। अत्र सर्वत्र सत्यादिभिः सह पुनः स्वाध्यायप्रवचनयोः कर्त्तव्योक्तिः सत्याद्यपेक्षयाऽत्यावश्यकत्वज्ञापनायेति द्रष्टव्यम्॥२०॥

व्याख्या—प्रिय-मधुर वाणी बोलना ऋत है। पढ़ना और पढ़ाना ये कर्त्तव्य हैं। इस प्रकार उत्तरत्र भी कर्त्तव्य पदों की अनुवृत्ति जाननी चाहिये। यथार्थ ज्ञानपूर्वक ठीक-ठीक कहना और सत्कर्मों को करना, एकादशी आदि में उपवास रहना और श्रीभगवान् का ध्यान करना तप है। दम = इन्द्रियों का निग्रह करना, शम = मन को वश में करके बुद्धि को श्रीभगवान् में लगाना, अग्नि-पूजन अथवा अग्नि का आधान करना, उसमें हवन करना और अतिथि जनों का पूजन करना, अपने-अपने ज्ञान से आधिक्य होने पर भी मानव धर्म का प्रवर्त्तन ही करना चाहिये; न कि अयोग्य व्यक्तियों में ज्ञान आदि ऐश्वर्य का प्रकटन करना चाहिये। शिष्य तथा पुत्र आदि रूपा प्रजा है। प्रजा की रक्षा अन्न एवं विद्या आदि दान द्वारा और प्राप्त रोगादि निवारण द्वारा करनी चाहिये। सन्तति चलाने के लिए पुत्ररूप से जन्म देना 'प्रजन' है, उत्पन्न पुत्र में उपनयन आदि स्वस्तिवाचनपूर्वक द्विजाति संस्कार कर्मों द्वारा ब्रह्मण्य रूप प्रकृष्ट जाति करना प्रजाति है। यहाँ पर सभी जगह सत्य आदि के साथ सच्छास्त्रों का अध्ययन और अध्यापन कार्य करते रहना चाहिये। 'स्वाध्यायोऽध्येतव्यः' यह अध्ययन विधि है जो वेदों की अमृतवाणी है॥२०॥

सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः॥२१॥

॥ इति नवमोऽनुवाकः ॥

तत्त्वप्रकाशिका—अत्र कर्त्तव्यत्वोक्तानां ऋतस्वाध्यायप्रवचनसत्यादीनां किं परस्परं साम्यमुत तत्रैकस्याधिक्यमिति शङ्कायां तत्र ऋषिमतान्याह—सत्यमित्यादिना। सत्यवचाः सत्यवचन एव निरतो रथीतरस्यापत्यं पुमान् राथीतरः = तन्नामा ऋषिः, सत्यमिति निरुक्तं सत्यमेव श्रेयः साधनमिति तदेव सम्पाद्यम्। तत्रैव तप आदेः सर्वस्यान्तर्भावादित्याह—तपोनित्यः तपोनिष्ठः। पुरुशिष्टेरपत्यं पुमान् पौरुशिष्टिस्तन्नामा कश्चिदृषिः। तप इति ध्यानादिरूपं तप एव श्रेयः साधनमिति तदेव कर्त्तव्यम्। तत्रैव ऋतसत्यत्वादीनामन्तर्भावादित्याह। मुद्गलस्यापत्यं पुमान् तद्गोत्रापत्यं वा मौद्गल्यो नाको नामतः स्वाध्यायप्रवचन एव कर्त्तव्ये इत्याह। कुत इत्यत ऋतसत्यतप आदीनां साधनेषु प्रधानादित्यभिप्रेत्याह—तद्धीति। तत् = स्वाध्यायप्रवचनकरणमेव तपः। इदमुपलक्षणं तद्धि सत्यमपि द्रष्टव्यम्। हि शब्देन प्राणायामादयस्तुष्टिपर्यन्ता द्विगुणाधिकाः स्वाध्यायोऽतः कोटिगुणः। 'तप आद्याः क्रमात्सर्वे उत्तरोत्तरतोऽधिकाः। अज्ञस्य श्रवणं श्रेष्ठमयुक्तेर्मननं तथा। ध्यानं निश्चिततत्त्वस्य तस्माच्छास्त्रावमर्शनम्। वरं दशगुणं

तस्मात् व्याख्यैकस्य शतोत्तरे'ति प्रमाणप्रसिद्धिं दर्शयति । अत इदमेव मतं पूर्वमतस्यापेक्षयाऽधिकमिति भावः । द्विरुक्तिस्तात्पर्यद्योतनार्था ॥२१॥

॥ इति नवमोऽनुवाकः ॥

व्याख्या—सत्य वचन में ही निरत रथीतर के पुत्र राथीतर ऋषि का कहना है कि सत्य का ही निर्वचन किया जाता है, सत्य ही श्रेय साधन है, उसका ही सम्पादन करना चाहिये । उसी में ही तप आदि सब का अन्तर्भाव हो जाता है, इस पर कहते हैं—तप इति । तपोनिष्ठ पुरुशिष्टि के पुत्र पौरुशिष्टि नाम वाले कोई ऋषि ने तप को ही श्रेष्ठ बताया है । निरन्तर श्रीभगवद्ध्यानरूप तप ही श्रेय साधन है, वही करना चाहिये । मुद्गल के पुत्र अथवा उनके गोत्र में उत्पन्न मौद्गल्य नाक नाम के ऋषि का कहना है कि अध्ययन और अध्यापन ही करना चाहिये । वही तप है, वही तप है । द्विरुक्ति तात्पर्य-द्योतनार्थ है । ये तीनों वैदिक ऋषि थे । पठन-पाठन से ही तत्त्व का ज्ञान होता है, समय का सदुपयोग होता है, इसलिए निवृत्तिपरक शास्त्र वेदान्तादि सात्त्विक ग्रन्थों को पढ़े और पढ़ायें । तप श्रीभगवान् का हृदय है और विद्या शरीर है—'तपो मे हृदयं ब्रह्मंस्तनुर्विद्या' । (श्रीमद्भागवत ६।४।४६) अतः विद्या-अध्ययन-अध्यापन के साथ तपरूप श्रीभगवान् का ध्यान करना चाहिये । श्रीभगवान् सत्यस्वरूप है, अतः सत्यवचन बोलना चाहिये । 'सत्यं परं धीमहि' । (श्रीमद्भागवत १।१।१)

॥ नवम अनुवाक समाप्त ॥९॥

•

अहं वृक्षस्य रेरिवा । कीर्त्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणꣳ सुवर्चसम् । सुमेधा अमृतोऽक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् ॥२२॥

॥ इति दशमोऽनुवाकः ॥

तत्त्वप्रकाशिका—पूर्वम् ऋतादेः सर्वस्मात् स्वाध्यायप्रवचनयोराधिक्यमुक्तम् । इदानीं तत्फलमाख्यायिकया निरूपयति—अहं वृक्षस्येत्यादिना । संसरत्यनेनेति संसारः = लिङ्गदेहः । तस्य रेरिवा, छेत्ता–रीङ्क्षय इति धातोः । कीर्त्तिः = मत्कीर्त्तिः । पृष्ठं गिरेरिव, पर्वतपृष्ठोपमाविस्तारेति शेषः । यथा पर्वताऽधोभाग ऊर्ध्वभागापेक्षया विस्तृतो भवत्येवं मत्कीर्त्तिरपि सर्वत्र विस्तृतेत्यर्थः । ऊर्ध्वपवित्रः = उन्नतो ह्यूर्ध्व उच्यत इति वचनादूर्ध्वशब्दस्योन्नतवाचित्वम् । उन्नतत्वं चात्युत्कृष्टत्वमत्युत्कृष्टश्च हरिरेव स्वाध्यायप्रवचनादिसम्पत्त्याऽपरोक्षज्ञानानन्तरमहमादौ तावदूर्ध्वे नात्युत्कृष्टेन विष्णुना पवित्रः पाविताऽप्रारब्धसमस्तपापरहितोऽस्मि । तद्यथैषीकतूलमिति श्रुतेः । तदनन्तरं प्रारब्धकर्मणां भोगेन क्षये चरमदेहपातानन्तरमर्चिरादिद्वारेण सूर्यलोकं प्राप्य तत्र वाजिरूपश्च नेता च वाजिनीः सूर्यस्तत्र वसतीति वाजिनीवसुस्तेन वाजिनीवसुना = विष्णुना । अमृतं प्रारब्धकर्मशेषनिर्मुक्तश्चास्मि विरजां प्राप्य तत्र लिङ्गशरीराख्यवृक्षस्य रेरिवा छेत्ताऽस्मि ।

अनन्तरमभिव्यक्तबहुतरानन्दमनुभवन्नैव सवर्चसं द्रविणं सुवर्णमिवाहं जातम्। वर्चस-शब्दोऽकारान्तोऽप्यस्ति। 'ब्रह्महस्तिभ्यां वर्चस' इत्यत्र योगविभागात्समासान्तो वा। न केवलं सर्ववर्चसं द्रविणमस्मि किं नाम सुमेधाः ? सुष्ठु अभिव्यक्तं मेधा ज्ञानं यस्यासौ सुमेधाश्चास्मि। अमृतेन = मरणरहितेन भगवता, उक्षितः = सिक्तो व्याप्तः। तत्सन्निधानविशेषयुक्तश्चास्मीत्येवं मे कीर्त्तिः स्वाध्यायप्रवचनजन्ययशोलक्षणागिरेः पृष्ठमिव पर्वताधोभागवत् विस्तृता। दिगन्तविश्रान्ता जातेत्यर्थः। कस्येदं वचनमित्यप्रतीतेः श्रुतिः स्वयमाह–इतीति। इत्येवं वैवस्वतमनुवंशोत्पन्नस्य हरिश्चन्द्रपितुः त्रिशङ्कोस्तन्नाम्नो राज्ञो वेदानुवचनम्। वेदप्रवचनजन्यं फलं निरूपितमित्यर्थः ॥२२॥

॥ इति दशमोऽनुवाकः ॥१०॥

व्याख्या—पहले ऋतादि सबसे स्वाध्याय और अध्यापन का आधिक्य बताया गया है। इस समय उन दोनों का फल आख्यायिका के द्वारा निरूपण करते हैं—जीव इस स्थूल शरीर द्वारा ही संसरण करता है, इस कारण संसार लिङ्गदेह है। मैं (जीव) उसका छेदन करने वाला हूँ। रीङ् धातुक्षय अर्थ में है। मेरी कीर्त्ति पर्वत के समान विस्तार युक्त है। पहाड़ की भाँति ऊँची मेरी कीर्त्ति का लोक में विस्तार है। जिस तरह पहाड़ का नीचे का भाग ऊपर के भाग की अपेक्षा विस्तृत होता है, उसी तरह मेरी कीर्त्ति भी सभी जगह विस्तृत है। उन्नत को ऊर्ध्व शब्द से कहा जाता है। ऊर्ध्व और उन्नत ये दोनों समानार्थक शब्द हैं। उन्नतत्व, अति उत्कृष्टत्व और अति उत्कृष्ट भगवान् श्रीहरि ही है। स्वाध्याय और प्रवचन आदि सम्पत्ति द्वारा अपरोक्ष ज्ञान के अनन्तर मैं आकाश में भगवान् श्रीविष्णु द्वारा पवित्र हूँ, समस्त पापों से रहित हूँ। इसके अनन्तर प्रारब्ध कर्मों का भोग के द्वारा क्षय हो जाने पर चरम देह पातानन्तर अर्चिरादि द्वार से सूर्यलोक को प्राप्त कर वहाँ वाजिरूप नेता और वाजिनी सूर्य निवास करते हैं। वाजिनीवसु भगवान् श्रीविष्णु के द्वारा मैं अमृत हूँ, प्रारब्ध कर्मों का शेष निर्मुक्त हूँ। विरजा नदी को पाकर वहाँ लिङ्गशरीर नामक वृक्ष का मैं छेदन करनेवाला हूँ। इसके बाद अभिव्यक्त बहुतर आनन्द का अनुभव करता हुआ सुवर्ण की भाँति मैं देदीप्यमान हूँ, सुष्ठु मेधाधारण शक्तिसम्पन्न हूँ। अमृतस्वरूप भगवान् श्रीविष्णु द्वारा उक्षित (सिक्त) हूँ अर्थात् व्याप्त हूँ। इस प्रकार वैवस्वत मनु के वंश में उत्पन्न राजा हरिश्चन्द्र के पिता त्रिशङ्कु नाम के राजा का यह वेदानुवचन है। वेदप्रवचन जन्य फल का निरूपण किया है। श्रीमद्भागवत में यह आख्यायिका इस प्रकार है—विश्वामित्र ऋषि ने अपने तेज से राजा त्रिशङ्कु को सशरीर स्वर्ग भेजना चाहा, परन्तु देवताओं ने वहाँ से उसे नीचे ढकेल दिया। विश्वामित्र ऋषि ने उन्हें आकाश में ही रोक दिया और त्रिशङ्कु आजतक नीचे सिर और ऊपर पैर किये लटके हैं। यथा—

'सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते।
पातितोऽवाक्शिरा देवैस्तेनैव स्तम्भितो बलात्' ॥ (श्रीमद्भागवत ९।७।६)

॥ दशम अनुवाक समाप्त ॥१०॥

•

वेदमनूच्याचार्य्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥२३॥

तत्त्वप्रकाशिका—ब्रह्मविद्याव्याख्यानानन्तरमाचार्येणान्तेवासिनं प्रति शिक्षणीयान् नियमानाह—वेदमनूच्येत्यादिना। आचार्यो वेदम् अनूच्य = व्याख्याय अन्ते समीप एव वसतीत्यन्तेवासी शिष्यस्तमनुशास्ति शिक्षयति। शिक्षाप्रकारमाह—सत्यं वदेति। सत्यवचननिष्ठो भव धर्मं चर। स्ववर्णाश्रमविहितं कर्म चर। आचर। स्वाध्यायात् अधीत वेदादिशास्त्रात्। मा प्रमदः = प्रमादयुक्तो मा भूः। तद्विस्मृतिमान् मा भूरिति यावत्। यद्वा अनध्यायातिरिक्तदिवसेषु व्याख्यानविषये प्रमादयुक्तो मा भूरित्यर्थः। आचार्यकुले वेदाध्ययनानन्तरं प्रियं = तदभिलषितं यद्धनं तत्। आचार्याय आहृत्य = दक्षिणात्वेन दत्वा, प्रजातन्तुं = प्रजासन्ततिं, मा व्यवच्छेत्सीः = माच्छेदय, गृहस्थाश्रमस्वीकारं कुर्विति यावत्। सत्योक्तौ धर्माचरणे च तात्पर्यद्योतनाय तदुभयविषये प्रमादो मास्त्वित्याह—सत्यादित्यादिना। कुशलात् = क्षेमकरात्, कर्मणोऽदृष्टार्थान्न प्रमदितव्यम्। भूत्यै = ज्ञानमोक्षाख्यैश्वर्यविषये न प्रमदितव्यम्। यद्वा भूत्यै = भूत्या। दैवान्महैश्वर्यप्राप्त्या तत्प्राप्तावपीति यावत्, उक्तसत्यादिविषये न प्रमदितव्यमित्यर्थः ॥२३॥

सान्वयानुवाद—वेदम् अनूच्य = वेद की व्याख्या कर, आचार्यः = सद्गुरुदेव, अन्तेवासिनम् = अपने शिष्य को, अनुशास्ति = शिक्षा देते हैं, सत्यं वद = तुम सच बोलो, धर्मम् चर = धर्म का आचरण करो, स्वाध्यायात् = स्वाध्याय से, मा प्रमदः = प्रमाद न करो, आचार्याय = आचार्य के लिए, प्रियम् धनम् = दक्षिणा के रूप में उनका अभिलषित धन, आहृत्य = देकर, प्रजातन्तुम् = प्रजासन्तति को, मा व्यवच्छेत्सीः = व्यवच्छेद न करना, सत्यात् = सत्य से, न प्रमदितव्यम् = प्रमाद नहीं करना चाहिये, धर्मात् = धर्म से, न प्रमदितव्यम् = प्रमाद नहीं करना चाहिए, कुशलात् = क्षेमकर कर्मों से, न प्रमदितव्यम् = प्रमाद नहीं करना चाहिये, भूत्यै = भूति से, न प्रमदितव्यम् = प्रमाद नहीं करना चाहिये, स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् = पठन और पाठन में प्रमाद नहीं करना चाहिये।

व्याख्या—ब्रह्मविद्या की व्याख्या के बाद आचार्य अपने शिष्य के प्रति शिक्षणीय नियमों का उपदेश करते हैं—तुम हमेशा सच बोलो, झूठ नहीं बोलना चाहिये। इसके ज्वलन्त उदाहरण शुक्राचार्य जी के शिष्य महाराज बलि हैं—'नायं त्यजति सत्यवाक्'। (श्रीमद्भागवत ८।२२।३०) याज्ञवल्क्यजी ने कहा है—'वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत्'। अर्थात् जहाँ सत्य बोलने से ब्राह्मण आदि वर्णों के वध की सम्भावना हो वहाँ साक्षी असत्य (झूठ) बोल सकता है। धर्म का आचरण करना चाहिये। इसलिये—'ध्रियतेऽधःपतन् पुरुषोऽनेनेति धर्मः'। धर्म नीचे गिरते हुए पुरुष को धारण करता है अर्थात् बचाता है। यह धर्म शब्द का अर्थ है। धर्म के विषय में आदिकाव्यकार त्रिकालज्ञ महर्षि वाल्मीकि जी ने लिखा है—

'धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम्।
धर्मादर्थं प्रभवति धर्मात् प्रभवते सुखम्।
धर्मेण लभते सर्वं धर्मसारमिदं जगत्' ॥

संसार में धर्म ही सबसे श्रेष्ठ है। धर्म में ही सत्य प्रतिष्ठित है। धर्म से ही अर्थ का उपार्जन होता है (अधर्म से नहीं)। धर्म से ही सुख मिलता है। मनुष्य धर्म से ही सब को प्राप्त करता है। यह भारतवर्ष धर्मप्रधान देश है, इसलिये धर्माचरण करना चाहिये। वेदादि शास्त्र से प्रमाद न करें। अथवा अनध्याय के अतिरिक्त दिवसों में व्याख्यान विषय में प्रमादयुक्त न होवें। गुरुदेव के लिए दक्षिणा के रूप में उनका अभिलषित धन देकर गृहस्थाश्रम स्वीकार करें। यह कोई जरूरी नहीं है कि सब गृहस्थाश्रम में प्रवेश करें।

'तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः।
सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा' ॥
(मुण्डकोपनिषद् १।२।११)

कुशल-क्षेमकर सत्कर्मों को श्रीभगवत्प्रीत्यर्थ निष्कामभाव से करते रहना चाहिये। इससे मनुष्यों का विषयों से दूषित अन्तःकरण शुद्ध होता है। क्योंकि सत्कर्म श्रीभगवान् की प्राप्ति का साधन है। ऐश्वर्य और सम्पत्ति से कभी प्रमाद नहीं करना चाहिये। पढ़ने और पढ़ाने में आलस्य कभी नहीं करना चाहिये ॥२३॥

देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकꣳ सुचरितानि। तानि त्वयोपास्यानि। नो इतराणि। ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः। तेषां त्वयाऽऽसनेन प्रश्वसितव्यम् ॥२४॥

तत्त्वप्रकाशिका—देवतोद्देशेन क्रियमाणं कर्त्तव्यं देवकार्यं समाराधनादि, पितॄनुद्दिश्य क्रियमाणं कर्त्तव्यं श्राद्धादि, ताभ्यां न प्रमदितव्यम्। माता देववत्पूज्या यस्यासौ तथोक्तः। आचार्यो देववत्पूज्यो यस्यासौ तथोक्तः। अतिथयो देववत्पूज्या यस्यासौ तथोक्तः। देवपूजावत् मात्रादिपूजायां निरतो भवेत्यर्थः। अनवद्यानि = निर्दुष्टानि, तानि = तान्येव। इतराणि = सावद्यानि। यान्यस्माकं सुचरितानि तानि अस्माभिराचर्यमाणानि समीचीनकर्माणि तान्येव तत्सदृशान्येव त्वयोपास्यानि = सेव्यानि कर्त्तव्यानीति यावत्। नो इतराणि। दैवादस्माभिर्देहादौ प्रतिबन्धकवशेन कदाचित् स्नानादिकर्त्तव्यं परित्यक्तं चेत् त्वया न परित्याज्यमिति भावः। ये के च ब्राह्मणाः = अस्मच्छ्रेयांसः। अस्मदपेक्षया ज्ञानादिना अधिकास्तेषामासने त्वया न प्रश्वसितव्यं = नासितव्यं नोपवेष्टव्यम्। यद्वा तेषां सतां तत्समक्षमिति यावत्। त्वया आसनेन प्रश्वसितव्यमित्यर्थः ॥२४॥

व्याख्या—देवताओं के उद्देश से क्रियमाण कर्त्तव्य देवकार्य-समाराधन आदि में प्रमाद (आलस्य) नहीं करना चाहिये। भगवान् श्रीहरि सर्वदेवमय है अत: उनकी उपेक्षा कदापि न करें। यथायोग्य उनकी आराधना करें। पितरों को उद्देश करके क्रियमाण कर्त्तव्य श्राद्धादि में प्रमाद नहीं करना चाहिए; जैसे—'नामगोत्रं पितृणां तु प्रापकं हव्यकव्ययो:'। (मत्स्यपुराण १९।४) माता-पिता की तिथि पर विधिपूर्वक श्राद्ध करें। देव और पितृकार्यों में विद्वान् पुरुषों को खीर, पूड़ी, मालपुआ, शाकान्न भोजन कराने से अनन्त फल प्राप्त होता है। जिसकी माता देवता के समान पूज्या है, जिसके पिता देवता के समान पूज्य है। जिसके आचार्य देवता के समान पूज्य है। देवपूजा की भाँति माता, पिता, गुरु और अतिथिजनों की पूजा में निरत होओ। इस संसार में जो-जो अनिन्द्य कर्म हैं, उन्हीं का ही तुम्हें सेवन करना चाहिये। उनसे भिन्न जो निन्दनीय कर्म हैं, उनका आचरण कदापि नहीं करना चाहिये। हमारे जो-जो आचर्यमाण समीचीन कर्म हैं उनके सदृश ही तुम्हें सेवन करना चाहिये। जो कई हमसे श्रेष्ठ ब्राह्मण हैं, उनके आसन पर तुम्हें नहीं बैठना चाहिये। 'आगतं स्वागतं कुर्यात्' इसके अनुसार सज्जन ज्ञानादि से बड़े ब्राह्मण घर पर पधारें, उनका आसन द्वारा यथोचित सत्कार करना चाहिये ॥२४॥

श्रद्धया देयम्। अश्रद्धया देयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥२५॥

तत्त्वप्रकाशिका—ज्ञानाधनादिकं श्रद्धया = आस्तिक्यबुद्धिपूर्वकं देयम्। अश्रद्धयाऽपि देयमेव। गुणभूतश्रद्धाभावे प्रधानं दानं न परित्याज्यम्। गुणप्रधानयोर्विरोधे गुणे त्वन्यायकल्पनमिति न्यायात्। मृगभयात् बीजानावापादर्शनाच्चेति भाव:। श्रिया = ऐश्वर्यानुसारेण। ह्रिया = स्वस्य सम्पत्तौ सत्यामप्यदाने लोका हसिष्यन्तीति लज्जया वा देयमित्यर्थ:। भिया = अदाने गुर्वादीनां दण्डभयेन परलोके यमदण्डभयेन वा। संविदा = 'अनादिनिधनं विष्णु: पात्रस्थ: परमेश्वर:' इति ज्ञानपूर्वकं सत्पात्रे देयम्। यद्वा पात्रापात्रविचारेणेत्यर्थ: ॥२५॥

सान्वयानुवाद—श्रद्धया = श्रद्धा-भक्ति से, देयम् = देना चाहिये, अश्रद्धया = अश्रद्धा से, देयम् = देना चाहिये, श्रिया = ऐश्वर्य के अनुसार, देयम् = दान देना चाहिये। ह्रिया = लज्जा से, देयम् = देना चाहिये, भिया देयम् = डर से भी देना चाहिये, संविदा = सम्यक् ज्ञान से, देयम् = देना चाहिये, अथ = इसके बाद, यदि = अगर, ते = तुम को, कर्मविचिकित्सा = कर्म में संशय हो, वा = अथवा, वृत्तविचिकित्सा = सदाचार में संशय, स्यात् = हो ॥२५॥

व्याख्या—अपनी विद्या और धन दूसरे को आस्तिक्य बुद्धिपूर्वक अवश्य देना चाहिये। प्रत्येक व्यक्ति को कुछ-न-कुछ थोड़ा-बहुत यथाशक्ति दान अवश्य करना चाहिये। गुणभूत श्रद्धा न होने पर प्रधान दान परित्याज्य नहीं है। कुछ श्रीमदान्ध लोगों

का स्वभाव है कि वे याचक को देखते ही जल-भुन जाते हैं। वे यह विचार नहीं कर पाते कि ये याचक बने कैसे ? जो मनुष्य कभी दान नहीं करता वही याचक बन घर-घर मारा-मारा फिरता है ? याद रखें–याचक माँगने नहीं आते, वे तो आप को शिक्षा देने आते हैं कि सब को प्रतिदिन यथाशक्ति दान करना चाहिये; जो दान नहीं करते उनकी गति ऐसी ही होती है। वे हमारी तरह इधर-उधर एक-एक दाने के लिए हाथ फैलाते फिरते हैं।

'याचका नैव याचन्ते बोधयन्ति गृहे गृहे।
दीयतां दीयतां नित्यमदातुर्गतिरीदृशी' ॥

अपने ऐश्वर्य के अनुसार दान करना चाहिये। अपनी सम्पत्ति होने पर भी न देने पर लोग उनकी हँसी उड़ायेंगे, लज्जा से देना चाहिये। परलोक में यमदण्ड के भय से अथवा गुरुजनों के दण्डभय से दान देना चाहिये। इस प्रकार वर्त्तमान कभी तुम्हारे श्रौत और स्मार्त कर्म में संशय हो। तब आगे स्वयं श्रुति कहती है—ये तत्रादि ॥२५॥

ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता अयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्त्तेरन्। तथा तत्र वर्त्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तेषु वर्त्तेरन्। तथा तेषु वर्त्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम् ॥२६॥

॥ इत्येकादशोऽनुवाकः ॥

तत्त्वप्रकाशिका—अथैवं वर्त्तमानस्य यदि कदाचित् ते तव श्रौते स्मार्त्ते वा कर्मणि वृत्ते वाऽऽचारलक्षणे विचिकित्सा = संशयः, स्यात् तत्र तदा तत्र देशे ये ब्राह्मणास्तत्र कर्मणि तदङ्गे च सम्मर्शिनः = विचारशीलाः, युक्ताः = ज्ञानाद्युपाययुक्ताः, आयुक्ताः = स्वधर्माचरणआग्रहयुक्ताः। अलूक्षाः = अरूक्षाः, अक्रूरमतयः। प्रश्ने कृते सति कोपरहिता इति यावत्। धर्मकामाः = धर्माचरण एव कामवन्तः, स्युः = भवेयुः, ते ब्राह्मणाः तत्र = कर्मादौ, यथा वर्त्तेरन्। त्वमपि तत्र = कर्मादौ, तत्तत्करणविषये तथैव = तदनुसारेणैव, वर्त्तेथाः न तु तद्विरोधेनेत्यर्थः। अथानन्तरमभ्याख्यातेषु = प्रत्याख्या-तेषु, वेदनिन्दितेषु अधर्मेषु तद्विषय इति यावत्, यदि विचिकित्सा स्यादिति वर्त्तते ये तत्रेत्यादिकमुक्तार्थम्। एवमाचार्योऽन्तेवासिनं प्रति धर्मानुद्दिश्य श्रद्धोत्पादनायाह—एष इति। एषः सत्यं वदेत्यादि। आदेशः = हरेराज्ञा। न केवलं राजाज्ञावत्। हरेराज्ञा-मात्रमिदम्। किन्नाम एषः तस्य हरेरुपदेशः। आचार्यपरम्पराप्राप्तः। नायमुपदेशो विरोचनं प्रति ब्रह्मोपदेश एव किन्नाम। एषा वेदोपनिषद् सत्यं वद इत्यादि वेदानां रहस्यम्। एषोपनिषच्छब्दापेक्षया स्त्रीलिङ्गम्। उपसंहरति–एतदिति। एतदनुशासनं शिक्षणं मया त्वां प्रति कृतमित्यर्थः। एवं मच्छिक्षितप्रकारेण त्वया सत्यवचना-दिकमुपासितव्यमनुष्ठेयम्। तात्पर्यातिशयद्योतनाय स्वोक्तमवधारयति—एवमु चेति। उ-

चशब्दावेवार्थौ एवमेव मदुक्तप्रकारेणैव। एतत्सत्यवचनादिकमुपास्यमनुष्ठेयमेव। न कदाचिदपि आलस्यादिभीरुणा परित्याज्यमित्यर्थः ॥२६॥

विघ्नपरिहारायादौ यां शान्तिं पठित्वा विद्या उपक्रान्ता समापिता च तामेव शान्तिं ब्रह्मा विघ्नपरिहारायान्ते पठति—

शन्नो मित्रः शं वरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्। ॐ शान्तिः शान्तिः शान्तिः।

इति तैत्तिरीयोपनिषदि प्रथमा शीक्षावल्ली समाप्ता ॥१॥

अस्यार्थं पूर्ववत्।

श्रीमत्तैतिरीयोपनिषदः तत्त्वप्रकाशिकाटीकायां शीक्षा-वल्ली समाप्ता ॥१॥

॥ इति द्वादशोऽनुवाकः ॥१२॥

सान्वयानुवाद—ये = जो, तत्र = वहाँ, सम्मर्शिनः = विचारशील, युक्ताः = ज्ञानादि उपायों से युक्त, आयुक्ताः = अपने वैदिक भावगत धर्मों का आचरण करने में आग्रह युक्त, अलूक्षाः = असम्बद्ध रूक्ष कटुवचनों से रहित, धर्मकामाः = धर्म को चाहनेवाले धर्मात्मा, स्युः = हों, ते = वे, यथा = जिस प्रकार, तत्र = कर्मादि में, वर्तेरन् = लगे रहते हैं, तेषु = उनके साथ, तथा = वैसे ही, वर्तेथाः = तुम को भी करना चाहिये। एषः = यह, आदेशः = भगवान् श्रीहरि की आज्ञा है। एषः उपदेशः = यही उनका उपदेश है, एषा = यही, वेदोपनिषद् = वेद और उपनिषदों का रहस्य है, च = और, एतत् = यही, अनुशासनम् = आचार्य-परम्परा से प्राप्त शिक्षा है, एवम् = इस प्रकार, उपासितव्यम् = उपासना करनी चाहिये, एवम् उ = इसी प्रकार, एतत् = यह, उपास्यम् = उपासनीय है।

व्याख्या—यह कार्य करते हुए अगर तुमको किसी बात की शङ्का का अवसर तुम्हारे मन में हो जायें या संशय हो जायें तो इस संशय के निवारणार्थ उस देश में जो ज्ञान और विज्ञान से सम्पन्न हैं, श्रीभगवान् के द्वारा बताये गये धर्मों का आचरण करने वाले धार्मिक धर्मात्मा हैं, असम्बद्ध कटुवचन न कहने वाले विद्वान् पुरुष रहते हैं; वे जिस प्रकार धर्म-कर्म का आचरण करते हैं ठीक उसी प्रकार का आचरण तुम्हें भी करना चाहिये। यह भगवान् श्रीहरि का उपदेश है, जो आचार्य (गुरु) परम्परा से प्राप्त है; जिनके निःश्वास से वेदों का प्रादुर्भाव हुआ है। सत्य बोलो और धर्म का आचरण करो इत्यादि वेदों का रहस्य है।

'यतो धर्मस्ततः कृष्णः'। (श्रीमहाभारत-भीष्मपर्व अ. २३)

जहाँ धर्म है वहीं पर षड्गुणैश्वर्यसम्पन्न नारायण श्रीकृष्ण निवास करते हैं।

'सत्यं परं धीमहि'।

(श्रीमद्भागवत १।१।१)

सत्यस्वरूप परमात्मा श्रीकृष्ण का हम ध्यान करते हैं। इसलिये सज्जनो ! धर्म को कभी न भूलें, सर्वत्र धर्म का प्रचार करें। स्त्रियों के मनाने में, हास-परिहास में, विवाह में, जीविका के विषय में, प्राण-सङ्कट में, गौ-ब्राह्मणों की रक्षा के लिए एवं किसी की हिंसा हो रही हो तो वहाँ झूठ कहना भी निन्दित नहीं माना जाता है; यह ऋग्वेद की श्रुतियों का रहस्य है। इतने स्थानों पर मिथ्या-भाषण करने की छूट है परन्तु अन्यत्र असत्य बोलना महापाप माना जाता है। इस प्रकार बताये गये प्रकार से ही सत्य वचन आदि का अनुष्ठान करना चाहिये; कभी भी आलस्य आदि के कारण परित्याग नहीं करना चाहिये।

॥ द्वादश अनुवाक समाप्त ॥१२॥

॥ शीक्षावल्ली समाप्त ॥

•

अथ ब्रह्मानन्दवल्ली

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि-नावधीतमस्तु। मा विद्विषावहै।

ॐ शान्तिः ! शान्तिः !! शान्तिः !!!

तत्त्वप्रकाशिका—यद् ब्रह्मविद्याप्राप्त्यर्थं पूर्वसम्पादनीया विद्या निरूपिता तामेव विद्यां वरुणाय वक्तुं तत्र प्रसक्तविघ्नपरिहाराय ब्रह्मा शान्तिं पठति—सह नावित्यादिना। सः मित्रादिः, नौ = गुरुशिष्यौ, अवतु = रक्षतु, विघ्नान् परिहृत्येति शेषः। हेति मित्रादेः रक्षणे सामर्थ्यमस्तीति प्रसिद्धिं दर्शयति। स मित्रादिः, नौ = गुरुशिष्यौ, भुनक्तु = अन्नादिदानेन पालयतु। हेति भोजनदाने सामर्थ्यप्रसिद्धिमाह। नौ = आवां, सह मिलित्वा भोजयत्विति वा। आवां गुरुशिष्यौ सह मिलित्वा वीर्यं = व्याख्यानविषये प्रयत्नं करवावहै = कुर्वः। लोडुत्तमपुरुषद्विवचनमिदम्। नौ = आवाभ्यामधीतं तेजस्वि वीर्यवत्तममस्तु। आवां तेजस्विनौ भवाव। अधीतं फलप्रदमस्तु। गुरुशिष्यौ आवां मा विद्विषावहै = विद्वेषं न करवावहै = न कुर्वः। शान्तिरिति त्रिरुक्तेः प्रयोजनं पूर्वमेवोक्त-मनुसन्धेयम् ॥१॥

व्याख्या—जो ब्रह्मविद्या की प्राप्ति के लिए पहले सम्पादनीया विद्या निरूपण की गयी है उसी विद्या का वरुण को उपदेश करने के लिए उस प्रसक्त विघ्नपरिहार के लिए ब्रह्मा जी शान्ति का पाठ करते हैं। वे मित्र आदि देवगण हम दोनों गुरु और शिष्य की रक्षा करें। विघ्नों का परिहार करके हमारी रक्षा करें। 'ह' यह शब्द मित्रादि के रक्षण में सामर्थ्य है—इस प्रसिद्धि को दिखलाता है। वे मित्र आदि देवता हम गुरु और शिष्य दोनों का अन्नादि दान द्वारा पालन करें। 'ह' यह पद भोजन दान में सामर्थ्य-प्रसिद्धि को

बताता है। हम गुरु और शिष्य मिलकर व्याख्यानविषय में प्रयत्न करते हैं। हम दोनों की पढ़ी हुई विद्या करामलकवत् हो। अधीत विद्या फलप्रद हो। हम दोनों आपस में विद्वेष नहीं करते। ॐ शान्तिः! शान्तिः!! शान्तिः!!! आध्यात्मिक, आधिदैविक और आधिभौतिक विघ्नों के परिहार के अभिप्राय से तीन बार शान्ति कही गयी है ॥१॥

ॐ ब्रह्मविदाप्नोति परम् तदेषाऽभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति ॥२॥

तत्त्वप्रकाशिका—अचिन्त्यानन्तनिरतिशयस्वाभाविकबृहत्तमस्वरूपगुणाद्याश्रय ब्रह्मण उपासकः सर्वेभ्यः परमुत्कृष्टं ब्रह्म प्राप्नोति। परस्य ब्रह्मणो वासुदेवस्य प्राप्यत्वेन निर्दिष्टत्वात् तस्यैवोपास्यत्वमिति बोद्धव्यम्। ननु तत्परं ब्रह्म किं लक्षणकं, नहि लक्षणेन विनाऽस्येतरसमस्तव्यावृत्ततया शक्यते ज्ञातुं कीदृशं तद्वेदनं का च तत्प्राप्तिः कीदृशं च प्राप्यमिति जिज्ञासायामाह—तदेषेति। तदेतच्छङ्कातुर्य्यमभिप्रैति। तदुत्तरत्वेनेति यावत्। एषा = वक्ष्यमाणा ऋक्मन्त्रवर्णरूपा। उक्ता = उच्यते। तमेव मन्त्रवर्णमुदाहरति–सत्यमित्यादिना। सत्यम् = निरुपाधिकसत्तासम्बन्धि तेन। विकारास्पदमचेतनं संसृष्टश्चेतनश्च व्यावृत्तः। ज्ञानम् = नित्यासङ्कुचितज्ञानैकाकारम्। तेन कादाचित्कसङ्कुचितज्ञानत्वेन मुक्ता व्यावृत्ताः। अनन्तम् = देशतः कालतो वस्तुतः परिच्छेदशून्यम्। द्वितीयतृतीयप्रश्नोत्तरमाह—यो वेदेति। यः = अधिकारी, गुहायां = हृदयगुहायां, परमे व्योमन् = व्योम्नि दहराकाशे, निहितं = सत्यत्वादिविशिष्टम्। परब्रह्म वेद स ब्रह्मवित् अधिकारी सर्वान् कामान् = स्वयोग्यानन्दादीन्। विपश्चिता ब्रह्मणा सह अश्नुते = भुङ्क्ते। विपश्चितत्वं नाम निरुपाधिकानन्त्याधीनासङ्कुचितसर्वविषयकज्ञानवत्त्वम्। सत्यं ज्ञानमनन्तं ब्रह्मेत्यनेन ब्रह्मणः सकलेतरव्यावृत्तं ब्रह्मणः लक्षणमुक्तम्भवति। हृदयगुहानिहितत्वप्रकारकज्ञानप्रतिपादनेन यो वेद निहितं गुहायामित्यनेन। विच्छब्दार्थ उक्तः। परमे व्योमन् सोऽश्नुते इत्यनेनाप्नोति शब्दार्थ उक्तः। सर्वान् कामान् सह ब्रह्मणा विपश्चिता इत्यनेन प्राप्यमुक्तम्। इतिशब्दो मन्त्रवर्णसमाप्तिद्योतकः ॥२॥

सान्वयानुवाद—ब्रह्मविद् = ब्रह्मज्ञानी, परम् = परमात्मा को, आप्नोति = प्राप्त होता है, एषा = यह, अभ्युक्ता = (अभि + उक्ता) भलीभाँति श्रुति ने बतायी है, सत्यम् = सत्यस्वरूप, ज्ञानम् = ज्ञानस्वरूप, अनन्तम् = अनन्तस्वरूप, ब्रह्म = ब्रह्म है। यः = जो, परमे व्योमन् = परम दहराकाश में, गुहायाम् = प्राणियों के हृदय-गुफा में, निहितम् = संनिहित है, वेद = उसे जानता है, सः = वह, विपश्चिता = एक ही साथ समस्त देश, काल, वस्तु विषयक ज्ञानवान्, ब्रह्मणा सह = ब्रह्म के साथ, सर्वान् = सभी, कामान् = अपने योग्य आनन्दादि को, अश्नुते = भोगता है, इति।

व्याख्या—उपासक अनन्त, अचिन्त्य, निरतिशय, स्वाभाविक बृहत्तम स्वरूप, गुणादि का आश्रय तथा सबों से परम उत्कृष्ट ब्रह्म को प्राप्त कर लेता है। स्मृतिशास्त्र में कहा गया है—

'एष प्रकृतिरव्यक्तः कर्त्ता चैव सनातनः।
परश्च सर्वभूतेभ्यस्तस्माद् बृहत्तमोऽच्युतः'॥

भगवान् अच्युत श्रीकृष्ण ही प्रकृति है, अव्यक्त (निर्गुण) है, कर्त्ता है, सनातन = ब्रह्म है, सभी भूतों से परे है इसलिये वह बृहत्तम = ब्रह्म है अर्थात् बड़ों से बड़ा है। यही ऋग्वेद के मन्त्रवर्णों से बताया गया है। जो सत्यस्वरूप, ज्ञानस्वरूप, अनन्तस्वरूप, ब्रह्मस्वरूप श्रीकृष्ण है एवं सभी प्राणियों के हृदयानुरूप उस-उस हृदय-गुफा में अन्तर्यामी रूप से बैठा हुआ है, उस परब्रह्म को जो विद्वान् पुरुष जानता है वह ब्रह्मवित् कहलाता है और वह ब्रह्म के साथ समस्त आनन्दादि सुखों को भोगता है एवं ब्रह्मभाव में स्थित होता है। यही मोक्षपद है ॥२॥

इन मन्त्रवर्णों द्वारा अब सृष्टिक्रम तथा जगत् की सत्यता का प्रतिपादन करते हैं—

तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः।
आकाशाद्वायुः। वायोरग्निः। अग्नेरापः।
अद्भ्यः पृथिवी। पृथिव्या ओषधयः।
ओषधीभ्योऽन्नम्। अन्नात्पुरुषः ॥३॥

तत्त्वप्रकाशिका—सत्यं ज्ञानमनन्तमित्युक्तं वस्त्वपरिच्छेदलक्षणमानन्त्यं सर्वोपादानत्वसर्वान्तरत्वमुखेन प्रपञ्चयति—तस्माद्वेति। तस्मान्मोक्षजनकीभूतज्ञानविषयत्वेन ब्रह्मशब्दोक्तादेतस्मान्मन्त्रवर्णोपलक्षितादात्मनः परमात्मन आकाशः सम्भूतः = उत्पन्नः। इदं पदं यथालिङ्गं यथावचनं पुरुषान्तेष्वनुवर्त्तते। शब्दगुणवत्त्वेन प्रसिद्धादाकाशाद् वायुः। शब्दस्पर्शगुणो नभस्वान्। वायोरुक्तादग्निः शब्दस्पर्शरूपगुणस्तेजो धातुः। अग्नेरुक्तादापः शब्दस्पर्शरूपरसगुणा द्रवात्मिकाः। अद्भ्य उक्ताभ्यः पृथिवी शब्दस्पर्शरूपरसगन्धगुणा कठिना भूमिः। पृथिव्या उक्ताया ओषधयः = फलपाकान्ताः। ओषधीभ्य उक्ताभ्य अन्नम् = फलपाकान्ताः। ओषधीभ्य उक्ताभ्य अन्नम् = अदनीयं प्रसिद्धम्। अन्नादुक्तात्पुरुषः = स्थूलदेहः पुरुषशब्दाभिधेयः ॥३॥

सान्वयानुवाद—तस्मात् = उस, एतस्मात् = इस, आत्मनः = परमात्मा से, आकाशः = आकाश, सम्भूतः = उत्पन्न हुआ, आकाशात् = आकाश से, वायुः = वायु, वायोः = वायु से, अग्निः = अग्नि, अग्नेः = अग्नि से, आपः = जल अद्भ्यः = जल से, पृथिवी = पृथ्वी, पृथिव्याः = पृथ्वी से, ओषधयः = ओषधियाँ उत्पन्न हुई, ओषधीभ्यः = ओषधियों से, अन्नम् = अन्न उत्पन्न हुआ है, अन्नात् = अन्न से, पुरुषः = स्थूल शरीरवाला मनुष्य उत्पन्न हुआ है (होता है और आगे होगा)।

व्याख्या—तत् शब्द एतत् शब्द का ही परामर्श है। यथा—'तत्त्वमसि' एवं 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः'। तुम वही हो। हे गार्गि! इस अक्षर के प्रशासन में सूर्य और चन्द्र धारण किये हुए स्थित हैं। जगत् का सर्जन कर उसमें अनुप्रविष्ट हुआ है। श्रुति ने ब्रह्म से ही जगत् की उत्पत्ति का वर्णन

किया है। परमात्मा ने समस्त संसार की रचना की एवं अपने सत्यसङ्कल्प के अनुसार स्वयं बहुरूप होकर जगत् में प्रवेश किया और प्रवेश करके नाम-रूप को धारण किया है। 'मैं एक हूँ, बहुत हो जाऊँ' यह उनका सङ्कल्प वाक्य है। वे परब्रह्म परमात्मा आकाश में शब्द रूप से रहते हैं, वायु में स्पर्श रूप से, अग्नि में तेज रूप से, जल में रस रूप से, पृथ्वी में गन्ध रूप से, औषधियों में जीव रूप से, अन्न में भोग रूप से, प्रकृति और पुरुष में नियम्य रूप से, चित्त में वासुदेव रूप से, अहङ्कार में सङ्कर्षण रूप से, बुद्धि में प्रद्युम्न रूप से और मन में अनिरुद्ध रूप से विराजते हैं। यह स्थूल शरीर पुरुष शब्द से कहा जानेवाला अन्न रसमय होने के कारण रस का ही परिणाम है (मदीय शोधप्रबन्ध शीर्षक—श्रीमद्भागवते निम्बार्कवेदान्तस्य समन्वयः हिन्दीभाषानुवादसहितः-पृ. २४८)। इसलिये यह नामरूपात्मक जगत् ब्रह्म से अभिन्न है। 'नेह नानाऽस्ति किञ्चन' अर्थात् इस जगत् में ब्रह्म के बिना कुछ भी नहीं है। हे अर्जुन! जो समस्त भूतों का बीज है, वह मैं ही हूँ। मेरे बिना चराचर-भूत कुछ भी नहीं है (श्रीमद्भगवद्गीता १०।३९)। इसलिये समस्त जड़-चेतन जगद्रूप संसार ब्रह्ममय है ॥३॥

स वा एष पुरुषोऽन्नरसमयः। तस्येदमेव शिरः। अयं दक्षिणः पक्षः। अयमुत्तरः पक्षः। अयमात्मा। इदं पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति ॥४॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्याये प्रथमोऽनुवाकः॥

तत्त्वप्रकाशिका—स वा एष पुरुषोऽयं देहोऽन्नरसमयः, रसस्य परिणामः। अन्नमशितं त्रिधा विधीयते, तस्य यः स्थविष्ठो धातुः सः पुरुषो भवति, यो मध्यमस्तन्मांसम्। (छान्दोग्योपनिषद् ६।५।१) इत्याद्युक्तरीत्या जाठराग्निपच्यमानान्नसारांशनिर्वर्त्यमानमांसादिमयत्वात् शरीरस्येति भावः। तस्य पुरुषस्य पक्षिण इदमेव प्रसिद्धमेव शिरो मस्तकम्। अयं दक्षिणो भुजः। दक्षिणो दक्षिणः भागस्थः। पक्षः = पत्रम्। अयं वामो भुजः। उत्तरो वामभागस्थः। पक्षः = पत्रम्। अयं गलमारभ्याकटिस्थलं मध्यमो देहभागोऽङ्गानामात्मा धारकत्वेन प्रधानभूत इत्यर्थः। मध्यं ह्येवाङ्गानामात्मा इति श्रुतेः। इदं कटिस्थलादधः स्थितं पादद्वयम्। पुच्छवदाधारत्वात्पुच्छम्। प्रतिष्ठा—प्रतिष्ठन्त्यस्मिन्निति प्रतिष्ठाऽऽधार इत्यर्थः। अत्र पुरुषशब्दितमनुष्यपाण्यादेः पक्षत्वादिरूपिणं प्रतिपत्तिसौकर्यार्थम्, तत्तस्मिन्नेवार्थे ब्राह्मणोक्तेऽयं मन्त्ररूपश्लोकोऽपि भवतीत्यर्थः।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्यायस्य
तत्त्वप्रकाशिकाटीकायां प्रथमोऽनुवाकः ॥१॥

सान्वयानुवाद—सः = वह, एषः = यह, पुरुषः = पुरुष, वै = निश्चय ही, अन्नरसमयः = अन्नरसमय है, तस्य = उसका, इदम् = यह, एव = ही, शिरः = मस्तक है, अयम् = यह, दक्षिणः पक्षः = दाहिना पत्र है, अयम् = यह, उत्तरः

पक्षः = बायाँ पत्र है, अयम् = यह, आत्मा = आत्मा है, इदम् = यह, पुच्छम् = पूँछ, प्रतिष्ठा = प्रतिष्ठा है। तत् अपि = उस अर्थ में, एषः = यह, श्लोकः = श्लोक, भवति = है।

व्याख्या—अन्न ही प्राणियों का जीवन है, ऐसा ही श्रीमद्भागवत (११।२६।३३) में बताया गया है। वही यह पुरुष यह देह (शरीर) अन्नरसमय है, रस का परिणाम है। छान्दोग्योपनिषद् में उल्लिखित है कि—पुरुषों द्वारा किये गये अन्न भोजन का तीन प्रकार से विधान किया जाता है। उसका जो स्थविष्ठ धातु = स्थूल अंश है वह पुरुष है, जो मध्यम है वह मांस है। तेजः, जल और पृथ्वी के विमिश्रण द्वारा प्राणियों के शरीर का अङ्गसमूह गठित होता है। पृथिवी से पुरीष (मल), मांस मन, जल से मूल, शोणित और प्राण। इसी तरह तेज से अस्थि (हड्डी), मज्जा और वाक् = वाणी उद्भूत होती है। इसलिये भगवती श्रुति ने उपदेश किया है—यह पुरुष अन्न-रस के विकार से उत्पन्न हुआ है। इस पुरुष के अङ्ग-विशेष को सिर (मस्तक) कहते हैं, अङ्ग-विशेष का नाम दक्षिण बाहु, अङ्ग-विशेष का नाम वामबाहु, अङ्ग-विशेष का नाम आत्मा अर्थात् मध्य-भाग, अङ्ग-विशेष का नाम पुच्छ अर्थात् नाभि के निम्नस्थ मेरुदण्ड का निम्न भाग जिस पर यह शरीर प्रतिष्ठित है। उसके सम्बन्ध में निम्नोक्त मन्त्ररूप श्लोक भी है।

॥ प्रथम अनुवाक समाप्त ॥१॥

•

अथ द्वितीयोऽनुवाकः

अन्नाद्वै प्रजाः प्रजायन्ते। याः काश्च पृथिवीः श्रिताः।
अथो अन्नेनैव जीवन्ति। अथैनदपि यन्त्यन्ततः॥

तत्त्वप्रकाशिका—अन्नाद् = अदनीयात्। वै = प्रसिद्धात्। प्रजाः = जन्तवः प्रजायन्ते। या काश्च = याः काश्चन, निखिलाः स्वेदजाण्डजजरायुजोद्भिजा इत्यर्थः। पृथिवीं = ब्रह्माण्डान्तर्बहिर्वर्त्तिनीं भूमिं श्रिता। अथो = अपि च, उत्पन्नाश्चान्नेनैव जीवन्ति। अन्तकाले तत्रैव लयं यान्तीत्यर्थः॥

सान्वयानुवाद—वै = प्रसिद्ध, अन्नात् = अन्न से, याः काः च = जो कोई, प्रजाः = प्रजा, प्रजायन्ते = उत्पन्न होती हैं, पृथिवीं श्रिताः = पृथ्वी के सहारे हैं, अथो = और भी, अन्नेन = अन्न द्वारा, एव = ही, जीवन्ति = जीवित रहती हैं। अथ = इसके बाद, अन्ततः = अन्तकाले, एतत् अपि = इसी अन्न में ही, यन्ति = लय को प्राप्त होती हैं।

व्याख्या—अण्डज, जरायुज, उद्भिज्ज और स्वेदज ये चार प्रकार के जीव प्रसिद्ध अन्न से उत्पन्न होते हैं और ब्रह्माण्ड के भीतर-बाहर रहनेवाली भूमि के आश्रित रहते हैं। वे अन्न से ही जीते हैं, फिर अन्तकाल में अन्न में ही लय होते हैं॥

अन्न ँ हि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते।
सर्वं वै तेऽन्नमाप्नुवन्ति। येऽन्नं ब्रह्मोपासते।
अन्न ँ हि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते॥

तत्त्वप्रकाशिका—सर्वभूतोपकारकत्वादन्नमेव ज्येष्ठम्। अत एव सर्वव्याधिनिवर्त्तकत्वादेव सर्वौषधमुच्यते। अन्ने ब्रह्मदृष्टिं कुर्वत उपासकस्य फलं दर्शयति—सर्वमिति। येऽधिकारिण अन्नं हि भूतानां ज्येष्ठमित्यादिना प्रकारेणान्नं ब्रह्मोपासते ते सर्वं पूर्णमन्नं प्राप्नुवन्ति। ब्रह्मदृष्टिहेतुभूतं ब्रह्मसाम्यमाह—अन्नं हीति। ब्रह्मणो हि सर्वरोगनिवर्त्तकत्वात्सर्वभेषजत्वस्य सत्त्वादिति भावः।

सान्वयानुवाद—अन्नम् = अन्न, हि = ही, भूतानाम् = भूतों में, ज्येष्ठम् = ज्येष्ठ है, तस्मात् = इसलिये, सर्वौषधम् = सर्वौषध, उच्यते = कहा जाता है, ये = जो उपासक, अन्नम् ब्रह्म = अन्न में ब्रह्मदृष्टि भाव से, उपासते = उपासना करते हैं, अन्नम् = अन्न को, आप्नुवन्ति = प्राप्त कर लेते हैं, अन्नम् = अन्न, हि = ही, भूतानाम् = भूतों में, ज्येष्ठम् = ज्येष्ठ है, तस्मात् = इसलिये, सर्वौषधम् = सर्वौषध शब्द से, उच्यते = कहा जाता है।

व्याख्या—अन्न समस्त प्राणियों का उपकारक होने से ही श्रेष्ठ है, क्योंकि प्राण को अन्न द्वारा भोजन देने से सारी इन्द्रियाँ तृप्त ही जाती हैं। इसलिये सकल व्याधि निवर्त्तक होने से ही सर्वौषध पद से कहा जाता है। अन्न में ब्रह्मदृष्टि करने वाले उपासक का फल दिखलाते हैं—जो विद्वान् पुरुष 'अन्नं हि भूतानां ज्येष्ठम्' इत्यादि प्रकार से अन्न ब्रह्म की उपासना करते हैं वे पूर्ण अन्न को प्राप्त कर लेते हैं। ब्रह्मदृष्टि हेतुभूत ब्रह्म की समता को बताते हैं—'अन्नं हि भूतानामि'त्यादि। सद्गृहस्थ व्यक्तियों को चाहिये कि वे अवश्य ही श्रीभगवान् के प्रीत्यर्थ अनाथ-भिक्षुक भूखे व्यक्तियों को अन्न-वस्त्रादि का दान करें तथा न्यायोपार्जित धन से परम पुरुष परमात्मा का यजन करें॥

अन्नाद् भूतानि जायन्ते। जातान्यन्नेन वर्द्धन्ते। अद्यतेऽत्ति च भूतानि। तस्मादन्नं तदुच्यत इति। तस्माद्वा एतस्मादन्नरसमयात् अन्योऽन्तर आत्मा प्राणमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः॥५॥

तत्त्वप्रकाशिका—जननवृद्धिहेतुत्वमन्नब्रह्मणोः साम्यमित्यर्थः। अन्नशब्दस्य निरुक्तिमाह—अद्यत इति। अद्यते = भक्ष्यते भूतैरिति शेषः। अत्ति च भक्षयत्यपि, चकारः कर्मकर्तृव्युत्पत्त्योरन्नशब्दे समुच्चयार्थः। भूतान्यण्डजादीनि तस्माद्यतोऽद्यतेऽत्ति च भूतानि ततः। अन्नमन्नशब्दं तदन्नमुच्यते कथ्यते। इति श्लोको भवतीति सम्बन्धः।

एवमाकाशादेरन्नमयस्य स्थूलशरीरपर्यन्तस्य मन्त्रब्राह्मणोदितब्रह्मोपादानकत्वमात्मन आकाश इत्यात्मशब्दश्रवणात् तदन्तर्यामिकत्वं चोक्तं भवति। एवमाकाशादेरन्नमयशब्दितस्थूलशरीरपर्यन्तस्य ब्रह्मैवात्मोपादानं चेत्युक्त्या स आत्मा क इत्यपेक्षाया

आनन्दमय एव स आत्मेति दर्शयितुं स्थूलारुन्धतीन्यायेन स्थूलदेहवर्त्तिनं प्राणमयमा-त्मत्वेन दर्शयति। सूक्ष्मामरुन्धतीं दर्शयितुं प्रवृत्तः प्रथमत एव सूक्ष्माया अरुन्धत्याः प्रदर्शनासम्भवं पर्यालोच्य तत्समीपवर्त्तिनीं स्थूलतारकामियमेवारुन्धतीति दर्शयति। तस्यां स्थूलतारकायां श्रोतुररुन्धतीत्वबुद्धौ धृतायां तत्समीपवर्त्तिनीं वस्तुतोऽरुन्धतीं सूक्ष्मामियमेवारुन्धतीति दर्शयति। सोऽयं स्थूलारुन्धतीन्याय इत्यर्थः। तस्मादिति। तस्येदमेव शिर इत्युक्तमहिमोपेतादेतस्मात् श्लोकोक्तमहिमोपेतादन्नरसमयात् देहात् अन्यो या प्राणमयः स एवात्मन आकाशः सम्भूत इत्याकाशादिसर्वोपादानत्वेन तदन्तर्यामित्वेन च निर्दिष्ट आत्मा। तथा चोक्तं वेदान्तकौस्तुभे—'अनन्वयादिति चेत स्यादवधारणात्'। (ब्र.सू. ३।३।१७) इति सूत्रव्याख्यानावसरे तथाहि। ननु पूर्वत्रान्योऽन्तर आत्मा प्राणमयः। इत्यादावात्मशब्दस्यानात्मन्यन्वयात्। अन्योऽन्तर आत्माऽऽनन्दमय इत्यत्रा-त्मशब्देन परमात्मनोऽग्रहणमिति चेत् परमात्मन आत्मशब्देन परिग्रहः स्यादेव कुतः अवधारणात् पूर्वत्रापि। 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इति प्रकृतं पर-मात्मानं बुद्धौ निधाय तत्स्वरूपगुणनिर्णयार्थं प्राणमयादौ परमात्मबुद्ध्यैवात्मशब्दान्व-यस्यावधारितत्वात्। तस्मादानन्दादीनां गुणानामेव गुणिस्वरूपनिरूपणस्य उपसंहारः। न प्रियशिरस्त्वादीनां तद्गुणानामिति भाषितम्। तथा चान्नमयादन्तरे प्राणमये प्रथमं परमा-त्मबुद्धिरवतीर्णा तदनन्तरं च प्राणमयादन्तरे मनोमये ततो विज्ञानमये तत आनन्दमय इत्याशयः। अत्र पञ्चवृत्तेः प्राणस्य प्राणनवृत्तिप्रचुरत्वात् प्राणमयत्वम्। तेनैष पूर्ण इति। तेन = प्राणमयेन आत्मना अयमन्नरसमय आत्मा पूर्णः। व्याप्त इति यावत्। निखिलस्य शरीरस्य प्राणव्याप्तत्वादिति भावः। स वा एष पुरुषविध एवेति। स वा एष अन्तरव-स्थितः प्राणमयः पुरुषविधः एव पुरुषाकार एवेत्यर्थः। हस्तपादादिमत्त्वेन पुरुषविधत्वभ्रमं निरस्यति। तस्यान्नमयस्य पुरुषविधत्वमनुकृत्य प्राणमयोऽपि पुरुषविध इत्यर्थः ॥५॥

सान्वयानुवाद—भूतानि = जन्तु, अन्नाद् = अन्न से, जायन्ते = उत्पन्न होते हैं, जातानि = उत्पन्न होकर, अन्नेन = अन्न द्वारा, वर्द्धन्ते = बढ़ते हैं, अद्यते = (भूतों द्वारा) खाया जाता है, च = और, भूतानि = भूतों को, अत्ति = (अन्न) खाता है, तस्मात् = इसलिये, तत् अन्नम् = वह अन्न, इति = ऐसा, उच्यते = कहा जाता है, तस्मात् वै = उस, एतस्मात् = इस, अन्नरसमयात् = अन्नरसमय से, अन्यः = भिन्न, अन्तरः = अन्दर में अवस्थित, प्राणमयः आत्मा = प्राणमय आत्मा है, तेन = उससे, एषः = यह, पूर्णः = व्याप्त है, सः वै एषः = वही यह, पुरुषविधः एव = पुरुषाकार ही है, तस्य = उसका, पुरुषविधताम् = पुरुषविधत्व, अन्वयम् = अनुगत, पुरुषविधः = पुरुषाकार है।

व्याख्या—अन्न से सब जीव उत्पन्न होते हैं, जन्म ग्रहण करके अन्न के द्वारा ही वर्द्धित होते हैं, दूसरे के आहार्य्य होते हैं एवं दूसरे को आहार करते हैं, अतएव उन सबों को अन्न शब्द से कहा जाता है। इस अन्नरसमय पुरुष से पृथक्, किन्तु उसी के अभ्यन्तर में प्राणमय पुरुष अवस्थित है, यह प्राणमय पुरुष ही अन्नमय के सम्बन्ध में आत्मा है। इसी प्राणमय के द्वारा ही अन्नमय पूर्ण (व्याप्त) है वह पुरुषाकार है।

अन्नमय पुरुष की भाँति उसके अनुरूप यह प्राणमय पुरुष विशेष है। इसपर भाष्यकार भगवान् श्रीनिम्बार्काचार्य ने बताया है—'अन्योऽन्तर आत्मा' इस श्रुत्युक्त आत्म शब्द से परमात्मा का ही ग्रहण है। जिस प्रकार 'आत्मा वा इदमेक एवाग्र आसीत्' यहाँ पर आत्म शब्द से परमात्मा का ही ग्रहण है ठीक वैसे ही (ब्रह्मसूत्रनिम्बार्कभाष्य ३।३।१६)। इसलिये आत्मा शब्द परमात्मा का वाचक है। उस प्राणमय आत्मा से यह अन्नरसमय आत्मा व्याप्त है। अर्थात् सम्पूर्ण शरीर में प्राण व्याप्त है। वही यह भीतर में स्थित प्राणमय पुरुषाकार ही है। इसलिये अन्नमय में पुरुषाकारता को अनुकरण करके प्राणमय भी पुरुषाकार है ॥५॥

तस्य प्राण एव शिरः। व्यानो दक्षिणः पक्षः। अपान उत्तरः पक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा ॥६॥ तदप्येष श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्याये द्वितीयोऽनुवाकः ॥२॥

तत्त्वप्रकाशिका—तस्य प्राणमयस्य शिरः प्राण एव। तस्य पक्षिणः पक्षो दक्षिणो बाहुर्व्यानः। उत्तरः पक्षः सव्यबाहुरपानः। यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महानिति स्मृत्युक्तरीत्या वायुविकारभूतप्राणापानादिधारकत्वादाकाशस्यात्मत्वम्। पृथिव्यामाकाशस्य प्रतिष्ठितत्वादस्याः पुच्छत्वम्। प्राणमयस्य प्राणादिरूपार्थे श्लोकं प्रमाणयति-तदपीति ॥६॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्यायस्य तत्त्वप्रकाशिकायां टीकायां द्वितीयोऽनुवाकः ॥२॥

सान्वयानुवाद—तस्य = उस (प्राणमय) का, शिरः = सिर, प्राणः एव = प्राण ही है, व्यानः = व्यान, दक्षिणः = दाहिना, पक्षः = पत्र है, अपानः = अपान, उत्तरः = बायाँ, पक्षः = पत्र है, आकाशः = आकाश, आत्मा = आत्मा है, पृथिव्याम् = पृथ्वी पर, पुच्छम् = पूँछ, प्रतिष्ठा = प्रतिष्ठा है, तत् = उस के बारे में, अपि = भी, एषः = यह, श्लोकः भवति = श्लोक है ॥

व्याख्या—उस प्राणमय का प्राणवायु सिर है, व्यान दक्षिणबाहु है, अपान उत्तर बाहु है, आकाश आत्मा है। तत्त्वप्रकाशिकाटीकाकार पृथिवी में सप्तमी विभक्ति का पाठ मानते हैं। उससे यहाँ अर्थ की सङ्गति नहीं बैठती है। हमारे परात्पर गुरुदेव पूज्यपाद स्वामी सन्तदास जी काठियाबाबा की 'वेदान्तसुबोधिनी नाम्नी भाषा व्याख्या' में—'पृथिवी पुच्छं प्रतिष्ठा' ऐसा पाठ है। पृथिवी पुच्छ—आश्रय-स्थान है। उसके सम्बन्ध में आगे बताया जानेवाला यह श्लोक (मन्त्र) है।

॥ द्वितीय अनुवाक समाप्त ॥२॥

•

अथ तृतीयोऽनुवाकः

प्राणं देवा अनु प्राणन्ति। मनुष्याः पशवश्च ये।
प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यते॥
सर्वमेव त आयुर्यन्ति। ये प्राणं ब्रह्मोपासते।
प्राणो हि भूतानामायुः। तस्मात् सर्वायुषमुच्यत इति।
तस्यैष एव शारीर आत्मा। यः पूर्वस्य॥

तत्त्वप्रकाशिका—देवाः प्राणम् अनुप्राणन्ति = चेष्टन्ते, मनुष्याः = मनुजाः, पशवश्च = गवाद्याः। चकारः सर्वशरीरसंग्रहार्थः। एते प्राणाधीनजीवना इत्यर्थः। प्राणाः हि = यस्मात् भूतानामण्डजादीनाम्। आयुर्जीवनं कारणं तस्मात् यस्मादायुस्ततः सर्वायुषम्। सर्वभूतायुर्हेतुत्वात् सर्वेषामायुरित्युच्यत इत्यर्थः। प्राणोपासकस्य फलं निर्दिशति—सर्वमेवेति। येऽधिकारिणः प्राणो हि भूतानामायुस्तस्मात्सर्वायुषमुच्यत इति प्रकारेण प्राणे ब्रह्मदृष्टिं कुर्वन्ति ते सर्वे सर्वमायुः प्राप्नुवन्तीत्यर्थः। एवं प्राणमय आकाशाद्यन्नमयान्तस्यात्मत्वबुद्धिमवतार्य बुद्धिं निवर्तयति—तस्यैष इति। पूर्वस्य = अन्नमयस्य, आत्मैष एव तस्य = प्राणमयस्य आत्मेत्यर्थः। शारीरः = शरीरसम्बन्धी आत्मा। अनेनात्मशब्दस्य स्वरूपार्थभ्रान्तिर्निरस्ता भवति। ततश्चान्नमयप्राणमयावेकात्मकौ न त्वन्नमयस्य प्राण आत्मेत्यर्थः॥

सान्वयानुवाद—ये = जो, देवाः = देवता, मनुष्याः = मानव, च = और, पशवः = गौ आदि, प्राणम् = प्राण के सहारे, अनुप्राणन्ति = चेष्टाएँ करते हैं अर्थात् जीते रहते हैं, हि = क्योंकि, प्राणः = प्राण, भूतानाम् = अण्डज आदि जीवों की, आयुः = आयु है, तस्मात् = इसलिये, सर्वायुषम् = सबका आयु, उच्यते = कहा जाता है। प्राणाः हि = प्राण ही, भूतानाम् = चतुर्विध जीवों की, आयुः = आयु है, ये = जो, प्राणम् ब्रह्म = प्राणस्वरूप ब्रह्म की, उपासते = उपासना करते हैं, ते = वे, सर्वम् एव = सम्पूर्ण, आयुः = आयु को, यन्ति = प्राप्त कर लेते हैं, तस्य = उसका, एषः = यह, शारीरः = शरीर सम्बन्धी, आत्मा = आत्मा, यः = जो, पूर्वस्य = पहले अन्नमय का आत्मा है वही॥

व्याख्या—अण्डज, जरायुज, उद्भिज्ज तथा स्वेदज इन चार प्रकार के भूत-प्राणियों की आयु (जीवन) प्राण ही है। ये चतुर्विध जीव प्राण के सहारे ही जी रहे हैं। इस सम्पूर्ण जगत् में ये ही चार प्रकार के जीव होते हैं।

'अण्डेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र'।
(श्रीमद्भागवत ११।३।३९)

आदित्यादि देवगण भी जीव हैं। यथा—

"आदित्यादिजीववर्गादन्योऽस्ति परमात्मा, कुतः ?
'आदित्ये तिष्ठन्नि'त्यादिना भेदव्यपदेशात्"। (ब्रह्मसूत्रनिम्बार्कभाष्य १।१।२२)

प्राण भी ईश्वर का ही रूप है।

'प्राणो हि भगवानीशः प्राणो विष्णुः पितामहः।
प्राणेन धार्यते लोकः सर्वं प्राणमयं जगत्' ॥

जो लोग प्राणरूपी ब्रह्म की उपासना करते हैं, वे दीर्घायु को प्राप्त करते हैं, प्राण ही प्राणमात्र की आयु है, अतएव प्राण को 'सब की आयु' इस प्रकार कहा जाता है। अन्नमय का जो आत्मस्वरूप है, वही प्राण है। उस प्राणमय की आत्मा है और यह प्राणमय शरीर सम्बन्धी पुरुष-देह है। जैसे सेवक अपने स्वामी राजा के पीछे-पीछे चलते हैं, ठीक वैसे ही सबों के शरीरों में प्राण के प्रबल रहने पर ही सारी इन्द्रियाँ सक्रिय-प्रबल रहती हैं और जब वह सुस्त पड़ जाता है तब सारी इन्द्रियाँ भी सुस्त हो जाती हैं॥ (श्रीमद्भागवत २।१०।१६)

तस्माद्वा एतस्मात्प्राणमयात्। अन्योऽन्तर आत्मा मनोमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य यजुरेव शिरः। ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश आत्मा। अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्याये तृतीयोऽनुवाकः ॥३॥

तत्त्वप्रकाशिका—तर्ह्यन्नमयप्राणमययोः क आत्मेति जिज्ञासायामाह—तस्मादिति पूर्ववद् व्याख्येयम्। अन्योऽन्तर आत्मा मनोमयः। अत्र प्राचुर्य्यार्थे मयट्। मनोबुद्ध्यहङ्कारचित्ताख्यान्तःकरणवृत्तिषु मनोवृत्तेः प्राचुर्य्यात्। तेन मनोमयेन एषः प्राणमयः पूर्णः। स वा एष मनोमयः पुरुषविध एव = पुरुषाकृतिरेव। तस्य = प्राणमयस्य। पुरुषविधतामनुकृत्य। मनोमयोऽपि पुरुषविध इत्यर्थः। मनोमयस्य शिर आदिकमाह—तस्येत्यादिना। तस्य = मनोमयस्य यजुर्वेदविषयज्ञानजनकमनोव्यापारः शिर इत्यर्थः। मुख्यार्थस्य यजुर्वेदस्य मनःसम्बन्ध्यभावेन मनसः शिरोरूपेणासम्भवात्। एवमुत्तरत्रापि। ऋग् दक्षिणः पक्षः = दक्षिणो बाहुः। साम उत्तरः पक्षः = वामबाहुः। आदेश आत्मा। इदं कुर्विदं मा कार्षीरिति विधिनिषेधरूपं रहस्यानुशासनमादेश इत्यर्थः। अत्र तज्जन्यज्ञानहेतुभूतान्तःकरणवृत्तिरादेशशब्देन उच्यते। अथर्वाङ्गिरसः अथर्वाङ्गिरसा दृष्टा मन्त्राः प्रतिष्ठाहेतुभूतं पुच्छमित्यर्थः। अत्रापि अथर्वाङ्गिरःशब्दस्तज्जन्यज्ञानहेतुभूतमनोव्यापारः। तदेष इति पूर्ववत्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्यायस्य तत्त्वप्रकाशिकायां टीकायां तृतीयोऽनुवाकः ॥३॥

सान्वयानुवाद—वै = निश्चयार्थ, तस्मात् = उस, एतस्मात् = इस, प्राणमयात् = प्राणमय से, अन्यः = भिन्न, अन्तरः = भीतर में स्थित, आत्मा = आत्मा (मनोमय) है, तेन = उससे, एषः = यह, पूर्णः = व्याप्त है, सः = वह, एषः

वै = यह, पुरुषविधः = पुरुष के आकार का, एव = ही है, तस्य = उसके, पुरुषविधताम् = पुरुषाकारत्व को (अनुकरण करके), पुरुषविधः = पुरुषाकृति, अन्वयः = अनुगत है, तस्य = उसका, यजुरेव = यजुर्वेद ही, शिरः = सिर है, ऋग् दक्षिणः = ऋग्वेद दाहिना, पक्षः = पक्ष है, साम = सामवेद, उत्तरः = बायाँ, पक्षः = पत्र है, आदेशः = आदेश, आत्मा = आत्मा है, अथर्वाङ्गिरसः = अथर्वा और अङ्गिरा ऋषि द्वारा देखे गये मन्त्र, पुच्छम् = पूँछ (तथा) प्रतिष्ठा = आधार है, तत् = उसके सम्बन्ध में, अपि = भी, एषः = यह, श्लोकः भवति = मन्त्र है।

व्याख्या—प्राणमय से पृथक् उसके अभ्यन्तर मनोमय अवस्थित है। यही मनोमय पुरुष ही प्राणमय के सम्बन्ध में आत्मा है। अन्नमयादि शब्द मयट् प्रत्ययान्त है, यहाँ मयट् प्रत्यय प्राचुर्य्य अर्थ में हुआ है। महामुनि पाणिनि ने प्राचुर्य्य अर्थ में भी मयट् प्रत्यय का विधान किया है। मन, बुद्धि, अहङ्कार, चित्त नामक अन्तःकरण-वृत्तियों में मनोवृत्ति का प्राचुर्य्य है। उस मनोमय से यह प्राणमय पूर्ण है। वही यह मनोमय पुरुष की आकृति ही है। प्राणमय के समान उसके अनुरूप मनोमय भी पुरुष-विशेष है। उस मनोमय का यजुर्वेद विषयक ज्ञानजनक मनोव्यापार मस्तक है। ऋग्वेद दाहिना बाहु है। सामवेद बायाँ बाहु है। 'यह करो, यह मत करो' इस प्रकार विधि-निषेध रूप रहस्य अनुशासन आदेश है। मन्त्रद्रष्टा अथर्वा और अङ्गिरा प्रतिष्ठा के कारण रूप पुच्छ (पूँछ) आधार है अर्थात् आश्रय-स्थान है। इस सम्बन्ध में आगे बताया जानेवाला मन्त्र है।

॥ तृतीय अनुवाक समाप्त ॥३॥

•

अथ चतुर्थोऽनुवाकः

यतो वाचो निवर्त्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्याये चतुर्थोऽनुवाकः ॥४॥

तत्त्वप्रकाशिका—यतः = यस्माद् ब्रह्मानन्दाद्वाचः मनसा सहाप्राप्य साकल्ये-नाप्रतिपाद्य निवर्त्तन्ते तादृशं ब्रह्मानन्दं दृश्यते, त्वग्रया बुद्ध्या मनसा तु विशुद्धेन मनसा ज्ञात्वा कदापि न बिभेतीत्यर्थः। अत्र ब्रह्मानन्दस्याशुद्धमनसाग्राह्यत्वेऽपि शुद्धमनो-ग्राह्यत्वेन मनोविषयत्वमस्तीति द्रष्टव्यम्।

तस्यैष इति पूर्वस्य प्राणमयस्य य आत्मा स एव मनोमयस्यात्मा। एवञ्चान्न-मयप्राणमयमनोमयानामेक आत्मैकम्भवति। स क इत्यपेक्षायामाह–तस्माद्वेति। अत्र मनोमयो जीवो न बुद्धिमात्रम्। मयट्प्रत्ययेन व्यतिरेकप्रतीतेः। तेन विज्ञानमयेन एषः मनोमयः पूर्णः। स वा एष विज्ञानमयः पुरुषविध एव = पुरुषाकृतिरेव। तस्य विज्ञान-मयस्य शिरोबाह्वादिकमाह–तस्येत्यादिना। तस्य शिरः श्रद्धैव श्रद्धाऽऽस्तिक्यसम्पन्न-बुद्धिवृत्तिः। ऋतं शास्त्रार्थविषये मानसव्यापारविषयावृत्तिः। सत्यं तस्मिन्नेव वाक्का-याभ्यामनुष्ठीयमाने तद्विषयावृत्तिः। ब्राह्मणे त्वामहसे, ओमित्यात्मानं युञ्जीतेति। विहित-ज्ञानविशेषो योगशब्देनोच्यते। महः पुच्छं प्रतिष्ठा। योगविरोधिनिरसनसामर्थ्य-लक्षणं महः पुच्छमित्यर्थः।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्यायस्य
तत्त्वप्रकाशिकाटीकायां चतुर्थोऽनुवाकः ॥४॥

सान्वयानुवाद—यतः = जहाँ से, मनसा सह = मन के साथ, वाचः = वाणी, अप्राप्य = उसे न पाकर, निवर्त्तन्ते = लौट आती है। ब्रह्मणः = ब्रह्म के, आनन्दम् = आनन्द को, विद्वान् = जाननेवाला व्यक्ति, कदाचन = कभी, न बिभेति = भय नहीं करता, इति = यह श्रुतियों का अटल सिद्धान्त है। तस्य = उस मनोमय पुरुष का, एषः एव = यही, शारीरः = स्वरूप है, यः = जो, पूर्वस्य = पहले कहा गया है। आत्मा = चेतन है। वै = निश्चयार्थे, तस्मात् = उस, एतस्मात् = इस, मनोमयात् = मनोमय से, अन्यः = भिन्न, अन्तरः = अभ्यन्तर, आत्मा विज्ञानमयः = आत्मा विज्ञानमय है, तेन = उससे, एषः = यह, पूर्णः = पूर्ण है, सः = वह, एषः = यह, वै पुरुषविध एव = पुरुषाकृति ही है। तस्य = उसकी, पुरुषविधताम् अन्वयः = पुरुषाकृति अनुगत है, पुरुषविधः = पुरुषाकार, तस्य = उसके, श्रद्धा एव = श्रद्धा ही, शिरः = सिर है, ऋतम् = प्रिय मधुर वाणी, दक्षिणः = दाहिना, पक्षः = पंख है, सत्यम् = सत्य, उत्तरः = बायाँ, पक्षः = पंख है, योगः = योग, आत्मा = आत्मा है, महः = मह, पुच्छम् = पूँछ, प्रतिष्ठा = आश्रयस्थान है, तत् = उसके सम्बन्ध में, अपि = भी, एषः श्लोकः भवति = यह मन्त्र है ॥

व्याख्या—जिसे प्राप्त न होकर मन के सहित वाक्य निर्वर्तित होते हैं, उसी परब्रह्म के आनन्द को जिसने जान लिया है या प्राप्त कर लिया है, उसे किसी से कदापि भय प्राप्त नहीं होता। यह मन्त्र श्रीमद्भागवत (३।६।४०) में भी देखने को मिलता है—

'यतोऽप्राप्य न्यवर्तन्त वाचश्च मनसा सह।
अहं चान्य इमे देवास्तस्मै भगवते नमः' ॥

जिसे वाणी मन के सहित सम्पूर्ण रूप से प्रतिपादन न करके जहाँ से लौट आती है, उस भगवान् को हम सब सिर झुकाकर प्रणाम करते हैं। क्योंकि वह परब्रह्म परमात्मा अवाङ्मनसगोचर है। जो प्राणमय का अन्तरात्मा स्वरूप है, वही मन इस मनोमय पुरुष का शरीर (स्वरूप) है। यह मनोमय से पृथक् है। उसके भीतर विज्ञानमय

अवस्थित है। इस प्रकार अन्नमय, प्राणमय और मनोमय एक आत्मा है। यहाँ विज्ञानमय आत्मा जीव है, बुद्धिमात्र नहीं। उस विज्ञानमय से यह मनोमय पूर्ण है। उस विज्ञानमय के सिर, बाहु आदि को बताते हैं—उसका सिर श्रद्धा ही है, श्रद्धा नाम आस्तिक्य सम्पन्न बुद्धि वृत्ति का है। ऋत नाम शास्त्रार्थ के विषय में मानस व्यापार विषयिणी वृत्ति का है। सत्य नाम से उसी में ही वाणी और शरीर द्वारा अनुष्ठीयमान उसकी विषयिणी वृत्ति है। योग आत्मा है—'परो हि योगो मनसः समाधिः' ऐसा कहा गया है। योग विरोधी निरसन सामर्थ्य लक्षण मह पुच्छ है ॥

॥ चतुर्थ अनुवाक समाप्त ॥४॥

•

अथ पञ्चमोऽनुवाकः

विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च। विज्ञानं देवाः सर्वे। ब्रह्म ज्येष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्वान् कामान् समश्नुत इति।

तत्त्वप्रकाशिका—विज्ञानं = प्रत्यगात्मा। 'कृत्यल्युटो बहुलमि'ति सूत्रात् नन्द्यादित्वाद् वा जानातीत्यर्थे ल्युडाश्रीयते। न चात्र विज्ञानपदस्य बुद्धिपरत्वं युज्यते, यज्ञं तनुते कर्माणि तनुतेऽपि चेति प्रतिपादितलौकिकवैदिककर्मकर्तृत्वासम्भवात्। य आत्मनि तिष्ठन्निति माध्यन्दिनपाठगतात्मशब्दस्थाने यो विज्ञाने तिष्ठन्निति काण्वपाठ-दर्शनाद्विज्ञानशब्दो जीवात्मपर इति भावः। सर्वे देवा विज्ञानं = प्रत्यगात्मस्वरूपमेव प्रधानशब्दितादधिचेतनाद् ब्रह्मणोऽपि ज्येष्ठं प्रजापतिविद्योक्तरीत्योपासते। एवं वेत्तुः फलमाह—विज्ञानं ब्रह्म चेदिति। चेद्यदि कश्चिद् विज्ञानरूपं ब्रह्म वेद। तस्माच्च जीवात् न प्रमाद्यति कदापि प्रमादयुक्तो न भवति। शरीरे पाप्मनो हित्वा = क्षपयित्वा देहे वर्त्तमान एव विनष्टाश्लिष्टपूर्वोत्तराघः सर्वान् कामान् सम्यगश्नुत इत्यर्थः॥

सान्वयानुवाद—विज्ञानम् = ज्ञानस्वरूप जीव, यज्ञम् = यज्ञ का, तनुते = विस्तार करता है, चापि = और भी, कर्माणि = कर्मों का, तनुते = विस्तार करता है, सर्वे = समस्त, देवाः = देवता, विज्ञानम् = प्रत्यगात्मस्वरूप है, (वे) ज्येष्ठम् ब्रह्म = ज्येष्ठ ब्रह्म की, उपासते = उपासना करते हैं, चेत् = अगर कोई, विज्ञानं ब्रह्म = जीव ब्रह्म को, वेद = जानता है, तस्मात् चेति = उससे भी, न प्रमाद्यति = प्रमाद नहीं करता है, पाप्मनः = पापों को, शरीरे = शरीर में, हित्वा = समूल नाश कर, सर्वान् कामान् = सारी कामनाओं को, समश्नुते = प्राप्त हो जाता है।

व्याख्या—यहाँ पर विज्ञान पद का बुद्धिपरक अर्थ नहीं है। 'यज्ञं तनुते, कर्माणि तनुतेऽपि च' इस प्रकार प्रतिपादित लौकिक-वैदिक कर्मकर्तृत्व उसमें असम्भव है। जो विज्ञान में रहता है—इस प्रकार काण्वपाठ में देखा जाता है कि विज्ञान शब्द जीवात्मपरक है। अतः यहाँ विज्ञान शब्द जीवात्मबोधेच्छया उच्चारित है। यदि कोई

विज्ञानरूप ब्रह्म को जानता है वह उससे कभी भी प्रमादयुक्त नहीं होता है। क्योंकि कपिलदेवजी ने कहा है—'ईश्वरो जीवकलया प्रविष्टो भगवानिति'। वही ईश्वर भगवान् पूर्ण ब्रह्म सब जीवों में जीव रूप से स्थित है। वह शरीर में पापों को छोड़कर सभी विषयभोगों को भोगता है तथा दिव्य सुख का अनुभव करता है।

तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्माऽऽनन्दमयः। तेनैष पूर्णः सः। वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्याये पञ्चमोऽनुवाकः ॥५॥

तत्त्वप्रकाशिका—पूर्वस्य तस्य मनोमयस्य य एष विज्ञानमयः शारीर आत्मा। एतस्माद्विज्ञानमयाज्जीवादन्योऽन्तर आत्माऽऽनन्दमयः नारायणो वासुदेवः। तेनानन्दमयेन एष विज्ञानमयः पूर्णः। स वा एष आनन्दमयः। तस्यानन्दमयस्य। अयं विज्ञानमयः। आनन्दमयस्य परब्रह्मणो वासुदेवस्य शिरोबाह्वादिकमाह—तस्येत्यादिना। तस्य शिरः प्रियम्। इष्टवस्तुदर्शनजन्यं सुखम्। दक्षिणः पक्षो दक्षिणबाहुः, मोदः = तल्लाभजन्यं सुखम्। उत्तरः पक्षः सव्यबाहुः प्रमोदः। लब्धस्योपभोगजन्यं सुखम्। आत्मा = मध्यकायः। आनन्दः = सुखातिशयः। न चैकस्य ब्रह्मणः पुच्छत्वेन मध्यकायत्वेन च निरूपणं कथमिति वाच्यम्। एकस्यैव परब्रह्मणो वासुदेवस्य ब्रह्मरूपत्वेन पुच्छत्वम्। आनन्दत्वेन रूपेण मध्यकायत्वमित्युपपत्तेः। तदप्येष श्लोक इति पूर्ववत्॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्यायस्य तत्त्वप्रकाशिकायां टीकायां पञ्चमोऽनुवाकः ॥५॥

सान्वयानुवाद—पूर्वस्य = पहले, तस्य = उस मनोमय का, यः = जो, एषः = यह, एव = ही, शारीरः = शरीर सम्बन्धी, आत्मा = स्वरूप है, वै = निश्चयार्थ, तस्मात् = उस, एतस्मात् = इस, विज्ञानमयात् = विज्ञानमय से, अन्यः = भिन्न, अन्तरः = अभ्यन्तर, आत्मा आनन्दमयः = आत्मा आनन्दमय है, तेन = उससे, एषः = यह, पूर्णः = पूर्ण है, सः = वह, एषः = यह, वै = निश्चय ही, पुरुषविधः = पुरुषाकार, एव = ही है, तस्य = उस आनन्दमय का, पुरुषविधः = पुरुषाकार, अन्वयम् = अनुगत है, तस्य = उसका, प्रियम् = प्रिय, एव = ही, शिरः = सिर है, मोदः = मोद, दक्षिणः = दाहिना, पक्षः = पत्र है, प्रमोदः = प्रमोद, उत्तरः = बायाँ, पक्षः = पत्र है, आनन्दः = आनन्द, आत्मा = आत्मा है, ब्रह्म = ब्रह्म, पुच्छम् = पुच्छ, प्रतिष्ठा = आश्रयस्थान है, तत् = उसके सम्बन्ध में, अपि = भी, एषः श्लोकः भवति = यह श्लोक है।

व्याख्या—पहले बताये गये उस मनोमय का जो यह विज्ञानमय शारीर आत्मा है। इस विज्ञानमय (ज्ञानस्वरूप) जीव से अन्य सभी प्राणियों के हृदयपुण्डरीक में रहने वाले आत्मा आनन्दमय नारायण वासुदेव ही है। उस आनन्दमय से यह विज्ञानमय पूर्ण है। वही यह पुरुषाकार ही है। उस आनन्दमय का यह विज्ञानमय है। आनन्दमय पर-ब्रह्मस्वरूप वासुदेव के सिर, बाहु आदि को श्रुति दिखाती है—तस्येत्यादि द्वारा। भगवान् श्रीवासुदेव की त्रिगुणात्मिका माया से अस्पृष्ट चिद्घन-ज्ञानघन नित्य सच्चिदानन्द श्रीविग्रह है। ऐसा ही श्रुति में सुना जाता है—'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः'। (छान्दोग्योपनिषद् १।६।७) सूर्यमण्डल के भीतर जो यह पुरुष दीखता है उसका श्मश्रु, केश और नखपर्यन्त समस्त अङ्ग ही हिरण्मय है, दिव्य है। श्रुति के 'ब्रह्म पुच्छं प्रतिष्ठा' वाक्य का अर्थ अन्नमयादि वाक्यों के अन्त में जो 'पुच्छं प्रतिष्ठा' शब्द है उसके अनुरूप अर्थ अवश्य ही करना होगा, अन्य अर्थ नहीं होता है। अतः 'पुच्छ' शब्द का अर्थ है पुच्छ देश, जिसके ऊपर जीव उपवेशन करता है, बैठता है। इसलिये 'पुच्छं प्रतिष्ठा' वाक्य उक्त हुआ है। (निम्बार्कवेदान्त का संक्षिप्त सार, पृ. १४८)

•

अथ षष्ठोऽनुवाकः

असन्नेव स भवति। असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य।

तत्त्वप्रकाशिका—आनन्दमयं ब्रह्म असत्त्वेन ये विदुः ये च सत्त्वेन विदुस्त-दुभयोः फलं वक्तुमाह—असन्नेवेति। ब्रह्मशब्देनानन्दमय एवोच्यते प्रागुपदिष्टानां श्लोकानां पुच्छवदानन्दविषयकत्वदर्शनादस्यापि श्लोकस्य तथात्वं वाच्यं, न तु ब्रह्मपुच्छमिति निर्दिष्टतदेकदेशविषयत्वं तथा च ब्रह्म आनन्दमयरूपमसदिति चेत् यदि वेद। अत्र सर्वत्रापि एकवचनं बहुवचनार्थे। विदुः। ते वेत्तारः असन्नेव भवति। असन्तः = दुःखिनो भवन्ति। तम आलयाः भवन्तीति यावत्। ब्रह्मानन्दमयरूपमस्तीति चेद्यदि वेद विदुः तर्हि एतान् वेत्तॄन् ततः सम्यग्वेत्तृत्वादेव सन्तं सतः सुखिनो मोक्षयोग्यानिति यावत् इति ज्ञानिनो विदुरित्यर्थः। इति श्लोको भवतीति सम्बन्धः। आनन्दमयस्य ब्रह्मणः आकाशादिविज्ञानमयान्तःपदार्थान्तर्यामितया निर्दिष्टस्यात्मान्तरं नास्ति, किमिति शङ्कां व्युदस्यति—तस्यैष इति। विज्ञानमयान्तःपदार्थस्यात्मभूत एवानन्दमय आत्मा तस्यानन्दमयस्यास्यात्मेत्यर्थः। ततश्चानन्यात्मकत्वमुक्तं भवति, न च पूर्वपर्य्यायेषु तस्यैष एव शारीर आत्मेत्यस्यानन्यात्मकत्वप्रतिपादत्वादर्शनादस्मिन्नपि पर्याये तदाश्रयणेऽर्थवैरूप्यं स्यादिति शङ्क्यम्। पूर्वेषु पर्यायेष्वनुक्तस्य ब्रह्मावयवत्वस्येह निरूपणात्तस्माद्वा एतस्मादानन्दमयादन्योऽन्तर आत्मेति निर्देशाभावात् चैतत्पर्यायस्य तस्यैष एव शारीर आत्मेत्यस्यानन्यात्मत्वमेवार्थः।

सान्वयानुवाद—चेत् = अगर (कोई), ब्रह्म = ब्रह्म, असत् = असत् है, इति = इस प्रकार, वेद = समझता या जानता है, सः = वह (व्यक्ति), असत् = असत्, एव = ही, भवति = हो जाता है, चेत् = अगर (कोई), ब्रह्म अस्ति = ब्रह्म है, इति = इस प्रकार, वेद = जानता है, ततः (तु) = तो, एनम् सन्तम् = इसको सत्पुरुष, विदुः = समझते हैं। इति = यह, बिल्कुल सच बात है। तस्य = उस आनन्दमय का, एषः = यह, एव = ही, शारीरः = शरीर सम्बन्धी, आत्मा = स्वरूप है, यः = जो, पूर्वस्य = पहले कहा गया है।

व्याख्या—जो व्यक्ति आनन्दमय ब्रह्म को असद्रूप से समझते हैं और जो सद्रूप से जानते हैं उन दोनों का फल बताते हैं—ब्रह्म शब्द से आनन्दमय ही कहा जाता है, ब्रह्म ही आनन्दमय शब्द का अर्थ है। उस आनन्दमय ब्रह्म को जो असत् (अस्तित्वविहीन) जानता है—इस नास्तिकता के कारण ही वे हतभाग्य दुःखी हो जाते हैं। वह सच्चिदानन्दस्वरूप आनन्दमय सद्ब्रह्म है—ऐसा जो जानते हैं वे सत् हैं। अर्थात् उन्हें कविजन सज्जन (सत्पुरुष) कहते हैं।

अथातोऽनुप्रश्नाः। उताविद्वानमुं लोकं प्रेत्य। कश्चन गच्छती३। आहो विद्वानमुं लोकं प्रेत्य। कश्चित् समश्नुता३उ। सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदꣳ सर्वमसृजत। यदिदं किञ्च। तत्सृष्ट्वा। तदेवानुप्राविशत्।

तत्त्वप्रकाशिका—आनन्दब्रह्मप्रतिपादनानन्तरं ब्रह्मविदाप्नोति परमित्युपक्रमाभिहितप्राप्तिविशदीकरणार्थमनुप्रश्नानाह—अथशब्दः प्रकरणान्तरारम्भद्योतनार्थः। आनन्दमयब्रह्मनिरूपणानन्तरं प्रकरणान्तरमारभ्यते। अतः ब्रह्मविदाप्नोति परमिति वाक्येन ब्रह्मविदः परब्रह्मप्राप्तेरुक्तत्वात् तच्छ्रुतवता वरुणेन चतुर्मुखं प्रति अनुप्रश्नास्तत्त्वनिर्णयानुकूलाः प्रश्नाः कथ्यन्ते। तानेव विशदयति—उतेति। ब्रह्मविदिति निरवधारणोक्तेः कश्चनाविद्वानुत। एकवचनं बहुवचनार्थे। अज्ञानिनोऽपि प्रेत्य = मृत्वा, अमुं लोकं = परलोकं वैकुण्ठादिस्थं परब्रह्मेति यावत्। गच्छति = गच्छन्ति प्राप्नुवन्ति। आहोस्वित् विद्वान् = ज्ञानिन एवामुं लोकं प्रेत्य गच्छन्त्येवं द्विकोटिक एकः प्रश्नः। ज्ञानिन एव ब्रह्म प्राप्नुवन्तीति पक्षेऽपि ज्ञानिनो ब्रह्म प्राप्नुवन्ति अथ केचनैवेति द्विकोटिको द्वितीयः प्रश्नोऽध्याहार्यः।

सर्वेऽपि ज्ञानिनो ब्रह्म प्राप्नुवन्तीति पक्षेऽपि किं सर्वेऽपि ज्ञानिनो ब्रह्म सम्यक् प्राप्नुवन्ति मुक्तौ भोग्यभूतं ब्रह्मानुभवन्तीति यावत्, उत ब्रह्मरूपेणैकीभवन्तीत्यर्थसिद्धः प्रश्नः। एतत्सर्वं बादरायणाचार्यैरुपासात्रैविध्यादिति सूत्रे स्पष्टमुक्तम्। एतान् प्रतिवक्तुं जगत्स्रष्टृत्वसर्वदेवादिभयप्रदत्वमुक्तिप्रदत्वादिना रूपेण ब्रह्मणः प्राप्यत्वज्ञापनायाह—सोऽकामयत इति। स आनन्दमयः परमात्मा अकामयत। कामनाप्रकारमेवाह-बहु स्यामिति। अहमादौ प्रजायेय देवमनुष्यादिरूपेण प्रादुर्भवानि नियम्यं जगच्च स्यात्, तदनन्तरं त्यदादिशब्दवाच्यब्रह्मादिजगन्नियामकतया अहं बहुरूपः स्याम् इत्यकामयत,

एवं कामनानन्तरं सः प्रलयकालगो वासुदेवस्तपोऽतप्यत स्रष्टव्यालोचनरूपं तपः कृतवान्। स तपस्तप्त्वा स्वोदरस्थं जगदालोच्य। अनन्तरं यदिदं किञ्चित् जगत् सत्यादिशब्दवाच्यं तदिदं सर्वमसृजत। तत्सृष्ट्वा तन्नियामकतया स्वयमपि बहुरूपो भूत्वा सृष्टं तदेव जगदनुप्राविशत। सर्वव्याप्तस्य ब्रह्मणः प्रत्येकं सर्ववस्तुषु पुष्कलप्रतीत्यर्हस्थितिविशेष एवानुप्रवेशः।

सान्वयानुवाद—अथ = इसके बाद, अर्थात् दूसरा प्रकरण प्रारम्भ होता है, अतः = यहाँ से, अर्थात्—'ब्रह्मविदाप्नोति परम्' इस वाक्य से, अनुप्रश्नाः = तत्त्व-निर्णय के अनुकूल प्रश्न किये जाते हैं। उत = क्या, कश्चन = कोई व्यक्ति, प्रेत्य = मरकर, अमुम् लोकम् = उस लोक में, गच्छति = जाता है, अविद्वान् = अज्ञानी अज्ञ व्यक्ति, आहो = अथवा, कश्चित् = कोई, विद्वान् = ज्ञानवान् पुरुष, प्रेत्य = मरकर, अमुम् लोकम् = उस लोक को, समश्नुते = प्राप्त होता है, सः = उस परमात्मा ने, अकामयत = कामना की, बहु स्याम् = बहुत हो जाऊँ, प्रजायेयेति = मैं प्रजा रूप से प्रकट हो जाऊँ, सः = उसने, तपः अतप्यत = तपस्या की, सः = उसने, तपः तप्त्वा = तप करके, यत् किञ्च = जो कुछ, इदम् = यह जगत्, इदम् सर्वम् असृजत = इस समस्त जगत् का सर्जन किया, तत् सृष्ट्वा = उसकी सृष्टि करके, तत् एव अनुप्राविशत् = वही नियामक रूप से स्वयं भी बहुत रूप होकर सृष्ट जगत् में प्रवेश किया है।

व्याख्या—अनन्तर शिष्य आचार्य से इस प्रकार प्रश्न करते हैं—क्या कई अविद्वान् (अज्ञ) व्यक्ति मृत्यु के उपरान्त उस परलोक को प्राप्त होते हैं अर्थात् वैकुण्ठ आदि में स्थित परब्रह्म को प्राप्त होते हैं? अथवा कई विद्वान् (ज्ञानी) व्यक्ति क्या मृत्यु के बाद उस परलोक को प्राप्त होते हैं? इस प्रश्न का उत्तर देते हुए श्रुति कहती है—उस आनन्दमय परमात्मा ने इच्छा की, मैं अनेक रूप में उत्पन्न होकर बहुत हो जाऊँ, प्रजारूप से मेरा प्रकाश हो। उसने ऐसा ध्यान किया, ध्यान करके यह समस्त जो कुछ हैं उसकी सृष्टि की और सर्जन कर उसमें प्रविष्ट हुआ। यह मन्त्र श्रीमद्भागवत में अनेक स्थान पर आया है।

> यथा—'सृष्ट्वाऽनुविश्य पुरुषस्तदसद्गुणेषु
> नानेव दारुषु विभावसुवद् विभासि'। (श्रीमद्भागवत ४।९।७)
> 'यो दुर्विमर्शपथया निजमाययेदं
> सृष्ट्वा गुणान् विभजते तदनुप्रविष्टः'। (श्रीमद्भागवत १०।४९।२९)

अग्नि वस्तुतः एक ही है, परन्तु वह जैसे तरह-तरह की लकड़ियों में प्रकट होती है, ठीक वैसे ही हे भगवन्! आप जगत् का सर्जन कर उसमें अन्तर्यामिरूप से प्रवेश कर जाते हैं। फिर इसके बाद असद्गुणों में नानारूप धारण कर सूर्य की भाँति भासित हो रहे हैं। यही बात दशम स्कन्ध में भी कही गयी है।

तदनुप्रविश्य। सच्च त्यच्चाभवत्। निरुक्तञ्चानिरुक्तञ्च। निलयनञ्चा-

निलयनञ्च। विज्ञानञ्चाविज्ञानञ्च। सत्यञ्चानृतञ्च। सत्यमभवत्। यदिदं किञ्च। तत्सत्यमित्याचक्षते। तदप्येष श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्द-वल्ल्यध्याये षष्ठोऽनुवाकः ॥६॥

तत्त्वप्रकाशिका—तत् = ब्रह्म, जगदनुप्रविश्य सच्च = चेतनं, त्यच्च = विकारास्पदमचेतनमभवत्। ब्रह्मैव चेतनाचेतननामरूपभाग्भवतीत्यर्थः। यदि प्रपञ्चं प्रति ब्रह्मण उपादानकारणत्वं स्यात्तदा विकारित्वं स्यादित्याशङ्क्याह—निरुक्तञ्चेति। जातिगुणाभिधायिशब्दवाच्यमचेतनं निरुक्तम्। तच्छून्यं चेतनजातमनिरुक्तम्। एता भूतमात्राः प्रज्ञामात्रास्वर्पिता इत्युक्तरीत्याऽचेतनवर्गाधारभूतं चेतनजातं निलयनम्। आश्रितमचेतनजातं त्वनिलयनम्। विज्ञानं चेतनमविज्ञानं तद्रहितमचेतनम्। निर्विकारतया सत्यत्वं चेतनस्याचेतनस्य न तथात्वम्। निरुक्तत्वनिलयनत्वविज्ञानत्वयुक्तसत्यानृतशब्दितचेतनाचेतनं नामरूपभाग्भवदपि ब्रह्म सत्यमेवाभवत्। अजहन्निर्विकारत्वलक्षणस्वभावमेवाभवदित्यर्थः। यदिदमिति। यस्माच्चेतनाचेतनात्मकवर्गानुप्रविष्टतया सत्यशब्दवाच्यस्य ब्रह्मण आत्मत्वमत एव सर्वमपि चेतनाचेतनात्मकं जगच्छास्त्रदृष्टिमन्तः पुरुषाः पराशरादयः 'हरेर्न किञ्चिद् व्यतिरिक्तमस्ति ज्योतींषि विष्णुर्भवनानि विष्णुः' इत्याचक्षत इत्यर्थः। उक्तार्थे सम्मतितया श्लोकमुदाहरति—तदपीति। तत्रापि देवमनुष्यादिरूपेण भवने एषः वक्ष्यमाणः श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्यायस्य तत्त्वप्रकाशिकायां टीकायां षष्ठोऽनुवाकः ॥६॥

सान्वयानुवाद—तत् = वह ब्रह्म, अनुप्रविश्य = जगत् में अनुप्रवेश करके, सत् च = चेतन और, त्यत् च = विकारास्पद अचेतन, अभवत् = हो गया, निरुक्तं च = निर्वचन किया गया और, अनिरुक्तं च = सम्पूर्ण निर्वचन करना सम्भव नहीं, निलयनम् = निवासस्थान, च = और, अनिलयनम् = घर-द्वार राज्यहीन, च = और, विज्ञानम् = चेतन, च = और, अविज्ञानम् = उससे रहित जड़ वस्तु, सत्यम् = सत्य, च = और, अनृतम् = झूठ, सत्यम् अभवत् = सत्य हो गया, यत्किञ्च = जो कुछ, इदम् = यह जगत्, तत् = वह, सत्यम् = सत्य है, इति = इस प्रकार, आचक्षते = विद्वान् पुरुष कहते हैं, तदपि = उस सम्बन्ध में भी, एषः = यह, श्लोकः भवति = कहा जानेवाला मन्त्र है।

व्याख्या—उस परब्रह्म ने इस जड़-चेतनरूप जगत् में प्रवेश किया। प्रविष्ट होकर वह स्थूल-मूर्त्त और सूक्ष्म-अमूर्त्त (व्यक्त और अव्यक्त) रूपों से प्रकाशित हुआ, देहादि-आश्रय विशिष्ट तथा उससे अतीत हुआ, विज्ञान एवं अविज्ञान हुआ, सत्य एवं अनृत हुआ। वही सत्यस्वरूप परमात्मा सब ओर से दिखाई देनेवाला सब कुछ हुआ है, इसलिये उसे 'सत्य' ऐसा मनीषी व्यक्ति कहते हैं। पृथ्वी, जल और तेज मूर्त्त तथा

वायु और आकाश अमूर्त पदार्थ हैं। जड़ और चेतन सब ब्रह्मस्वरूप है, उससे कुछ अलग नहीं है। ऐसा ही कहा गया है—

'भगवद्रूपमखिलं नान्यद् वस्त्विह किञ्चन'। (श्रीमद्भा. १०)

॥ षष्ठ अनुवाक समाप्त ॥६॥

•

अथ सप्तमोऽनुवाकः

असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मान ँ स्वयमकुरुत। तस्मात्तत्सुकृतमुच्यत इति। यद्वै तत्सुकृतम्। रसो वै सः। रस ँ ह्येवायं लब्ध्वाऽऽनन्दी भवति।

तत्त्वप्रकाशिका—इदं = स्थूलं चेतनाचेतनशरीरकं ब्रह्मानभिव्यक्तनामरूपं सृष्टेः प्रागासीत्। तस्मादिदं जगदभिव्यक्तनामरूपमभवदित्यर्थः। नन्वसच्छब्दितस्य ब्रह्मण उपादानत्वे कर्त्रन्तरमपेक्षितं निमित्तोपादानयोर्भेदावश्यम्भावादित्याशङ्क्याह—तदात्मानमिति। अन्तरात्मानमेवोपादानत्वेन स्वीकृत्य स्वयमेवाकुरुत यस्मात्तस्मादेव हेतोः ब्रह्म सुकृतमुच्यते, सुसम्यक् विश्वात्मना स्वरूपं कृतमित्यर्थः। इति श्लोको भवतीति सम्बन्धः। भवतु तावत् सुकृतत्वं ब्रह्मणस्तस्योपास्यत्वप्राप्यत्वयोः किमायातमित्यत्राह—तद्वै तत्सुकृतमिति। सुकृतत्वेन निर्दिष्टं ब्रह्म रसः पूर्णानन्द इत्यर्थः। ननु भगवतः पूर्णानन्दत्वे किं मानमित्याशङ्क्य मुक्तानां सुखकारणत्वादयं पूर्णानन्द इत्याह—रसमिति। हि यस्माद्रसं पूर्णानन्दमेनं वासुदेवं लब्ध्वैव = प्राप्यैव अयं मुक्त आनन्दीभवति स्वयोग्यानन्दपूर्णो भवति। अन्यथा तन्न स्यात्। न हि दुःखिनं प्राप्तस्यानन्दो दृश्यते। तथाऽयं वासुदेवः पूर्णानन्दो न स्यात् यदि, तर्हि तं प्राप्तो मुक्तोऽपि पूर्णानन्दो न स्यात्; लोके दुःखिनं प्राप्तस्यानन्दादर्शनात्। भवति च मुक्तः पूर्णानन्दः। 'ज्योतिर्मयेषु देहेषु स्वेच्छया विश्वमोक्षिणः। भजन्ते तु सुखान्येव न दुःखादीन् कदाचने'ति वचनात्। अतस्तत्प्राप्यो वासुदेवोऽपि पूर्णानन्द इति सिद्ध्यतीति भावः। तथा च वासुदेवस्य प्राप्यत्वोपास्यत्वे युक्ते।

सान्वयानुवाद—अग्रे = सृष्टि के पहले, इदम् = यह जगत्, असत् = अप्रकाशित, वै = ही, आसीत् = था, ततः = उससे, वै = ही, सत् = यह दृश्यमान जगत्, अजायत = उत्पन्न (प्रकाशित) हुआ है, तत् = उसने, आत्मानम् = अपने को, स्वयम् = स्वयं, अकुरुत = जगत् के रूप में परिणत किया है, तस्मात् = इसलिये, तत् = वह, सुकृतम् = सुकृत, उच्यते = कहा जाता है, वै इति, सः = वह, वै = निश्चय ही, रसः = रस है, हि = क्योंकि, अयम् = यह जीव, रसम् = रस को, लब्ध्वा = प्राप्त करके, एव = ही, आनन्दीभवति = आनन्दवान् हो जाता है।

व्याख्या—यह स्थूल जड़-चेतनरूप जगत् सृष्टि के पहले नाम-रूप से अभिव्यक्त नहीं था। उससे यह नाम-रूप जगत् अभिव्यक्त हुआ अर्थात् प्रकाशित हुआ है। उस परब्रह्म ने स्वयं अपने को ही इस जगत् के रूप में परिणत (प्रकट) किया। इस

प्रकार श्रुति में ब्रह्म को ही कर्त्ता और कर्म कहा गया है। अतः ब्रह्म ही इस जगत् का निमित्त और उपादान कारण है। सर्वज्ञ सर्वशक्तिमान् ब्रह्म अपनी शक्तिविक्षेपपूर्वक अपने को जगदाकार रूप में परिणत करता है तथा अविकृत रूप से अवस्थान करता है। यही उसकी सर्वशक्तिमत्ता का परिचय है (ब्र.सू.निम्बार्कभाष्य १।४।२६)। उस पर ब्रह्म ने भलीभाँति विश्व रूप से अपने को प्रकट किया है। इसलिये ब्रह्म को स्वयंकृत कहते हैं। जिसने अपने आपको प्रकाशित किया था वह रसस्वरूप पूर्णानन्द वासुदेव है और जीव उसे प्राप्त होकर ही आनन्दित होते हैं अर्थात् पूर्ण मनोरथ होते हैं। जैसा कि गीताशास्त्र में स्वयं श्रीभगवान् ने कहा है—'यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः'। (६।२२) जिसे प्राप्त करके और अपर लाभ को उससे अधिक नहीं मानता है। वह कृतकृत्य हो जाता है। इस दुर्लभ मनुष्य-जन्म को पाकर अनलस होकर श्रीभगवान् की प्राप्ति के लिये सदैव प्रयत्न करना चाहिये।

को ह्येवान्यात् कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्। एष ह्येवाऽऽनन्दयाति।

तत्त्वप्रकाशिका—लोकचेष्टकत्वायथानुपपत्तिरूपयुक्त्यापि भगवान् वासुदेवः पूर्णानन्द इत्याह—एष आकाशः परमात्मा वासुदेवो यदि पूर्णानन्दो न स्यात् = न भवेत्, को ह्येव लोकेऽन्यात् चेष्टां कुर्यादित्यर्थः। कः प्राण्यात् प्राणनं कुर्यान्न कोऽपि वैदिकीं लौकिकीं वा प्रवृत्तिं कुर्यात्। प्राणिति चानिति च सर्वलोकोऽतस्तत्प्रवर्त्तको भवन् एष भगवान् केवलमुन्मत्तवदानन्दोद्रेकादेवेति वक्तव्यं, कार्यानुगुणत्वाच्च कारणस्य महाप्रवृत्त्या महानन्द एव सिद्ध्यतीत्यर्थः। तथा चैष भगवान् पूर्णानन्दो भवितुमर्हति प्रवृत्तिकारणत्रयरहितत्वे सति प्रवृत्तिमत्त्वात्। उन्मत्तवदित्यनुमानं द्रष्टव्यम्। अमुक्तानां ब्रह्माद्यखिललोकानामानन्दकारणत्वाच्चायं भगवान् पूर्णानन्द इत्याह—एष ह्येवेति। अखिलमिति शेषः। हि = यस्मादेष एव भगवानखिलं ब्रह्माद्यमुक्तजातमानन्दयाति आनन्दयति। छान्दसत्वाद्दीर्घः। अतोऽयं भगवान् वासुदेवः पूर्णानन्द इत्यर्थः। स्वस्यैव तदभावे परस्मै तद्दानुपपत्तेरिति भावः।

सान्वयानुवाद—एषः = यह, आकाशः = आकाश, आनन्दः = आनन्द, न स्यात् = न होता, हि = तो, कः एव = कौन, अन्यात् = लोक में दूसरा, कः प्राण्यात् = कौन चेष्टा कर सकता, एषः = यह पूर्णानन्द परमात्मा वासुदेव, एव = ही, आनन्दयाति = सबको आनन्दित करता है।

व्याख्या—ये आकाश की भाँति व्यापक परमात्मा वासुदेव पूर्णानन्द नहीं होते तो कौन लोक में चेष्टा कर सकता? कौन जीवित रह सकता? कौन श्वास-क्रिया और प्रश्वास-क्रिया कर सकता? परमात्मा की वजह से जीभ हिलती है, साँसें चलती हैं, सभी प्राणी चेष्टाएँ करते हैं। पूर्णानन्द परमात्मा वासुदेव ही समस्त प्राणियों को आनन्द प्रदान करते हैं।

यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति।

तत्त्वप्रकाशिका—यदैवैषोऽधिकारी। अदृश्ये = अज्ञदृष्ट्यगोचरे प्राकृतचक्षुरादि-ग्रहणानर्हे। अनात्म्ये = आत्मन इदम् आत्म्यं जीवसम्बन्ध्यल्पज्ञानाल्पसुखादि तद्रहिते। अनिरुक्ते = अनन्तगुणवत्त्वेन साकल्येन वेदाप्रतिपाद्ये। अनिलयने = न विद्यते अन्यत् निलयनमाश्रयो यस्य सोऽनिलयनस्तस्मिन् अनिलयने निजाश्रयाद् अपराश्रयरहिते एतस्मिन् हरौ तद्विषय इति यावत्। अभयमिति क्रियाविशेषणम्। अभयं यथा भवति तथा अभयत्वेनेति यावत्। प्रतिष्ठां = निरन्तरस्मृतिलक्षणां निष्ठां विन्दते = लभते, अथ तदासौऽअधिकारी अभयं = हरिं, गतः = प्राप्तो भवति, मुक्तो भवतीत्यर्थः।

व्याख्या—मुक्त पुरुष जन्मादि-विकारों से शून्य होते हैं। वे स्वाभाविक अचिन्त्य, अनन्तगुणसागर, सर्वविभूतिसम्पन्न ब्रह्म के स्वरूप में अपने को अनुभव करते हैं। मुक्त पुरुषों की ऐसी ही स्थिति का उपदेश श्रुति ने किया है। यथा–तैत्तिरीय श्रुति ने मुक्तावस्था के सम्बन्ध में कहा है—'यदा ह्येवैष' इत्यादि। जब ये जीव इस अदृश्य, अनन्तगुणसम्पन्न, अवाङ्मनसगोचर और सर्वभूताशयालय परब्रह्मस्वरूप भगवान् श्रीकृष्ण में प्रतिष्ठित होते हैं और इसी कारण ही वे सर्वविध भय से विमुक्त होते हैं एवं उसी समय अभय ब्रह्मरूपत्व को प्राप्त होते हैं। जो पीछे बताया गया है—वह रसस्वरूप है। ये जीव उस रसस्वरूप पूर्ण ब्रह्म पूर्णानन्द श्रीकृष्ण को प्राप्त होकर आनन्दरूपता को प्राप्त करते हैं। यही मोक्षपद है।

यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति। तत्त्वेव भयं विदुषोऽमन्वानस्य। तदप्येष श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्द-वल्ल्यध्याये सप्तमोऽनुवाकः ॥७॥

तत्त्वप्रकाशिका—उक्ताया प्रतिष्ठाया विच्छेदेऽनर्थः सम्पद्यत इत्याह—यदा = यदि, एषः = अधिकारी, एतस्मिन् = परमात्मनि, ध्यानस्यान्तरं उदरमल्पमपि कुरुते तस्य भयमुद्भवति। पूर्वमन्त्रे प्रतिष्ठाशब्दस्यानवरतस्मृतिसन्तानपरत्वमुपपादितम्, अत्राप्यन्तरशब्देन तद्विरोधिनो ध्यानविच्छेदस्य ग्रहणमुचितं भाति। किं भयं तत्राह—तत्त्वेवेति। विदुषो ब्रह्मोपासकस्य। अमन्वानस्य तदतिरिक्तस्पृहया निरन्तरं मननमकुर्वतस्तदेवामननं भयं न हि तदपेक्षयाऽयाऽन्यद्भयमस्ति। उक्तञ्च महर्षिभिः—

'यन्मुहूर्तं क्षणं वाऽपि वासुदेवो न चिन्त्यते।
सा हानिस्तन्महच्छिद्रं सा भ्रान्तिः सा च विक्रिया॥
वरं हुतज्वालापञ्जरान्तर्व्यवस्थितिः।
न शौरिचिन्ताविमुखजनसंवासवैशसम्'॥

इति तदप्येष इति पूर्ववत्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्यायस्य तत्त्वप्रकाशिकाया टीकायां सप्तमोऽनुवाकः ॥७॥

सान्वयानुवाद—यदा हि एषः = अगर यह जीव, एतस्मिन् = इस परमात्मा में, अन्तरम् = ध्यान का विच्छेद, उदरम् = थोड़ा भी, कुरुते = करता है, अथ = तब, तस्य = उसको, भयम् भवति = भय होता है, तत् तु एव = वही, भयम् = भय, अमन्वानस्य = मनन न करनेवाले, विदुषः = विद्वान् को होता है, तदपि = उस सम्बन्ध में भी, एषः श्लोकः भवति = यह मन्त्र है।

मन्त्रार्थः—अगर जीव परमात्मा में थोड़ा-सा भी ध्यान का विच्छेद करता है तो उसको भय उत्पन्न होता है। विद्वान् व्यक्ति के भी अमननशील होने से उसको ब्रह्म से भय रहता है। इस सम्बन्ध में आगे कहा जानेवाला श्लोक है ॥

॥ सप्तम अनुवाक समाप्त ॥७॥

•

भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः।
भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति ॥

तत्त्वप्रकाशिका—भीट्शब्दस्य तृतीयैकवचनं भीषेति। अस्मादिति पञ्चमी षष्ठ्यर्थे। अस्य भगवतो भीषा = भयेन, वातः पवते = तृणादिसम्मार्जनेन भूशुद्धिं करोति। भीषोदेति सूर्यः। अस्मादित्यनुवर्त्तते। उदितो भूत्वा ध्वान्तं विनाश्य पदार्थान् प्रकाशयतीति भाव;। अग्निश्चन्द्रेत्युभौ पचनवर्षणरूपं स्वव्यापारं कुरुत इति शेषः। अस्य भीषा पञ्चमः, पञ्चत्वसङ्ख्यापूरको मृत्युर्यमः प्रजासंयमनादिरूपे स्वव्यापारे धावति। अतीव जागरूकस्तिष्ठतीत्यर्थः। इदमुपलक्षणम्। एवं सर्वे देवा अस्य भीषैव स्वस्वव्यापारान् कुर्वन्तीति ग्राह्यम्। इति श्लोको भवतीति सम्बन्धः ॥

सान्वयानुवाद—अस्मात् भीषा = इसी के भय से, वातः = वायु, पवते = चलती है, भीषा = इसी के भय से, सूर्यः = सूर्यदेव, उदेति = उदय होता है, अस्मात् भीषा = इसी के भय से, अग्निः = आग, च = और, इन्द्रः = इन्द्र, च = और, पञ्चमः = पाँचवाँ, मृत्युः = मृत्यु, धावति = प्राणियों का संहार करती है।

व्याख्या—भीट् शब्द की तृतीया के एकवचन में भीषा रूप बनता है। 'अस्मात्' यहाँ पर षष्ठी अर्थ में पञ्चमी है। इस भगवान् के भय से वायु तृण, पर्ण आदि का सम्मार्जन द्वारा भूशुद्धि करती है। यथासमय सूर्य उदित होकर अन्धकार को दूर कर पदार्थों को प्रकाशित करता है। यह उपलक्षण है। इस प्रकार समस्त देवगण श्रीभगवान् के भय से ही अपने-अपने व्यापारों को करते हैं। इस मन्त्र का अक्षरशः अनुवाद श्रीमद्भागवत में भी है—

'मद्भयाद् वाति वातोऽयं सूर्यस्तपति मद्भयात्।
वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति मद्भयात्' ॥

मेरे भय से वायु चलती है, सूर्य तपता है, इन्द्र जलवृष्टि करता है, अग्नि जलती है और हे मातः! मृत्यु मेरे ही भय से प्राणियों का संहार करती हुई सर्वत्र विचरती है

तथा अतीव जागरूक होकर ठहरती है। इसलिये सर्वदा भगवान् श्रीकृष्ण का मनन व ध्यान करते रहना चाहिये। बस, यही समस्त शास्त्रों का सार है।

सैषाऽऽनन्दस्य मीमाꣳसा भवति। युवा स्यात् साधुयुवाऽध्यापकः। आशिष्ठो द्रढिष्ठो बलिष्ठः। तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः। स एको मनुष्य-गन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं मनुष्यगन्धर्वाणा-मानन्दः। स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवगन्धर्वाणामानन्दाः। स एकः पितृणां चिरलोकलोकानामानन्दः। श्रोत्रियस्य चाकामहतस्य। स एक आजानजानां देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य।

तत्त्वप्रकाशिका—एषा वक्ष्यमाणा आनन्दस्य मीमांसा भवति। आनन्दवैचि-त्र्यविषयको विचारः क्रियमाणो भवति। क्रियत इति यावत्। युवा = षोडशवर्षमारभ्या-ऽऽपलितदर्शनमुपघातमन्तरेण मध्यमं वयो यौवनं तद्वान् अक्षीणेन्द्रियशक्तिः। यौवनेऽपि स्वभावतः शरीरस्येन्द्रियाणां वा वैरूप्यं सम्भावितं रोगादिनिमित्तं वा तन्निवारणार्थमाह—साधु युवा। साधुश्चासौ युवा चेति यूनो विशेषणम्। कन्दर्पसमानरूपः सन् यौवनसम्पन्न इत्यर्थः। तादृशोऽपि मूर्खो मा भूदित्याह—अध्यापकोऽधीतसाङ्गोपाङ्गवेदः। तादृशोऽपि केवलं स्वोदरम्भरिरितिमन्दो वा मा भूत् तद्द्वयं तन्त्रेण वारयति। अशिष्टाऽतिशयेना-ऽऽशास्ताऽतिशयेनाऽऽशुकारी च। द्रढिष्ठो दृढतरो न त्वव्यवस्थितस्वभावः। तादृशो-ऽपि बलहीनः स्यादित्यत आह–बलिष्ठोऽतिशयेन बलसम्पन्नः। एवम्भूतोऽपि वित्तहीनः स्यादित्यत आह–तस्येति। उक्तविशेषणविशिष्टस्य। इयं सप्तद्वीपाब्धिवलया लोक-मेखला। पृथिवी = भूमिः। सर्वा = निखिला। वित्तस्य = वित्तेन। दृष्टादृष्टसुखकरणेन गोहिरण्यादिना पूर्णा = परिपूर्णा, स्यात् = भवेत्। सर्वलक्षणसम्पन्नस्य चक्रवर्त्तिन इत्यर्थः। स सर्वलक्षणसम्पन्नस्य चक्रवर्त्तिनो जायमान आनन्दः। एकः एकत्वसङ्ख्या-क्रान्तः। मानुषो मनुष्येषु भवः। आनन्दो भावरूपः सुखात्मा। नातः परं मनुष्याणां सुखमित्यर्थः। ते परोक्षाः। ये प्रसिद्धाः शतं शतसङ्ख्याका मानुषा आनन्दाः स परोक्षः प्रसिद्धः, एकः एकत्वसङ्ख्याक्रान्तः। मनुष्यगन्धर्वाणां मनुष्याः सन्तो जन्मान्तरे गन्धर्वत्वं प्राप्ता मनुष्यगन्धर्वाः। अन्तरिक्षलोकनिवासिनोऽन्तर्धानादिशक्तिमन्तः तेषाम्। आनन्द अस्माकं चक्रवर्त्तिनां यथोक्तगुणविशिष्टानां शतगुणसुखं मनुष्यगन्धर्वाणां परमं सुखमित्यर्थः। अकामहत श्रोत्रियस्य मुक्तस्यापि स आनन्दोऽस्ति मुक्तस्य सर्वानन्दानु-भवशालितया तत्र मानुषानन्दस्यान्तर्गतत्वादिति भावः। देवगन्धर्वाणां देवाश्च ते गन्ध-र्वाश्च देवगन्धर्वास्तेषामानन्दाः, स एकः आनन्दः पितृणाम्। पितृविशेषणं चिरलोक-लोकानामिति। चिराद् दीर्घस्थायिनो लोकाः कर्मविशेषास्ते येषां लोकास्तत्स्थानानि च चिरलोकास्तेषामनेककालस्थायिनामित्यर्थः। आजानानाम्—कल्पादावुत्पन्नानामाजाने देवलोके जाता आजानजास्तेषां विशेषणमिदम्। विशेष्यमाह—देवानामिति। द्योत-नात्मकानामित्यर्थः।

व्याख्या—यह कही जानेवाली ब्रह्मानन्द की मीमांसा (विचार) की जा रही है। यदि एक वेदशास्त्रज्ञ, साधुप्रकृतिक, शुभलक्षणसम्पन्न दृढकाय युवा-पुरुष धन-रत्नसम्पन्न समस्त पृथ्वी का अधिकारी हो तो उसके आनन्द को एक गुणा आनन्द मान लेने से इसका शतगुण आनन्द एक मनुष्य-गन्धर्व का आनन्द है। मनुष्यगन्धर्व का शतगुण आनन्द एक देवगन्धर्व का आनन्द है। इसका शतगुण आनन्द पितृलोक है, इसका शतगुण आनन्द 'आजानज' देवताओं का, इसका शतगुण आनन्द कर्म-देवताओं का, इसका शतगुण आनन्द इन्द्र का, इसका शतगुण आनन्द बृहस्पति का, इसका शतगुण आनन्द प्रजापति का और इसका शतगुण आनन्द ब्रह्म का है। अकामहत श्रोत्रिय मुक्त का भी वही आनन्द है।

ते ये शतमाजानजानां देवानामानन्दाः। स एकः कर्मदेवानां देवानामा-नन्दः। ये कर्मणा देवानपियन्ति। श्रोत्रियस्य चाकामहतस्य। ते ये शतं कर्मदेवानां देवानामानन्दाः। स एको देवानामानन्दः। श्रोत्रियस्य चाकामह-तस्य। ते ये शतं देवानामानन्दाः। स एक इन्द्रस्यानन्दः। श्रोत्रियस्य चाका-महतस्य। ते ये शतमिन्द्रस्यानन्दाः। स एको बृहस्पतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं बृहस्पतेरानन्दाः। स एकः प्रजापतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य।

तत्त्वप्रकाशिका—देवानाम्। इदं श्रुतिरेव व्याकरिष्यति। पूर्ववद् विशेषणमुक्त्वा विशेष्यमाह—देवानामाजानेभ्य उत्कृष्टानां द्योतनात्मकानाम्। कर्मदेवानामित्येतद्व्या-करोति। ये प्रसिद्धा याज्ञिकाः कर्मणाग्निहोत्राद्यश्वमेधान्तेन। देवान् = द्योतनात्मकान्, अपियन्ति = प्राप्नुवन्ति। देवत्वमुपगता इत्यर्थः। देवानाम्–त्रयस्त्रिंशत्सङ्ख्याकानां हविर्भुजामग्न्यादीनाम्। इन्द्रस्य त्रिलोकीपतेः। ते शक्रस्य। बृहस्पतेर्देवगुरोः। प्रजापति-र्चतुर्मुखः, न तु दक्षादयः; एकवचनश्रवणात्। अत्र ब्रह्मशब्दो ब्रह्मविदाप्नोति परमिति। प्रकृतब्रह्मपरः। न च ब्रह्मानन्दस्य ते ये शतमिति परिच्छिन्नत्वं कथमिति शङ्क्यम्। क्षणार्धेन बहूनि योजनानि गच्छति खाविषुवद् गच्छति सवितेषु साम्यप्रतिपादकवचनस्य हि मान्द्यनिवृत्तिपरत्ववत्ते ये शतमिति वाक्यस्यापि चतुर्मुखानन्दाधिक्यमात्रपरत्वेन शत-गुणितचतुर्मुखानन्दात्न्यूनाधिकपरत्वाभावात्।

व्याख्या—आजानज देवताओं के जो सौ आनन्द हैं वही कर्मदेव देवताओं का है, जो कि अग्निहोत्रादि कर्म करके देवत्व को प्राप्त होते हैं, एक आनन्द है और वह अकामहत श्रोत्रिय को भी प्राप्त है। कर्मदेव देवताओं के जो सौ आनन्द हैं वही देवताओं का एक आनन्द है और वह अकामहत श्रोत्रिय को भी प्राप्त है। देवताओं के जो सौ आनन्द हैं वही इन्द्र का एक आनन्द है तथा वह अकामहत श्रोत्रिय को भी प्राप्त है। इन्द्र के जो सौ आनन्द हैं वही बृहस्पति का एक आनन्द है और वह अकामहत श्रोत्रिय को भी प्राप्त है। बृहस्पति के जो सौ आनन्द हैं वही प्रजापति का एक आनन्द

है और वह अकामहत श्रोत्रिय को भी प्राप्त है। प्रजापति के जो सौ आनन्द हैं वही ब्रह्मा का एक आनन्द है और वह अकामहत श्रोत्रिय को भी प्राप्त है।

स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः। स य एवंवित्। आत्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसंक्रामति। एतं प्राणमयमात्मानमुपसंक्रामति। एतं मनोमयमात्मानमुपसंक्रामति। एवं विज्ञानमयमात्मानमुपसंक्रामति। एतमानन्दमयमात्मानमुपसंक्रामति। तदप्येष श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्यायेऽष्टमोऽनुवाकः ॥८॥

तत्त्वप्रकाशिका—एवम्भूतानन्दमयो यो वेद निहितं गुहायामिति हृदयगुहानिहितत्वेनोपास्यमानः कीदृशो विग्रहविशेषविशिष्टः, को वा देवताविशेष इति जिज्ञासायामाह—चशब्दौ परस्परसमुच्चयार्थौ। स प्रसिद्धो योऽयं पुरुषे तदुपलक्षितापकृष्टजीवेषु नियामकतया तिष्ठति, यश्चासावादित्ये तदुपलक्षितोत्कृष्टजीवेषु देवेषु नियामकतया तिष्ठति। स ब्रह्मादीनां स्वरूपानन्दाविर्भावाप्तिदाता कमनीयविग्रहयुक्तो पुण्डरीकाक्षो भगवान् वासुदेव एक एव, न तयोः परस्परं भेदो मन्तव्यः। ततश्च तादृशविग्रहवत्त्वेन हृदयगुहावर्त्तिनो भगवतो वासुदेवस्य ध्यानं कर्त्तव्यम्। एवं प्राप्यस्य प्राप्यत्वोपयुक्तमुताविद्वानमुं लोकमित्यादिनोपक्षिप्तानां प्रश्नानामुत्तरमाह–स एवं विदित्यादिना। य एवमुक्तप्रकारेण श्रीभगवन्माहात्म्यवेत्ता उपासकः, स भोगेन प्रारब्धं क्षपयित्वाऽनन्तरमस्माल्लोकात् चरमत्वेन प्रसिद्धाल्लोकाच्छरीरात्प्रेत्य हृदयाग्रप्रज्वलनप्रकाशितनाडीद्वारा देहान्निष्क्रम्य अर्चिरादिद्वारा आनन्दमयमात्मानमुपसंक्रामति = गच्छति। एतमन्नमयमन्नमयशरीरकमात्मानं परमात्मानमुप तत्समीपं संक्रामति = गच्छति। एतं प्राणमयं प्राणमयशरीरकपरमात्मानमुपसंक्रामति। एतमुत्तरत्रापि योज्यम्। अत्र श्रीबादरायणाचार्यैः सर्वोऽपि विद्वानस्माल्लोकात्प्रेत्यान्नमयादिसमष्टिव्यष्टिविभूतिकं निरतिशयानन्दं परमात्मानं भोग्यभूतं भोक्तासन्ननुभवतीति प्रश्नस्योत्तरमुक्तं भवति। एवमानन्दमयं भगवन्तं प्राप्य संसारभयरहितः सन् इति शेषः। अत्राथ सम्मतितया श्लोकमुदाहरति–तदपीति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्यायस्य तत्त्वप्रकाशिकायां टीकायाम् अष्टमोऽनुवाकः ॥८॥

व्याख्या—श्रुति में दो च शब्द परस्पर समुच्चय अर्थ है। वह प्रसिद्ध जो यह पुरुष में अर्थात् पुरुष-उपलक्षित अपकृष्ट जीवों में नियामक रूप से रहता है, वही आदित्य में अर्थात् आदित्य-उपलक्षित उत्कृष्ट जीव देवों में नियामक रूप से रहता है। वही ब्रह्मादि के स्वरूप-आनन्द-आविर्भावाप्तिदाता कमनीय विग्रहयुक्त पुण्डरीकाक्ष भगवान् श्रीवासुदेव एक ही है; उनमें परस्पर भेद नहीं समझना चाहिये। इसके बाद वैसे ही विग्रह युक्त सबों के हृदयगुफा में रहनेवाले भगवान् श्रीकृष्ण का निरन्तर ध्यान करना चाहिये। जो इस प्रकार से श्रीभगवान् का माहात्म्य जाननेवाला वह उपासक भोग से प्रारब्ध कर्म का समूल नाश करके अनन्तर इस अन्तिम शरीर से मरकर हृदयाग्र

प्रज्वलन प्रकाशित नाडी द्वारा शरीर से निकल कर अर्चिरादि द्वारा इस अन्नमय अर्थात् अन्नमय शरीरक आत्मा (परमात्मा) के समीप शीघ्र पहुँच जाता है, उसे प्राप्त हो जाता है। इस प्रकार प्राणमय, मनोमय, विज्ञानमय और आनन्दमय परमात्मा की सन्निधि में शीघ्र ही पहुँच जाता है। ऐसा अर्थ भी जोड़ना चाहिये। महर्षि बादरायण जी ने इस प्रश्न का उत्तर बताया है—विद्वान् पुरुष इस लोक से विदा लेकर अन्नमयादि समष्टि-व्यष्टि सविभूतिक निरतिशयानन्द परमात्मा का सेवन करते हुए भोक्ता होकर अनुभव करता है। इस प्रकार आनन्दमय परमात्मा को प्राप्त करके संसार के भय से रहित हो जाता है। इस सम्बन्ध में भी सम्मति रूप से मन्त्र उद्धृत किया जाता है।

॥ अष्टम अनुवाक समाप्त ॥८॥

•

यतो वाचो निवर्त्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति। एतँ्ह वाव न तपति। किमहꣳ साधु नाकरवम्। किमहं पापमकरवमिति। स य एवं विद्वानेते आत्मानꣳ स्पृणुते। उभे ह्येवैष एते आत्मानꣳ स्पृणुते। य एवं वेद। इत्युपनिषत्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्द-
वल्ल्यध्याये नवमोऽनुवाकः ॥९॥

तत्त्वप्रकाशिका—वाङ्मनसे आनन्दस्येयत्तालक्षणं पारं गन्तुं प्रवृत्ते यतः = यस्मात् मनसा सह वाचः अप्राप्य निवर्त्तन्ते। आनन्त्यादिति शेषः। एतादृशं ब्रह्मणः आनन्दरूपिणमानन्दमयवासुदेवाख्यं परं ब्रह्म। विद्वान् तद्विषयकापरोक्षज्ञानद्वारा तं प्राप्त इति यावत्। कुतश्चन = कुतोऽपि, न बिभेति = संसारभयवान्न भवतीत्यर्थः। इति श्लोको भवतीति सम्बन्धः। श्लोकोक्तं भयाभयं विवृणोति—एतꣳ ह वावेति। अहं किं किमर्थं साधुकर्म नाकार्षं किमर्थं पापमकरवं येनैतादृशं पापफलं भुञ्जे इत्येवं रूपं पश्चात्तापजनितं भयं एतं मुक्तं न तपति = न सन्तापयति, इत्येतत् ह वाव अति-प्रसिद्धमित्यर्थः। संसारे प्रसिद्धमेतादृशभयं मुक्तस्य नास्तीति भावः। एतादृशं ब्रह्मविद्या-प्रयुक्तमाहात्म्यमपि ध्येयमित्याह-स य एवमिति। एते एताभ्यां पुण्यपापाभ्यामात्मानं स्पृणुते = रक्षतीत्यर्थः। पुण्यपापफलानुभवो नास्तीत्युक्तं भवति। पुनर्वचनं पुण्यपाप-विधूननध्यानसातत्यतात्पर्यद्योतनाय। एवं वरुणं प्रत्युपदिश्योपसंहरति ब्रह्मा। इत्युप-निषदिति रहस्यभूता ब्रह्मविद्या त्वां प्रति मयोपदिष्टेति शेषः।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यध्यायस्य
तत्त्वप्रकाशिकायां टीकायां नवमोऽनुवाकः ॥९॥

॥ इति ब्रह्मानन्दवल्ली समाप्ता ॥

सान्वयानुवाद—मनसा सह = मन के साथ, वाचः = वाणी, यतः = जहाँ से, अप्राप्य = उसे न पाकर, निवर्त्तन्ते = लौट आती हैं, (तस्य) ब्रह्मणः = उस ब्रह्म के,

आनन्दम् = आनन्द को, विद्वान् = जानकर, कुतश्चन = किसी से, न बिभेति = डरता नहीं, इति ह वाव = यह अतिप्रसिद्ध ही है, एतम् = इस मुक्त को, न तपति = तपता नहीं है, इति ह वाव = यह अतिप्रसिद्ध ही है, एतम् = इस मुक्त को, न तपति = तपता नहीं है, अहम् = मैंने, किम् = क्या, साधु = अच्छे कर्म, न = नहीं, अकरवम् = किया, किम् = क्या, अहम् = मैंने, पापम् अकरवम् = पाप किया है, इति = इस प्रकार, यः = जो, विद्वान् = सुधी (है), सः = वह, आत्मानम् स्पृणुते = अपनी रक्षा करता है, हि = निश्चय ही, यः = जो, एते = इन पुण्य और पाप, उभे एव = दोनों को ही, एवम् = इस प्रकार, वेद = जानता है, एषः = वही यह विद्वान्, आत्मानम् स्पृणुते = आत्मा (अपनी) रक्षा करता है, इति-उपनिषद् = इस प्रकार रहस्यभूत उपनिषद् ब्रह्मविद्या कही गयी है।

व्याख्या—मन के सहित वाक्य जिसको न पाकर जहाँ से निवर्त्तित होते हैं, जिसने उस ब्रह्म के आनन्द को जान लिया है, संसार में उसको किसी से भय नहीं रहता। मन्त्र में बताया गया भयाभय का विवरण करते हैं—मैंने क्यों और किसलिए सत्कर्म नहीं किया अथवा क्यों किसलिये मैंने पापकर्म किया, जिससे इस तरह मैं पाप का फल भोग रहा हूँ। इस प्रकार का पश्चात्ताप-जनित भय मुक्त पुरुष को नहीं सताता है अर्थात् उसके हृदय में सन्ताप उत्पन्न नहीं करता है। विवेकी पुरुष हमेशा पुण्य और पाप इन दोनों प्रकार के कर्मों से आत्मा की रक्षा करते हैं। क्योंकि वे पुण्य और पाप को धुल कर ही ब्रह्म की समता को प्राप्त होते हैं और वे भगीरथखातावच्छिन्न जलप्रवाह के समान श्रीभगवान् का ध्यान करते रहते हैं एवं राग-द्वेषादि से सदा विमुक्त रहते हैं। इस मन्त्र में पुनर्वचन पाप-पुण्य, विधूनन, ध्यान-सातत्य-तात्पर्य द्योतन के लिए अक्षरशः दुहराया गया है।

॥ नवम अनुवांक समाप्त ॥९॥

॥ ब्रह्मानन्दवल्ली समाप्त ॥२॥

•

अथ भृगुवल्ली ॥३॥

अथ प्रथमोऽनुवाकः

भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तस्मा एतत्प्रोवाच। अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति। तꣳ होवाच।

तत्त्वप्रकाशिका—आनन्दमयस्य ब्रह्मण उपास्तिं ब्रह्मवल्ल्यध्याये उक्त्वा तत्रैव समाख्यातत्वेन भृगुवरुणसंवादरूपामाख्यायिकामाह—वरुणस्यापत्यं पुमान् वारुणि-भृगुः। वैशब्देन भृगोर्वरुणपुत्रत्वं प्रसिद्धमित्याचष्टे। पितरं वरुणमुपससार समीपं गत-वान्। किं वदन् उपससारेत्यत आह—अधीहीति। हे भगवः! 'मतो वसो रु सम्बुद्धौ

छन्दसि'। हे भगवन्! = पूज्य! ब्रह्म = परं ब्रह्म, अधीहि = अध्यापय। णिजर्थस्यान्तर्णीतत्वात्। एवं पृष्टो वरुणस्तस्मै भगवे एतत् ब्रह्म प्रोवाच = उपदिष्टवान्। तदेव दर्शयति—अन्नमित्यादिना। अत्तृत्वादन्नं प्राणं प्रकृष्टचेष्टाकत्वात्। चष्ट इति चक्षुः, श्रवणात् श्रोत्रं, मन्तृत्वात्। मनः, वक्तृत्वाद् वाक् विवेचनात्। विज्ञानं ब्रह्मेत्यादिकं तन्मनः-शोधनायोपदिश्य किं सर्वाणि उतैकं तत्रापि वस्तुसिद्धेर्लक्षणाधीनत्वात् व्याकुलचेतसं पुत्रं प्रति ब्रह्मलक्षणमुवाच॥

शब्दार्थ—वै = यह प्रसिद्ध है, वारुणिः = वरुण का पुत्र, भृगुः = भृगु, पितरम् = अपने पिता, वरुणम् उपससार = वरुण के समीप गया, भगवः = हे भगवन्! ब्रह्म अधीहि = मुझे ब्रह्मविद्या पढ़ाइये, इति = इस प्रकार कहने पर, तस्मै = उससे, एतत् = यह, प्रोवाच = कहा, अन्नम् = अन्न, प्राणम् = प्राण, चक्षुः = नेत्र, श्रोत्रम् = श्रोत्र (कान), मनः = मन, वाचम् = वाणी, इति = इस प्रकार, तम् ह उवाच = उससे स्पष्ट कहा।

व्याख्या—आनन्दमय ब्रह्म की उपासना ब्रह्मवल्ली अध्याय में कही गयी है, वही समाख्यात रूप से भृगु-वरुण संवादरूपा आख्यायिका को श्रुति बताती है—वरुणपुत्र भृगु अपने पिता वरुण के समीप गये, जाकर वे अपने पिता से बोले—हे भगवन्! मुझे ब्रह्म का उपदेश कीजिये, उन्होंने इस प्रकार पूछा। वरुण ने जिज्ञासु भृगु को ब्रह्म का उपदेश किया—अन्न, प्राण, चक्षु, श्रोत्र, मन और वाणी यह सब ब्रह्म हैं। इस प्रकार वे अपने पुत्र से बोले। अब ब्रह्म का स्वरूप बताते हैं—

यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति।
यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति।

तत्त्वप्रकाशिका—जीवन्ति = चेष्टन्ते। यत् प्रयन्ति = प्रलये। अभि स्वेच्छया संविशन्ति मुक्तौ। तद् ब्रह्म इति ज्ञात्वा तद् ब्रह्म विजिज्ञासस्व = जिज्ञासां कुर्वित्यर्थः। इति पितुर्वचनसमाप्तौ।

शब्दार्थ—यतः = जिससे, वै = निश्चयार्थ, इमानि भूतानि = ये भूत-जड़-चेतन, जायन्ते = उत्पन्न होते हैं, जातानि = उत्पन्न होकर, येन = जिसके द्वारा, जीवन्ति = जीवित रहते हैं, प्रयन्ति = प्रयाण करते हैं, यत् अभिसंविशन्ति = जिसमें अभिसंवेशन करते हैं, तत् = उसको, विजिज्ञासस्व = विशेष जानने की इच्छा कर, तत् = वही, ब्रह्म इति = ब्रह्म है।

व्याख्या—जिससे यह दृश्यमान जड़-चेतन समस्त विश्व उत्पन्न होते हैं अर्थात् तृण से लेकर महदादि भूत-प्राणी उत्पन्न होते हैं, उत्पन्न होकर जिससे वे जीवित रहते हैं, समस्त कर्मों के बन्धनध्वंसानन्तर जिसे प्राप्त होते हैं और प्रलय-काल में जिसमें लीन होते हैं वह ब्रह्म है; ऐसा जानकर तुम उसे विशेष रूप से जानने की इच्छा कर। इस प्रकार अपने पिता वरुण के वचन की समाप्ति है।

स तपोऽतप्यत। स तपस्तप्त्वा।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये प्रथमोऽनुवाकः ॥१॥

तत्त्वप्रकाशिका—स श्रुतपितृवाक्यो भृगुः तपःपर्यालोचनम् अन्नादिषूक्तेषु ब्रह्मलक्षणाक्रान्तं कतमदित्येवं रूपम्। अतप्यत = कृतवान्। अथवा तपः इन्द्रियनिग्रहलक्षणम्। अस्मिन् पक्षे तपसा शुद्धान्तःकरणस्य मनस इन्द्रियाणां चैकाग्र्यं जायत इति व्याख्येयम्। स तापसो भृगुः तप उक्तरूपं तप्त्वा = सम्पाद्य।

इति कृष्णयजुर्वेदीय-तैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये तत्त्वप्रकाशिकायां प्रथमोऽनुवाकः ॥१॥

व्याख्या—भृगु ने अपने पिता के वाक्यों को सुनकर ध्यानमग्न होकर कहे गये अन्नादि में पर्यालोचन किया अर्थात् जान लिया।

॥ प्रथम अनुवाक समाप्त ॥१॥

•

अथ द्वितीयोऽनुवाकः

अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति।

तत्त्वप्रकाशिका—ब्रह्मलक्षणाक्रान्तमन्नं ब्रह्मशब्दाभिधेयमित्यनेन प्रकारेण व्यजानात् = विशेषेणावगतवान्। तद्विज्ञानप्रकारमाह श्रुतिः। अन्नादुक्तात् हि यस्मात्। एवान्नादेव न त्वन्यस्मात्। खलु निश्चितम्। इमानि भूतानि जायन्ते। अन्नेन जातानीत्यादिकं पूर्ववत्। इत्यनेन प्रकारेण तदन्नं ब्रह्मरूपं विज्ञाय = अवगत्य, प्रत्यक्षेणोपपत्यान्नस्य नाशमवलोक्यान्नस्य ब्रह्मत्वं कथमिति सन्दिहानो भृगुः पुनर्भूय एव वरुणं पितरमुपससार। अधीहीत्यादिकं पूर्ववत्।

व्याख्या—अन्न ब्रह्म है—इस प्रकार जाना। क्योंकि निश्चय अन्न से ही ये सब प्राणी उत्पन्न होते हैं। उत्पन्न होने पर अन्न से ही जीवित रहते हैं। प्रयाण करते समय अन्न में ही लीन होते हैं। ऐसा जानकर वह फिर अपने पिता वरुण के पास आया (और कहा—) "भगवन्! मुझे ब्रह्म का उपदेश कीजिए"।

तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये द्वितीयोऽनुवाकः ॥२॥

तत्त्वप्रकाशिका—वरुणस्तं भृगुं प्रति उवाच। तपसा = इन्द्रियनिग्रहलक्षणे ब्रह्मविद्योपायभूतेन ब्रह्म विजिज्ञासस्वेत्युक्तवान्। स तपोऽतप्यत स तपस्तप्त्वा। इ पूर्ववत्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये तत्त्व-प्रकाशिकायां टीकायां द्वितीयोऽनुवाकः ॥२॥

व्याख्या—पीछे 'ब्रह्मानन्द वल्ली' नामक दूसरी वल्ली में जो सारी बातें कह गयी हैं, इस 'भृगुवल्ली' नामक तीसरी वल्ली में आख्यायिका द्वारा द्वितीय वल्ली के उपदिष्ट विषयों को पुनः स्पष्ट किया गया है। भृगु ने ध्यानमग्न होकर समाधि द्वारा जान लिया कि ब्रह्म 'अन्नरूप' है। अन्न से ही ये सब प्राणी उत्पन्न होते हैं, अन्न से ही जीते रहते हैं एवं अन्न में ही लीन होते हैं। इस प्रकार 'वह अन्न ब्रह्मरूप है' यह जानकर प्रत्यक्ष उपपत्ति से अन्न के नाश का अवलोकन कर अन्न में ब्रह्मत्व कैसे? ऐसे सन्दिहान भृगु फिर से ही अपने पिता वरुण के पास गये। वरुण ने उसके प्रति कहा—तपस्या द्वारा ब्रह्म को विशेष रूप से जानो। उन्होंने तप किया, ब्रह्म का ध्यान किया तब भृगु ने फिर ध्यान में मग्न होकर समाधि द्वारा समझा कि—

॥ द्वितीय अनुवाक समाप्त ॥२॥

•

अथ तृतीयोऽनुवाकः

प्राणो ब्रह्मेति व्यजानात्। प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते। प्राणेन जातानि जीवन्ति। प्राणं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्य-ध्याये तृतीयोऽनुवाकः ॥३॥

व्याख्या—प्राण ब्रह्म है, इस प्रकार विशेष रूप से जाना। क्योंकि निश्चय ही ये सब प्राणी प्राण से ही उत्पन्न होते हैं। वे उत्पन्न होकर प्राण के द्वारा ही जीवित रहते हैं। प्रयाण करते समय प्राण में ही लीन होते हैं। इस प्रकार से उस प्राणब्रह्म को जानकर वरुणपुत्र भृगु फिर अपने पिता वरुण के पास गया। उन्होंने कहा—मुझे ब्रह्म का उपदेश कीजिए। वरुण ने भृगु से कहा—तप से ब्रह्म को जानो। तप ब्रह्म है। उसने तप किया। उन्होंने तप करके जाना।

॥ तृतीय अनुवाक समाप्त ॥२॥

•

अथ चतुर्थोऽनुवाकः

मनो ब्रह्मेति व्यजानात्। मनसो ह्येव खल्विमानि भूतानि जायन्ते। मनसा जातानि जीवन्ति। मनः प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्य-
ध्याये चतुर्थोऽनुवाकः ॥४॥

व्याख्या—मन ब्रह्म है, इस प्रकार विशेष रूप से जाना। क्योंकि निश्चय ही ये सब प्राणी मन से ही उत्पन्न होते हैं। वे उत्पन्न होकर मन के द्वारा ही जीवित रहते हैं। प्रयाण करते समय मन में ही लीन होते हैं। इस प्रकार से उस मनब्रह्म को जानकर वरुणपुत्र भृगु फिर अपने पिता वरुण के पास गया। उन्होंने कहा—तप से ब्रह्म को जानो। तप ब्रह्म है। उसने तप किया। उन्होंने तप करके जान लिया।

॥ चतुर्थ अनुवाक समाप्त ॥२॥

•

अथ पञ्चमोऽनुवाकः

विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्य-
ध्याये पञ्चमोऽनुवाकः ॥५॥

व्याख्या—विज्ञान ब्रह्म है, इस प्रकार विशेष रूप से जाना। क्योंकि निश्चय ही ये सब प्राणी विज्ञान से ही उत्पन्न होते हैं। वे उत्पन्न होकर विज्ञान के द्वारा ही जीवित रहते हैं। प्रयाण करते समय विज्ञान में ही लीन होते हैं। इस प्रकार से उस विज्ञानब्रह्म को जानकर वरुणपुत्र भृगु फिर अपने पिता वरुण के पास गया। उन्होंने कहा—मुझे ब्रह्म का उपदेश कीजिए। वरुण ने भृगु से कहा—तप से ब्रह्म को जानो। तप ब्रह्म है। उसने तप किया। उन्होंने तप करके जाना लिया।

॥ पञ्चम अनुवाक समाप्त ॥२॥

•

अथ षष्ठोऽनुवाकः

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति।

तत्त्वप्रकाशिका—यथाऽन्नस्य विनाशित्वं दोषो ब्रह्मत्वे तथाऽचेतनत्वं प्राणस्य। अनिश्चयात्मकत्वं मनसः। सुखदुःखभोक्तृत्वं विज्ञानस्य = प्रत्यगात्मनो दोषः। आनन्दमयस्य ब्रह्मशब्दाभिधेयत्वं ततोऽस्य दर्शनानन्तरं पितरं प्रतिगमनाभावः। प्राणमनोमयविज्ञानानन्दपर्य्यायश्चत्वारोऽपि समानपाठा अन्नपर्य्यायवद् व्याख्येयाः। इदानीमाख्यायिकासिद्धमर्थं श्रुतिराह विद्यास्तुतये।

व्याख्या—ब्रह्म प्राणरूप है। समस्त प्राणी प्राण से उत्पन्न होते हैं, प्राण के द्वारा जीवित रहते हैं एवं प्राण में ही लीन होते हैं तथा मरने के बाद सब प्राण में ही प्रविष्ट हो जाते हैं। उन्होंने अपने पिता के आदेशानुसार पुनः ध्यानमग्न होकर जाना कि मन ही ब्रह्म है, अनन्तर समझा कि विज्ञान ही ब्रह्म है एवं सब के अन्त में उन्होंने समझा कि ब्रह्म आनन्दरूप है। आनन्द से ही समस्त जीव उत्पन्न होते हैं, उसी से जीवित रहते हैं, उसी में लीन होते हैं इत्यादि। उपर्युक्त इन दोनों वल्लियों में अनेक स्थानों पर ब्रह्म को ही आनन्दरूप कहा गया है। इन दोनों वल्लियों के उपदेशों का ऐक्य करके निविष्ट चित्त से विचारने से यही निश्चय होता है कि ब्रह्मानन्द वल्ली में वर्णित—अन्नमय आत्मा, प्राणमय आत्मा, मनोमय आत्मा, विज्ञानमय आत्मा एवं आनन्दमय आत्मा क्रम से भृगुवल्ली में उपदिष्ट अन्नब्रह्म, प्राणब्रह्म, मनोब्रह्म, विज्ञानब्रह्म और आनन्दब्रह्म हैं। परन्तु भृगुवल्ली में वर्णित आनन्दब्रह्म परब्रह्म है, जीव नहीं, इसमें कोई सन्देह नहीं है। भाष्यकार की भी यही सम्मति है—'आनन्दमयः परमात्मैव न तु जीवः'। (ब्र.सू.नि.भा. १।१।१३) ब्रह्म स्वरूपतः आनन्दमय है, वही परब्रह्म है। ब्रह्म असीम आनन्द का स्थान है, उसमें किसी प्रकार के दुःख का सम्पर्क नहीं है। वह आनन्दस्वरूप है, यही आनन्दमय शब्द का अर्थ है। 'आनन्दं ब्रह्मेति व्यजानात्। आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन। एष ह्येवानन्दयति'। इत्यादि शास्त्रवाक्यों द्वारा ब्रह्म जाना जाता है। ब्रह्म ही जीवों के आनन्द का हेतु है। इसलिये परमात्मा ही आनन्दमय शब्द का अर्थ है। वेदों के द्वारा जिसका आनन्द शब्द से गान किया गया है वह ब्रह्म आनन्द रूप है।

(तृतीय, चतुर्थ, पञ्चम और षष्ठ अनुवाक का स्वाभाविक सार अर्थ ही बताया गया है।)

सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता।

तत्त्वप्रकाशिका—एषा इदानीमुक्ता। भार्गवी = भृगुणावगता। वारुणी = वरुणेन प्रोक्ता। विद्या = ब्रह्मविद्या। परमे = उत्कृष्टे। व्योमन् = व्योमनि। परमात्मनि प्रतिष्ठिता = अवस्थानं प्राप्ता, आनन्दमये ब्रह्मणि पर्यवसिता।

भावार्थ—वही ब्रह्मविद्या इस समय कही गयी है, जो वरुण ने अपने पुत्र भृगु को उपदेश की और भृगु को प्राप्त हुई। यह भार्गवी वारुणी ब्रह्मविद्या परम व्योम परमात्मा में प्रतिष्ठित है अर्थात् अवस्थान को प्राप्त हुई आनन्दमय ब्रह्म में पर्यवसित है।

य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति। प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्या।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये षष्ठोऽनुवाकः ॥६॥

तत्त्वप्रकाशिका—योऽधिकारी एवमन्नप्राणमनोविज्ञानेभ्योऽन्य आनन्दमयः परमात्मेति वेद = जानाति। स मुक्तो भूत्वा तस्मिन् ब्रह्मण्येव प्रतितिष्ठति। अन्नवान् = अन्नसम्पन्नः। अन्नादः = अन्नभक्षको नीरोगो महानधिकः, प्रजया = पुत्रादिसन्तत्या। पशुभिः = गवादिभिः, ब्रह्मवर्चसेन = वेदाध्ययनजाततेजसा न केवलमेवं किन्तु महानधिकः। कथं कीर्त्या यशसा प्रथमः। महच्छब्दस्तस्मिन्विद्याधिक्यमाह। द्वितीयस्तु प्रजादीनां कीर्त्यन्तानाम्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये तत्त्वप्रकाशिकायां टीकायां षष्ठोऽनुवाकः ॥६॥

सान्वयानुवाद—यः = जो, एवम् = इस प्रकार, वेद = जानता है, सः = वह, प्रतितिष्ठति = प्रतिष्ठित हो जाता है, अन्नवान् = अन्नवाला, अन्नादः = अन्न को खानेवाला, भवति = होता है, पशुभिः = पशुओं से, ब्रह्मवर्चसेन = ब्रह्मबल से, कीर्त्या = कीर्त्ति से, प्रजया = प्रजा से, महान् भवति = बड़ा होता है।

व्याख्या—जो विद्वान् इस प्रकार अन्न, प्राण, मन और विज्ञानमय से भिन्न आनन्दमय परमात्मा है–ऐसा जानते हैं वे पुरुष मुक्त होकर उसी आनन्दमय ब्रह्म में ही प्रतिष्ठित हो जाते हैं तथा अन्नसम्पन्न, अन्नभक्षक, नीरोग, पुत्रादि सन्तति से, गौ आदि से, वेद-शास्त्रजनित तेज से वे बड़े होते हैं। कीर्त्ति से वे जीवित रहते हैं। इस संसार में जिसकी कीर्त्ति है वह पुरुष मरने पर भी जीवित रहता है। ऐसा कहा गया है—'कीर्त्तिर्यस्य स जीवति'।

षष्ठ अनुवाक समाप्त ॥६॥

•

अथ सप्तमोऽनुवाकः

अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये सप्तमोऽनुवाकः ॥७॥

तत्त्वप्रकाशिका—एतद्विद्याङ्गव्रतमाह—अन्नमित्यादिना। अन्नस्य = अदनी-

यस्य, निन्दां न कुर्यात्। तदन्नानिन्दनं व्रतं = व्रतधारणम्। प्राणेऽन्नम्। प्राणेऽन्नत्वदृष्टि कार्या। शरीरेऽन्नादत्वदृष्टिर्विधेया। प्राणे पञ्चवृत्तौ शरीरं प्रतिष्ठितं तदधीनस्थितित्वेन प्रतिष्ठां प्राप्तम्। इदानीं वैपरीत्यमाह—शरीरे प्राण इति। एवं वेत्तुः फलमाह—स य इति। तस्य व्याख्यानं पूर्ववत्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये तत्त्व-प्रकाशिकायां टीकायां सप्तमोऽनुवाकः ॥६॥

शब्दार्थ—अन्नं न निन्द्यात् = अन्न की निन्दा न करे, तद्व्रतम् = वह व्रत है, प्राणः वै अन्नम् = प्राण ही अन्न है, शरीरम् अन्नादम् = शरीर अन्न का भक्षक है, शरीरं प्राणे प्रतिष्ठितम् = शरीर प्राण में प्रतिष्ठित है, शरीरे = शरीर में, प्राणः प्रतिष्ठितः = प्राण प्रतिष्ठित है, तत् = वह, एतत् = यह, अन्ने = अन्न में, अन्नं प्रतिष्ठितम् = अन्न प्रतिष्ठित है, वेद = जानता है, यः = जो, प्रतितिष्ठति = प्रतिष्ठित है, सः = वह, अन्नवान् = अन्नवाला, अन्नादः = अन्न को खानेवाला, भवति = होता है, प्रजया = प्रजा से, पशुभिः = पशुओं से, ब्रह्मवर्चसेन = ब्रह्मबल से, महान् भवति = महान् होता है, कीर्त्या = यश से महान् होता है।

व्याख्या—प्राणियों का प्राण (जीवन) अन्न है, इसलिये अदनीय अन्न की निन्दा न करे। व्रतधारण करे कि मैं अन्न की निन्दा नहीं करूँगा। अन्न ही प्राण है और प्राण ही अन्न है। प्राण में अन्नत्व दृष्टि करनी चाहिये और शरीर में अन्नादत्व दृष्टि करनी चाहिये। पञ्च वृत्ति में शरीर प्रतिष्ठित है, उसके अधीन स्थिति रूप से प्रतिष्ठा को प्राप्त किया है। इस प्रकार अन्न को जानने वाले का फल बताते हैं—जो इस अन्न को अन्न में प्रतिष्ठित जानता है वह प्रतिष्ठित हो जाता है। अन्नवान् एवं अन्नभक्षक होता है, नीरोग होता है, पुत्रादि सन्तति से महान् होता है। गौ आदि एवं वेदाध्ययन से उत्पन्न तेज से वह महान् होता है और यश से अधिक बड़ा होता है।

॥ सप्तम अनुवाक समाप्त ॥७॥

•

अथाष्टमोऽनुवाकः

अन्नं न परिचक्षीत। तद्व्रतम्। आपो वा अन्नम्। ज्योतिरन्नादम्। अप्सु ज्योतिः प्रतिष्ठितम्। ज्योतिष्यापः प्रतिष्ठिताः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्य-ध्याये अष्टमोऽनुवाकः ॥८॥

तत्त्वप्रकाशिका—अन्नं न परिचक्षीत = दीयमानमन्नं न निराकुर्यात्। पात्रस्थं वा

न परित्यजेत्। तदन्नापरित्यागलक्षणं व्रतं व्रतधारणम्। अन्नशब्देन भौतिकं भूतप्रसङ्गं प्रस्तावयति। आपो वा अन्नमिति आपोद्रवात्मिकाश्चतुर्गुणाः। ज्योतिः प्रकाशात्मकं त्रिगुणम्। शेषं प्राणशरीरपर्यायवत्समानपाठं व्याख्येयम्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये तत्त्वप्रकाशिकायां टीकायाम् अष्टमोऽनुवाकः ॥८॥

व्याख्या—अन्न का परित्याग न करे। यह व्रत है। जल ही अन्न है। ज्योति अन्नाद है। जल में ज्योति प्रतिष्ठित है और ज्योति में जल स्थित है। इस प्रकार ये दोनों अन्न ही अन्न में प्रतिष्ठित हैं। जो इस प्रकार अन्न को अन्न में स्थित जानता है वह प्रतिष्ठित होता है, अन्नवान् और अन्नाद होता है; प्रजा, पशु और ब्रह्मतेज के कारण महान् होता है तथा कीर्ति के कारण भी महान् होता है।

॥ अष्टम अनुवाक समाप्त ॥९॥

•

अथ नवमोऽनुवाकः

अन्नं बहु कुर्वीत। तद्व्रतम्। पृथिवी वा अन्नम्। आकाशोऽन्नादः। पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये नवमोऽनुवाकः ॥९॥

तत्त्वप्रकाशिका—अन्नमुक्तं बह्वधिकं शास्त्रोक्तैरुपायैरर्जनादिभिः कुर्वीत शेषं पूर्ववत्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये तत्त्वप्रकाशिकायां टीकायां नवमोऽनुवाकः ॥९॥

भावार्थ—दीयमान अन्न का निराकरण न करे, अर्थात् पात्र में अन्न की अवहेलना कर उसका कभी परित्याग न करें। वह एक अपरित्याग लक्षण व्रतधारण है। यहाँ अन्न शब्द से भौतिक भूतप्रसङ्ग का प्रस्ताव है। जल ही अन्न है अर्थात् जल द्रवात्मिक चतुर्गुण है। ज्योति प्रकाशस्वरूप अन्नभक्षक है। जल में ज्योति प्रतिष्ठित है, ज्योति में जल प्रतिष्ठित है। शेष पूर्ववत् अर्थ जानना चाहिये।

शास्त्र में कहे गये उपायों द्वारा अन्न को खूब बढ़ायें, अन्नक्षेत्र खोलकर विद्यार्थी, ब्राह्मण, साधु-संन्यासी जनों को नित्य पकवानों द्वारा श्रद्धा-भक्ति से भोजन करायें। धनाढ्य व्यक्ति अगर ऐसा न करे तो उनका परलोक बिगड़ जाता है। धन द्वारा

धर्मोपार्जन करें, तभी उसे ज्ञान-विज्ञान की प्राप्ति हो सकेगी। यह शास्त्रों का अटल सिद्धान्त है। शेष पूर्ववत्।

॥ नवम अनुवाक समाप्त ॥९॥

•

अथ दशमोऽनुवाकः

न कञ्चन वसतौ प्रत्याचक्षीत। तद्व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते। एतद्वै मुखतोऽन्नꣳ राद्धम्। मुखतोऽस्मा अन्नꣳ राध्यते। एतद्वै मध्यतोऽन्नꣳ राद्धम्। मध्यतोऽस्मा अन्नꣳ राध्यते। एतद्वा अन्ततोऽन्नꣳ राद्धम्। अन्ततोऽस्मा अन्नꣳ राध्यते। य एवं वेद। क्षेम इति वाचि। योगक्षेम इति प्राणापानयोः। कर्मेति हस्तयोः। गतिरिति पादयोः। विमुक्तिरिति पायौ। इति मानुषीः समाज्ञाः।

तत्त्वप्रकाशिका—कमपि मनुष्यमात्रं वसतौ अद्य रात्रौ त्वद्गृहवासं करिष्यामीति वसतिनिमित्तं समागतं न प्रत्याचक्षीत = न निराकुर्वीत। तद्वसतिनिमित्तं समागतानिवारणं व्रतं व्रतधारणम्। अन्नसम्पादनार्थं गृहस्थाश्रमवासिना मुमुक्षुणापि महान् प्रयत्नः करणीय इत्याह—तस्मादिति। यस्मादन्नमन्तरेण न पुरुषार्थसिद्धिर्गृहस्थस्य ततो यया कया च येन केनापि विधया = उपायप्रकारेण याजनाद्यन्यतमेनेत्यर्थः। बह्वधिकमन्नं व्रीह्यादिकं प्राप्नुयात् = सम्पादयेत्। अराधि = संसिद्धम्। अस्मै गृहं समागतायातिथयेऽन्नमदनीयम्। इत्यनेन प्रकारेण स्वभार्यादीन् प्रति आचक्षते = कथयन्ति। विद्वांसो गृहस्थाः। अनेन गृहस्थप्रसिद्धिः प्रमाणमन्नदाने कथिता। इदानीं दीयमानेऽन्ने देशकालपात्रश्रद्धासत्कारादिसम्पत्तिरङ्गमित्येतदर्थे यथा दत्तं तथैव फलं भवतीत्याह—एतद्वैति। एतद्वै प्रसिद्धम्। मुखतो मुखे मुख्यदेशे काले पात्रे च मुख्यया श्रद्धाप्रणिपातसत्कारादिरूपया वृत्त्या मुख्यमन्नमदनीयम्। राद्धं = संसिद्धं दत्तं यदि तदा मुखतो मुख्ये देशे काले मुख्यया वृत्त्या मुख्यं मुख्याय। अस्मै = अन्नस्य दात्रे। अन्नमदनीयम्। राध्यते संसिद्धं भवति। एतद्वै मध्यतो मध्यमदेशे काले पात्रे च मध्यमया वृत्त्या मध्यमम्। अन्ततोऽन्ते जघन्यदेशे काले पात्रे च जघन्यया वृत्त्या तिरस्कारादिरूपया जघन्यम्। एवं वेत्तुः फलमाह—य एवमिति। योऽन्नदानस्य फलाभिज्ञः। एवमुक्तप्रकारेण वेद। अन्नदानफलमुत्तममुपास्ते सोऽपि मुख्यतोऽन्नं लभत इति शेषः। तस्मान्मुखतोऽन्नं देयमिति सन्दर्भार्थः। क्षेमं = प्राप्तस्य रक्षणम्। क्षेमसाधनत्वाद् वाचः क्षेमत्वबुद्धिस्तत्र कार्येत्यर्थः। योगक्षेमः = अप्राप्तस्य प्राप्तिर्हि योगः। प्राप्तस्य परिरक्षणं क्षेमः। तद्बुद्धिः प्राणापानयोः कार्या। एवमुत्तरत्रापि। विमुक्तिर्विसर्गः, मलविमोचनव्यापार इति यावत्। इत्यध्यात्मोपासनासमाप्त्यर्थः। मानुषीः = मनुष्यसम्बन्धीः। समाज्ञाः = सम्यगाज्ञा उपासनाः। जानीयादिति शेषः।

शब्दार्थ—वसतौ = अपने घर पर, कञ्चन = किसी (व्यक्ति) का, न प्रत्याच-

क्षीत = प्रत्याख्यान न करे। तत् = वह, व्रतम् = व्रत है, तस्मात् = इसलिये, यया कया च विधया = जिस किसी भी प्रकार से, बहु = बहुत, अन्नम् = अन्न, प्राप्नुयात् = प्राप्त करे। अस्मै = अपने घर पर आये हुए इस अतिथि देवता के लिये, अन्नम् = पकवान्न, अराधि = तैयार है, इति = इस प्रकार, आचक्षते = (सद्गृहस्थ) कहते हैं, मुखत: = मुख्यवृत्ति से, अर्थात् श्रद्धा-भक्ति से एवं सत्कारपूर्वक, एतत् राद्धम् = यह संसिद्ध, अन्नम् = अन्न है, वै = निश्चय ही, अस्मै = इस अन्नदाता को, मुखत: = अधिक सत्कार आदि के साथ, अन्नम् राध्यते = अन्न सिद्ध हो जाता है, मध्यत: = मध्यम वृत्ति से, एतत् = यह, राद्धम् = सिद्ध, अन्नम् = अन्न है (अन्न दान देता है), अस्मै = इस (अन्नदाता) को, वै = निश्चय ही, मध्यत: = मध्यम श्रद्धा से, अन्नम् राध्यते = अन्न संसिद्ध (प्राप्त होता) है, अन्तत: = जघन्य वृत्ति से, एतत् = यह, राद्धम् = सिद्ध, अन्नम् = अन्न है (ऐसा समझकर भोजन देता है), अन्नम् राध्यते = अन्न संसिद्ध होता है, य: = जो, एवम् = इस प्रकार, वेद = जानता है, वाचि = वाणी में, क्षेम इति = क्षेम रहता है, प्राणापानयो: = प्राण और अपान, योगक्षेम इति = ये योग और क्षेम है, हस्तयो: = दोनों हाथों में, कर्म इति = कर्म किया जाता है, पादयो: = दोनों पैरों में, गति: इति = गमन, पायौ = गुदा में, विमुक्ति: इति = मलविसर्जन, मानुषी: = मनुष्य सम्बधिनी, समाज्ञा: = भलीभाँति आज्ञा-उपासनाएँ, इति = इस प्रकार कही गयी हैं।

व्याख्या—सभी के लिये इस लोक में कुछ ईश्वर सम्बन्धी नियम बताये गये हैं—जैसे कोई भी मनुष्यमात्र 'आज रात में तुम्हारे घर पर रहूँगा' इस प्रकार रातभर ठहरने के लिए आये हुये अतिथि व्यक्ति को विमुखकर न लौटायें। पीछे शिक्षावल्ली में कहा गया है—'अतिथिदेवो भव'। इसलिये भगवद्बुद्धि से अतिथि की अवश्य सेवा करनी चाहिये। हम अतिथि-सेवा करेंगे ऐसा व्रत धारण करना चाहिये। अन्न सम्पादन के लिए गृहस्थाश्रम वासी मुमुक्षु को भी महान् प्रयत्न करना चाहिये। क्योंकि अन्न के बिना गृहस्थ के पुरुषार्थ की सिद्धि नहीं हो सकती, इसलिये जिस किसी भी उपाय-प्रकार से अधिक अन्न धान-गेहूँ आदि का सम्पादन करें। अर्थात् बहुत-से धन का सञ्चय करें। उससे यज्ञभागी पञ्चदेवता देव, ऋषि, पितर, भूत और नर की सेवा करें। हमारे घर पर समागत अतिथि के लिए अन्न-वस्त्रादि देना चाहिये। सद्गृहस्थ इस प्रकार से अपनी भार्या (स्त्री) से कहते हैं। इस समय दीयमान अन्न में देश, काल, पात्र, श्रद्धा, सत्कार आदि सम्पत्ति अङ्ग इस अर्थ में जैसे दिया गया है वैसे ही फल होता है, सो बताते हैं—मुख्य देश में, ठीक समय पर और सत्पात्र में श्रद्धा-प्रणिपात-सत्कार आदि रूप वृत्ति से मुख्य अन्न अदनीय है। मध्यम देश, काल और पात्र में मध्यम वृत्ति से मध्यम माने जाते हैं। जघन्यदेश, काल और पात्र में जघन्य वृत्ति से तिरस्कार आदि रूप से जघन्य है। इस प्रकार जानने वाले का फल बताया गया है—जो अन्नदान का फलाभिज्ञ है, इस प्रकार से जानता है; अन्नदान फल की उत्तम उपासना करता है वह भी मुख्य अन्नलाभ करता है। इसलिये मुख्य वृत्ति से अन्नदान करना चाहिये। यही

सन्दर्भ का अर्थ है। क्षेम का साधन होने से वाणी में क्षेमत्व बुद्धि उसमें करनी चाहिये। अप्राप्त की प्राप्ति ही योग है। प्राप्त वस्तु की सब ओर से रक्षा करना क्षेम है। प्राण और अपान में वह बुद्धि करनी चाहिये। इस प्रकार उत्तरोत्तर भी अर्थ जोड़ना चाहिये। मनुष्य सम्बन्धिनी भलीभाँति आज्ञा उपासनाएँ समझें।

अथ दैवीः। तृप्तिरिति वृष्टौ। बलमिति विद्युति। यश इति पशुषु। ज्योतिरिति नक्षत्रेषु। प्रजापतिरमृतमानन्द इत्युपस्थे। सर्वमित्याकाशे। तत्प्रतिष्ठेत्युपासीत। प्रतिष्ठावान् भवति। तन्मह इत्युपासीत। महान्भवति। तन्मन इत्युपासीत। मानवान् भवति। तन्नम इत्युपासीत। नम्यन्तेऽस्मै कामाः। तद्ब्रह्मेत्युपासीत। ब्रह्मवान् भवति।

तत्त्वप्रकाशिका—अथ मानुष्युपासनाकथनसमनन्तरम्। दैवीः = देवसम्बन्धिनीः समाज्ञा इत्यनुषङ्गः। तृप्तिः = अशनपानजा तुष्टिः, तद्बुद्धिर्वृष्टौ कार्या। एवमुत्तरत्रापि। बलं = भूयसासमप्यभवकारणं सत्त्वम्। विद्युति = अचिरप्रभायाम्। यशः = कीर्त्तिरूपम्। पशुषु = गवादिषु। ज्योतिः = प्रकाशरूपम्। प्रजापतिः = पुत्रदातृत्वात् तद्बुद्धिः कार्या। अमृतं = सन्ततिः, तथा च पौत्रादिरूपसन्तानपरम्परादातृत्वादमृतमिति भावः। आनन्दं = क्षद्रसुखरूपम्। उपस्थे = गुह्येन्द्रिये। आकाशे भूताकाशे। प्रतिष्ठा = प्रतितिष्ठत्यस्मिन् कार्यकारणजातमिति सर्वाधार इत्यर्थः। इत्यनेन प्रकारेणोपासीतोपासनं कुर्यात्। तत्र फलमाह—प्रतिष्ठावान् भवतीति। महान् सर्वस्मादधिकः। अस्मै = उपासकाय। कामाः नम्यन्ते = नम्रा भवन्ति, प्राप्ता भवन्ति। पूर्णगुणत्वाद् ब्रह्मेत्युपासीत ब्रह्मवान् = ब्रह्मत्ववान् भवतीत्यर्थः॥

शब्दार्थ—अथ = इसके बाद, दैवीः = देवसम्बन्धिनी बातें हैं। वृष्टौ = वृष्टि में, तृप्तिः = तृप्ति, इति, विद्युति = बिजली में, बलम् = बल है, इति, पशुषु = पशुओं में, यशः = यश है, इति, नक्षत्रेषु = नक्षत्रों में, ज्योतिः = प्रकाशरूप है, इति, उपस्थे = उपस्थ में, प्रजातिः = प्रजाति है, अमृतम् आनन्द इति = पुत्र-पौत्र आदि सन्तन्ति को देनेवाला क्षुद्र सुख रूप है, आकाशे = आकाश में, सर्वम् इति = सब है, तत् = वह, प्रतिष्ठा = प्रतिष्ठा है, इति उपासीत = इस प्रकार (ब्रह्म की) उपासना करे, प्रतिष्ठावान् भवति = उपासना करने वाला व्यक्ति प्रतिष्ठावाला हो जाता है, तन्महः = वह मह है, इति उपासीत = इस प्रकार उसकी उपासना करे। महान् भवति = वह महान् हो जाता है। तन्मनः = वह मन है, इति उपासीत = इस प्रकार उसकी उपासना करे, मानवान् भवति = वह मननशील हो जाता है, तन्नमः = वह नमन करने योग्य है, इति उपासीत = इस प्रकार उसकी उपासना करे। अस्मै = ऐसे उपासक के लिये, कामाः = विषयभोग पदार्थ, नम्यन्ते = झुकते हैं, तत् = वह, ब्रह्म = ब्रह्म है, इति उपासीत = इस प्रकार उसकी उपासना करे, ब्रह्मवान् भवति = वह उपासक आत्मवान् हो जाता है।

व्याख्या—इसके बाद अर्थात् मानुषी-उपासना कथा के बाद देवसम्बन्धिनी

पासनाओं का वर्णन करते हैं। तृप्ति अन्न-जल से उत्पन्न तुष्टि वह बुद्धि वृष्टि में करनी ाहिये। इस प्रकार आगे भी जोड़ना चाहिये। अमृत सन्तान और पौत्रादि रूप सन्तान रम्परा को देने के कारण ही अमृत है। उपस्थ–गुह्येन्द्रिय में आनन्द क्षुद्र सुख है। म्भोग रूप रतिक्रीड़ा–स्त्रीपुरुषजनित सुख व आनन्द क्षुद्र है। भूताकाश में सब वेद्यमान है। वह ब्रह्म सर्वाधार है—ऐसा जानकर उसकी उपासना करनी चाहिये। इस कार से ब्रह्म की उपासना करें। इस प्रकार ब्रह्म की उपासना करने वाले का उसमें फल बताया गया है—प्रतिष्ठावान् भवति = वह उपासक सब से अधिक महान् होता है। सारी कामनाएँ मूर्त्तिमती होकर उसके सामने सेवार्थ उपस्थित रहती हैं एवं नतमस्तक होकर रहती हैं। वही आत्मज्ञानी होता है॥

तद्ब्रह्मणः परिमर इत्युपासीत। पर्येणं म्रियन्ते द्विषन्तः सपत्नाः। परि येऽप्रिया भ्रातृव्याः। स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः। स य एवंवित्। अस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसंक्रम्य। एतं प्राणमय-मात्मानमुपसंक्रम्य।

तत्त्वप्रकाशिका—परितो म्रियन्तेऽस्मिन् इति परिमरः। सार्वत्रिकमरणस्याप्यव-काशतयाऽऽश्रयः। अथवा सर्वविनाशकः कालः परमेश्वरः ब्रह्मणा सम्बद्धश्च स इत्याकाशः। इत्यनेन प्रकारेण उपासीतोपासनं कुर्यात्। पर्येणम् = एनमुपासकं परि तद्द्विषन्तो म्रियन्ते = विनश्यन्ति। सपत्नाः = कामादयो बाह्या वा वैरिणः। परि = सर्वतो ये प्रसिद्धाः। अप्रियाः = कर्णनेत्रमनोदाहकाः, स्वस्य भ्रातृव्याः = वैरिणो द्विषन्तोऽपि अयमस्माकं वैरी अस्य अनिष्टम् अस्माभिः करणीयमित्युपासते सङ्कल्पयन्ते, उपासको वैते मम वैरिण इति सङ्कल्पं करोति येषु वैरमकुर्वाणेष्वपि ते सर्वे विनश्यन्तीत्यर्थः। स यश्चायमित्यादिकं प्रागुपदर्शितरीत्या व्याख्येयम्।

व्याख्या—परिमरः = सब ओर से इसमें मरते हैं, इस अर्थ में सार्वत्रिक मरण का भी अवकाश रूप से आश्रय है। वह ब्रह्म का परिमर है। अथवा सर्वविनाशक काल परमेश्वर ब्रह्म से सम्बद्ध और वह आकाश है, इस प्रकार से उपासना करे (पर्येणम् = एनं + परि)। इस ब्रह्मोपासक के प्रति विद्वेष करनेवाले दुश्मन मर जाते हैं, स्वतः विनष्ट हो जाते हैं। हिंसक खल अपने पाप से ही नष्ट हो जाते हैं और साधु-सज्जन अपनी समता से ही भयों से (द्वेष करनेवाले शत्रुओं से) बच जाते हैं। चारों ओर से ये प्रसिद्ध अप्रिय कान, नेत्र और मन का दाहक अपने अनिष्ट चाहनेवाले हमारे सारे शत्रु स्वतः विनष्ट हो जाते हैं। वे सब वैर करने वाले दुश्मन मारे जाते हैं। 'स यश्चायमि'त्यादि की पहले दिखलायी गयी रीति से व्याख्या करनी चाहिये।

एतं मनोमयमात्मानमुपसंक्रम्य। एतमानन्द एतं विज्ञानमयमात्मानमुप-संक्रम्य। एतमानन्दमयमात्मानमुपसंक्रम्य इमाँल्लोकान् कामान्नीकामरूप्य-नुसञ्चरन्। एतत्साम गायन्नास्ते। हा३वु हा३वु हा३वु। अहमन्नमहमन्न-महमन्नम्। अहमन्नादो३ऽहमन्नादो३ऽहमन्नादः। अह२ श्लोककृदह२

श्लोककृदह३ श्लोककृत्। अहमस्मि प्रथमजा ऋता३स्य। पूर्वं देवेभ्योऽमृतस्य ना३भायि। यो मा ददाति स इदेव मा३वाः।

अहमन्नमन्नमदन्तमा३द्मि। अहं विश्वं भुवनमभ्यभवा३म्। सुवर्ण-ज्योतीः। य एवं वेद। इत्युपनिषत्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्य-ध्याये दशमोऽनुवाकः ॥१०॥

तत्त्वप्रकाशिका—इमान् भूरादींल्लोकान् कर्मफलभूतान्। कामान्नीकामं यथाभि-लाषमन्नमदनीयमस्यास्तीति कामान्नीकामरूपी कामं यथाभिलाषं रूपमस्यास्तीति काम-रूपी। अनुसञ्चरन् = आत्मसाक्षात्कारमनु इमांल्लोकान् पर्यटन् मानुषेण शरीरेणाधि-कारिकेण वा एतद् वक्ष्यमाणं लोकानुग्रहार्थं साम = सामत्वप्रतिपादकं वचनं संसार-शूलार्पितान् प्राणिनो निरीक्ष्य करुणाक्रान्तमना गायन्नत्युन्नताञ्छब्दान् कुर्वन्। आस्ते = तिष्ठते। हा३वु हा३वु हा३वु। स्तोमाक्षराण्येतानि। लोकत्रयीस्थानं सम्बोधयति। वच-नत्रयेण अहो अहो अहो इति प्लुतिः पदत्रयेऽप्याश्चर्यार्था। अहमन्नमदनीयमुपभोग्यमि-त्यर्थः। अन्नादः = अन्नमत्तीत्यान्नदो भोक्ता परमात्मा। श्लोकयत इति श्लोकः, श्लाघ-नीयो जगद्रक्षणादिकृदित्यर्थः। ऋतस्य कर्मणः प्रथमजाः सर्गाद्यसमये तत्परिपाककृदि-त्यर्थः। देवेभ्यः पूर्वः पूर्वज इत्यर्थः। पूर्वभाव्यपेक्षयेदमिति ज्ञातव्यम्। अमृतस्य मोक्षस्य नाभिराश्रयः। नाभा इति गानकृतो विकारः। ये मां योग्याय शिष्याय ददात्युपदिशति स इदेव माऽवा प्राप्तो भवति। वा गतिगन्धनयोरिति धातुः। अहमन्नमिति अन्नमचेतनं तद्भोक्तारं चेतनं चाद्मि = व्याप्नोमि। अहं विश्वमिति प्रलयकाले विश्वमभि-भूतवानस्मि। सुवर्नः सुवर्णः तत्समानवर्णो देदीप्यमानविग्रहः, ज्योतिः = प्रकाशः। एवं वेत्तुः फल-माह-योऽधिकारी एवमुक्तप्रकारमानन्दमयं परमात्मानं वासुदेवं वेद = जानाति, साक्षा-त्करोति। सोऽपि सर्वाल्लोकानित्यादिनोक्तफलं प्राप्नोति। अस्य व्याख्यानं पूर्ववत्।

अनादिनिवृत्तपथप्रवर्तकब्रह्मविद्योपदेशकलोकाचार्यश्रीसनन्दादिप्रवर्त्तित श्री १०८ महामुनीन्द्रभगवन्निम्बार्काचार्यचरणोपबृंहितवैदिकसत्सम्प्रदायानुगतपूज्य-पादनिखिलरसिकचक्रचूडामणि श्री १०८ स्वामिहरिदासपदाश्रिताश्रित-परमविरक्तमहानुभावश्री १०८स्वामिनीशरणपादपद्मचञ्चरीकेण तर्क-वागीशोपाधिविभूषितामोलकरामशास्त्रिणा पूर्वाचार्योक्तितः कृष्ण-यजुर्वेदीयोपनिषत्तत्त्वप्रकाशिकाटीकायां तृतीयो भृगुवल्ल्यध्यायः समाप्तः ॥३॥

शब्दार्थ—एतम् = इस, मनोमयम् = मनोमय, आत्मानम् = आत्मा को, उप-संक्रम्य = प्राप्त होकर, एतम् = इस, विज्ञानमयम् = विज्ञानमय, आत्मानम् = आत्मा को, उपसंक्रम्य = प्राप्त होकर, कामान्नी = अभिलाषानुसार, कामरूपी = इच्छानुसार रूपवाला होकर, इमान् = इन, लोकान् = लोकों में, अनुसञ्चरन् = पर्यटन करता हुआ, एतत् = इस, साम = सामत्वप्रतिपादक, गायन् आस्ते = वचन का गान करता

हुआ रहता है। हा ३ वु हा ३ वु हा ३ वु। अहम् = मैं, अन्नम् = अन्न हूँ। अहम् = मैं, अन्नम् = अन्न हूँ, अहम् = मैं, अन्नादः = अन्न का भक्षक हूँ, अहम् = मैं, श्लोककृत् = जगद्रक्षण आदि करनेवाला हूँ, ऋतस्य = कर्म का, अहम् = मैं, प्रथमजाः सर्गादि के समय में उत्पन्न होने वाला, देवेभ्यः = देवों से, पूर्वम् = पहले उत्पन्न, अमृतस्य = अमृत का, नाभायि = आश्रय, अस्मि = हूँ, यः = जो, मा = मुझे, ददाति = देता है, सः = वह, इदेव मा आवाः = निश्चय ही मुझे प्राप्त होता है, अहम् = मैं, अन्नम् = अन्न, अहम् = मैं, अन्नम् = अन्न को, अदन्तम् = खाते हुए, अद्मि = निगल जाता हूँ, अहम् = मैं, विश्वम् = सब, भुवनम् = लोक में, अभ्यभवाम = अभिभूतवान् हूँ, सुवर्णज्योतिः = तपाये हुए सोने के समान कान्ति है, यः = जो, एवम् = इस प्रकार, वेद = जानता है, इति उपनिषद् = इस प्रकार यह उपनिषद् ब्रह्मविद्या है।

व्याख्या—इन भूः आदि कर्मफल रूप लोकों को चाहने वाला व्यक्ति यथाभिलषित अभीष्ट पदार्थ भगवत्कृपा से पाप्त कर लेता है तब वह विषयभोगों को यथेच्छ—'कामान्नी' = भोगनेवाला और 'कामरूपी' हो जाता है। इन भूः आदि लोकों में मानुष शरीर से भ्रमण करता हुआ ये आगे कहे जाने वाले जनों पर अनुग्रह करने के लिए साम का गान करता रहता है। संसारशूल में अर्पित प्राणियों का निरीक्षण कर करुणायुक्त भक्तिगद्गद हृदय से ऊँचे शब्दों का गान करता हुआ रहता है। अर्थात् संसारशूलार्पित जीवों को साम के सुमधुर गान से आनन्दित करता हुआ रहता है।

'हा३वु हा३वु हा३वु' इस प्रकार तीनों लोकों में स्थित जनों को सम्बोधित करता है। वचनत्रय द्वारा 'अहो अहो अहो' इस प्रकार प्लुति पदत्रय में भी आश्चर्यार्थ है। मैं अन्न-अदनीय उपभोग्य हूँ। अन्न को खाता है-इस अर्थ में अन्नाद (अन्नभक्षक) भोक्ता परमात्मा है। श्रीभगवान् का जो जगद्रक्षणादि गुणानुवाद विद्वानों के द्वारा गान किया जाता है। कर्म का सर्गादि समय में कर्म का परिपाक करनेवाला जो देवताओं से पहले हुआ है, अमृत अर्थात् मोक्ष नाभि आश्रय है। नाभा यह गानकृत विकार है। जो मुझे योग्य शिष्य देता है वह उपदेश करता है, वही उसे प्राप्त होता है। मैं अन्न हूँ। अन्न अचेतन उसके भोक्ता चेतन को खाता हूँ अर्थात् उसको व्याप्त करके रहता हूँ। मैं सब हूँ। प्रलयकाल में विश्व (सब मैं) अभिभूतवान् हूँ। सुवर्ण के समान वर्ण देदीप्यमान विग्रह प्रकाशस्वरूप है। जो वेदान्त शास्त्र के अधिकारी उक्त प्रकार से आनन्दमय परमात्मा वासुदेव को जानता है उसे सब अभीष्ट पदार्थ प्राप्त हो जाते हैं। इस प्रकार यह अध्यात्म-परमात्मविद्या (उपनिषद्) समाप्त हुई।

इति श्रीमत्परमहंसपरिव्राजकाचार्यत्यागमूर्तिस्वामिधनञ्जयदासजीकाठियाबाबातर्कतर्कव्याकरणतीर्थपादपद्मान्तेवासियोगिराजस्वामिराधाविहारिदासजी-
काठियाबाबाचरणारविन्दचञ्चरीक डा. स्वामी द्वारकादास
काठियाबाबा कृत तत्त्वप्रभा नाम्नी हिन्दी
टीका में तैत्तिरीयोपनिषद् समाप्त।

ऋग्वेदीय ऐतरेयोपनिषद्

आत्मा वा इदमेक एवाग्र आसीत्। नान्यत् किञ्चन मिषत्। स ईक्षत लोकान्नु सृजा इति ॥१॥

स इमाँल्लोकानसृजत। अम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठाऽन्तरिक्षं मरीचयः। पृथिवी मरो या अधस्तात्ता आपः ॥२॥

श्रीकृष्णाय नमस्तस्मै राधाप्रेष्ठाय शर्मदे।
परमानन्दसन्दोहसान्द्रानन्दवपुष्मते ॥१॥
निम्बादित्यस्य पादाब्जं लोचनानन्ददायकम्।
सकलार्थप्रदं नृणां प्रणमामि पुनः पुनः ॥२॥
श्रीनिवासं गुरुं वन्दे करुणावरुणालयम्।
बादरायणसूत्राणां भाष्यकारं गुणार्णवम् ॥३॥
सकलान् देशिकान् नत्वा पूवाचार्योक्तितः खलु।
ऐतरेयस्य च व्याख्या व्याकरिष्ये यथामति ॥४॥

तत्त्वप्रकाशिका—इदमनभिव्यक्तनामरूपात्मकं जगत्। तद्भिन्नाभिन्न एक एव सहायान्तरशून्यस्वतन्त्रसत्ताश्रयः सर्वज्ञोऽचिन्त्यानन्तशक्तिरात्मा परमात्मा श्रीवासुदेवोऽग्रे जगतः सृष्टेः प्रागासीत्। एवकारस्तदधिकोत्कृष्टत्वव्यवच्छेदपरः। प्रकृतादात्मनोऽन्यत् विलक्षणं किञ्चन किञ्चिदपि वस्तु न मिषत्। धातूनामनेकार्थत्वान्नासीदित्यर्थः। स परमात्मा पृथिव्यादींल्लोकान् स्रक्ष्यामीत्येवमीक्षत ईक्षणं पर्यालोचनं कृतवान्। नशब्दो वितर्के। इत्थं विचार्य स सर्वेश्वर इमान् लोकान् असृजत।

यद्यपि लोकानुसृजा इत्येतावन्मात्रविचारेण कुलालवन्निमित्तकारणत्वं ब्रह्मणः प्रतिभाति तथापि 'सोऽकामयत बहु स्यां प्रजायेय' इति शाखान्तान्तरगतस्य स्वकीयबहुभावविचारवाक्यस्य गुणोपसंहारन्यायेनात्रोपसंहारादुपादानत्वमपि सिद्ध्यति। एतच्च भगवता श्रीबादरायणेन सूत्रितम्—'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधात्' (ब्र.सू. १।४।२३)। ब्रह्मैव जगतः प्रकृतिरुपादानञ्च निमित्तञ्च कुतः उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवतीत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय यथा सोम्य! एकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यादिति दृष्टान्तस्यानुसरणादिति सूत्रार्थः। यावन्तो लोका भगवता सृष्टास्तान् स्व-स्वनाम्ना निर्दिशति—अम्भ इत्यादिना। आकाशादिक्रमेणाणुमुत्पाद्याम्भःशब्दवाच्यद्युलोकप्रभृतील्लोकानसृजत एतेषामम्भःप्रभृतिशब्दानां लोकवाचित्वं न प्रसिद्धतरमित्याशङ्क्य तेषां शब्दानामर्थं स्वयमेव श्रुतिः व्याचष्टे—अदोऽम्भ इति परेण द्युलोकस्योपरि महर्लोकजनोलोकप्रभृतयः, या च द्यौः प्रतिष्ठा सर्वेषां देवानामाश्रयभूतो द्युलोकोऽदोऽम्भ

एतत्सर्वमम्भ:शब्दवाच्यम्। मरीचिशब्देनान्तरिक्षलोक उच्यते, सूर्यमरीचीनामाधारत्वात्। भूर्लोकवर्त्तिनां प्राणिनां मरणाश्रयत्वात् मरशब्दवाच्या पृथिवी। पृथिव्या अधस्तात् पातालविशेषाः आपशब्देनोच्यन्ते।

शब्दार्थ—इदम् = यह दृश्यमान जगत्, अग्रे = सृष्टि के पहले, एक: = एक, आत्मा = परमात्मा, वै = ही, आसीत् = था, अन्यत् = दूसरा, किञ्चन एव = कुछ ही, न मिषत् = नहीं था, स: = उस (परमात्मा) ने, ईक्षत = ईक्षण किया, नु = वितर्क उत्पन्न हुआ, (मैं) लोकान् सृजै = भुवनों का सर्जन करूँ, स: = उसने, अम्भ: = द्युलोक, मरीची: = मरीची (अन्तरिक्ष), मरम् = मर, मर्त्यलोक, आप: = जल, इमान् = इन, लोकान् असृजत = लोकों की सृष्टि की, दिवम् परेण = द्युलोक के ऊपर महर्लोक प्रभृति, प्रतिष्ठा = स्थापित है, स्थित है, अद: = वे सब, अम्भ: = अम्भ शब्दवाच्य हैं, द्यौ: = द्युलोक, अन्तरिक्षम् = अन्तरिक्ष, मरीचय: = मरीचि, पृथिवी = पृथिवी, मर: = मर (जहाँ आदमी मरते हैं), या: = जो, अधस्तात् = नीचे, ता: = वे, आप: = जल हैं।

व्याख्या—परमात्मा श्रीवासुदेव से अखिल विश्व ब्रह्माण्ड की सृष्टि, स्थिति (पालन) और विनष्टि (संहार) किस प्रकार से साधित होते हैं, श्रुतियाँ इन्हीं का सम्यक् प्रतिपादन करती हैं। छान्दोग्योपनिषद् के षष्ठ प्रपाठक एवं द्वितीय खण्ड में उल्लिखित है—'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्। तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजत' इत्यादि। अर्थात्—हे सौम्य ! इस जगत् में पहले सृष्टि के पूर्व एक मात्र समानातिशयशून्य अद्वितीय सद्ब्रह्म ही था। उसी सत् ने ईक्षण (पर्यालोचन) किया है। मैं जगद्रूप में परिणत होकर बहुत हो जाऊँ। इस प्रकार से ईक्षण करके उस सत्सर्वेश्वर ने तेज की सृष्टि की। सद्ब्रह्म ने ईक्षणपूर्वक जगत् की रचना की है। अनन्त कल्याण गुणवाले परमात्मा श्रीपुरुषोत्तम अपने सत्यसङ्कल्प मात्र से ही तीनों लोकों की सृष्टि, स्थिति और संहार करते हैं। वस्तुतः यह विश्व सृष्टि, स्थिति और विनाश रूप से उनकी माया का खेल है। जिसे उनकी अघटनघटनापटीयसी मायाशक्ति कहते हैं।

'आत्मा वा इदमेक एवाग्र आसीत्। नान्यत् किञ्चन मिषत्' इत्यादि श्रुति का तात्पर्यार्थ श्रीमद्भागवत (६।४।४७) में देखने को मिलता है—'अहमेवासमेवाग्रे नान्यत् किञ्चान्तरं बहिः'। जगत्कर्त्ता ब्रह्म ईक्षणशक्तियुक्त है और बृहत्तम स्वतन्त्र अद्वैत सद्वस्तु है। प्रलयकाल में जगत् का अदर्शन हो जाने पर एकमात्र ब्रह्म शेष रह जाते हैं। इसलिये कहा—'नान्यत् किञ्चन मिषत्'। उस परमात्मा ने ईक्षण किया, प्रजारूप से अपने को स्वयं बनाया, अतएव अपना बहुत भाव रूप का विचार निमित्तकारण यह ईक्षणशक्ति ही है और उपादान वस्तु भी स्वयं ब्रह्म ही है। वस्तुतः ब्रह्म ही समस्त जगत् का सर्जनकर्त्ता, पालनकर्त्ता और प्रलयकर्त्ता है। यह उपनिषद्वेत्ताओं का सिद्धान्त है। ब्रह्म की स्वरूपगत ईक्षण शक्ति जगत् की केवल सृष्टि विषयक ही नहीं बल्कि इसके परिपालन, संरक्षण और प्रलयसाधन की शक्ति भी इसी के अन्तर्गत है। यह प्रत्यक्ष सिद्ध है कि परिवर्त्तन ही संसार का स्वरूपगत धर्म है। परिवर्त्तन शब्द पर विचार करने

से ज्ञात होता है कि सृष्टि, स्थिति और लय ये तीनों परिवर्त्तन शब्द के अर्थ हैं। 'सूर्य्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्'। अतएव प्रवाह की भाँति यह नामरूपात्मक जगत् परिवर्त्तनशील एवं सङ्कुचित होकर सूक्ष्मरूप से ब्रह्म में विद्यमान था।

स्वर्गलोक के ऊपर महर्लोक, जनलोक प्रभृति हैं और जो स्वर्गलोक है वह समस्त देवताओं का आश्रयरूप है। यह सब अम्भ:शब्दवाच्य हैं। मरीचि शब्द से अन्तरिक्षलोक कहा जाता है, सूर्य मरीचियों का आधार है। भूर्लोक में रहने वाले प्राणी मरणाश्रय होने के कारण पृथिवी मरशब्दवाच्या है। पृथिवी के नीचे पाताल विशेष लोक 'आप' शब्द से कहे गये हैं। जितने लोक हैं उन सबकी श्रीभगवान् ने सृष्टि की है। यही श्रीभगवान् की असाधारण सर्वशक्तिमत्ता का परिचय है।

स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति। सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्च्छयत्। तमभ्यतपत् तस्याभितप्तस्य मुखं निरभिद्यत यथा-ण्डम् ॥३॥

तत्त्वप्रकाशिका—लोकसृष्टिरुक्ता पालकमन्तरा तस्याः सृष्टेः विनाशः स्यादित्याशङ्क्य लोकपालसृष्टिं दर्शयति—स परमात्मा ईक्षत = पर्य्यालोचत इमे त्वम्भः-प्रभृतयः मया रचिताः, तेषां रक्षणार्थं लोकपालानां नु सृजे = अहं सृजे। स विचारयुक्तः परमेश्वरः अद्भ्य एव = जलोपलक्षितपञ्चभूतेभ्यः, पुरुषं = पुरुषाकारं विराजं विराट्-पिण्डं समुद्धृत्य। अमूर्च्छयत् = कठिनमकरोत्। यथा कुलाल आर्द्रां मृदमानीय शोषयित्वा कठिनं पिण्डं करोति तद्वदित्यर्थः। विराडुत्पत्तिमभिधाय तदवयवेभ्यो लोकपालोत्पत्तिमाह–तमभ्यतपदिति। तं = पिण्डं पुरुषविधमुद्दिश्याभ्यतपत = पर्या-लोचितवान्। पर्य्यालोचनमेव तप इति प्रागभिहितम्। अभितः पर्य्यालोचितस्य विराट्-पिण्डस्य मुखच्छिद्रं निरभिद्यत = मुखच्छिद्रं विदारितमभूत्। यथा पक्षिसर्पादीनां पक्वपिण्डं भिन्नं भवति।

शब्दार्थ—सः = उसने, ईक्षत = ईक्षण किया, इमे = ये, नु = वितर्क में, लोकाः = लोक, लोकपालान् = लोकपालों की, सृजे = सृष्टि की, इति, सः = उसने, अद्भ्यः = जल से, एव = ही, पुरुषम् = पुरुषाकार विराट् पिण्ड को, समुद्धृत्य = निकालकर, अमूर्च्छयत् = कठिन किया, तम् = उस पिण्ड को, अभ्यतपत् = पर्या-लोचित किया, तस्य अभितप्तस्य = उस अभितप्त विराट्पिण्ड का, मुखम् = मुख-छिद्र, निरभिद्यत = विदारित हुआ, यथाण्डम् = जिस तरह अण्डों को फोड़कर पक्षी बाहर निकल आते हैं।

व्याख्या—पहले मन्त्र में लोकों की सृष्टि कही गयी है, पालक के बिना उस सृष्टि का विनाश हो-ऐसी आशङ्का कर लोकपालों की सृष्टि को दिखाते हैं—उस परमात्मा ने पर्य्यालोचन किया—ये अम्भ प्रभृति की मैंने रचना की है, उनकी रक्षा के लिये मैं लोकपालों की सृष्टि करूँ। इस प्रकार विचारयुक्त परमात्मा ने जलोपलक्षित पञ्च महाभूतों से पुरुषाकार विराट्पिण्ड को समुद्धृत कर उसे कठिन किया। जिस तरह

कुम्हार गिली मिट्टी को लाकर उसे सूखाकर कठिन ढेले को बना लेता है ठीक वैसे ही विराट् पुरुष जब चौबीस तत्त्वों के अण्ड का भेदन कर बाहर निकले तब उन्होंने अपने रहने के लिए निर्मल जल की सृष्टि की—'अपाऽस्राक्षीच्छुचिः शुचीः'। (श्रीमद्भागवत) विराट् की उत्पत्ति को बताकर उसके अवयवों से लोकपालों की उत्पत्ति को बताते हैं— उस पिण्ड = पुरुषाकार को उद्देश करके पर्यालोचन = तप किया। मुण्डकोपनिषद् में वर्णित है—'तपसा चीयते ब्रह्म'। 'यस्य ज्ञानमयं तपः'। यहाँ तप पद से सङ्कल्परूप ज्ञान से ब्रह्म सृष्टि के लिये उन्मुख होता है। जिसका ज्ञान ही तप है। सब ओर से पर्यालोचित पिण्ड के मुख का च्छेद हुआ, जिस प्रकार पक्षी-सर्पादि का पक्व पिण्ड अलग हो जाता है।

मुखाद् वाग् वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद् वायुरक्षिणी निरभिद्येतामक्षिभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद् दिशस्त्वङ्निरभिद्यत। त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत। हृदयान्मनो मनसश्चन्द्रमा नाभिर्निरभिद्यत। नाभ्या अपानोऽपानान्मृत्युः शिश्नं निरभिद्यत। शिश्नाद्रेतो रेतस आपः ॥४॥

इत्यैतरेयोपनिषद्यात्मषट्के प्रथमः खण्डः ॥१॥

तत्त्वप्रकाशिका—तद्वदस्मान्मुखच्छिद्राद् वागिन्द्रियं निष्पन्नम्। तस्माच्चेन्द्रियादग्निदेवता निष्पन्ना। एवमुत्तरपर्यायेष्वपि छिद्रेन्द्रियदेवता व्याख्येयाः। प्राणो प्राणेन्द्रियम्। लोमशब्देन तदाधारभूतत्वङ्निष्ठं स्पर्शेन्द्रियमुच्यते, हृदयमष्टदलकमलम्। अपानोऽधः सञ्चारो वायुः। रेतो गुह्येन्द्रियम् ॥४॥

इति ऐतरेयोपनिषत्तत्त्वप्रकाशिकाटीकायां प्रथमः खण्डः ॥१॥

व्याख्या—मुख से वाक्-इन्द्रिय निष्पन्न हुई, उस वाक् इन्द्रिय से अग्नि देवता निष्पन्न हुआ, नासिका (नाक) के दोनों छेद उत्पन्न हुए, उनमें से प्राण-वायु निष्पन्न हुई, प्राण से वायु का प्रादुर्भाव हुआ, दोनों आँखों के छेद विदारित हुए, आँखों के छिद्रों में से नेत्र-इन्द्रिय निष्पन्न हुई, नेत्र-इन्द्रिय से सूर्य का प्रादुर्भाव हुआ, दोनों कानों के छेद विदारित हुए, कानों से श्रोत्रेन्द्रिय प्रकट हुई, श्रोत्र-कर्णेन्द्रिय से दिशाएँ प्रकट हुईं, त्वचा निकली, त्वचा से लोम उत्पन्न हुए, लोमों से ओषधियाँ और वनस्पतियाँ उत्पन्न हुईं। हृदय, हृदय से मन और मन से चन्द्र उत्पन्न हुआ। फिर नाभि और नाभि से अपानवायु और अपानवायु से मृत्युदेव प्रकट हुआ। नीचे संचार करनेवाला वायु ही अपानवायु कहा जाता है। शिश्न = पुरुषलिङ्ग, उस शिश्न से रेत = गुह्य-इन्द्रिय और उससे जल उत्पन्न हुआ ॥४॥

॥ प्रथम खण्ड समाप्त ॥१॥

•

द्वितीयः खण्डः

ता एता देवताः सृष्टा अस्मिन् महत्यर्णवे प्रापतंस्तमशनायापिपासाभ्यामन्ववार्जत्। ता एनमब्रुवन्नायतनं न प्रजानीहि। यस्मिन् प्रतिष्ठिता अन्नमदामेति ॥१॥ ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ॥२॥ ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति। ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं बतेति पुरुषो वाव सुकृतम्। ता अब्रवीद्यथाऽऽयतनं प्रविशतेति ॥३॥

तत्त्वप्रकाशिका—या इन्द्रियतदभिमानिदेवता एताः सृष्टा रचिताः। अस्मिन् महत्यर्णवे = समुद्रवदत्यन्तविस्तृते विराट्देहे, प्रापतन् = प्रकर्षेण पतिता अभूवन्, तं सर्वेन्द्रियतद्देवताधिष्ठानभूतं विराट्देहं क्षुत्पिपासाभ्यामन्वावर्जत्तदनुगमितवान् संयोजितवान्। ता इन्द्रियाभिमानिन्यो देवताः। एनं स्रष्टारं परमात्मानं प्रत्यब्रुवन्। आयतनमधिष्ठानं नोऽस्मभ्यं प्रजानीहि विधत्स्व। यस्मिन् शरीरे प्रतिष्ठिताः सत्यः वयं तद्देहपर्याप्तमन्नमदाम। अन्नमत्तुं समर्था भवामः। ततः परमात्मा ताभ्यो देवताभ्यो भोगाय गां गोदेहमानयत्, तांश्च देवता अब्रुवन्। नोऽस्माकमयं देहो नैवालमिति अत्तुं न योग्यः। गोशरीरस्योपरिदन्ताभावेन दूर्वादिमूलस्योत्खातुमशक्यत्वादित्यर्थः। इतोऽन्यमप्युभयतोदन्तं देहं सृजेत्येवमब्रुवन्। परमात्मनाऽश्वशरीरं दत्तम्। विवेकज्ञानाभावादयमश्वदेहोऽपि न पर्य्याप्त इत्युक्तवत्यः। ततः परमात्मा विवेकसम्पन्नं पुरुषशरीरमानयत्। ताश्च देवताः परितुष्टाः सुकृतं = सुष्ठुकृतं परमात्मनेत्यब्रुवन्, बतेत्याश्चर्ये, तस्मान्मनुष्यशरीरं विवेकसम्पन्नं सुकृतं सर्वपुण्यकर्महेतुत्वात्। ता देवताऽब्रवीद् इष्टमासादितमिदमधिष्ठानमिति मत्वा स्वयोनिषु सर्वे हि रमन्ते ईश्वरसृष्टेषु भोगक्षमशरीरेषु देवतानां प्रवेशायेश्वरप्रेरणं दर्शयति–ता अब्रवीदिति। यस्मिन्नायतने छिद्रे यदिन्द्रियमुत्पन्नं या चाभिमानिदेवतोत्पन्ना तदायतनमनतिक्रम्य हे देवताः! प्रविशत ॥१-३॥

व्याख्या—जो इन्द्रियाँ और उनके अभिमानी देवता रचे गये हैं वे इस महान् सागर में अर्थात् समुद्र की भाँति अत्यन्त विस्तृत विराट् शरीर में आ पड़ें। उन्होंने समस्त इन्द्रियाँ और उसके देवता अधिष्ठानभूत विराट् देह को भूख और प्यास से संयोजित कर दिया। वे इन्द्रियाभिमानी देवता इस स्रष्टा परमात्मा से बोले—हे सर्वेश्वर! आप हमारे लिए आयतन—अधिष्ठान का विधान करें। जिस शरीर में स्थित होकर हम लोग उस देह में पर्याप्त अन्नभक्षण कर सकें। उसके बाद परमात्मा ने उन देवताओं के भोग के लिये गौ का शरीर उत्पन्न किया। देवता उनसे बोले—हमलोगों के लिए यह देह भक्षण के लिए योग्य नहीं है। गौशरीर का ऊपर दाँत न रहने पर दूर्वादि मूल का भक्षण करने में समर्थ नही हैं। इससे दूसरी दोनों ओर से दाँत शरीर युक्त सत्त्व की सृष्टि कीजिये। तब परमात्मा ने उनके लिए घोड़े का शरीर सर्जन कर दिया। देवताओं ने कहा- भगवन्! विवेक व ज्ञान का अभाव होने के कारण यह घोड़े का शरीर हमारे लिये पर्याप्त नहीं है। उसके बाद उनके लिये परमात्मा ने विवेकसम्पन्न पुरुष के शरीर का सर्जन किया। उसे देखकर वे अग्नि आदि समस्त देवता परितुष्ट हो गये और वे बोले—यह मनुष्यशरीर विवेकसम्पन्न है, समस्त पुण्यकर्मों का कारण है,

श्रीभगवत्कृपा से ही यह मिला है। परमात्मा ने उन सबों से कहा—जिस छिद्र में जो इन्द्रिय उत्पन्न हुई और जो अभिमानी देवता उत्पन्न हुए हैं उसके आयतन-अधिष्ठान को अतिक्रमण करके प्रवेश कर जाओ ॥१-३॥

अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद् दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशन् ॥४॥

तत्त्वप्रकाशिका—इत्थमनुज्ञातानां देवतानां प्रवेशं दर्शयति–योऽयमग्निर्वागिन्द्रियाभिमानी देवः, सोऽयं वाग्भूत्वा वाच्यन्तर्भूय मुखच्छिद्रं प्राविशत्। एवमुत्तरत्रापि योज्यम्। चक्षुरादीनीन्द्रियाणि स्वस्वविषये स्वातन्त्र्येण प्रवर्त्तन्ते स्वस्वाधिष्ठातृदेवताप्रेरितानि वा तादृक्शक्तिमत्वात् स्वयमेव प्रवर्त्तन्ते इत्याशङ्क्य भगवता बादरायणेन सिद्धान्तितम्—'ज्योतिराद्यधिष्ठानन्तु तदामननात्'। (ब्र.सू. २।४०।१४) ज्योतिरादिभिरग्न्यादिभिर्देवताभिरधिष्ठानमधिष्ठितं वागादिकरणजातं देवताप्रवर्त्तितं सत् स्वकार्यार्थं प्रवर्त्तते न स्वातन्त्र्येण। कुतः तदामननात्। अग्निर्वाग्भूत्वेत्यादिना प्रेर्य्यप्रेरकभावं विनाऽग्न्यादिप्रवेशस्य वैयर्थ्यं प्रसज्येत इति सूत्रार्थः। एवमन्येऽपीन्द्रियविषयकविमर्शाः द्वितीयाध्यायस्य चतुर्थखण्डे द्रष्टव्याः।

व्याख्या—इस प्रकार अनुज्ञात देवताओं का प्रवेश दिखाते हैं—वही यह वाक्-इन्द्रिय अभिमानी अग्निदेव वाणी होकर मुख के छिद्र में प्रविष्ट हो गये। इसी प्रकार वायुदेव प्राण होकर दोनों नाकों के छिद्रों में प्रविष्ट हो गये। सूर्यदेव नेत्र-इन्द्रिय होकर दोनों आँखों में प्रविष्ट हो गये। दिशाभिमानी देव श्रोत्रेन्द्रिय होकर दोनों कानों में प्रविष्ट हो गये। ओषधि और वनस्पतियों के अभिमानी देवता लोम होकर चमड़े में प्रविष्ट हो गये। चन्द्रमा मन होकर हृदय में प्रविष्ट हो गये। मृत्युदेव अपान—अधः सञ्चार वायु होकर नाभि में प्रविष्ट हो गये और जल रेत–गुह्येन्द्रिय होकर शिश्न (पुरुषलिङ्ग) में प्रविष्ट हो गये। वागादि करणसमूह अग्नि प्रभृति देवताओं के द्वारा प्रेरित होकर अपने-अपने कार्यों में प्रवृत्त होते हैं (ब्रह्मसूत्रनिम्बार्कभाष्य द्रष्टव्य २।४।१४) ॥४॥

तमशनापिपासे अब्रूतामावाभ्यामभिप्रजानीहीति। ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति। तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनापिपासे भवतः ॥५॥

इत्यैतरेयोपनिषद्यात्मषट्के द्वितीयः खण्डः ॥२॥

तत्त्वप्रकाशिका—व्यष्टिशरीरेऽपि अशनापिपासयोरपि करणाधिष्ठातृदेवतासम्बन्धं वक्तुं तयोः प्रश्नं दर्शयति—तं परमात्मानं प्रति अशनापिपासे = क्षुत्पिपासे, स्वार्थं स्थानविशेषमनुग्रहेणेत्यब्रूताम् आवाभ्यामधिष्ठानमनभिप्रजानीहि चिन्तय विधत्स्व एवमुक्तः। परमात्मा ते क्षुत्पिपासे अब्रवीत् उभे अप्येतास्वेवाग्न्यादिदेवतासु आभजामि

ततस्तास्वेव भागिन्यौ विषयभोगयुक्ते करोमीत्यब्रवीत् भगवान्, यस्मादेवं भगवतोक्तं तस्माल्लोके यस्यै कस्यै अग्न्यादिदेवतायै हविर्गृह्यते भोग्यं वस्तु समर्प्यते अस्या-मग्न्यादिदेवतायामेते क्षुत्पिपासे भागयुक्त एव भवतः, अग्निवाय्वादिदेवतानां शरी-रेष्वाहारस्वीकारे क्षुत्पिपासयोरेव तृप्तिर्भवति तथा मनुष्यशरीरेऽपि चक्षुरादिदेवतायै हविः-स्वीकारे क्षुत्पिपासे तृप्यत इति भावः ॥५॥

इत्यैतरेयोपनिषत्तत्त्वप्रकाशिकाटीकायां प्रथमाध्याये द्वितीयः खण्डः ॥२॥

व्याख्या—व्यष्टिशरीर में भूख और प्यास इन दोनों का करणाधिष्ठातृ देवता के साथ सम्बन्ध को बतलाने लिए दोनों का प्रश्न दिखलाते हैं—उस परमात्मा के प्रति भूख और प्यास अपने लिए स्थान विशेष के अनुग्रह से इस प्रकार कहने लगीं-हमारे लिए अधिष्ठान = ठहरने के लिए उचित स्थान का विधान करें। परमात्मा ने भूख और प्यास से कहा—तुम दोनों को इन अग्नि आदि देवताओं में ही मैं विषयभोगों से युक्त कर देता हूँ। क्योंकि यह भगवदुक्त वचन है इसलिये लोक में जिस किसी भी अग्नि आदि देवताओं के लिये हवि = भोग्य वस्तु समर्पित किया जाता है। इस अग्नि आदि देवता में ये भूख और प्यास भागयुक्त (भागीदार) ही होती हैं। जैसे अग्नि, वायु आदि देवताओं के शरीरों में आहार स्वीकार करने पर क्षुधा और पिपासा की ही तृप्ति होती है वैसे ही मनुष्यशरीर में भी चक्षुरादि देवता के लिये हवि स्वीकार करने पर भूख और प्यास दोनों ही हिस्सेदार होती हैं।

॥ द्वितीय खण्ड समाप्त ॥२॥

•

अथ तृतीयः खण्डः

स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति ॥१॥

सोऽपोऽभ्यतपत्ताभ्योऽभितप्ताभ्यो मूर्त्तिरजायत। या वै सा मूर्त्तिरजाय-ताऽन्नं वै तत् ॥२॥

तदेनत्सृष्टम्, पराङ्त्यजिघांसत्तद्वाचाऽजिघृक्षत्तन्नाशक्नोद्वाचा ग्रहीतुम्। स यद्धैनद्वाचाऽग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत् ॥३॥

तत्प्राणेनाजिघृक्षत् तन्नाशक्नोत् प्राणेन ग्रहीतुम्। स यद्धैनत् प्राणेना-ग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत् ॥४॥

तत्त्वप्रकाशिका—स परमात्मा पुनरप्येवं पर्य्यालोचितवान्। ये पृथिव्यादिलोकाः ये च लोकपालाः सर्वेन्द्रियशरीरदेवतारूपास्ते सर्वेऽपीमे सृष्टाः। क्षुत्पिपासाभ्याश्च संयो-जिता अत एभ्यो लोकपालेभ्योऽन्नं सृजे। अन्नमन्तरा तेषां जीवनासम्भवादिति भावः। अन्नं स्रक्ष्यामीति विचार्यान्ननिष्पादनार्थं तत्कारणजलप्रधानानि पञ्चमहाभूतान्यभ्यतपत् सर्वतः पर्यालोचनमकरोत्। ईदृशाज्जलसहितात् क्षेत्राद् व्रीह्यादयो जायन्तां स ईदृशानि मूषकादिशरीराणि मार्जारादीनामन्नभूतानि जायन्तामित्येवं सङ्कल्पं कृतवान्। ताभ्योऽद्भ्यो

जलोपलक्षितभूतेभ्यो व्रीहियवादिरूपा मूषकादिरूपा च मूर्त्तिरजायत। तत्र व्रीहियवादि-मूर्त्तिर्मनुष्यादीनामन्नं तैरद्यमानत्वात् ॥१-२॥

अन्नसृष्टिमुक्त्वाऽन्वयव्यतिरेकाभ्यां तत्स्वीकारसाधनं निश्चिनोति–तदेनत्सृष्ट-मिति। यत्सृष्टमन्नं व्रीहियवादिकं तत्र व्रीह्याद्यन्नस्य स्वकीयवधविषये विवेकज्ञानाभावाद् गन्तुमसमर्थत्वाच्च नास्ति जनात् पलायनम्। यत्तु मूषकादिरूपं तदन्नं तदेतन्मार्जारादीनां भोक्तॄणां वधहेतुत्वं निश्चित्य तेभ्यः पराङ्मुखं सदत्यजिघांसदतिशयेन हन्तुं गन्तुमैच्छत् पलायितुं प्रारभतेत्यर्थः। पलायितुमुद्युक्तं तन्मूषकादिरूपमन्नं दृष्ट्वा भोक्तृवर्गो मार्जारादि-र्वागिन्द्रियेण ग्रहीतुमैच्छत्। ततः सर्वप्रयत्नेन वागिन्द्रियं प्रयुञ्जानोऽपि तेन तदन्नं ग्रहीतुं नाशक्नोत्। इदानीन्तनोदाहरणेन सृष्टिकालीना तदशक्तिः स्पष्टीक्रियते। स भोक्तृवर्ग आदिसृष्टिकाले यद्येतन्मूषकादिरूपमन्नं वाचा गृह्णीयात् तदेदानीमपि भोक्ता तदन्नवाचकैः शब्दैरीदृशमित्युक्तिमात्रेण तृप्तो भवेत्। नापि वागिन्द्रियस्याभिधानव्यतिरेकेणाकर्षण-सामर्थ्यं किञ्चिदस्ति। न चैवमन्नवाचकशब्दोच्चारणमात्रेण तृप्तिर्दृश्यते। तस्मात्सृष्टि-कालेऽपि वाचोऽन्नस्वीकारे सामर्थ्यं नास्तीत्यनुमेयम् ॥३॥

तत्प्राणेनेति। प्राणेन = घ्राणेन स्वव्यापारेणान्नमजिघृक्षत् = ग्रहीतुमैच्छत्, तदन्नं नाशक्नोन्न समर्थोऽभवत्प्राणेन ग्रहीतुमुपादातुम्। स पूर्वजः शरीरी यद्यदि हैनत् प्राणेनाग्रहैष्यत् गृहीतवान् स्यात् सर्वोऽपि जनः अभिप्राण्याघ्राय हैवान्नमत्रप्स्यत् तृप्तोऽभविष्यत् ॥४॥

सान्वयानुवाद—सः = उस (परमात्मा) ने, ईक्षत = ईक्षण किया, नु = वितर्क में, इमे लोकाः = ये सब लोक, च = और, लोकपालाः = लोकपाल, एभ्यः = इनके लिए, अन्नं सृजे इति = अन्न की सृष्टि की। सः = उस (परमात्मा) ने, अपः = जलों को, अभ्यतपत् = तपाया, ताभ्यः अभितप्ताभ्यः = उन सब ओर से तपाये हुए जलों से अर्थात् पञ्च महाभूतों से, मूर्त्तिः = मूर्त्ति, अजायत = उत्पन्न हुई, वै = निश्चय ही, या = जो, सा = वह मूर्त्ति, अजायत = उत्पन्न हुई, तत् वै अन्नम् = वह अन्न ही है। सृष्टम् = उत्पन्न किया हुआ, तत् एतत् = वह यह अन्न, पराङ् = विमुख होकर, अत्यजिघांसत् = भागने के लिये तैयार हुआ, वाचा = वाणी द्वारा, अजि-घृक्षत् = ग्रहण करने की इच्छा की, तत् = उसे, वाचा = वाणी द्वारा, ग्रहीतुं न अशक्नोत् = ग्रहण नहीं कर सका, यत् एनत् = अगर इस अन्न को, वाचा = वाणी द्वारा, अग्रहैष्यत् = ग्रहण कर सकता, ह = निश्चय ही, अन्नम् अभिव्याहृत्य = अन्न का उच्चारण करके, एव = ही, अत्रप्स्यत् = तृप्त हो जाता है। तत् = उस अन्न को, प्राणेन = प्राण (घ्राण) के द्वारा, अजिघृक्षत् = पकड़ना चाहा, तत् = उसको, प्राणेन = प्राण (घ्राणेन्द्रिय)द्वारा, ग्रहीतुं न अशक्नोत् = पकड़ न सका, यत् = अगर, सः = वह, एनत् = इस अन्न को, ह = ही, अग्रहैष्यत् = पकड़ सकता, अन्नम् = अन्न को, अभिप्राण्य = सूँघकर, एव = ही, अत्रप्स्यत् = तृप्त हो जाता ॥१-४॥

व्याख्या—उस परमात्मा ने फिर से इस प्रकार पर्य्यालोचना की—ये पृथ्वी आदि लोक और ये लोकपाल समस्त इन्द्रिय शरीर देवता रूप हैं। वे सब भी ये उत्पन्न हुए क्षुधा

और पिपासा से संयोजित हैं, अतः इन लोकपालों के लिए मुझे अन्न की सृष्टि करनी चाहिये। अन्न के बिना इनका जीना सम्भव नहीं। 'अन्न की सृष्टि करूँगा' ऐसा विचार करके भगवान् ने अन्न-सम्पादन के लिए उसके कारण जलप्रधान पाँच महाभूतों का सब ओर से पर्यालोचन किया। ऐसे ही जल सहित क्षेत्र से व्रीहि आदि बहुत उत्पन्न हों, राज्यों में समय पर वर्षा हों और पृथ्वी प्रचुर अन्न उत्पन्न करें; इस प्रकार संकल्प किया। उन जलोपलक्षित भूतों से धान, जौ इत्यादि रूपा मूषकादि रूपा मूर्त्ति उत्पन्न हुई। धान, जौ आदि अन्न मनुष्यादि के लिए भोग्य हैं। अन्न की सृष्टि बताकर अन्वय और व्यतिरेक द्वारा उसे स्वीकार कर साधन का निश्चय करते हैं—यदि उत्पन्न किया हुआ अन्न व्रीहि-यवादि व्रीहि-यवादि का स्वकीय वध के विषय में विवेक ज्ञान का अभाव होने के कारण चलने के लिये समर्थ नहीं है और जनों से भाग नहीं सकता। यदि मूषकादिरूप वह अन्न यह मार्जार आदि भोक्ताओं के वध हेतु निश्चय करके उनसे विमुख होकर उन्हें मारने के लिए दौड़ा अर्थात् उनसे छुटकारा पाने के लिये विमुख होकर पलायन करने की चेष्टा करने लगा। उसके बाद सभी प्रयत्न द्वारा वाक्-इन्द्रिय को लगाते हुए भी उससे वह अन्न पकड़ में नहीं आ सका। वह भोक्तृवर्ग आदि सृष्टिकाल में यदि यह मूषकादि रूप अन्न को वाणी द्वारा पकड़े तब इस समय भी भोक्ता उस अन्नवाचक शब्दों द्वारा इस प्रकार की उक्ति मात्र से तृप्त हो जाते। वाग्-इद्रिय का अभिधान व्यतिरेक द्वारा आकर्षण का सामर्थ्य कुछ भी नहीं है। इस प्रकार अन्नवाचक शब्द के उच्चारण मात्र से ही तृप्त हो जाते लेकिन ऐसा देखा नहीं जाता। इसलिये सृष्टिकाल में भी वाणी का अन्न स्वीकारने में सामर्थ्य नहीं है, ऐसा अनुमान करना चाहिये। उसने अन्न को प्राण के द्वारा अर्थात् प्राण के द्वारा एवं अपने व्यापार द्वारा पकड़ना चाहा, परन्तु वह अन्न को प्राण के द्वारा पकड़ने में समर्थ नहीं हो सका। वह पूर्वज शरीरी यदि इस अन्न को प्राण द्वारा पकड़ सकता हो तो सभी व्यक्ति भी अन्न को नाक से सूँघकर ही तृप्त हो जाते ॥१-४॥

तच्चक्षुषाऽजिघृक्षत् तन्नाशक्नोच्चक्षुषा ग्रहीतुम्। स यद्धैनच्चक्षुषाऽग्रहैष्यद् दृष्ट्वा हैवान्नमत्रप्स्यत् ॥५॥

तच्छ्रोत्रेणाजिघृक्षत् तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुम्। स यद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत् ॥६॥

तत्त्वचाऽजिघृक्षत् तन्नाशक्नोत्त्वचा ग्रहीतुम्। स यद्धैनत्त्वचाऽग्रहैष्यत् स्पृष्ट्वा हैवान्नमत्रप्स्यत् ॥७॥

तन्मनसाऽजिघृक्षत् तन्नाशक्नोन्मनसा ग्रहीतुम्। स यद्धैनन्मनसाऽग्रहैष्यद् ध्यात्वा हैवान्नमत्रप्स्यत् ॥८॥

तच्छिश्नेनाजिघृक्षत् तन्नाशक्नोच्छिश्नेन ग्रहीतुम्। स यद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत् ॥९॥

तदपानेनाजिघृक्षत्तदावयत् सैषोऽन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः ॥१०॥

तत्त्वप्रकाशिका—तच्चक्षुषा तच्छ्रोत्रेण तत्त्वचा तन्मनसा तच्छिश्नेन तेन तेन करणव्यापारेणान्नं ग्रहीतुमशक्नुवन्पश्चादपानेन वायुना मुखच्छिद्रेण तदन्नमजिघृक्षत् स ग्रहीतुम् एतदन्नमावयज्जग्राहाशितवान्। अत्रापानशब्देनान्नस्य मुखबिलादन्तःप्रवेशनरूपं निगरणं कुर्वन्नन्तर्मुखो यो वायुः सोऽभिधीयते। अन्वयव्यतिरेकाभ्यां वायोरेवात्र ग्रहणे साधनत्वं निश्चित्य दार्ढ्यार्थं वायुं प्रशंसति—सैषोऽन्नस्य ग्रह इति। मुखबिलादन्तः-सञ्चारी वायुरिति यदस्ति स एषोऽन्नस्य ग्राहकः। अयमर्थोऽनुभवसिद्धः। किञ्चायं वायुर्वा अन्नद्वारेणायुष्यहेतुरेव। अन्नरसेन हि प्राणो देहे वध्यत इत्यर्थः ॥५-१०॥

सान्वयानुवाद—(उसने) तत् = उस अन्न को, चक्षुषा = आँखों से, अजिघृक्षत् = पकड़ना चाहा, तत् = उसको, चक्षुषा = आँखों के द्वारा, ग्रहीतुं न अशक्नोत् = पकड़ नहीं सका, यत् = अगर, सः = वह, एनत् = इस अन्न को, चक्षुषा = आँखों से, ह = ही, अग्रहैष्यत् = पकड़ लेता तो, ह = निश्चय ही, अन्नम् = अन्न को, दृष्ट्वा = देखकर, एव = ही, अत्रप्स्यत् = तृप्त हो जाता। (उसने) तत् = उस अन्न को, श्रोत्रेण = कानों द्वारा, अजिघृक्षत् = पकड़ना चाहा, तत् = उसको, श्रोत्रेण = कानों द्वारा, ग्रहीतुं न अशक्नोत् = पकड़ नहीं सका, यत् = अगर, सः = वह, एनत् = इसको, श्रोत्रेण = कानों द्वारा, ह = ही, अग्रहैष्यत् = पकड़ लेता तो, ह = अवश्य ही, अन्नम् = अन्न को, श्रुत्वा = सुनकर, एव = ही, अत्रप्स्यत् = तृप्त हो जाता। (उसने) तत् = उसको, त्वचा = चमड़ी द्वारा, अजिघृक्षत = पकड़ना चाहा, तत् = उसको, त्वचा = चमड़ी द्वारा, अजिघृक्षत् = पकडना चाहा, तत् = उसको, त्वचा = चमडी द्वारा, ग्रहीतुं न अशक्नोत् = पकड़ नहीं सका, यत् = अगर, सः = वह, एनत् = इसको, त्वचा = चमड़ी द्वारा, ह = ही, अग्रहैष्यत् = पकड़ सकता तो, ह = निश्चय ही, अन्नम् = अन्न को, स्पृष्ट्वा = स्पर्श करके, एव = ही, अत्रप्स्यत् = तृप्त हो जाता। (उसने) तत् = उसको, मनसा = मन से, अजिघृक्षत् = पकड़ना चाहा, तत् = उसको, मनसा = मन से, ग्रहीतुं न अशक्नोत् = पकड़ नहीं सका, यत् = अगर, सः = वह, एनत् = इसको, मनसा = मन से, ह = ही, अग्रहैष्यत् = पकड़ लेता तो, ह = अवश्य ही, अन्नम् = अन्न का, ध्यात्वा = ध्यान करके, एव = ही, अत्रप्स्यत् = तृप्त हो जाता। (उसने) तत् = उस (अन्न) को, शिश्नेन = लिङ्ग द्वारा (जिसके द्वारा मूत्र त्याग किया जाता है), अजिघृक्षत् = पकड़ना चाहा, तत् = उसको, शिश्नेन = शिश्न द्वारा, ग्रहीतुं न अशक्नोत् = पकड़ नहीं सका, यत् = अगर, सः = वह (पुरुष), एनत् = इस (अन्न) को, शिश्नेन = शिश्न द्वारा, ह = ही, अग्रहैष्यत् = पकड़ लेता तो, ह = अवश्य ही,अन्नं विसृज्य (त्यक्त्वा) एव अत्रप्स्यत् = अन्न का त्याग करके ही तृप्त हो जाता। तत् = उस (अन्न) को, अपानेन = अधःसञ्चार वायु के द्वारा, अजिघृक्षत् = पकड़ना चाहा, तत् = उस को, आवयत् = पकड़ लिया, सः = वह, एषः = यह, अन्नस्य = अन्न का , ग्रहः = ग्रहण करनेवाला, यत् = जो, वायुः = वायु, अन्नायुः = अन्न से आयु बढ़ती है, वै = यह प्रसिद्ध है, यत् = जो, एषः = यह, वायुः = वायु है ॥१०॥

व्याख्या—वह पुरुष आँखों से, कानों से, चमड़ी से, मन से, लिङ्ग से उस-उस करण-व्यापार से उस अन्न को पकड़ नहीं सका। बाद में नीचे सञ्चार करनेवाली अपानवायु के मुखछिद्र से उस अन्न को ग्रहण करना चाहा, उससे वह उसको ग्रहण कर लिया। यहाँ अपान शब्द से अन्न का मुखविल से अन्त:प्रवेशन रूप निगरण करते हुए अन्तर्मुख जो वायु है वही (वायु पद से) कहा जाता है। यहाँ अन्वय और व्यतिरेक द्वारा वायु के ही ग्रहण में साधनत्व निश्चित करके दाढ्यार्थ वायु की प्रशंसा करते हैं। मुखबिल से अन्त:सञ्चारी वायु है, वही यह अन्न को ग्रहण करनेवाला है। यह अर्थ अनुभव सिद्ध है। यह वायु अन्न द्वारा आयु का ही कारण है। अन्न के रस से ही प्राण शरीर में बँध जाता है ॥५-१०॥

स ईक्षत कथं न्विदं मदृते स्यादिति स ईक्षत कतरेण प्रपद्या इति। स ईक्षत यदि वाचाऽभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोऽहमिति ॥११॥

तत्त्वप्रकाशिका—भोगाधिष्ठानभोगसाधनभोग्यभोगानां सृष्टिमभिधाय भोगस्वामिनं दर्शयितुं सर्वेश्वरस्य सङ्कल्पमाह—स ईक्षत इति। यदिदं देहेन्द्रियतदभिमानिदेवतातदीयान्नस्वीकाररूपमस्ति, तदिदं सर्वं मदृते मदात्मकं भोगस्वामिनं प्रत्यगात्मानं विना कथं न नाम स्यान्न कथञ्चिदुपपद्यते। नहि नगरस्वामिनं राजानं विहाय पुरस्य पौरजनानां वा रचना शोभते, तस्माज्जीवात्मना सह मया देहे प्रवेष्टव्यमित्यर्थः। प्रवेशद्वारविचारं दर्शयति—स ईक्षत इति। द्वावत्र प्रवेशमार्गौ पादाग्रं मूर्ध्नि ब्रह्मरन्ध्रं च। तयोर्मध्ये कतरेण केन मार्गेण प्रपद्ये = प्रविशानि सर्वनियन्तारमनपेक्ष्य वागादयोऽभिवदनव्यापारेषु स्वतन्त्राः कर्त्तारः स्युस्तदानीमहं को नाम स्यां न कोऽपि भवेयम्। अस्ति कश्चिद् देहेन्द्रियादिभ्यो विलक्षणः सत्यज्ञानानन्दस्वरूपः परमात्मा इत्येवं कश्चिदपि न जानीयात्। यदा त्वहमेव सर्वेषां करणानां नियन्ता वागादयस्तु मया प्रेरिताः सन्तोऽभिवदनादिक्रियाः कुर्युस्तदानीं तत्प्रेरकः कश्चिदस्तीति मम सद्भावोऽनुमातुं शक्यते। सोऽयमनुमानेन परमात्मसद्भाव उषस्तब्राह्मणे समाम्नायते–'यः प्राणेन प्राणिति स त आत्मा सर्वान्तर' इति ॥११॥

सान्वयानुवाद—सः = उस (परमात्मा) ने, ईक्षत = ईक्षण किया, नु = वितर्क में, इदम् = यह, मद् ऋते = मेरे बिना, कथम् = कैसे, स्यात् = रहेगा, इति = ऐसा निश्चय कर, सः = उसने, ईक्षत = ईक्षण किया, यदि = अगर, वाचा = वाणी द्वारा, अभिव्याहृतम् = कहने की क्रिया (वाक्यालाप) कर ली, यदि = अगर, प्राणेन = घ्राण-इन्द्रिय द्वारा, अभिप्राणितम् = सूँघने की क्रिया कर ली, यदि = अगर, चक्षुषा = नेत्र-इन्द्रिय द्वारा, दृष्टम् = देख लिया, यदि = अगर, श्रोत्रेण = श्रवणेन्द्रिय द्वारा, श्रुतम् = सुन लिया, यदि = अगर, त्वचा = त्वक् इन्द्रिय द्वारा, स्पृष्टम् = स्पर्श कर लिया, यदि = अगर, मनसा = मन द्वारा, ध्यातम् = ध्यान कर लिया, यदि = अगर, अपानेन = अपान द्वारा, अभ्यपानितम् = अन्न ग्रहण कर लिया, यदि = अगर,

शिश्नेन = शिश्न द्वारा, विसृष्टम् = मूत्र तथा वीर्य का त्याग कर लिया। अथ = इसके बाद, अहम् = मैं, कः = कौन हूँ, इति, सः = उसने, ईक्षत = ईक्षण किया, कतरेण = किस मार्ग से, प्रपद्ये इति = मुझे प्रवेश करना चाहिये।

व्याख्या—भोगों का अधिष्ठान, भोगों के साधनों का एवं भोग्य भोगों की सृष्टि बताकर भोगस्वामी को दिखलाने के लिए सर्वेश्वर परमात्मा के संकल्प को श्रुति कहती है—यह जो देह इन्द्रिय और उसके अभिमानी देवता तदीय अन्न स्वीकार रूप है, मेरे बिना वह सब मेरे अभिन्न स्वरूप भोगस्वामी प्रत्यगात्मा के बिना अकेला किस प्रकार रहेगा। यह कैसे उपपन्न हो सकता है ? नगर के स्वामी राजा को छोड़कर पुर अथवा पुरवासी जनों की रचना शोभा नहीं देती है। इसलिये जीव के साथ मुझे शरीर में प्रवेश करना चाहिये। प्रवेशद्वार को दिखलाते हैं—यहाँ प्रवेशमार्ग दो हैं, पैर का अग्र और सिर पर ब्रह्मरन्ध्र है। उन दोनों के बीच में किस मार्ग में से मैं प्रविष्ट होऊँ। सर्वनियन्ता परमात्मा की अपेक्षा न कर वाक्-आदि बोलने के क्रियाव्यापारों में स्वतन्त्र कर्त्ता वाले हों-उस समय मैं कौन हूँ ? कोई भी नहीं हूँ। कोई है शरीर-इन्द्रिय आदि से विलक्षण सत्यस्वरूप, ज्ञानस्वरूप, आनन्दस्वरूप परमात्मा इस प्रकार कोई भी नहीं जानता। जब मैं ही सभी करणों का नियन्ता हूँ, वाक् आदि इन्द्रियाँ तो मेरे द्वारा प्रेरित होकर कहने की क्रियाएँ कर रही हैं; वे करें तब उनके प्रेरक कोई है। जैसे कि भक्त ध्रुव ने श्रीभगवान् का स्तवन करते हुए कहा है—समस्त शक्तियों को धारण करने वाले जिन भगवान् श्रीवासुदेव ने मेरे अन्तःकरण में प्रविष्ट होकर मेरी सोयी हुई वाणी को जागृत किया एवं कर, चरण आदि अन्यान्य जड़ इन्द्रियों को चेतन किया है, मैं उन आदि-पुराणपुरुष परमात्मा को सिर झुकाकर प्रणाम करता हूँ। अतः हम सब प्राणी परमात्मा के ही सद्भाव का अनुमान कर सकते हैं।

स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत। सैषा विदृतिर्नाम द्वास्तदेतन्नान्दनं तस्य त्रय आवसथास्त्रयः स्वप्ना अयमावसथोऽयमावसथोऽयमावसथ इति ॥१२॥

तत्त्वप्रकाशिका—अथ प्रवेशं दर्शयति—स सर्वेश्वर एतमेव मूर्धमध्यभागमेव कपालसन्धिरूपां सीमानं स्थानविशेषं विदार्य = छिद्रं कृत्वा, तच्छिद्ररूपद्वारा ज्ञानादि-सकलशक्तिसहितः सन् देहमध्ये प्राविशत्। मूर्द्धगतं प्रवेशद्वारं प्रशंसति-सैषेति। सेयं हि प्रसिद्धा द्वाः सैषा विदृतिः विदारितत्वाद्विदृतिर्नाम प्रसिद्धा तदेतन्नान्दनं नन्दनमेवानान्दनं, नन्दयत्यनेन द्वारेण गत्वा परस्मिन् ब्रह्मणि शरीरे प्रविष्टस्य सञ्चारस्थानानि तेष्ववस्था-विशेषांश्च दर्शयति-तस्येति। यथा महाराजस्य क्रीडार्थमुपर्यधोभागेन वर्त्तमानाः प्रासादस्य भूमयो निर्मीयन्ते। एवं तस्यात्मनः शरीरे क्रीडनार्थं त्रय अवस्थास्त्रीणि स्थानानि निर्मि-तानि, त्रयः स्वप्नाः जाग्रत्स्वप्नसुषुप्त्याख्याः नेत्रकण्ठहृदयाख्यानि स्थानानि हस्ताग्रेण अयमावसथ इत्यादिना प्रदर्श्यन्ते, तेषु हि जागरणाद्यवस्थानिष्पत्तिः। तदुक्तम्—'नेत्रे जागरितं विद्यात् कण्ठे स्वप्नं समादिशेत्। सुषुप्तं हृदयस्थं तु तुरीयं मूर्ध्नि संस्थितम्' ॥ इति ॥१२॥

सान्वयानुवाद—सः = उसने, एतम् एव = इस मूर्ध मध्य भाग को ही, सीमानम् = सीमा स्थान विशेष को, विदार्य = विदीर्ण (चीर) कर, एतया द्वारा = इसके द्वारा, प्रापद्यत = शरीर के मध्य में प्रवेश किया, सा = वह, एषा = यह, द्वाः = द्वार, विदृतिः नाम = विदृति नाम से जाना जाता है, तत् = वही, एतत् = यह, नान्दनम् = आनन्द देने वाला, तस्य = उस आत्मा के, त्रयः = तीन, आवसथाः = अवस्थाएँ हैं, त्रयः = तीन, स्वप्नाः = स्वप्न हैं, अयम् = यह, आवसथः = अवस्था, अयम् = यह, आवसथः = अवस्था, अयम् = यह, आवसथः = अवस्था है ॥१२॥

व्याख्या—अब प्रवेश को दिखलाते हैं—वह सर्वात्मा परमात्मा इस मूर्ध मध्य कपालसन्धि रूपा सीमा स्थान विशेष को छिद्र करके उस छिद्र रूप द्वार से ज्ञान आदि सकल शक्तिसहित शरीर के मध्य में प्रविष्ट हो गये। वही यह प्रसिद्ध द्वार विदारित होने के कारण विदृति नाम से प्रसिद्ध है। नन्दन ही नान्दन आनन्दित करता है, इस द्वार से जाकर परब्रह्म में ज्ञानी लीन हो जाते हैं। इस ब्रह्मरन्ध्रद्वार से जाकर परब्रह्म शरीर में प्रविष्ट ज्ञानी उपासक के अवस्था-विशेषों को श्रुति दिखलाती है—जिस प्रकार चक्रवर्त्ती सम्राट् के खेल के लिए ऊपर और नीचे भाग से वर्त्तमान प्रासाद की भूमियाँ निर्मित रहती हैं। इस प्रकार उस आत्मा के शरीर में खेल के लिए तीन अवस्थाएँ निर्मित हैं। जैसे जाग्रत्, स्वप्न और सुषुप्ति—ये तीन अवस्थाएँ होती हैं जो क्रमशः नेत्र, कण्ठ और हृदय नामक स्थान हैं। इस विषय में कहा गया है—नेत्र में जाग्रत्, कण्ठ में स्वप्न और हृदय में सुषुप्त तथा मूर्धा में तूर्य अवस्था स्थित जानो ॥१२॥

स जातो भूतान्यभिव्यैख्यत् किमिहान्यं वावदिषदिति। स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिती३ ॥१३॥

तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः ॥

इति तृतीयः खण्डः ॥

इत्यैतरेये द्वितीयारण्यके चतुर्थोऽध्यायः।

उपनिषत्सु प्रथमोऽध्यायः।

तत्त्वप्रकाशिका—स प्रत्यगात्मा शरीरे वर्त्तमानः सन् कदाचिदीश्वरानुग्रहाद् गुरूपदेशद्वारा भूतान्याकाशादीनि प्राणिनश्चाभिव्यैख्यत् सर्वतो विवेकेन ज्ञातवान्, आकाशादीनि भूतानि प्राणिदेहाश्च कुत उत्पद्यन्ते केन वा रक्ष्यन्ते कस्मिन् वा प्रलीयन्ते ? इत्येवं शास्त्रं विविच्य सर्वस्य संसारस्य ब्रह्मात्मकत्वं ज्ञातवान्। इह जगति अन्यं ब्रह्मव्यतिरिक्तं वावदिषत् किमिति का क्व नोक्तवानित्यर्थः। सर्वं चिदचिदात्मकं वस्तु ब्रह्मभिन्नाभिन्नं ज्ञातवानिति भावः। स प्रत्यगात्मा एतमेव जीवान्तर्यामितया प्रविष्टं परमात्मानं ब्रह्मापश्यत् ब्रह्मत्वेन निश्चितवान्। कीदृशं ब्रह्म ? ततमम्-एकतकारो लुप्तः, अतिशयेन ततं = विस्तृतम् ॥३॥

तस्मादिन्द्रो नाम परमात्मा, इन्द्रो ह वै नाम सुप्रसिद्धो लोके नन्विन्द्रो मायाभिरित्यादाविन्द्र इति प्रसिद्धो न त्विदन्द्र इत्यत आह—तमेवमिति। तमेवमिदन्द्रं सन्तमिन्द्र इति परोक्षेण परोक्षाभिधानेता चक्षते ब्रह्मविदः परोक्षप्रियाः परोक्षनामग्रहणप्रियाः। इव हि यस्माद् देवाः। द्विरुक्तिः प्रकृताध्यायसमाप्त्यर्था।

इत्यैतरेयोपनिषत्तत्त्वप्रकाशिकाटीकायां द्वितीयारण्यके चतुर्थाध्याये तृतीयः खण्डः।

सान्वयानुवाद—जातः सः = जीव रूप से उत्पन्न हुए वह प्रत्यगात्मा ने, भूतानि = आकाशादि पञ्च महाभूतों को, अभिव्यैख्यत् = सब ओर से विवेक द्वारा जाना, इह = इस जगत् में, अन्यम् = ब्रह्म के व्यतिरिक्त, किम् = कौन है, इति वावदिषत् = यही कहा है, सः = उसने, एतम् = इस, पुरुषम् = पुरुष को, एव = ही, ततमम् = व्याप्त, ब्रह्म = ब्रह्म के रूप में, अपश्यत = देखा, इति = अहो ! ये बड़े सौभाग्य की बात है कि इदम् अदर्शम् = इस गुणी ब्रह्म को मैंने अपनी आँखों से देख लिया ॥१३॥

तस्मात् = इसलिये, इदन्द्रः नाम = वह इदन्द्र नामवाला है, ह वै = निश्चय ही, इदन्द्रः नाम = इदन्द्र नामवाला ही है, इदन्द्रम् = इदन्द्र, सन्तम् = होते हुए, तम् = उस परमात्मा को, परोक्षेण = परोक्ष द्वारा, इन्द्रः = परम ऐश्वर्यवान् सर्वगुण-सम्पन्न, इति = इस प्रकार, आचक्षते = पुकारते हैं, हि = यह बिल्कुल ही सच्ची बात है, देवाः = देवगण, परोक्षप्रियाः इव = परोक्ष नामग्रहण प्रिय हैं, हि देवाः परोक्षप्रियाः इव = पूर्ववत् अर्थ ज्ञेय ॥१४॥

व्याख्या—उस प्रत्यगात्मा (जीव) ने शरीर में वर्त्तमान कभी ईश्वर के अनुग्रह से तथा सद्गुरु के सदुपदेश द्वारा आकाशादि पञ्च महाभूतों को और प्राणियों को सब ओर से भलीभाँति जाना। यह दृश्यमान जड़-चेतन किससे उत्पन्न होते हैं, किस के द्वारा ये सुरक्षित हैं और किस में लीन होते हैं ? इस प्रकार शास्त्र विचार कर सम्पूर्ण संसार की ब्रह्मात्मकता की जानकारी हुई। इस जगत् में ब्रह्मव्यतिरिक्त कौन है–ऐसा कहा; कौन है, कहाँ है–ऐसा नहीं कहा। समस्त स्थावर-जङ्गम, जड़-चेतन वस्तु ब्रह्म से भिन्न होते हुए भी अभिन्न है–ऐसा अवगत हुआ। उस प्रत्यगात्मा ने सभी प्राणियों में अन्तर्यामी रूप से प्रविष्ट परमात्मा को देखा और ब्रह्म रूप से निश्चय किया। 'ततमम्' ब्रह्म का विशेषण है। एक वकार लुप्त है। जो अतिशय विस्तृत है ॥१३॥

इसलिये इन्द्र नाम परमात्मा का है, इन्द्र ही नाम लोक में सुप्रसिद्ध है। 'इन्दि परमैश्वर्ये'। इन्द्र = परमात्मा परम ऐश्वर्यवाले हैं। उनका ही नाम 'इदन्द्र' = सर्वत्र स्थित तथा व्याप्त इन्द्र–इस परोक्ष नाम से ब्रह्मविद् लोग पुकारते हैं, क्योंकि वे परोक्ष नाम ग्रहण करना पसन्द करते हैं। 'परोक्षप्रिया इव हि देवाः' यह द्विरुक्ति प्रकरण तथा अध्याय की समाप्ति के लिये है।

॥ तृतीय खण्ड समाप्त ॥३॥

प्रथम अध्याय समाप्त ॥१॥

•

अथ द्वितीयोऽध्याय:

आरण्यकक्रमेण पञ्चमोऽध्याय: । तत्र प्रथम: खण्ड: ।

पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेत: । तदेतत्सर्वेभ्योऽङ्गेभ्य-स्तेज: सम्भूतमात्मन्येवात्मानं बिभर्ति तद्यदा स्त्रियां सिञ्चत्यथैनज्जनयति तदस्य प्रथमं जन्म ॥१॥ तत् स्त्रिया आत्मभूयं गच्छति यथा स्वमङ्गं तथा तस्मादेनां न हिनस्ति साऽस्यै तमात्मात्मानमत्र गतं भावयति ॥२॥ सा भावयित्री भावयितव्या भवति ।

तत्त्वप्रकाशिका—अयं = जीवात्मा, आदित: = प्रथमत:, पुरुषे = पितृशरीरे गर्भो भवति, न चात्र स्त्रीगर्भवद् उदरवृद्ध्या सोऽभिव्यज्यते । किन्तु यदेतत् पितृशरीरे सप्तधातुरूपं रेतोऽस्ति तदेव गर्भ इत्युच्यते, तस्मिन् रेतसि जनिष्यमाणजीवस्य प्रविष्टत्वात् । स्वर्गाद्वा नरकाद्वा वृष्टिद्वारा भूमौ समगतो जीवो व्रीहियवाद्यन्नद्वारा पितृशरीरे प्रविशति । एतच्च पञ्चाग्निविद्यायां प्रपञ्चेनाम्नातम् । तस्य गर्भस्य जन्मप्रकारं दर्शयति-तदेतदित्यादिना । पुरुषे गर्भत्वेन व्यवस्थितं यद्रेतोऽस्ति तदेतत्तस्मिन् पुरुषशरीरे आपाद-मस्तकं सर्वेभ्योऽवयवेभ्य: सारभूतं निर्गतं भवति, तच्च सर्वावयवनिर्गतरेतोरूपमन्नं सारमात्मानं स्वस्यैव रूपान्तरभूतमात्मन्येव स्वशरीर एवासौ पुरुषो बिभर्त्ति पोषयति । तद्रेतो यदा यस्मिन् काले भार्यर्तुमती तस्यां योषाग्नौ स्त्रियां सिञ्चति । अथ तदैनद्रेत आत्मना गर्भभूतं जनयति पिता । तदस्य पुरुषस्य स्थानान्निर्गमनं रेतसेककाले रेतो-रूपेणास्य संसारिण: प्रथमं जन्म प्रथमावस्थाभिव्यक्ति: । स्त्रीयोनौ प्रविष्टं तत्पुरुष-रेतस्तस्या: स्त्रिया आत्मभूयं स्वशरीरभावं गच्छति यथा स्वमङ्गं हस्तादिकं शरीरात् न पृथग्भूतं तद्वत् तस्मात्स्वशरीरत्वेनैकीभावात् कारणादेनां स्त्रियं न हिनस्ति = उदर-लग्नबाणवद्धिंसां न करोति । तद्गर्भद्वारेण स्त्रीपुरुषयो: परस्परमुपकार्योपकारकभावं दर्शयति—सेति । सा = गर्भधारिणी स्त्र्यत्र गतं स्वशरीरे प्रविष्टमस्य पुरुषस्य रेत: सेक्तू रेतसमात्मानं पुत्ररूपं भावयति परिपालयति यस्मात् सा स्त्री गर्भपरिपालनेन भावयित्री पुरुषस्यैव पालयित्री तस्मात् कारणात् तेन पुरुषेण सा भावयितन्याऽभीष्टान्नपानवस्त्रादि-प्रदानेन पालयितव्या भवति ॥२॥

सान्वयानुवाद—अयम् = यह (जीवात्मा), ह वै = निश्चय ही, आदित: = प्रथम तो, पुरुषे = पुरुषशरीर में, गर्भ: भवति = गर्भ बनता है, यत् = जो, एतत् = यह, रेत: = वीर्य है, तत् = वह, एतत् = यह, सर्वेभ्य: अङ्गेभ्य: = सभी अङ्गों से, सम्भूतम् = भलीभाँति उत्पन्न हुआ, तेज: = तेज है, आत्मानम् = अपने को, आत्मनि = अपने में, एव = ही, बिभर्त्ति = धारण करता है, यदा = जब, तत् = उसको, स्त्रियाम् = स्त्री में, सिञ्चति = सिञ्चन करता है, अथ = तब, एनम् = इसको, जनयति = प्रादुर्भाव करता है, तत् = वह, अस्य = इसका, प्रथमम् = पहला, जन्म = जन्म है । तत् = वह, स्त्रिया: = स्त्री के, आत्मभूयम् = अपने शरीरभाव को, गच्छति = प्राप्त हो जाता है, यथा = जैसे, स्वम् = अपना, अङ्गम् = अङ्ग होता है,

तथा = ठीक वैसे, तस्मात् = इसी कारण से, एनाम् = इस स्त्री को, न हिनस्ति = उदर लग्न बाण की भाँति हिंसा नहीं करता, सा = वह (स्त्री), अत्रगतम् = यहाँ आये हुए, अस्य = इस (अपने पतिदेव) के, आत्मानम् = वीर्यरूप बिन्दु को, एतम् भावयति = इसे सावधानी से परिपालन करती है, सा = वह, भावयित्री = गर्भ का पालन-पोषण करनेवाली स्त्री, भावयितव्या भवति = पालन-पोषण करने योग्य होती है।

व्याख्या—यह जीवात्मा पहले तो जन्मदाता पिता के शरीर में वीर्यरूप से गर्भ बनता है। यहाँ स्त्री की भाँति उदर की वृद्धि से वह अभिव्यक्त नहीं होता। इस बारे में श्रीमद्भागवत में लिखा है—जीव पिता के वीर्य द्वारा माता के उदर में प्रवेश करता है। एक रात्रि में शुक्र और शोणित (वीर्य और रज) मिलकर जब एक हो जाते हैं तो उसे कलल कहते हैं। तृतीय स्कन्ध का इकतीसवाँ अध्याय द्रष्टव्य है। पिता के शरीर में सात धातु रूप रेत है, उसे ही गर्भ कहा जाता है। जन्म लेने वाला जीव उसी रेत में प्रवेश करता है। स्वर्ग से अथवा नरक से निकलकर वह जीव वृद्धि द्वारा भूमि पर व्रीहि-यव आदि अन्न द्वारा पिता के शरीर में प्रवेश करता है। ये सारी बातें पीछे पञ्चाग्निविद्या में विस्तार से बतायी गयी है। उस गर्भ के जन्मप्रकार को दिखलाते हैं—पुरुष में गर्भ रूप से स्थित जो रेत है वही इस पुरुष-शरीर में पैरों से लेकर सिर तक समस्त अवयवों से साररूप निकलता है। वही समस्त अवयवों से निर्गत रेतस रूप अन्नसार आत्मा को ही (दूसरे रूप को ही) अपने शरीर में ही वह पुरुष धारण-पोषण करता है। उस रेत (वीर्य) को जिस समय ऋतुमती स्त्री में सिञ्चन (स्थापित) करता है इसके बाद पिता अपने उसी वीर्य को माता के उदर में गर्भ रूप से उत्पन्न करता है। यही जीव का पहला जन्म है। मनुष्य योनि प्राप्त होने के पूर्व कूकर, सूकर आदि चौरासी लाख योनि को क्रम से भोगकर फिर जीव मनुष्ययोनि में आता है। स्त्री की योनि में प्रविष्ट वह पुरुष का वीर्य स्त्री के अपने शरीर में एक 'कलल' भाव को प्राप्त हो जाता है। जिस प्रकार अपना अङ्ग होता है ठीक उसी प्रकार वह होता है। इसलिये इसकी हिंसा नहीं करता अर्थात् गर्भवती स्त्री को किसी तरह पीड़ा नहीं पहुँचाता है। उस गर्भ द्वारा स्त्री और पुरुष का एक-दूसरे से उपकार्य और उपकारक भाव को दिखलाते हैं—वह गर्भधारिणी स्त्री अपने शरीर में प्रविष्ट हुए अपने पति के सन्तति रूप वीर्य का परिपालन करती है। क्योंकि वह स्त्री गर्भपरिपालन द्वारा भावयित्री है, पुरुष की ही पालयित्री है, इसी कारण से पुरुष द्वारा स्त्री पालन-पोषण करने योग्य है अर्थात् वह अभीष्ट अन्न-पान-वस्त्रादि प्रदान द्वारा पालयितव्या है। कहा भी गया है—'पितुरधिका माता गर्भधारणपोषणात्' ॥१-२॥

तं स्त्री गर्भं बिभर्त्ति सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति।

तत्त्वप्रकाशिका—स्त्रीपुरुषयोरुभयोरपि पुत्रं प्रत्युपकारकत्वं दर्शयति—पुत्ररूपं गर्भं मातृरूपा स्त्र्यत्यन्तं प्रयासं सोढ्वा नव दश वा मासानुदरे धारयित्वा पोषयति, स च पिताऽग्र एव प्रसवात्पूर्वमेव निष्पन्नं कुमारं जन्मनोऽग्रे प्रसवादूर्ध्वमधिभावयति। अधिकत्वेन शास्त्रीयजातकर्मादिना संस्कारं करोति।

सान्वयानुवाद—स्त्री = स्त्री, अग्रे = प्रसव के पहले, तम् गर्भम् = उस गर्भ को, बिभर्त्ति = धारण करती है, सः = पुरुष, अग्रे = पहले, एव = ही, कुमारम् = नवजात शिशु का, जन्मनः = जन्म से, अधिभावयति = जन्म से नामकरण द्विजाति संस्कार करता है।

व्याख्या—पुत्ररूप गर्भ को मातृरूपा स्त्री अत्यन्त प्रयास से सहन कर नौ अथवा दस महीनों तक उदर में धारण कर पालन-पाषण करती है और पिता प्रसव से पूर्व ही निष्पन्न कुमार को (प्रसव होने से पहले) अधिक-से-अधिक शास्त्रीय जातकर्म आदि संस्कार करता है। ब्राह्मण, क्षत्रिय और वैश्य ये तीन ही वर्णों का शास्त्रीय जातकर्म द्विजाति नामकरण संस्कार करने का विधान है। अतः 'तस्माच्छास्त्रं प्रमाणं ते' इस गीताशास्त्र के अनुसार उसका सभी द्विजातियों को पालन करना चाहिये।

स यत्कुमारं जन्मनोऽग्रेऽधिभावयत्यात्मानमेव तद्भावयत्येषां लोकानां सन्तत्या एवं सन्तता हीमे लोकास्तदस्य द्वितीयं जन्म ॥३॥

सोऽस्याऽयमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते। अथास्याऽयमितर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म ॥४॥

तत्त्वप्रकाशिका—कुमारसंस्कारेण पितुरुपयोगं दर्शयति—स यत्कुमारमिति। पुत्रसंस्कार इति यदस्ति तेन पिता स्वस्यैव संस्कारं करोति, पुत्रस्य स्वदेहरूपत्वात्। पुत्रपौत्रादय इमे जना लोकास्तेषामविच्छेदाय संस्कृतपुत्रोत्पादनम्, एवं पुत्रोत्पादनादि-कर्माविच्छेदेनैव ते सन्तताः प्रबन्धरूपेण वर्त्तन्ते अन्यथा विच्छिद्येरन्। मातृशरीरान्नि-र्गमनस्य पूर्वोक्तजन्मापेक्षमद्वितीयत्वं दर्शयति—तदस्येति। जनकस्य पुत्रप्रयुक्तमुपयोगं दर्शयति–सोऽस्यायमात्मेति। अस्य पितुर्द्वावात्मानौ देहौ तयोर्मध्येऽयमात्मा पुत्ररूपो देहः पुण्येभ्यः कर्मभ्यः शास्त्रोक्तकर्मनिष्पादनार्थं प्रतिधीयते = स्वस्य प्रतिनिधित्वेन गृहेऽ-वस्थाप्यते। ननु किमनेन प्रतिनिधिना स्वयमेव कुतो न करोतीत्यत आह—अथा-स्यायमितर इति। अस्य पितुरितर आत्मा स्थाविरो देहः कृतकृत्यः कृतान्ये-तज्जन्मप्रयुक्तानि कृत्यानि कर्माणि येनासौ कृतकृत्यः। वयोगतो वयसा पूर्वकर्म-सम्पादितेनायुषा हीनः प्रैति = म्रियते। पूर्वोक्तजन्मद्वयमपेक्ष्य जन्मान्तरं दर्शयति–स इत इति। स वृद्धपितेतोऽस्माज्जरठदेहात्प्रयत्नेन निर्गच्छन्नेव स्वर्गे नरके मनुष्यलोके वा स्वकर्मानुसारेण जायते। तदस्य तृतीयं जन्म। अनेन जन्मत्रयोपवर्णनेन संसाराद्विरक्ति-रुपजायते। न हि मातृपितृमलद्वयरूपदेहस्य निरन्तरं धारणादन्यदधिकं जुगुप्सितं वैराग्य-कारणमुदाहर्त्तुं शक्यम्। अतएव विष्णुपुराणे पठ्यते—

'स्वदेहाशुचिगन्धेन न विरज्येत यः पुमान्।
विरागकारणं तस्य किमन्यदुपदिश्य वै' ॥

सान्वयानुवाद—सः = वह (पिता), यत् = जो, जन्मनः = जन्म के, अग्रे =

पहले, आत्मानम् एव = आत्मा को ही, अधिभावयति = संस्कारादि करता है, तत् = वह, एषाम् = इन, लोकानाम् = लोकों को, सन्तत्या = सन्तति द्वारा, भावयति = अपने वंश को फैलाता है, हि = क्योंकि, एवम् = इसी प्रकार, इमे = ये (सब), लोका: सन्तता: = लोक (जन) विस्तार को प्राप्त हुए हैं, तत् = वह, अस्य = इसका, द्वितीयम् = दूसरा जन्म है। स: = वह, अयम् = यह, अस्य = इस (पिता) के, पुण्येभ्य: = शुभ कर्मों के लिये, प्रतिधीयते = प्रतिनिधि रूप से घर में रहता है, अथ = इसके बाद, अस्य = इसका, अयम् = यह, इतर: = दूसरा, आत्मा = आत्मा, कृतकृत्य: = कृतकृत्य, वयोगत: = अवस्था पूरी होने पर, प्रैति = मरता है, स: = वह, इत: = यहाँ से, प्रयन् = जाकर, एव = ही, पुन: = फिर, जायते = उत्पन्न हो जाता है, तत् = वह, अस्य = इसका, तृतीयम् = तीसरा, जन्म = जन्म है ।।४।।

व्याख्या—कुमार के संस्कार से पिता के उपयोग को दिखलाते हैं—पिता अपना ही संस्कार करते हैं, पुत्र तो साक्षात् अपने पिता का ही देहरूप आत्मा है। पुत्र और पौत्र आदि ये सभी जन उनके अविच्छेद के लिये संस्कृत पुत्रोत्पादन है एवं पुत्रोत्पादन आदि कर्म अविच्छेद से ही वे परम्परा प्रबन्ध रूप से रहते हैं। अन्यथा विच्छिन्न हो जायेंगे। माता के शरीर से निकलने में पहले बताये गये जन्म की अपेक्षा अद्वितीयत्त्व को दिखलाते हैं। जनक (पिता) के पुत्रप्रयुक्त उपयोग को दिखलाते हैं—पिता के दो आत्मा (देह) के मध्य में यह आत्मा पुत्ररूप देह शास्त्र में कहे गये पुण्यकर्म सम्पादन के लिये अपने पिता के प्रतिनिधि रूप से घर में रहता है। शङ्का—क्या इस प्रतिनिधि द्वारा स्वयं ही क्यों नहीं करता ? इस पर कहते हैं—इस पिता की दूसरी आत्मा स्थाविर देह से इस जन्म में किये गये कर्मों से वह कृतकृत्य हो जाता है। वह पूर्व कर्मों से सम्पादित आयु से हीन होकर मरता है। पहले बताये गये दोनों जन्मों की अपेक्षा करके जन्मान्तर को दिखलाते हैं—वह वृद्ध पिता इस वृद्ध शरीर से निकल कर ही स्वर्ग में, नरक में अथवा मनुष्यलोक में अपने कर्मानुसार जन्म लेता है। वह इसका तीसरा जन्म है। इस जन्मत्रय के उपवर्णन द्वारा संसार से विरक्ति उपजात होती है। पिता के वीर्य और माता के विष्ठा-मूत्र भरे देह को हमेशा धारण किये जाने से इससे अधिक जुगुप्सित वैराग्य का कारण उदाहरण के लिये नहीं हो सकता है। इसलिये विष्णुपुराण में महर्षि ने पढ़ा है—जो व्यक्ति अपने शरीर रूपी अशुचि गन्ध से विरक्त नहीं होता उसके लिये दूसरा क्या वैराग्य कारण का उपदेश किया जाय।

तदुक्तमृषिणा। गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा। शतं मा पुर आयसीररक्षन्नध: श्येनो जवसा निरदीयमिति गर्भ एवैतच्छयानो वामदेव एवमुवाच ।।५।।

तत्त्वप्रकाशिका—प्रागुदाहृतप्रबन्धेन संसारस्य यत्कष्टत्वमुपवर्णितं यश्च संसार-निवर्त्तकोपायो विवक्षित: तदुभयमप्यर्थजातं केनचिन्मन्त्रेणाभिहितं तन्मन्त्रं पठति—गर्भ इति। अहं वामदेवाख्यो मुनि: गर्भे नु वितर्के मातु: गर्भ एवावस्थित: सन्नेषामग्नि-

वाय्वादित्यदेवतानां विश्वा जनिमानि सर्वाण्यपि जन्मान्यन्ववेदमनुक्रमेण विदितवानस्मि। औपनिषदात्मज्ञानं मम सम्पन्नमित्यर्थः। अथैतस्माज्ज्ञानोदयादधस्तान्मां वामदेवमायसीर्लोहनिर्मितशृङ्खलासमानाः, शतं पुरः शतसंख्याकानि शरीराण्यरक्षन् यथा शतसङ्ख्योपलक्षितान्यनन्तानि शरीराणि। यथा मुक्तो न भवामि तथैवारक्षन्। इदानीं गुरुशास्त्रप्रसादाल्लब्धतत्त्वविद्यायुक्तो संसारात् श्येन इव जालं भित्वा जवसा त्वरया निरदीयं निर्गतोऽस्मि। अहो गर्भ एव शयानो वामदेव ऋषिरेवमुवाचैतत्, इतिशब्दो मन्त्रसमाप्त्यर्थः ॥५॥

सान्वयानुवाद—ऋषिणा = ऋषि द्वारा, तदुक्तम् = वह बात बतायी है, नु = वितर्क में, अहम् = मैंने, गर्भे = गर्भ में, सन् = रहते हुए ही, एषाम् = इन, देवानाम् = देवताओं के, विश्वा = बहुत-से, जनिमानि = जन्मों को, अन्ववेदम् = जान लिया, अधः = ज्ञान उदय के पहले, मा = मुझे, शतम् = सैकड़ों, आयसीः = लोह से बने हुए, पुरः = शरीरों ने, अरक्षन् = रोक रखा था, श्येनः = बाज पक्षी (के समान), जवसा = वेग से, निरदीयम् इति = निकल गया हूँ, गर्भे = गर्भ में, एव = ही, शयानः = सोये हुए, वामदेवः = वामदेव मुनि, एवम् = इस प्रकार से, एतत् = यह, उवाच = कहा ॥५॥

व्याख्या—पहले बताये गये प्रबन्ध द्वारा संसार का जो कष्टत्व उपवर्णित है और जो संसारनिवर्त्तक का उपाय कहा गया है उन दोनों का भी अर्थजात जिस मन्त्र से वर्णन किया गया है, उसी मन्त्र को यहाँ पढ़ते हैं। जो वामदेव ऋषि द्वारा बताया गया है। मैं वामदेव नामक मुनि ने माता के गर्भ में ही अवस्थित रहते हुए इन अग्नि,वायु, सूर्य आदि देवताओं के सभी जन्मों को अनुक्रम से जान लिया। औपनिषदात्मज्ञान मेरा सम्पन्न हो गया। इस ज्ञान के उदय से पहले मुझ (वामदेव) को लोह से निर्मित शृङ्खला के समान शतसङ्ख्याक शरीरों ने अवरुद्ध कर रखा था। जिस प्रकार कारागृह में अवस्थापित तस्कर को बद्ध शृङ्खला का पलायन दिखता है इसी प्रकार शत संख्या से उपलक्षित अनन्त-असंख्य शरीरों ने मुझे अवरुद्ध कर रखा था। अब इस समय मैं गुरु तथा शास्त्रों की प्रसन्नता से लब्ध तत्त्वविद्या से युक्त संसार से बाज पक्षी की भाँति जाल का भेदन कर वेग से लिकल गया, अलग हो गया हूँ। अहो ! आश्चर्य ! परमाश्चर्य !! गर्भ में ही वामदेव ऋषि ने इस प्रकार कहा है। इति शब्द मन्त्र की समाप्ति के लिये है ॥५॥

स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत् समभवत् ॥६॥

इत्यैतरेयोपनिषद्यात्मषट्के चतुर्थः खण्डः ॥४॥

उपनिषत्क्रमेण द्वितीयाध्याये प्रथमः खण्डः ॥१॥

ऐतरेयोपनिषदि द्वितीयोऽध्यायः ॥२॥

तत्त्वप्रकाशिका—ज्ञानस्याव्यभिचरितफलज्ञापनाय वामदेवेन ज्ञानस्य फलं

प्राप्तमिति वक्तुमाह—स एवमिति। स वामदेवो महर्षिः। एवं प्रागुदाहृतप्रकारेणात्मतत्त्वं विद्वान् प्रारब्धकर्मणि क्षीणे सत्यस्मात् पाञ्चभौतिकाच्छरीरभेदादूर्ध्वमुत्तरकालेऽवस्थितः सर्वस्मात्संसारबन्धादुत्क्रम्यामुष्मिन् स्वर्गे लोके = ब्रह्मलोके, सर्वान् कामान् = आनन्दानाप्त्वाऽमृतः = मरणरहितः, समभवत् = मुक्तोऽभूदिति यावत्। समभवदित्यभ्यासोऽध्यायसमाप्त्यर्थः।

इत्यैतरेयोपनिषत्तत्त्वप्रकाशिकाटीकायां द्वितीयोऽध्यायः ॥२॥

सान्वयानुवाद—सः = वह, विद्वान् = जानकार, एवम् = इस प्रकार, अस्मात् = इस, शरीरभेदात् = शरीर का पात हो जाने पर, ऊर्ध्वः उत्क्रम्य = संसारबन्धन से ऊपर उठ गया, अमुष्मिन् = उस, स्वर्गे लोके = ब्रह्मलोक में, सर्वान् कामान् = समस्त कामनाओं को, आप्त्वा = प्राप्त करके, अमृतः = मरणरहित, समभवत् = हो गया, समभवत् = हो गया।

व्याख्या—ज्ञान का अव्यिभिचरित फल ज्ञापन करने के लिये वामदेव ने ज्ञान का फल किया है। श्रुतियाँ उसी को बताती हैं—वह महर्षि वामदेव इस प्रकार पहले कहे गये प्रकार से आत्मतत्त्व को जानकर प्रारब्ध कर्म क्षीण हो जाने पर इस पाञ्चभौतिक शरीर के उत्तर काल में अवस्थित संसारबन्धन से छुटकर परमधामरूप ब्रह्मलोक में समस्त आनन्दों को प्राप्त कर (उनका अनुभव कर) मरणरहित हो मुक्त हो गये। 'समभवत्' पद की दो बार आवृत्ति अध्याय की समाप्ति के लिये है।

॥ प्रथम खण्ड समाप्त ॥१॥

॥ द्वितीय अध्याय समाप्त ॥२॥

•

कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा येन वा पश्यति येन वा शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति ॥१॥

यदेतद्धृदयं मनश्चैतत् संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति ॥२॥

तत्त्वप्रकाशिका—प्रतिदिनं प्रतिक्षणमात्मेति यमुपास्महे सः कतरः ? कोऽसावित्यर्थः। पुमान् नीलपीतादिरूपं पश्यति अतो येन वाचा, चक्षुषा चैतन्येन पश्यति तच्चैतन्यं किमात्मेत्येका कोटिः। येन श्रोत्रचैतन्येन शब्दं शृणोति तत् किमात्मेति द्वितीया कोटिः। एवं घ्राणवाग्जिह्वादिषु योज्यम्। हृदयम् = अन्तःकरणं बुद्धिः। तद्विशिष्टस्य कर्त्तुरात्मनो रूपादिविषयसङ्कल्पविकल्पादिसाधनं मन इत्युच्यते। संज्ञानं = सम्यक् इदं वस्तु इति ज्ञप्तिः। अज्ञानं = अज्ञप्तिः। विज्ञानम् = इदमस्माद्विशिष्टमित्येवमादि विवेकः। प्रज्ञानं = प्रज्ञता। मेधा = ग्रन्थतदर्थधारणा। दृष्टिः = चक्षुर्द्वारा

रूपोपलब्धिहेतुर्मनोवृत्तिः । धृतिः = धारणमवसन्नानां शरीरेन्द्रियाणां ययोत्तम्भनं भवति । मतिर्मननं, राजकार्याद्यालोचनम् । मनीषा तत्र स्वातन्त्र्यम् । जतिर्जवः प्राप्तकार्येषु मनसो व्यग्रता । स्मृतिः = अनुभूतार्थवस्तुस्मरणम् । सङ्कल्पः = एवं करिष्यामीत्याकारकः । क्रतुः = अवश्यं करिष्यामीत्यध्यवसायः । असुः = प्राणनादिजीवनक्रियानिमित्ता वृत्तिः । कामः = असन्निहितविषयाकाङ्क्षा । वशः = अभीष्टवस्त्वभिलाषः । येन वा पश्यतीत्यादिना क्रतुरसुकामो वश इत्यन्तेन ग्रन्थेनोदाहृतानि सर्वाणि प्रज्ञानस्य ब्रह्मणो नामधेयानि सम्पद्यन्ते ॥२॥

सान्वयानुवाद—वयम् = हम लोग, उपास्महे = जिसकी उपासना करते हैं, (सः = वह) अयम् = यह, आत्मा = आत्मा, कः = कौन है, इति, येन = जिससे, पश्यति = जीव देखता है, वा = और, येन = जिससे, शृणेति = सुनता है, वा = अथवा, येन = जिससे, गन्धान् = गन्धों को, आजिघ्रति = सूँघता है, वा = अथवा, येन = जिससे, वाचम् = वाणी को, व्याकरोति = बोलता है, वा = और, येन = जिससे, स्वादु = स्वादयुक्त, च = और, अस्वादु = स्वादहीन वस्तु को, च = और, विजानाति = विशेष रूप से जानता है, सः = वह, आत्मा = आत्मा, कतरः = कौन है ? । यत् = जो, एतत् = यह, हृदयम् = हृदय है, एतत् = यही, मनः = मन, च = और, संज्ञानम् = संज्ञान, आज्ञानम् = आज्ञान, विज्ञानम् = विज्ञान, प्रज्ञानम् = प्रज्ञान, मेधा = मेधा, दृष्टिः = दृष्टि, धृतिः = धृति, मतिः = मति, मनीषा = मनीषा, जूतिः = जव, स्मृतिः = स्मृति, सङ्कल्पः = सङ्कल्प, क्रतुः = क्रतु, असुः = प्राण, कामः = कामना, वशः = अधीन, इति = इस प्रकार, एतानि सर्वाणि = ये सब, प्रज्ञानस्य एव = प्रज्ञान का ही, नामधेयानि भवन्ति = नाम हैं ॥२॥

व्याख्या—प्रतिदिन प्रतिक्षण 'आत्मा है' ऐसा जानकर जिसकी हमलोग उपासना करते हैं वह कौन है ? व्यक्ति नील-पीत आदि रूपों को देखता है इसलिये जिस वाणी से वाक्य बोलता है, जिस श्रोत्र चैतन्य द्वारा शब्दों को सुनता है, इसी प्रकार घ्राणेन्द्रिय द्वारा गन्धों को सूँघता है और रसना (जीभ) द्वारा स्वादु और अस्वादु वस्तु को जान लेता है ॥१॥

हृदय अर्थात् अन्तःकरण (बुद्धि) है, उस विशिष्ट कर्त्ता आत्मा का रूप आदि विषय संकल्प-विकल्प आदि साधन मन ऐसा कहा जाता है । संज्ञान = भलीभाँति वस्तु की जानकारी, आज्ञान = आज्ञा द्वारा शासन, विज्ञान = ये हम से विशिष्ट हैं आदि विवेक, प्रज्ञान = प्रकृष्ट ज्ञान अर्थात् वस्तु को देखकर समझ जाना, मेधा = धारणाशक्ति, दृष्टि = नेत्रों द्वारा रूपों की उपलब्धि हेतु मन की वृत्ति । धृति = धारणा, अवसन्न शरीर और इन्द्रियों का जिससे उत्तम्भन होता है । मति = मनन, राजकार्य आदि की आलोचना, जूति = प्राप्त कार्यों में मन की व्यग्रता । स्मृति = अनुभूतार्थ वस्तु का स्मरण । सङ्कल्प = इस प्रकार हम करेंगे इस प्रकार का निश्चय । क्रतु = हम अवश्य ही करेंगे—इस प्रकार का अध्यवसाय । असु = प्राणन आदि जीवन क्रिया निमित्त वृत्ति ।

काम = असन्निहित विषयों की आकांक्षा, वश = अभीष्ट वस्तु की अभिलाषा। 'येन वा पश्यति' इत्यादि से क्रतु, असु, काम, वश–यहाँ तक ग्रन्थ द्वारा उदाहृत समस्त प्रज्ञानस्वरूप परब्रह्म के ही नाम हैं ॥२॥

एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव। बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणि जङ्गमञ्च पतत्रि च यच्च स्थावरं सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म ॥३॥ स एतेन प्रज्ञानेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत् समभवत् ॥

इति पञ्चमः खण्डः।

इत्यैतरेयारण्यके षष्ठोऽध्यायः।

उपनिषत्सु तृतीयोऽध्यायः ॥३॥ इत्यैतरेयोपनिषत् सम्पूर्णा ॥

तत्त्वप्रकाशिका—एष ब्रह्मा चतुर्मुखः। इन्द्रो देवराजः। प्रजापतिः कश्यपः। सर्वे देवा अग्निवाय्वादयः। पृथिव्यादीनि पञ्चमहाभूतानि प्रसिद्धानि। इमानि पञ्च महाभूतानीत्येतस्य वाक्यस्य पृथिवीत्यारभ्येत्येतानीत्यन्तं विवरणम्। इमानि चान्यानि क्षुद्रैरल्पकैर्मशकपिपीलिकादिदेहैः मिश्राणि बीजानि कारणानि तेषां बीजानां नानाजातीयत्वमितराणि चेतराणि चेत्यनेन प्रतिज्ञायते। परस्परविलक्षणबहुभेदयुक्तानीत्यर्थः। प्रतिज्ञातं नानात्वं प्रपञ्च्यते। अण्डजानीति पक्षिसर्पादीन्यण्डजानि। जारुजानि जरायुजानि मनुष्यगवादीनि। कृमिदंशादीनि स्वेदजानि। तरुगुल्मादीन्युद्भिज्जानि। यथोक्तेष्वेव जरायुजानामश्वा गावः पुरुषा हस्तिन इत्युदाहृत्य प्रदर्शनम्। उक्तानामनुक्तानाञ्च सङ्क्षेपेणोपसङ्ग्रहार्थं यत्किञ्चेत्यादिवाक्यम्। ब्रह्मादिस्थावरान्तं यज्जगदस्ति तत्सर्वं प्रज्ञानेत्रं = ब्रह्मात्मकमेव। प्रकृष्टा ज्ञप्तिः प्रज्ञा, नीयते सर्वं जगदनेनेति सृष्टिस्थितिलयमूलकारणं नेत्रं प्रज्ञैव नेत्रं यस्य तत् प्रज्ञानेत्रम्। अशेषजगतो मूलकारणभूतं ब्रह्मैवेति यावत्। सर्वस्यापि चेतनाचेतनात्मनो वस्तुनः सर्वात्मत्वसर्वनियन्तृत्वसर्वव्यापकत्वस्वतन्त्रसत्त्वसर्वाधारत्वादिना ब्रह्मणो भिन्नत्वम्। ब्रह्मात्मकत्वतन्नियम्यत्वतत्तन्त्रसत्त्वत्वपराधेयत्वादिना च तदभिन्नत्वमित्यर्थः। तदेव स्फुटयति—प्रज्ञाने प्रतिष्ठितमिति। प्रज्ञाने = ब्रह्मणि। प्रतिष्ठितं = सम्बद्धम्। आश्रितमिति यावत्। सर्वजगदाधारभूतमिति भावः। लोकः = प्राणिसमूहः। प्रज्ञानेत्रः—प्रज्ञा = ज्ञानसाधनं श्रुतिस्मृत्यादिकं नेत्रं यस्यासौ प्रज्ञानेत्रम्। तदुक्तम्—'श्रुतिस्मृती द्वे नेत्रे विप्राणां परिकीर्त्तिते' इति। प्रज्ञा प्रतिष्ठा सर्वस्य जगतः तस्मात्प्रज्ञानं ब्रह्म इत्यर्थः। एवं वेत्तुः फलं दर्शयति—स एतेनेति। यः पुमान् प्रज्ञानं ब्रह्मेत्येव जानाति स पुमान् अस्माल्लोकादुत्क्रम्य प्रज्ञेन ब्राह्मणे स्वरूपेणाविर्भवति। स्वर्गे लोके = ब्रह्मलोके, सर्वान् कामान् = मनोऽभिलषि-

तान्, प्राप्यामृतः = जन्ममरणरहितः सन्, समभवत् = अवतिष्ठते। समभवदित्यभ्यासो-ऽध्यायसमाप्त्यर्थः ॥

श्रीसनन्दनादिप्रवर्त्तितश्री १०८ महामुनीन्द्रभगवन्निम्बार्काचार्यचरणोपबृंहित-
वैदिकसत्सम्प्रदायानुगतपूज्यपादनिखिलरसिकचक्रचूडामणि-
श्री १०८ स्वामिहरिदासपदाश्रिताश्रितपरमविरक्तमहानुभाव-
श्री १०८ स्वामिनीशरणपादपद्मचञ्चरीकेण तर्कवागी-
शोपाधिविभूषितामोलकरामशास्त्रिणा पूवाचार्योक्तितः
संगृहीता समाप्तेयमैतरेयोपनिषत्तत्त्वप्रकाशिका-
टीका।

सान्वयानुवाद—एषः = यह, ब्रह्मा = ब्रह्मा है, एषः = यह, इन्द्रः = इन्द्र है, एषः = यह, प्रजापतिः = प्रजापति है, एते = ये, सर्वे = समस्त, देवाः = देवगण, च = और, इमानि = ये, पृथिवी = पृथ्वी, वायुः = वायु, आकाशः = आकाश, आपः = जल, ज्योतींषि = तेज, इति = इस प्रकार, पञ्च = पाँच, महाभूतानि = महाभूत, च = और, इमानि क्षुद्रमिश्राणि इव = इन क्षुद्र मिले हुए जैसे, बीजानि = कारणरूप प्राणी, च = और, इतराणि इतराणि = इनसे भिन्न अन्य, च = और, अण्ड-जानि = अण्डे से पैदा होनेवाले, च = एवं, जारुजानि = जेर से पैदा होने वाले, च = और, स्वेदजानि = पसीने से पैदा होनेवाले, च = तथा, उद्भिज्जानि = जमीन फोड़कर पैदा होने वाले, च = तथा, अश्वाः = घोड़े, गावः = गायें, हस्तिनः = हाथी, पुरुषाः = पुरुष, यत् किञ्च = जो कुछ भी, इदम् = यह जगत्, च यत् = और जो, पतत्रि = पक्षी, च = और, जङ्गमम् = चलने-फिरनेवाले जीव, स्थावरम् = नहीं चलने वाले वृक्षादि, प्राणि = सकल प्राणी, तत्सर्वम् = वह सब, प्रज्ञानेत्रम् = प्रकृष्ट ज्ञानचक्षु स्वरूप, प्रज्ञाने = प्रज्ञानस्वरूप ब्रह्म में, प्रतिष्ठितम् = स्थित है, लोकः = भुवन, प्रज्ञानेत्रः = प्रज्ञा नेत्रवाला, प्रज्ञा = प्रकृष्ट ज्ञप्ति, प्रतिष्ठा = प्रतिष्ठा, प्रज्ञानम् = प्रकृष्ट ज्ञानस्वरूप, ब्रह्म = ब्रह्म है, सः = वह, अस्मात् = इस, लोकात् = शरीर से, उत्क्रम्य = निकलकर, अमुष्मिन् = उस, स्वर्गे लोके = ब्रह्मलोक में, एतेन प्रज्ञेन आत्मना = इस ज्ञानस्वरूप आत्मा द्वारा, सर्वान् कामान् = सभी कामनाओं को, आप्त्वा = पाकर, अमृतः = अजर-अमर, समभवत् = हो गया, समभवत् = हो गया ॥

व्याख्या—ये चार मुखवाले ब्रह्मा हैं, ये देवराज इन्द्र हैं, ये प्रजापति कश्यप हैं एवं ये समस्त अग्नि, वायु आदि देवगण हैं। पृथ्वी, वायु, आकाश, जल और तेज ये पाँच महाभूत प्रसिद्ध हैं। ये दूसरे अन्य छोटे-छोटे मच्छर, चींटी आदि शरीरों से मिले हुए उन बीज़ों का कारण है, नाना जातीयत्व इतर सकल प्राणी इसके द्वारा जाने जाते हैं, अर्थात् एक-दूसरे से विलक्षण बहुत भेदयुक्त हैं। चतुर्विध जीवों को दिखलाते हैं—यथा—१. अण्डज, २. जरायुज, ३. उद्भिज्ज तथा ४. स्वेदज। अण्डज = अण्डे से उत्पन्न होनेवाले पक्षी-सर्प इत्यादि जीव; जरायुज = जरायु से उत्पन्न होने वाले मनुष्य,

गौएँ, घोड़ें इत्यादि जीव; उद्भिज्ज = जमीन को फोड़कर उत्पन्न होनेवाले वृक्ष, गुल्म, झाड़ी इत्यादि जीव और स्वेदज = कृमि इत्यादि—ये जीव शरीर के मल से उत्पन्न होते हैं। इस दृश्यमान स्थावर = जड़-जङ्गम चेतन जगत् में ऊपर बताये गये ये चार प्रकार के ही जीव हैं, ऐसा समझना चाहिये। ब्रह्मादि से लेकर स्थावर पर्यन्त जो कुछ जगत् है वह सब ब्रह्मात्मक ही है। प्रकृष्टा ज्ञप्ति प्रज्ञा है, इसके द्वारा समस्त जगत् का ज्ञान होता है। सृष्टि, स्थिति और लय का मूल कारण नेत्र ही है जिसकी प्रज्ञा वह प्रज्ञानेत्र है। अर्थात् समस्त जगत् का मूलकारण रूप परब्रह्म ही है। समस्त चेतनाचेतन वस्तु पंखों वाले तथा चलने-फिरनेवाले और न चलनेवाले जड़ जगत् प्रपञ्च ब्रह्म से भिन्न है। जैसे कि सर्वनियन्तृत्व, सर्वात्मत्व, सर्वव्यापकत्व, स्वतन्त्रसत्त्व, सर्वाधारत्व आदि धर्मों से ब्रह्म का चेतन जीवों से एवं अचेतन जगत् से भेद है एवं अभेद अभिन्न भी है। जैसे—ब्रह्मात्मकत्व, ब्रह्मनियम्यत्व तथा ब्रह्म के अधीन स्थिति प्रवृत्तिमान होने से एवं ब्रह्मव्याप्य होने से यह सम्पूर्ण चर-अचर जगत् ब्रह्म से अभिन्न है। यही उपनिषद्वेत्ताओं का सिद्धान्त है। प्रज्ञानस्वरूप ब्रह्म में सम्बद्ध (आश्रित) है। वही समस्त जगत् का आधार रूप है। उस परमात्मा में ही लोक = चौदह भुवन स्थित हैं। ज्ञान का साधन श्रुति और स्मृति जिसके नेत्र हैं। समस्त जगत् की प्रज्ञा-प्रतिष्ठा इसलिये प्रज्ञानब्रह्म है। इस प्रकार जाननेवाले के फल को श्रुति दिखलाती है—जो व्यक्ति प्रज्ञान ब्रह्म है–इस प्रकार जानता है वह इस पाञ्चभौतिक शरीर से निकलकर अर्थात् इस लोक का परित्याग कर प्रज्ञानस्वरूप परमात्मा के साथ अपने रूप से आविर्भूत हो जाता है। अर्थात् इस लोक से उठकर वह ब्रह्मोपासक परम ज्योतिस्वरूप ब्रह्म के साथ अपने स्वाभाविक विशुद्ध रूप में आविर्भूत होता है। उस ब्रह्मलोक में अर्थात् परमधाम में सभी मनोवाञ्छित फलों को पाकर जन्म और मृत्यु से रहित होकर रहता है। 'समभवत्' इस पद की दो बार आवृत्ति अध्याय की समाप्ति के लिए है।

॥ प्रथम खण्ड समाप्त ॥

॥ तृतीय अध्याय समाप्त ॥३॥

॥ ऋग्वेदीय ऐतरेयोपनिषद् समाप्त ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यत्यागमूर्त्तिस्वामिधनञ्जयदासजीकाठियाबाबातर्क-तर्कव्याकरणतीर्थपादपद्मान्तेवासियोगिराजस्वामिराधाविहारिदासजी काठिया-बाबाचरणारविन्दचञ्चरीक डॉ. स्वामी द्वारकादासकाठियाबाबा कृत तत्त्वप्रभा हिन्दी टीका में ऐतरेयोपनिषद् समाप्त ॥

॥ श्रीश्रीराधाकृष्णार्पणमस्तु ॥

अन्य महत्त्वपूर्ण ग्रन्थ

ईशाद्यष्टोत्तरशतोपनिषद् (मूलमात्र) । निर्णयसागर संस्करण

ईशादिनवोपनिषद् (ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-तैत्तिरीय-एतरेय-छान्दोग्योपनिषद्) । शाङ्करभाष्य सहित । पं० हरिरघुनाथभागवत

ईशावास्योपनिषद् । 'शाङ्करभाष्य' एवं हिन्दी व्याख्या सहित

Isavasyopanishad : English Translation by N. B. Iyer

उपनिषद्वाक्यमहाकोषः । (२३९ उपनिषदां वाक्यैः सम्भृतः) । श्री एस० गजानन सघाले

केनोपनिषत् । 'शाङ्करभाष्य' एवं 'भावप्रकाशिका' हिन्दी व्याख्या सहित । व्याख्याकार—डॉ० शिवप्रसाद द्विवेदी

छान्दोग्योपनिषद् । मूल, शाङ्करभाष्य, पदच्छेद, अन्वयार्थ एवं हिन्दी टीका सहित । टीकाकार—रायबहादुर बाबू जालिम सिंह

अथर्ववेदसंहिता । 'सायणभाष्य', पदपाठ एवं पं० रामस्वरूप गौड कृत हिन्दी अनुवाद सहित । १-८ भाग

ऋग्वेदसंहिता । 'सायणभाष्य', पदपाठ एवं पं० रामगोविन्द त्रिवेदी कृत हिन्दी टीका सहित। १-९ भाग

सामवेदसंहिता । 'सायणभाष्य', पदपाठ एवं पं० रामस्वरूपशर्मा गौड़ कृत हिन्दी टीका सहित ।

शुक्लयजुर्वेदसंहिता । पदपाठ, उव्वट एवं महीधरकृत भाष्य एवं डॉ० रामकृष्ण शास्त्री कृत हिन्दी टीका सहित

शुक्लयजुर्विधानसूत्र । कात्यायन महर्षि । श्रीकालनाथ प्रणीत यजुर्मञ्जर्याख्य व्याख्या एवं स्वाहाकार प्रयोग प्रदीप सहित

आदिपुराण । श्रीश्यामसुन्दरलाल त्रिपाठी कृत हिन्दी अनुवाद सहित

कल्किपुराण । श्रीरामस्वरूपशर्मा कृत हिन्दी अनुवाद सहित

पुराणविमर्श । आचार्य बलदेव उपाध्याय

श्रीमद्देवीभागवतम् । मूलमात्र । सम्पा० पं० रामतेजपाण्डेय

मत्स्यपुराण । पं० कालीचरण एवं पं० बस्तीरामजी कृत हिन्दी अनुवाद सहित

मार्कण्डेयपुराण । भाषा टीका सहित

वामनपुराण । भाषा टीका सहित

अद्वैतसंग्रह । हिन्दी टीका सहित । वेदान्तविषयक प्रमुख ग्रन्थों का संकलन

अद्वैतसिद्धि । मधुसूदनसरस्वती । व्यासपतिकृत 'न्यायामृत' एवं स्वामी योगीन्द्रानन्द कृत 'अद्वैतसिद्धि' व्याख्या सहित